CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमरकोशः

तृतीयं काण्डम्

सम्पादक : अनुवादक
विश्वनाथ झा

मोतीलाल बनारसीदास
दिल्ली वाराणसी पटना बंगलौर मद्रास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमदमरसिंहविरचितः

R

अमरकोशः

'सुधा' संस्कृतहिन्दीव्याख्योपेतः

[तृतीयं काण्डम्]

R. 266
276

व्याख्याकारः

विश्वनाथ झा

मोतीलाल बनारसीदास

दिल्ली वाराणसी पटना बंगलौर मद्रास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीय संस्करण : वाराणसी १९७६
पुनर्मुद्रण : दिल्ली, १९९३

© मोतीलाल बनारसीदास
बंगलो रोड, जवाहरनगर, दिल्ली ११० ००७
१२० रॉयपेट्टा हाई रोड, मैलापुर, मद्रास ६०० ००४
१६ सेन्ट मार्क्स रोड, बंगलौर ५६० ००१
अशोक राजपथ, पटना ८०० ००४
चौक, वाराणसी २२१ ००१

मूल्य : रु० ३८

पुस्तकालय

नरेन्द्रप्रकाश जैन, मोतीलाल बनारसीदास, बंगलो रोड, जवाहरनगर, दिल्ली ११० ००७ द्वारा प्रकाशित तथा जैनेन्द्रप्रकाश जैन, श्री जैनेन्द्र प्रेस, ए-४५ नारायणा, फेज-१, नई दिल्ली ११० ०२८ द्वारा मुद्रित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमरकोशः

तृतीय काण्डम्

१. वर्गभेदाः

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

२. परिभाषा

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ १ ॥

३. विशेष्यनिघ्नवर्गः

सुकृतीपुण्यवान् धन्यो महेच्छस्तु महाशयः ।
हृदयालुः सुहृदयो महोत्साहो महोद्यमः ॥ १ ॥

सोमं सोमधरं देवं नत्वा सन्नतमौलिना ।
सुधया योजयाम्यद्य चरमं काण्डमामरम् ॥

अन्वयः—(इह) सामान्ये विशेष्यनिघ्नैः संकीर्णैः नानार्थैः अव्ययैः लिङ्गादिसङ्ग्रहैः (उपलक्षिताः) अपि वर्गसंश्रयाः वर्गाः उच्यन्ते इति सम्बन्धः ।

इस सामान्य नामक काण्ड में अर्थात् तृतीयकाण्ड में विशेष्य के अधीन लिङ्ग वचन वाले शब्दों से युक्त विशेष्यनिघ्न (निहन्यते इति निघ्नः विशेष्यस्य निघ्नः) वर्ग, परस्पर विभिन्न जातीय अर्थवाले शब्दों से युक्त संकीर्णवर्ग, नाना (अनेक) अर्थ वाले शब्दों से युक्त नानार्थ (नाना अनेके अर्थाः येषां ते, तैः) वर्ग, अव्यय शब्दों से युक्त अव्यय वर्ग, प्रत्ययों के द्वारा लिङ्ग बोधक शब्दों से युक्त (आदिपद से नाम का ग्रहण है) लिङ्गादिसंग्रहवर्ग (जिनके पूर्व कहे स्वर्गादिवर्ग ही आश्रय हैं अर्थात् स्वर्गादिवर्ग सम्बन्धी वर्गों) को कहते हैं । एतावता ये वर्ग स्वतन्त्र या नवीन नहीं हैं ॥ १ ॥

इस वर्ग में लिङ्गज्ञानोपाय कहते हैं—अन्वयः—यादृशैः स्त्रीदाराद्यैः पदैः यद्विशेष्यं (यथा) प्रस्तुतम् । तस्य भेदकाः गुणद्रव्यक्रियाशब्दाः तथा स्युः ।

जिस प्रकार पुलिङ्ग, स्त्रीलिङ्ग, नपुसंकलिङ्ग युक्त स्त्री-दार-कलत्र पदों से जिस विशेष्य को जैसे प्रस्तुत किया जायेगा उस विशेष्य के व्यावर्तक (विशेषण) उस प्रकार के गुण-द्रव्य-क्रिया विशिष्ट वैसे ही शब्द होंगे । अर्थात् विशेष्य में जो लिङ्ग, जो वचन होंगे वे ही विशेषण में भी होंगे । जैसे—गुण सुकृतादि हैं, तद्विशिष्ट जैसे 'सुकृतिनी स्त्री' 'सुकृतिनो दाराः' 'सुकृतिनं कुलम्' । द्रव्य दण्डादि हैं—तद्विशिष्ट जैसे 'दण्डिनी स्त्री' 'दण्डिनो दाराः' 'दण्डि कुलम्' । क्रिया पचनादिः तद्विशिष्ट जैसे 'पाचिका स्त्री' 'पाचकाः दाराः' 'पाचकं कुलम्' आदि जानना चाहिये ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ २ ॥
पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः ।
दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ३ ॥
स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।
जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् ॥ ४ ॥

सुकृती (सुकृतमस्यास्ति इति इनिः) पुण्यवान् (पुण्यमस्यास्ति इति मतुप्) [1]धन्यः (धनं लब्धा इति यत्) ये ३ त्रि० नाम भाग्यवान् के हैं।
महेच्छः (महती इच्छा यस्य) महाशयः (महान् [2]आशयोऽस्य) ये २ त्रि० नाम बड़े अभिप्राय वाले के हैं।

हृदयालुः (प्रशस्तं हृदयमस्य इति आलुः) सुहृदयः (शोभनं हृदयमस्य इति मित्रत्वाविवक्षणान्न हृद्भावः) ये २ त्रि० नाम अच्छे मन वाले के हैं।

महोत्साहः (महानुत्साहोऽस्य) महोद्यमः (महानुद्यमोऽस्य) ये २ त्रि० नाम अति उत्साही के हैं ॥ १ ॥

प्रवीणः (प्रकृष्टा वीणाऽस्य, वीणया प्रगायति प्रगीयते वा, इति णिजन्तात् अच् घञ् वा) निपुणः (निपुणति इति कः) अभिज्ञः (अभि जानाति इति कः) विज्ञः (विजानाति इति कः) निष्णातः (न्यस्नासीत् इति कः षत्वञ्च) शिक्षितः (शिक्षा जाताऽस्य इति कः) वैज्ञानिकः (विज्ञानं बुद्धिः 'विज्ञानं यज्ञं तनुते इति श्रुतेः' विज्ञाने नियुक्तः इति ठक्) कृतमुखः (कृतं संस्कृतं मुखमस्य, सर्वस्य कृतमुखत्वादत्र कृतशब्दस्य संस्कृतपरत्वम्) कृती (कृतं कर्म प्रशस्तमस्य इति इनिः) [3]कुशलः (कुशान् लाति इति कः, कौ पृथिव्यां शलति चालयति वेति अच्) ये १० त्रि० नाम शिक्षित या लोक में चतुर के हैं ॥ २ ॥

[4]पूज्यः (पूज्यते इति यत्) [5]प्रतीक्ष्यः (प्रतीक्ष्यते प्रतिपाल्यते इति यत्) ये २ त्रि० नाम पूजा (सत्कार) करने योग्य के हैं।

सांशयिकः (संशयमापन्नः इति ठक्) संशयापन्नमानसः (संशयापन्नं मानसं यस्य यस्मिन् वा) ये २ त्रि० नाम सन्देह युक्त के हैं।

दक्षिणीयः (दक्षिणामर्हति इति छः) दक्षिणार्हः (दक्षिणामर्हति इति अच्) दक्षिण्यः (दक्षिणामर्हति इति यत्) ये ३ त्रि० नाम दक्षिणा देने योग्य ब्राह्मणादि के हैं। जहाँ दक्षिणीयः और दक्षिणार्हः है वहाँ दक्षिण्यः भी होता है, प्रज्ञाद्यण् करने पर 'दाक्षिण्य' भी होगा ॥ ३ ॥

[6]वदान्यः (मां याचस्व इति वदति इति वद्धातोः आन्यः) स्थूललक्ष्यः (स्थूलं कूटं लक्ष्यमस्येति

---

१. धन्या धात्र्यामलक्योः स्याद्धन्यं पुण्यवति त्रिषु । इति विश्वमेदिन्यौ । २. आशयः स्यादभिप्राये मानसाधारयोरपि । इति मेदिनी । ३. कुशलः शिक्षिते त्रिषु । क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसकम् । इति विश्वमेदिन्यौ । ४. पूज्यः श्वशुरवन्द्ययोः । इति हैमः । ५. प्रतीक्ष्यः प्रतिपाल्ये स्यात् पूज्ये च । इति हैमः । ६. वदान्यो दानशौण्डे स्याच्चारुवादिनि वाच्यवत् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

R. 266.

परीक्षकः कारणिको वरदस्तु समर्धकः।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ५ ॥
दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मनाः।
दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि ॥ ६ ॥

स्थूलैर्महद्भिः लक्ष्यते वेति ण्यत्। यकाररहितपाठे घञि स्थूललक्षोऽपि) [1]दानशौण्डः (दाने शौण्डः इति सप्तमी शौण्डैः इति समासः) बहुप्रदः (बहु प्रददाति इति कः) ये ४ त्रि० नाम अधिक दान करने वाले के हैं।

[2]जैवातृकः (जीवति इति आतृकन् वृद्धिश्च) आयुष्मान् (अतिशयितमायुरस्य इति मतुप भत्वाव् रुत्वाभावश्च) ये २ त्रि० नाम अधिक आयु वाले के हैं।

अन्तर्वाणिः (अन्तर्वाणी अस्य इति समासान्तविधेरनित्यत्वान्न कप् 'गोस्त्रियोः' इति ह्रस्वः, अन्तर्वाणयति इति वण् धातोः स्वार्थणिजन्तादच् इः वा) शास्त्रवित् (शास्त्रं वेत्ति इति क्विप्) ये २ त्रि० नाम शास्त्रज्ञ के हैं ॥ ४ ॥

परीक्षकः (परीक्ष्यते इति ईक्ष दर्शने धातोः ण्वुल्) [3]कारणिकः (करणैश्चरति इति ठक्) ये २ त्रि० नाम परीक्षा करने वाले या ब्राह्मणादि की परीक्षा करके दान देने वाले दानाध्यक्ष के हैं।

[4]वरदः (वरं ददाति इति कः) समर्धकः (समृध्नोति इति ण्वुल्) ये २ त्रि० नाम वरदान देने वाले के हैं।

हर्षमाणः (हर्षति इति ताच्छील्ये चानश् मुमागमे च) विकुर्वाणः (विकुरुते इति चानशि शानज् वा) प्रमनाः (प्रकृष्टं मनो यस्य) हृष्टमानसः (हृष्टं मानसमस्य) ये ४ त्रि० नाम प्रसन्न चित्त वाले के हैं ॥ ५ ॥

दुर्मनाः (दुःस्थितं मनोऽस्य) विमनाः (विगतं विविधं वा मनोऽस्य) अन्तर्मनाः (अन्तर्मनोऽस्य इति) ये ३ त्रि० नाम उदास मन वाले के हैं।

उत्कः (उद्गतं मनोऽस्य इति उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन्) उन्मनाः (उद्गतं मनोऽस्य) ये २ त्रि० नाम उत्सुक या उत्कण्ठित के हैं।

[5]दक्षिणः (दक्षते इति इनन्) [6]सरलः (सरति इति अलच्) [7]उदारः (उत्कृष्टम् आ समन्तात् राति इति कः, उदर्यते इति कर्मणि घञ् वा) ये ३ त्रि० नाम सरल स्वभाव वाले के हैं।

यो दाता चासौ भोक्ता च तत्र—सुकलः (सुकल्यते इति, शोभना कला यस्येति वा खल्) यह १ त्रि० नाम दिल खोलकर दान देने वाले तथा खाने-पीने वाले का है ॥ ६ ॥

---

१. शौण्डो मत्तेऽपि विख्याते। इति विश्वः। २. जैवातृकः पुमान् सोमे कृषकायुष्मतोस्त्रिषु। इति विश्वमेदिन्यौ। ३. करणं हेतुकर्मणोः। इति मेदिनी। ४. वरदः पुनः। प्रसन्ने शान्तचित्ते च वरदा तु कुमारिका। इति हैमः। ५. दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु। अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्। इति मेदिनी। ६. सरलः पूतिकाष्ठे नायोदारावक्रयोस्त्रिषु। इति मेदिनी। ७. उदारो दातृमहतोर्दक्षिणेऽप्यभिधेयवत्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः ।
प्रतीते प्रथित-ख्यात-वित्तविज्ञातविश्रुताः ॥ ७ ॥
गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ ।
इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता ॥ ८ ॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।
अधिकर्द्धिः समृद्धिः स्यात् कुटुम्बव्यापृतस्तु यः ॥ ९ ॥

तत्परे = तात्पर्ययुक्ते प्रसितासक्तौ स्यातामिति सम्बन्धः—तत्परः (परमुत्तमं यस्य इति । तेन पूर्यते इति अप् वा) प्रसितः (प्रासायि प्रसीयते स्म वेति कर्मणि क्तः) आसक्तः (आसञ्जि इति क्तः) ये ३ त्रि० नाम तात्पर्य युक्त या कार्य में लगे हुए के हैं ।

इष्टार्थोद्युक्तः (इष्टश्चासौ अर्थश्च, तत्र उद्युक्तः) उत्सुकः (उद् उद्योगं सवति इति, संज्ञापूर्वकत्वात् गुणाभावः, क्विपि, आगमशास्त्रस्यानित्यत्वात् तुगभावो वा कन् च) ये २ त्रि० नाम अपने लक्ष्य की सिद्धि के लिए कार्य में लगे हुए के हैं ।

प्रतीतः (प्रत्येकमगात्, प्रतीयते स्मेति वा क्तः) प्रथितः (प्रथते स्मेति क्तः) ख्यातः (अख्यायि इति क्तः) वित्तः (अवेदि इति क्तः, वित्तो भोगप्रत्यययोः इति साधुः) विज्ञातः (व्यज्ञायि इति क्तः) विश्रुतः (व्यश्रावि इति क्तः) ये ६ त्रि० नाम प्रसिद्ध या विख्यात के हैं ॥ ७ ॥

गुणैः प्रतीते = विख्याते—[1]कृतलक्षणः (कृतमुच्चारितं लक्षणं नामास्य) [2]आहत-लक्षणः (आहत-मभ्यस्तं लक्षणं यस्य) ये २ त्रि० नाम विद्या, शिल्प आदि किसी गुण से प्रसिद्ध के हैं ।

[3]इभ्यः (इभमर्हति इति यः) आढ्यः (अध्यायति इति कः, पृषोदरादित्वात् ढत्वे च) धनी (बहुधनमस्य इति इनिः) ये ३ त्रि० नाम धनी के हैं ।

[4]स्वामी (स्वमस्यास्ति इति 'स्वामिन्नैश्वर्ये' इति निपातनात् साधुः) [5]ईश्वरः (ईष्टे इति वरच्) [6]पतिः (पाति इति डतिः) ईशिता (इष्टे इति तृच् तृन् वा) ॥ ८ ॥

अधिभूः (अधिभवति इति क्विप्) [7]नायकः (नयति इति ण्वुल्) नेता (नयति इति तृच्) प्रभुः (प्रभवति इति डुः) परिवृढः (परिवर्हति परिवृंहति वेति 'प्रभौ परिवृढ' इति निपातनात् साधुः) अधिपः (अधि पाति इति कः) ये १० त्रि० नाम अधिपति मालिक के हैं ।

अधिकर्द्धिः (अधिका ऋद्धिरस्य इति) समृद्धः (समृध्नोति स्मेति क्तः) ये २ त्रि० नाम अधिक धन वाले के हैं ।

[8]यः—कुटुम्बव्यापृतः कुटुम्बपोषणे संसक्तः (व्याप्रियते स्मेति अकर्मकत्वात् क्तः) ॥ ९ ॥

---

१. लक्षणं नाम्नि चिह्ने च । इति विश्वः । २. आहतं गुणितेऽपि स्यात् । इति विश्वः । ३. इभ्यो धनवतीभ्यां तु वरेण्वां सल्लकी तरौ । इति हेमचन्द्रः ४. स्वामी प्रभुविशाखयोः । इति विश्वः (मेदिनी च) । ५. ईश्वरो मन्मथे शंभौ नाढ्ये स्वामिनि वाच्यवत् । ईश्वरी चेश्वरोमायाम् । इति विश्वमेदिन्यौ । ६. पतिर्धवे ना त्रिष्वीशे । इति विश्वः (मेदिनी च) । ७. नायको नेतरि श्रेष्ठे हारमध्यमणावपि । इति विश्वहेमचन्द्रौ । ८. व्यापृतस्तरुणो युवा । इति वोपालितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।
वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥ १० ॥
निर्वार्यः कार्यकर्ता यः संपन्नः सत्त्वसंपदा ।
अवाचि मूकोऽथ मनोजवः स पितृसंनिभः ॥ ११ ॥
सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।
लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्सलः ॥ १२ ॥

तस्मिन्—अभ्यागारिकः (अभ्यागारे नियुक्तः इति ठन्) [१]उपाधिः (आधानमाधिः इति किः, उपगतः आधिम् इति समासः) ये ३ नाम क्रम से २ त्रि० १ नि. पुं परिवार के पालन-पोषण करने वाले के हैं।

सिंहसंहननः (सिंहं श्रेष्ठं संहननमस्य, संहनने सिंहः इति वा, राजदन्तादिः । अङ्गानि च रूपं च इति अङ्गरूपाणि, वराणि च तान्यङ्गरूपाणि च तैरुपेतः इति सम्बन्धः) यह १ त्रि० नाम सुन्दर सुडौल शरीरवाले का है ॥ १० ॥

निर्वार्यः (निश्चयेन व्रियते इति ण्यत्—व्यसनेऽभ्युदये वापि ह्यविकारं सदा मनः । तत्तु सत्वमिति प्रोक्तं नयविद्भिर्बुधैः किल ॥ तत्संपदा संपतन् उद्यमं कुर्वन् । संयुतः सन् वा कार्यं करोति स निश्चयेन व्रियते) यह १ त्रि० नाम सत्व सम्पत्ति अर्थात् सुख-दुःख में हमेशा उत्साह से निःशंक होकर कार्य करने वाले का है।

अवाचि वाग्रहिते—अवाक् (न वाग् यस्य) [२]मूकः (मू इति कायति इति कः) ये २ त्रि० नाम गूँगे के हैं।

[३]मनोजवः (जवति इति अच्, मनो जवं वेगवद्यस्मिन्) पितृसंनिभः (पितेव सम्यग् विभाति इति कः) ये २ त्रि० नाम ज्ञान अवस्थादि के कारण पिता के सदृश पूज्य व्यक्ति के हैं ॥ ११ ॥

कूकुदः (कोकते इति कः पृषोदरादिः । 'यद्वा कवनम् कूः, संपदादिः' । कुवः शब्दस्य कुर्भूः कीर्तिः भूमिः इति यावत् तां कूकुं ददाति, कूक्का दायति वेति कः) यह १ त्रि० नाम अलङ्कार वस्त्रादि से कन्या को अलङ्कृत करके श्रेष्ठ वर को कन्यादान करने वाले का है। सत्कृत्यालंकृतां कन्यां यो वराय ददाति सः, इति सम्बन्धः ।

लक्ष्मीवान् (लक्ष्मीरस्यास्ति इति मतुप्) [४]लक्ष्मणः (लक्ष्मीरस्यास्ति इति पामादित्वान्नः लक्ष्म्या अच्चेतीकारस्य अत्वं च) श्रीलः (श्रीरस्यास्ति इति लच्) श्रीमान् (श्रीः अस्यास्ति इति मतुप्) ये ४ त्रि० नाम श्रीमान् (लक्ष्मीवान्) के हैं।

स्निग्धः (स्निह्यति स्मेति क्त घादेशश्च) [५]वत्सलः (वत्से पुत्रादिस्नेहपात्रेऽभिलाषोऽस्यास्ति इति लच्) ये २ त्रि० नाम प्रेम (स्नेह) करने वाले के हैं ॥ १२ ॥

---

१. उपाधिः धर्मचिन्तायां कुटुम्बव्यापृते छले । इति विश्वमेदिन्यौ । २. मूको दैत्यावाग्दीनेषु । इति हैमः । ३. मनोजवपितृसधर्माणः । इति नाममाला । मनोजवसः चमसादिवत् इति स्वामी । पीयूषव्याख्या मनोजवाः इति सान्तोऽपि उक्तः । ४. लक्ष्मणा त्वोषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात्सश्रीके चाभिधेयवत् । इति मेदिनी । ५. वत्सः पुत्रादिवर्षयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।
स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १३ ॥
परतन्त्रः पराधीनः परवान्नाथवानपि ।
अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥ १४ ॥
खलपूः स्याद्बहुकरो दीर्घसूत्रश्चिरक्रियः ।
जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रियासु यः ॥ १५ ॥
कर्मक्षमोऽलंकर्मीणः क्रियावान् कर्मसूद्यतः ।

दयालुः (दयते तच्छीलः इति स्पृहिगृहि, इत्यालुच्) कारुणिकः (करुणा शीलमस्य इति ठक्) कृपालुः (कृपां लाति इति डुः) सूरतः (सुरमते इति क्तप्रत्यये मलोपे पूर्वपदस्य दीर्घे च) ये ४ त्रि० नाम दया करने वाले के हैं ।

स्वतन्त्रः (स्व आत्मा तन्त्रं प्रधानमस्य) [१]अपावृतः (अपगतमावृतम् आवरणमस्य इति) स्वैरी (स्वेनेरितुं शीलमस्य इति णिनिः वृद्धिश्च) स्वच्छन्दः (स्वः छन्दोऽभिलाषो यस्येति) निरवग्रहः (निष्क्रान्तोऽवग्रहात् = नियमात् इति 'निरादयः' इति समासः) ये ५ त्रि० नाम स्वतन्त्र के हैं ॥ १३ ॥

परतन्त्रः (परस्तन्त्रं प्रधानं यस्य) पराधीनः (परस्मिन्नधि इति 'सप्तमी शौण्डैः' इति समासः खश्च) परवान् (परः स्वाम्यस्यास्ति इति मतुप्) नाथवान् (नाथोऽस्यास्ति इति मतुप्) ये ४ त्रि० नाम पराधीन के हैं ।

अधीनः (इनमधिगतः 'अत्यादयः' इति समासः, अधि उपरि इनोऽस्य इति वा) निघ्नः (निहन्यते = निगृह्यते इति कः) आयत्तः (आयतते स्मेति क्तः) अस्वच्छन्दः (न स्वः छन्दोऽस्य) [२]गृह्यकः (गृह्येत इति क्यप् कन् च स्वार्थे) ये ५ त्रि० नाम वश में रहने वाले अधीन के हैं ॥ १४ ॥

[३]खलपूः (खलं चत्वरं पुनाति मार्जयति इति क्विप्) बहुकरः (वहु करोति भुवं संमार्ष्टि इति अच्) ये २ त्रि० नाम खलिहान या भूमि साफ करने वाले के हैं ।

[४]दीर्घसूत्रः (दीर्घं सूत्रं व्यवस्था यस्य) चिरक्रियः (चिरा चिरेण वा क्रिया यस्य) ये २ त्रि० नाम विलम्ब से कार्य करने वाले के हैं ।

[५]जाल्मः (जालयति जाल्यते वेति वाहुलकान्मः) असमीक्ष्यकारी (असमीक्ष्याविचार्य कर्तुं शीलमस्येति णिनिः) ये २ त्रि० नाम विना विचारे ही कार्य करने वाले के हैं ।

क्रियासु यः मन्दः सः—[६]कुण्ठः (कुण्ठति इति अच्) यह १ त्रि० नाम मन्द गति से कार्य करने वाले का है ॥ १५ ॥

कर्मक्षमः (कर्मसु क्षमः इति सप्तमीयोगविभागात् समासः) अलङ्कर्मीणः (कर्मणे क्रियायै अलं समर्थः इति 'प्राप्तापन्नालंपूर्व' इति परवल्लिङ्गनिषेधात्समासः खश्च) ये २ त्रि० नाम कार्य करने में समर्थ के हैं ।

---

१. अपावृतस्तु पिहिते स्वतन्त्रेऽपि च वाच्यवत् । इति विश्वमेदिन्यौ । २. गृह्यको निघ्नके छेके । इति विश्वमेदिन्यौ । ३. खलं भूस्थानकल्केषु । इति विश्वः । ४. सूत्रं तन्तुव्यवस्थयोः । इति विश्वः । ५. जाल्मस्तु पामरे असमीक्ष्यकारिणि च । इति हैमः । ६. कुण्ठोऽकर्मण्यमूर्खयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स कार्मः कर्मशीलो यः कर्मशूरस्तु कर्मठः ॥ १६ ॥
भरण्यभुक्कर्मकरः कर्मकारस्तु तत्क्रियः ।
अपस्नातो मृतस्नात आमिषाशी तु शौष्कलः ॥ १७ ॥
बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ।
परान्नः परपिण्डादो भक्षको घस्मरोऽद्मरः ॥ १८ ॥
आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।
उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ १९ ॥

क्रियावान् (क्रियाऽस्यास्ति इति मतुप्) यह १ त्रि० नाम कार्य में संलग्न (लगे) तत्पर रहने वाले का है।

कार्मः (कर्म शीलमस्य इति छत्रादित्वात् णः) कर्मशीलः (कर्मणि शीलमस्य) ये २ त्रि० नाम फल की इच्छा न करते हुए सर्वदा कार्य करने वाले के हैं।

कर्मशूरः (कर्मणि शूरः इति सप्तमी समासः) कर्मठः (कर्मणि शूरः इति अठच्) ये २ त्रि० नाम यत्न पूर्वक प्रारम्भ—किये हुए कार्य को समाप्त करने वाले के हैं ॥ १६ ॥

भरण्यभुक् (भरण्यं वेतनं भुङ्क्ते इति क्विप्) कर्मकरः (कर्म करोति इति टः) ये २ त्रि० नाम मूल्य लेकर कार्य करने वाले मजदूर के हैं।

कर्मकारः (तत्क्रियः—तत्कर्मैव क्रिया यस्य इति, कर्मकारक्रियः सः, कर्म करोति इति अण्) यह १ त्रि० नाम अवैतनिक कार्य करने वाले का है।

अपस्नातः (अपकृष्टं स्नातः 'प्रादयो गताद्यर्थे' इति समासः) मृतस्नातः (मृते स्नातः इति सप्तमी समासः) ये २ त्रि० नाम मरे हुए के उद्देश्य से स्नान किये हुए के हैं।

आमिषाशी (आमिषमश्नाति इति णिनिः) शौष्कलः[१] (शुष्कली शुष्कमांसेऽपि मांसपात्रेऽपि सा मता। तामत्ति इति अण्) ये २ त्रि० नाम मांस भक्षण करने वाले के हैं ॥ १७ ॥

बुभुक्षितः (बुभुक्षा जाताऽस्य इति इतच्) क्षुधितः (क्षुध्यति स्मेति क्तः इट् च) जिघत्सुः(अत्तुमिच्छुः इति अदेः सनि 'घस्लादेशः उश्च') अशनायितः (अशनस्येच्छा इति, अशनाया इति निपातनात् साधुः, अशनाया जाता अस्येति तारकादिः) ये २ त्रि० नाम भूखे व्यक्ति के हैं।

परान्नः (परायान्नम्, परान्नं नित्यमस्य इति अच्) [२]परपिण्डादः (परस्य पिण्डं तदत्ति इति अण्) ये २ त्रि० नाम परान्न को खाकर जीवन व्यतीत करने वाले के हैं।

भक्षकः (भक्षयति इति ण्वुल्) घस्मरः (घसति इति 'क्मरच्') अद्मरः (अत्ति इति क्मरच्) ये ३ त्रि० नाम अधिक खाने वाले के हैं ॥ १८ ॥

विजिगीषाविवर्जिते—उत्कर्षेच्छारहिते—आद्यूनः (आदेवीत् इति क्तः निष्ठानत्वम् इडभावे ऊठि च) औदरिकः (उदरे प्रसितः इति ठक्) ये २ त्रि० नाम भूख से व्याकुल के हैं।

उभौ स्वोदरपूरके—आत्मम्भरिः (आत्मानं भरति बिभर्ति वा 'फले ग्रहिरात्मंभरिश्च' इति निपात-

---

१. शुष्कलः शुष्कमांसस्य फणिके पिशिताशिनी। इति हैमः। २. पिण्डमाजीवने। इति धरणिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः ।
लुब्धोऽभिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ ॥ २० ॥
सोन्मादस्तून्मदिष्णुः स्यादविनीतः समुद्धतः ।
मत्ते शौण्डोत्कटक्षीबाः कामुके कमिताऽनुकः ॥ २१ ॥
कम्रः कामयिताऽभीकः कमनः कामनोऽभिकः ।
विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २२ ॥

नात् साधुः चात् मुम् च) कुक्षिंभरिः (कुक्षिं बिभर्ति इति निपातनात् साधुः मुम् च) ये २ त्रि० नाम अपने पेट भरने से मतलब रखनेवाले पेटू के हैं ॥ १९ ॥

सर्वान्नीनः (सर्वेषामन्नानि सर्वान्नानि तानि भक्षयति इति खः) सर्वान्नभोजी (सर्वान्नानि भोक्तुं शीलमस्य इति णिनिः) ये २ त्रि० नाम सब जाति के अन्न को खाने वाले (औघड़) के हैं।

गृध्नुः (गर्धनशीलः इति क्नुः) गर्धनः (गृध्यत्येवं शीलः इति युच्) [१]लुब्धः (लुभ्यति इति क्तः) अभिलाषुकः (अभिलष्यति इति उकञ्) तृष्णक् (तृष्यति इति नजिङ्) ये ५ त्रि० नाम लोभी के हैं।

समौ—लोलुपः (गर्हितं लुम्पति इति यङन्तादच्) लोलुभः (भृशं लुभ्यति इति यङन्तात् अच्) ये २ त्रि० नाम अधिक लोभी के हैं ॥ २० ॥

उन्मदः—सोन्मादः इति वा पाठः (उद्गतो मदो हर्षोऽस्य, सह उन्मादेन वर्तते इति सोपसर्ग-त्वान्मदेर्वञ्) उन्मदिष्णुः (उन्मदनशीलः इति इष्णुच्) ये २ त्रि० नाम पागल के हैं।

अविनीतः (न व्यनायि इति कर्मणि क्तः) [२]समुद्धतः (समुद्धन्ति स्मेति कर्तरि क्तः) ये २ त्रि० नाम उद्धत के हैं।

मत्तः (माद्यति इति क्तः नत्वाभावश्च) [३]शौण्डः (शुण्डायां पानागारे भवः इति अण्) [४]उत्कटः (उद्गतः कट आवरणभावारको वाऽस्येति कटच्) क्षीबः (क्षीवते स्मेति क्तः 'अनुपसर्गात्' इति साधुः, को वा) ये ३ त्रि० नाम मतवाले के हैं।

[५]कामुकः (कामयते इति उकञ्) कमिता (णिङ्भावे तृच्) अनुकः (अनुकामयते इति 'अनुकामिका' इति निपातनात् साधुः) कम्रः (कमनशील इति रः) कामयिता (कामयते इति तृच्) [६]अभीकः (अभिकामयते इति 'अनुकाभिका' इति निपातनात् कन् पक्षको दीर्घश्च) [७]कमनः (कामयते इति युच्) कामनः (कामयते इति णिजन्तात् युच्) अभिकः (अभिकामयते इति पूर्ववत् निपातनात् कन्) ये ९ त्रि० नाम कामी प्राणी के हैं ॥ २१ ॥

विधेयः (विधातुं शक्यः इति यत् ईद् गुणश्च) विनयग्राही (प्रवृत्तौ निवृत्तौ वा विनयं

---

१. लुब्ध आकाङ्क्षिणि व्याधे। इति हेमचन्द्रः। २. समुद्धतं समुद्गीर्णेऽप्यविनीते च वाच्यवत्। इति मेदिनी। ३. शौण्डो मत्ते च विख्याते पिप्पल्यां च भवेत् स्त्रियाम्। इति विश्वमेदिन्यौ। ४. उत्कटस्तीव्रमत्तयोः। इति हैमः। ५. कामुकः कमनेऽशोकपादपे चातिमुक्तके। इति मेदिनी। ६. अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ। इति मेदिनी। ७. कमनः कामुके कामेऽभि रूपेऽशोक-पादपे। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ।
धृष्टे धृष्णग्वियातश्च प्रगल्भः प्रतिभान्विते ॥ २३ ॥
स्यादधृष्टे तु शालीनो विलक्षो विस्मयान्विते ।
अधीरे कातरस्त्रस्ते भीरुभीरुकभीलुकाः ॥ २४ ॥
आशंसुराशंसितरि गृहयालुर्ग्रहीतरि ।
श्रद्धालुः श्रद्धया युक्ते पतयालुस्तु पातुके ॥ २५ ॥
लज्जाशीलेऽपत्रपिष्णुर्वन्दारुरभिवादके ।

ग्रहीतुं शीलमस्येति णिनिः) वचनेस्थितः (वचने तिष्ठति स्मेति क्तः अलुक् च) [1]आश्रवः (आश्रृणोति इति अच्) ये ४ त्रि० नाम आज्ञाकारी के हैं ॥ २२ ॥

[2]वश्यः (वशमधीनत्वं गतः इति यत) प्रणेयः (प्रकर्षेण नेतुं शक्यः इति यत्) ये २ त्रि० नाम वश में रहने वाले के हैं।

समाः = समानार्थाः—निभृतः (नितरामभारि इति क्तः) [3]विनीतः (व्यनायि इति क्तः) प्रश्रितः (प्रथममश्रायि गुणैः इति क्तः) ये ३ त्रि० नाम विनीत (नम्र) के हैं।

धृष्टः (धृष्णोति स्म इति क्तः इडभावश्च) धृष्णक् (धृष्णोति इति नजिङ्) वियातः (विरुद्धं यातं चेष्टितं यस्येति विरुद्धमयासीद्वेति क्तः) ये ३ त्रि० नाम ढीठ (न डरनेवाले) के हैं, अर्थात् निर्लज्ज के हैं।

प्रतिभान्विते—प्रगल्भः (प्रगल्भते इति अच्) [4]प्रतिभान्वितः (प्रति भानम् इति अङ्, प्रतिभयाऽन्वितः) ये २ त्रि० नाम प्रतिभाशाली (नवीन बुद्धिवाले) के हैं ॥ २३ ॥

अधृष्टः (न धृष्टः) शालीनः (शाला प्रवेशमर्हति इति 'शालीनकौपीन' इति निपातनात् साधुः) ये २ त्रि० नाम लज्जा करनेवाले व्यक्ति के हैं।

विलक्षः (विशेषेण लक्षयति इति अच्) विस्मयान्वितः (विस्मयेनाश्चर्येणान्वितः) ये २ त्रि० नाम आश्चय से युक्त के हैं।

अधीरः (न धीरो धैर्यं यस्य) कातरः (ईषत्तरति इति अच्, ईषदर्थे कोः कादेशः) ये २ त्रि० नाम भूख-प्यास रोगादि भय से व्याकुल के हैं।

त्रस्तौ त्रसनशीले—त्रस्नुः (त्रस्यति इति क्नुः) [5]भीरु. (बिभेति इति क्रुः) भीरुकः (बिभेति इति क्रुकन्) भीलुकः (बिभेति इति क्लुकन्) ये ४ त्रि० नाम डरने वाले या भयभीत हुए के हैं ॥२४॥

आशंसुः (आशंसते इति उः) आशंसिता (आशंसते इति तृन्) ये २ त्रि० नाम अपने मनोरथ को पूर्ण करने की इच्छा वाले के हैं।

ग्रहीतरि—गृहयालुः (गृहयति इति आलुच् णेरयादेशश्च) ग्रहीता (गृह्णाति इति तृन्, इटो दीर्घे च) ये २ त्रि० नाम ग्रहण करने वाले के हैं।

१. आश्रवो वचने स्थिते । प्रतिज्ञायां च क्लेशे च। इति हैमः। २. वशमायत्ततायां स्यात्। इति विश्वः । ३. विनीतस्तु निभृते निर्जितेन्द्रिये । वाणिजे साधुवाह्यश्वे विनयग्राहिते हिते । इति हैमः । ४. प्रज्ञा नवनोन्मेषशालिनी प्रतिभा मता । इति रुद्रः । ५. भीरुरार्ते त्रिलिङ्गः स्यात् वरयोषिति योषिति । इति विश्वमेदिन्यौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुस्तु वर्धनः ॥ २६ ॥
उत्पतिष्णुस्तूत्पतिताऽलंकरिष्णुस्तु मण्डनः ।
भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः समौ ॥ २७ ॥
निराकरिष्णुः क्षिप्नुः स्यात् सान्द्रस्निग्धस्तु मेदुरः ।
ज्ञाता तु विदुरो विन्दुर्विकासी तु विकस्वरः ॥ २८ ॥

श्रद्धया युक्ते—श्रद्धालुः (श्रद्दधाति इति आलुच्) यह १ त्रि० नाम श्रद्धा करने वाले का है। गुरुवेदान्तादिवाक्येषु विश्वासः श्रद्धा तया युक्ते इति सम्बन्धः।

पातुके—पतयालुः (पतयति इति आलुच्) पातुकः (पतति इति भौवादिकात्पत धातोः उकञ्) ये २ त्रि० नाम गिरने वाले के हैं ॥ २५ ॥

लज्जाशीलः (लज्जा शीलमस्य) अपत्रपिष्णुः (अपत्रपते इति इष्णुच्) ये २ त्रि० नाम लज्जा करनेवाले के हैं।

वन्दारुः (वन्दते इति आरुः) अभिवादकः (अभिवादयति इति ण्वुल्) ये २ त्रि० नाम प्रणाम करने वाले के हैं।

शरारुः (शृणाति इति आरुः) घातुकः (हन्ति इति उकञ्) [१]हिंस्रः (हिनस्ति इति रः) ये ३ त्रि० नाम हिंसा करने वाले के हैं।

वर्धिष्णुः (वर्धते इति इष्णुच्) [२]वर्धनः (वर्धते इति युच्) ये २ त्रि० नाम बढ़ने वाले के हैं ॥२६॥

उत्पतिष्णुः (उत्पतति इति इष्णुच्) उत्पतिता (उत्पतति इति तृन्) ये २ त्रि० नाम उछलने वाले के हैं।

अलङ्करिष्णुः (अलङ्करणशीलः इति इष्णुच्) मण्डनः (मण्डनशीलः इति युच्) ये २ त्रि० नाम भूषणों की इच्छा करने वाले के हैं।

भूष्णुः (भवनशीलः इति चाद्भुवः ग्स्नुः इट्प्रतिषेधश्च) भविष्णुः (भवनशीलः इति इष्णुच्) भविता (भवनशील इति तृन्) ये ३ त्रि० नाम होनहार के हैं।

वर्तिष्णुः (वर्तनशीलः इति इष्णुच्) वर्तनः (वर्तनशील इति युच्) ये २ त्रि० नाम व्यवहार में आने वाले के हैं ॥ २७ ॥

निराकरिष्णुः (निराकरणशीलः इति इष्णुच्) क्षिप्नुः (क्षेपणशीलः इति क्नुः) ये २ त्रि० नाम बहिष्कार करने वाले के हैं।

सान्द्रस्निग्धः (सान्द्रो घनः चासौ स्निग्धः चिक्कणः)—मेदुरः (मेदनशीलः इति घुरच्) यह १ त्रि० नाम घन या चिकने के हैं।

ज्ञाता (जानाति इति तृन्) विदुरः (विदनशीलः इति कुरच्) विन्दुः (विदनशीलः इति 'विन्दुरिच्छुः' इति निपातनात् साधुः) ये ३ त्रि० नाम जानने वाले के हैं।

---

१. हिंस्रा काकादनीमांस्योः स्त्रियां स्याद्घातुकेऽन्यवत्। इति विश्वमेदिन्यौ। २. वर्धनं छेदने वृद्धौ वर्धनी तु गलन्तिका। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विसृत्वरो विसृमरः प्रसारी च विसारिणि।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ २९ ॥
क्रोधनोऽमर्षणः कोपी चण्डस्त्वत्यन्तकोपनः।
जागरूको जागरिता घूर्णितः प्रचलायितः ॥ ३० ॥
स्वप्नक्शयालुर्निद्रालुर्निद्राणशयितौ समौ।
पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ॥ ३१ ॥

---

[1]विकासी (विकसति इति घिनुणि तत इनिर्वा) विकस्वरः (विकसति इति वरच्) ये २ त्रि० नाम खिलने वाले पुष्प आदि के हैं ॥ २८ ॥

विसृत्वरः (विसरणशीलः इति क्वरप् तुक् च) विसृमरः (विसरणशीलः इति क्मरच्) प्रसारी (प्रसरणशीलः इति घिनुण्) विसारिणी (विसरणम् इति घञ्, विसारोऽस्यास्ति इति इनिः) ये ४ त्रि० नाम फैलने वाली लता आदि के हैं।

सहिष्णुः (सहनशीलः इति इष्णुच्) सहनः (सहनशीलः इति युच्) क्षन्ता (क्षमणशीलः इति तृन्) तितिक्षुः (तितिक्षणशील तिजे.क्षमायाम् इतिं सन् उश्च) क्षमिता (क्षमणशील इति तृन् इट् च) क्षमी (क्षाम्यत्येवं शीलः इति घिनुण्) ये ६ त्रि० नाम क्षमा करने वाले के हैं ॥ २९ ॥

क्रोधनः (क्रोधनशीलः इति युच्) अमर्षणः (न मर्षणशीलः इति युच्) कोपी (अवश्यं कुप्यति इति णिनिः) ये ३ त्रि० नाम क्रोध करने वाले के हैं।

[2]चण्डः (चण्डते इति अच्) अत्यन्तकोपनः (अत्यन्तं कुप्यति इति युच्) ये २ त्रि० नाम अधिक क्रोध करने वाले के हैं।

जागरूकः (जागरणशीलः इति ऊकः) जागरिता (जागरणशीलः इति तृन्) ये २ त्रि० नाम जागने वाले के हैं।

घूर्णितः (घूर्णते स्मेति क्तः इट् च) प्रचलायितः (प्रचल इव आचरति इति 'कर्तुः क्यङ् सलोपश्च' इति क्यङि, प्रचलायते स्मेति क्तः इट् च) ये २ त्रि० नाम निद्रा या नशा से व्याकुल होकर घूमने वाले के हैं ॥ ३० ॥

स्वप्नक् (स्वप्नशीलः इति नजिङ्) [3]शयालुः (शयनशीलः इति आलुच्) निद्रालुः (निद्राशीलः इति आलुच्) ये ३ त्रि० नाम सोने वाले के हैं।

निद्राणः (निद्राति स्मेति कर्तरि क्तः नत्वञ्च) शयितः (शेते स्मेति क्तः कित्वाभावश्च) ये २ त्रि० नाम सोये हुए के हैं।

पराङ्मुखः (पराञ्चत्यनभिमुखो भवति इति क्विन्, पराक् मुखमस्य) पराचीनः (पराञ्चे वेति खः स्वनादेशश्च) ये २ त्रि० नाम विमुख के हैं।

---

१. विकासः स्फुटने व्यक्तौ। इति दन्त्यान्ते धरणिः। २. चण्डस्तु यमदासेऽतिकोपने। तीव्रे दैत्यविशेषे च चण्डी तु शिवयोषिति। चण्डा धनहरी शङ्खपुष्प्योः। इति हेमचन्द्रः। ३. शयालुः स्यादजगरे निद्राशीले च कुक्कुरे। इति विश्वमेदिन्यौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवानञ्चति देवद्र्यङ् विष्वद्र्यङ् विष्वगञ्चति ।
यः सहाञ्चति सध्र्यङ् सः स तिर्यङ् यस्तिरोऽञ्चति ॥ ३२ ॥
वदो वदावदो वक्ता वागीशो वाक्पतिः समौ ।
वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ॥ ३३ ॥
स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखराबद्धमुखौ शक्लः प्रियंवदे ॥ ३४ ॥

अवाङ् (अवाञ्चत्यधोमुखं भवति इति क्विन्) अधोमुखः (अधोमुखं यस्य) ये २ त्रि० नाम नीचे मुख करने वाले के हैं ॥ ३१ ॥

देवद्र्यङ् (देवान् अञ्चति इति क्विन् अद्र्यादेशः) यह १ त्रि० नाम देवों की पूजा करने वाले का है ।

विष्वद्र्यङ् (विष्वगञ्चति इति अद्र्यादेशः) यह १ त्रि० नाम सब तरफ जाने वाले का है ।

यः सहाञ्चति सः—सध्र्यङ् (सहाञ्चति इति सहस्य सध्रिरिति सध्र्यादेशः) यह १ त्रि० नाम साथ-साथ चलने या पूजा करने वाले का है ।

तिर्यङ् (तिरोऽञ्चति इति तिरसस्तिर्यलोपे इति तिर्यादेशः) यह १ त्रि० नाम टेढ़े चलने वाले का है ॥ ३२ ॥

वदः (वदति इति अच्) वदावदः (वदति इत्यच् तस्य द्वित्वम् अभ्यासस्याक्च) [१]वक्ता (वक्ति इति तृन्) ये ३ त्रि० नाम अधिक बोलने वाले के हैं ।

वागीशः (वाचाम् ईशः) वाक्पतिः (वाचां पतिः) ये २ त्रि० नाम सुन्दर बोलने वाले के हैं ।

वाचोयुक्तिपटुः (वाचो युक्तिः सयुक्तित्वम् 'वाग्दिक्पश्यद्भ्यः' इत्यलुक्, तत्र पटुः) [२]वाग्मी (प्रशस्ता वाक् अस्येति ग्मिनिः) वावदूकः (वावदूकशब्दपाठात् वदे ऊकः) अतिवक्ता (अति (वक्ति इति तृन् तृज् वा) ये ४ त्रि० नाम बुद्धिमानी से अधिक युक्तियुक्त बोलने वाले या नैयायिक के हैं ॥ ३३ ॥

जल्पाकः (जल्पति इति षाकन्) वाचालः (बहुगर्ह्या वागस्य इति आलच्) वाचाटः (बहुगर्ह्या वागस्य इति आटच्) बहुगर्ह्यवाक् (बहुगर्ह्या वाग् अस्य) ये ४ त्रि० नाम निष्प्रयोजन अधिक बोलने वाले के हैं ।

[३]दुर्मुखः (दुर्निन्दितं मुखमस्य) मुखरः (निन्दितं मुखमस्य इति रः, मुखशब्दो लक्षणयाऽत्र वचनपरः) अबद्धमुखः (न बद्धं नियमितं मुखमस्य) ये ३ त्रि० नाम अप्रिय बोलने वाले के हैं ।

शक्लः (शक्नोति इति क्लः) प्रियंवदः (प्रियं वदति इति खश्) ये २ त्रि० नाम प्रिय बोलने वाले के हैं ॥ ३४ ॥

---

१. वक्ता तु पण्डितेऽपि स्याद्वाग्मिन्यप्यभिधेयवत् । इति विश्वः (मेदिनी च) । २. वाग्मी पटौ सुराचार्ये । इति विश्वमेदिन्यौ । ३. दुर्मुखः कपिभिन्नागमिदोर्ना मुखरे त्रिषु । इति विश्वः (मेदिन च) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोहलः स्यादस्फुटवाग्गर्ह्यवादी तु कद्वदः।
समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः॥ ३५॥
रवणः शब्दनो नान्दीवादी नान्दीकरः समौ।
जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतमशिक्षिते॥ ३६॥
तूष्णींशीलस्तु तूष्णींको नग्नोऽवासा दिगम्बरे।
निष्कासितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः॥ ३७॥

[1]लोहलः (लोहनम् इति लुह गार्ध्ये धातोः भावे घञ्, लोहं लाति इति कः) अस्फुटवाक् (न स्फुटा वागस्य) ये २ त्रि० नाम अस्पष्ट बोलने वाले के हैं।

गर्ह्यवादी (गर्ह्यं वदति इति णिनिः) कद्वदः (कुत्सितं वदति इत्यच् कोः कत् च) ये २ त्रि० नाम खराव (बुरा) बोलने वाले के हैं।

कुवादः (कुत्सितो वादोऽस्य) कुचरः (कुत्सितं चरति इति अच्) ये २ त्रि० नाम दोष युक्त या दोषारोपण करते हुए बोलने वाले के हैं।

असौम्यस्वरः (असौम्यः रूक्षः स्वरो यस्य) अस्वरः (अप्रशस्तः स्वरो यस्य) ये २ त्रि० नाम काक की तरह रूक्ष स्वर से बोलने वाले के हैं॥ ३५॥

रवणः (रवणशीलः इति युच्) शब्दनः (शब्दनशीलः इति युच्) ये २ त्रि० नाम अधिक शब्द करने वाले के हैं।

नान्दीवादी (नान्दी वदनशीलः इति णिनिः) [2]नान्दीकरः (नान्दी करोति इति टः) ये २ त्रि० नाम स्तुति करनेवाले या नाटक में पहले मंगल पाठ करने वाले के हैं।

[3]जडः (जलति इति अच् डलयोरभेदः) अज्ञः (न जानाति इति कः) ये २ त्रि० नाम मूर्ख के हैं।

वक्तुं श्रोतुमशिक्षिते—[4]एडमूकः (एडो बधिरश्चासौ मूकश्च) यह १ त्रि० नाम बोलने और सुनने में असमर्थ बहरे गूँगे का है॥ ३६॥

तूष्णींशीलः (तूष्णीं शीलमस्य) तूष्णींकः (तूष्णीं शीलमस्य इति 'शीले कः, मलोपश्च, मलोपसामर्थ्यात् ह्रस्वाभावः) ये २ त्रि० नाम मौन रहने वाले के हैं।

[5]नग्नः (नजते स्मेति क्तः, नत्वञ्च) अवासः (न वासोऽस्य) [6]दिगम्बरः दिगेवाम्बरं यस्य) ये ३ त्रि० नाम नंगे के हैं।

---

१. लोहलः शृङ्खला धार्येऽव्यक्तवाचिनि च त्रिषु। इति विश्वमेदिनीहेमचन्द्राः। २. आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रवर्तते। देवद्विजनृपादीनां तस्मान्नान्दीति कीर्यते॥ इति भरतः। ३. इष्टं वाऽनिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात्। परवशगः स भवेदिह नित्यं जडसंज्ञकः पुरुषः॥ जडा स्त्रियाम्। शूकशिम्ब्यां हिमग्रस्तमूकाप्रज्ञेषु। इति विश्वमेदिन्यौ। ४. एडमूकोऽन्यवत्त्रिषु स्याच्छठे वाक्श्रुतिवर्जिते। इति मेदिनी। त्रिलिङ्गोऽनेडमूकः स्याच्छठे वाक्श्रुतिवर्जिते। इति रभसः। ५. नग्नौ वन्दिक्षपणयोः पुंसि त्रिषु विवाससि। इति विश्वः (मेदिनी च)। ६. दिगम्बरः स्यात्क्षपणेऽपने तमसि शंकरे। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्तगर्वोऽभिभूतः स्याद्दापितः साधितः समौ ।
प्रत्यादिष्टो निरस्तः स्यात् प्रत्याख्यातो निराकृतः ॥ ३८ ॥
निकृतः स्याद्विप्रकृतो विप्रलब्धस्तु वञ्चितः ।
मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ ३९ ॥
अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ ।
आपन्न आपत्प्राप्तः स्यात् कांदिशीको भयद्रुतः ॥ ४० ॥

निष्कासितः (निष्कास्यते स्मेति क्तः) अवकृष्टः (अवकृष्यते स्मेति क्तः) ये २ त्रि० नाम वहिष्कृत किये हुए के हैं ।

¹अपध्वस्तः (अपध्वस्यते स्मेति क्तः) धिक्कृतः (धिक् इति कृतः) ये २ त्रि० नाम धिक्कारे हुए के हैं ॥ ३७ ॥

आत्तगर्वः (आत्तो गर्वो यस्य, २आत्तगन्धः इति पाठान्तरम्) अभिभूतः (अभिभूयते स्मेति क्तः) ये २ त्रि० नाम नष्ट हुए अभिमान वाले के हैं ।

दापितः (दाप्यते इति ण्यन्तात् कर्मणि क्तः) ये २ त्रि० नाम धन दिलाने वाले के हैं ।

प्रत्यादिष्टः (प्रत्यादिश्यते स्मेति क्तः) ³निरस्तः (निरस्यते स्मेति क्तः) प्रत्याख्यातः (प्रत्याख्यायते स्मेति क्तः) निराकृतः (निराकारि इति कर्मणि क्तः) ये ४ त्रि० नाम अपमान के साथ निकाले, या हटाये हुए के हैं ॥ ३८ ॥

⁴निकृतः (न्यकारि इति क्तः) विप्रकृतः (विप्राकारि इति विप्रक्रियते स्म इति वा क्तः) ये २ त्रि० नाम अनादर पाये हुए के हैं ।

विप्रलब्धः (विप्रलभ्यते स्मेति क्तः) वञ्चितः (वञ्च्यते स्मेति क्तः) ये २ त्रि० नाम ठगे हुए के हैं ।

मनोहतः (मनोहतं यस्य) ⁵प्रतिहतः (प्रतिहन्यते स्मेति क्तः) प्रतिबद्धः (प्रति बध्यते स्म इति क्तः) हतः (हन्यते स्म इति क्तः नलोपश्च) ये ४ त्रि० नाम कार्य पूर्ण न होने से हतोत्साह (टूटे मन वाले) के हैं ॥ ३९ ॥

⁶अधिक्षिप्तः (अधिक्षिप्यते स्मेति क्तः) ⁷प्रतिक्षिप्तः (प्रतिक्षिप्यते स्मेति क्तः) ये २ त्रि० नाम जिससे ईर्ष्या करता हो उसी के समक्ष तिरस्कृत करने के हैं । अथवा निन्दित के हैं ।

बद्धः (बध्यते स्मेति क्तः) कीलितः (कील्यते स्मेति क्तः) संयतः (संयम्यते स्मेति क्तः) ये ३ त्रि० नाम रस्सी से बाँधे हुए के हैं

---

१. अपध्वस्तः परित्यक्ते निदिन्तेऽप्यवचूर्णिते । इति मेदिनी । २. गन्धो गन्धक आमोदे सम्बन्धे लेशगर्वयोः । इति विश्वः । गन्धो गर्वो लवोऽपि । इति त्रिकाण्डशेषः । ३. निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदिते । निष्ठ्यूते प्रतिहते च । इति हैमः । ४. निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु । इति विश्वमेदिन्यौ । ५. भवेत् प्रतिहतं द्विष्टे प्रतिस्खलितरुद्धयोः । इति मेदिनी । ६. अधिक्षिप्तः प्रणिहिते कुत्सिते भर्त्सिते त्रिषु । इति विश्वहेमचन्द्रौ । ७. प्रतिक्षिप्तं वारिते स्यात्प्रेषिते पञ्चकं त्रिषु । इति मेदिनी । प्रतिक्षिप्तं प्रतिहते प्रेषिते च निराकृते । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आक्षारितः क्षारितोऽभिशस्ते संकसुकोऽस्थिरे ।
व्यसनार्तोपरक्तौ द्वौ विहस्तव्याकुलौ समौ ॥ ४१ ॥
विक्लवो विह्वलः स्यात्तु विवशोऽरिष्टदुष्टधीः ।
कश्यः कशार्हे संनद्धे त्वाततायी वधोद्यते ॥ ४२ ॥

---

[1]आपन्नः (आपद्यते स्मेति क्तः) आपत्प्राप्तः (आपदनं क्विपि आपत्, प्राप्नोति स्मेति प्राप्तः, आपदं प्राप्तः इति) ये २ त्रि० नाम दुःख में पड़े हुए के हैं ।

कान्दिशीकः (कां दिशं यामि इत्याह इति ठक् 'पृषोदरादिः') भयद्रुतः (अद्रुद्रवत् इति क्तः, भयात् द्रुतः इति 'पञ्चमी' इति योगविभागात् समासः) ये २ त्रि० नाम भय से भागे हुए के हैं ॥ ४० ॥

अभिशस्ते अपवादग्रस्ते—आक्षारितः (आक्षार्यते स्मेति ण्यन्तात् कर्मणि क्तः, आक्षारो मैथुनं प्रत्याक्रोशो जातोऽस्येति वा इतच्) [2]क्षारितः (क्षार्यते इति ण्यन्तात् क्तः) अभिशस्तः (अभिशस्यते स्मेति क्तः इडभावश्च) ये ३ त्रि० नाम चोरी या मैथुन आदि बुरे कार्य के लिए झूठा लोकापवाद पाये हुए के हैं ।

संकसुकः (संकसति इति उकन्) अस्थिरः (न स्थिरः) ये २ त्रि० नाम स्थिर न रहने वाले के हैं ।

व्यसनार्तः (व्यसनेनार्तः) [3]उपरक्तः (उपरज्यते स्मेति क्तः) ये २ त्रि० नाम व्यसन से दुःखी के हैं ।

[4]विहस्तः (विक्षिप्तो हस्तोऽस्य) व्याकुलः (व्याकोलति इति कः) ये २ त्रि० नाम शोकादि के कारण कर्तव्य के निश्चय को नहीं करने वाले के हैं ॥ ४१ ॥

विक्लवः (विक्लवते इति अच्) विह्वलः (विह्वलति इति अच्) ये २ त्रि० नाम शोकादि के कारण अपने शरीर को सँभालने में असमर्थ के हैं ।

[5]विवशः (विरुद्धं वष्टि इति अच्) अरिष्टदुष्टधीः (अरिष्टेन दुष्टा इति अरिष्टदुष्टा, अरिष्टदुष्टा धीर्यस्य) ये २ त्रि० नाम मरणकाल समीप होने से अस्थिर बुद्धि वाले के हैं ।

कशार्हे—[6]कश्यः (कशामर्हति इति यः) कशार्हः (कशामर्हति इति अच्) ये २ त्रि० नाम कोड़े से मारने योग्य मनुष्य घोड़े आदि के हैं ।

सन्नद्धे = वधोद्यते-[7]आततायी (आततं यथा स्यात्तथाऽयितुं शीलमस्य इति णिनिः) यह १ त्रि० नाम मारने के लिए तैयार का है ॥ ४२ ॥

---

१. आपन्नः सविपत्तौ च प्राप्तेऽपि वाच्यलिङ्गकः । इति विश्वमेदिन्यौ । २. क्षारितः स्राविते क्षारे चाभिशस्तेऽपि च त्रिषु । इति मेदिनी । ३. उपरक्तो व्यसनार्ते राहुग्रस्तेन्दु-सूर्ययोः । इति विश्वः मेदिनी च । ४. विहस्तस्तु विह्वले पण्डकेऽकरे । इति हैमः । ५. विवशलिप्ववश्यात्मारिष्टदुष्टधियोरपि इति मेदिनी । ६. कश्यं कशार्हमद्ययोः । अश्वमध्येऽपि । इति हैमः । ७. अग्निदो गरदश्चैव शस्त्रपाती धनापहः । क्षेत्रदारहरश्चैव षडेते त्वाततायिनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य इमौ समौ ।
विष्यो विषेण यो वध्यो मुसल्यो मुसलेन यः ॥ ४३ ॥
शिश्विदानोऽकृष्णकर्मा चपलश्चिकुरः समौ ।
दोषैकदृक् पुरोभागी निकृतस्त्वनृजुः शठः ॥ ४४ ॥
कर्णेजपः सूचकः स्यात् पिशुनो दुर्जनः खलः ।

द्वेष्यः (द्वेष्टुमर्हः इति ण्यत्) अक्षिगतः (अक्षिविषयं गतः इति शाकपार्थिवादित्वात् समासः) ये २ त्रि० नाम नेत्रों में गड़े हुए के हैं ।

वध्यः (वधमर्हति स्मेति यः) शीर्षच्छेद्यः (शीर्षस्य शिरसश्छेदः, तमर्हति इति यत्) ये २ त्रि० नाम मारने योग्य या शिर काट लेने योग्य के हैं ।

विष्यः (विषेण वध्यः इति यत्) यह १ त्रि० नाम विष खिलाकर मारने योग्य का है ।

मुसल्यः (मुसलेन वध्य इति यत्) यह १ त्रि० नाम मुसल से मारने योग्य का है ॥ ४३ ॥

शिश्विदानः (शिश्विन्दे इति कानच् नुमभावश्च) अकृष्णकर्मा (अकृष्णं शुक्लं कर्माऽस्य) ये २ त्रि० नाम पुण्य कर्म करने वाले के हैं ।

पाठ भेद से 'कृष्णकर्मा शिश्विदानः' (श्विताववर्णे धातोः श्वेतितुमिच्छति इत्यानच् दत्वम् सनो लुक् च) पापकर्म करने वाले के २ नाम हैं ।

[१]चपलः (चपति इति कलच्) [२]चिकुरः (चि इति अव्यक्तं कुरति इति कः) ये २ त्रि० नाम चपल या दोष को विना विचारे ही मारने के लिए तैयार के हैं ।

दोषैकदृक् (दोषे एकस्मिन् दृक् ज्ञानं यस्य) पुरोभागी (पुरः पूर्वं भजते इति घिनुण्) ये २ त्रि० नाम केवल दोष को देखने वाले के हैं ।

[३]निकृतः (निकृन्तति इति कः) अनृजुः (ऋजु विरुद्धः न ऋजुः नञ् इति तत्पुरुषे नलोपे नुडागमे च) [४]शठः (शठति इति अच्) ये ३ त्रि० नाम शठ के हैं ॥ ४४ ॥

कर्णेजपः (कर्णे जपति इति अच् अलुक् च) [५]सूचकः (सूचयति इति ण्वुल्) ये २ त्रि० नाम चुगुलखोर के हैं ।

[६]पिशुनः (पिशति इति उनन्) दुर्जनः (दुष्टो जनः इति 'कुगति' इति समासः) [७]खलः (खलति इति अच् , 'खं छिद्रं लातीति') ये ३ त्रि० नाम आपस में फूट कराने वाले दुष्ट के हैं ।

---

१. चपलश्चोरके चले । क्षणिके चिकुरे शीघ्रे पारदे प्रस्तरान्तरे । मीनेऽपि चपला तु स्यात्पिप्पल्यां विद्युति श्रियाम् । पुंश्चल्याम् । इति हेमः । २. चिकुरोऽहौ गृहबभ्रौ केशे चञ्चलशैल्योः । पक्षिवृक्षभिदोश्चापि । इति हैमः । ३. निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु । इति मेदिनी । ४. शठो मध्यस्थपुरुषे धूर्ते धत्तूरकेऽपि च । इति हेमचन्द्रः । ५. सूचकः शुनि दुर्जने । कथके सीवनद्रव्ये मार्जारे वायसेऽपि च । इति हैमः । ६. पिशुनं कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिषु । पृक्कायां पिशुना स्त्री स्यात् । इति विश्वमेदिन्यौ । ७. खलः कल्के भुवि स्थाने क्रूरे कर्णेजपेऽधमे । इति हैममेदिन्यौ । खलः सर्षपमात्राणि पररन्ध्राणि पश्यति । आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति । सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः । सर्प एकाकिनं हन्ति खलः सर्वविनाशकृत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृशंसो घातुकः क्रूरः पापो धूर्तस्तु वञ्चकः ॥ ४५ ॥
अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।
कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ॥ ४६ ॥
निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।
वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४७ ॥
अहंकारवानहंयुः शुभंयुस्तु शुभान्वितः ।

नृशंसः (नॄन् शंसति = हन्ति इति अण्) घातुकः (हननशीलः इति उकञ्) क्रूरः (कृन्तति इति रक्, धातोश्चक्रू आदेशश्च) पापः (पापमस्यास्त इति अच् ये ४ त्रि० नाम क्रूर के हैं।

¹धूर्तः (धुर्वति हिंसति इति तन्, राल्लोपः इति वलोपे दीर्वे च) ²वञ्चकः (वञ्चयति इति ण्वुल्) ये २ त्रि० नाम ठग के हैं ॥ ४५ ॥

³अज्ञः (न जानाति इति कः) ⁴मूढः (मुह्यति स्मेति क्तः) यथाजातः (जातं जन्मकालविशेषमनतिक्रम्य वर्तते पदार्थानतिवृत्तावव्ययीभावः तदस्यास्ति इति अच्) मूर्खः (मुह्यति इति मुहेः खो मूर्च) वैधेयः (विधेयं विधानम्, तस्यायमधिकारी अविद्यावद्विषयत्वाच्छास्त्राणां तस्य इदम्, इत्यण्) ⁵बालिशः (बलिशस्य मत्स्यवेधनस्यायम् इत्यण्) ये ६ त्रि० नाम मूर्ख के हैं।

कदर्यः (कुत्सितोऽर्यः स्वामी इति कुगतिप्रादय इति समासः, कोः कदादेशे च) कृपणः (कृपां करोति इति णिचि कृपयति, कृप्यते इति कर्मणि ल्युटि गुणाभावे च) ⁶क्षुद्रः (क्षुणत्ति इति रक्) किंपचानः (किं पचति इति चानश् शानज् वा नुमभावश्च 'किं क्षेपे' इति समासः) मितंपचः (मितं पचति इति खच्) ये ५ त्रि० नाम कृपण के हैं ॥ ४६ ॥

निःस्वः (निर्गतं स्वमस्य) ⁷दुर्विधः (दुःस्था विधा प्रकारः सनृद्धिर्वाऽस्य) ⁸दीनः (दीयते स्मेति क्तः नत्वञ्च) दरिद्रः (दरिद्राति इति अच्) दुर्गतः (दुर्गच्छति स्मेति क्तः) ये ५ त्रि० नाम दरिद्र के हैं।

वनीयकः (वननम् इति इन्, वनिः याञ्चा, वनिमिच्छति इति क्यच् ण्वुल् च) याचनकः (याचति इति ल्युः स्वार्थे कन् च) मार्गणः (मार्गति इति युच्) याचकः (याचति इति ण्वुल्) अर्थी (अर्थोऽस्यास्ति इति इनिः) ये ५ त्रि० नाम माँगने वाले के हैं ॥ ४७ ॥

अहङ्कारवान् (अहङ्कारोऽस्यास्ति इति मतुप्) अहंयुः (अहमस्यास्ति इति युस्) ये २ त्रि० नाम घमण्ड करने वाले के हैं।

---

१. धूर्तं तु खण्डलवणे धूर्तो धत्तूरमायिनोः । इति हेमचन्द्रः । २. वञ्चकस्तु खले धूर्ते गृहवभ्रौ च जम्बुके । इति विश्वमेदिन्यौ । ३. अज्ञस्तु जडमूर्खयोः । इति विश्वः । ४. मूढस्तन्द्रितबालयोः । इति विश्वः । ५. बालिशस्तु शिशौ मूर्खे । इति मेदिनी । ६. क्षुद्रो दरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोः । क्षुद्राव्याघ्रीनटीव्यङ्गावृहतीसरघासु च । चाङ्गेरिकायां हिंस्रायां मक्षिकामात्रवेश्ययोः । इति हेमचन्द्रः । ७. दुर्विधो वाच्यलिङ्गः स्याद्दुर्गतेऽपि खलेऽपि च । इति मेदिनी । ८. दीना स्त्री मूषिका स्त्रियाम् । वाच्यवद्दुर्गते भीते । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिव्योपपादुका देवा नृगवाद्या जरायुजाः ॥ ४८ ॥
स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः ।
उद्भिदस्तरुगुल्माद्या उद्भिदुद्भिज्जमुद्भिदम् ॥ ४९ ॥
सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५० ॥

शुभंयुः (शुभमस्ति इति युस्) शुभान्वितः (शुभेनान्वितः इति 'कर्तृकरणे कृता' इति समासः) ये २ त्रि० नाम शुभ युक्त के हैं ।

देवा–दिव्योपपादुकाः स्युः—[१]दिव्योपपादुकाः (दिवि भवाः इति यत् दिव्याः, उपपद्यन्ते इति उकञ् 'उपपादुकाः' दिव्याश्च ते उपपादुकाश्च) यह १ त्रि० नाम स्वर्गीय देवता आदि के हैं ।

नृगवाद्याः जरायुजाः जरायोर्गर्भाशयाज्जाताः भवन्ति—नृगवाद्याः (ना च गौश्चाद्यौ येषाम्, आद्य-शब्देन खराश्वादीनां ग्रहणम्—जरायुजः (जरायोर्गर्भाशयाज्जाताः इति डः) यह १ त्रि० नाम गर्भ से उत्पन्न होने वाले गौ, मनुष्य आदि का है ॥ ४८ ॥

कृमिदंशाद्याः कृमिश्च दंशश्च तौ आद्यौ येषां ते, आद्यशब्देन मशकमत्कुणादिग्रहणम् ते स्वेदजाः उच्यन्ते—स्वेदजाः (स्वेदजनकत्वादूष्मा स्वेदः, स्वेदाज्जाताः इति डः) यह १ त्रि० नाम पसीने से उत्पन्न होने वाले खटमल-जूका आदि का है ।

पक्षिसर्पादयः (पक्षी च सर्पश्च तौ आदी येषां ते, आदिशब्देन नक्रमत्स्यपिपीलिकादीनां ग्रहणम्, ते अण्डजाः. अण्डे जाताः इति डः, कथ्यन्ते) यह १ त्रि० नाम पक्षी, साँप, मछली आदि का है ।

॥ इति प्राणिवर्गः ॥

तरुश्च गुल्मश्च तौ आद्यौ येषां ते । आद्यशब्देन तृणौषधिलतादिग्रहः—

तरुगुल्माद्याः—उद्भित् (भुवमुद्भिन्दन्ते इति क्विप्) यह १ त्रि० नाम वृक्ष, लता, घास आदि का है ।

उद्भित् (भुवमुद्भिन्दन्ति इति क्विप्) उद्भिज्जम् (उद्भेदनम् उद्भित् क्विप्, उद्भिदो जातम् इति डः, उद्भिदम् (उद्भिनत्ति इति कः) ये ३ नाम क्रम से २ त्रि० १ न० नाम वृक्ष आदि के पौधों के हैं ॥ ४९ ॥

सुन्दरम् (सु द्रियते इति अप् 'पृषोदरादिः) रुचिरम् (रोचते इति किरच्) [२]चारु (चरति चित्ते इति ञुण्) सुषमम् (सु शोभनं समं सर्वमस्येति सुविनिर्दुर्भ्यः इति षत्वम्) [३]साधु (साध्नोति अर्थम् इति उण्) [४]शोभनम् (शोभाते इति युच्) [५]कान्तम् (कम्पते स्मेति क्तः, इड्भावः दीर्घश्च) मनोरमम् (मनो रमयति इति ण्यन्तः, कर्मण्यण्) रुच्यम् (रोचते रुच्यते इति 'राजसूय' इति निपातनात् साधुः)

---

१. नारकव्यावृत्तये दिव्यपदम् । मातापित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्योऽणुभ्यो जाता ये ते देवाः । दिव्योपपादुकास्त एव उच्यन्ते । २. चारुर्वृहस्पतौ पुंसि शोभने त्वभिधेयवत् । इति विश्वः (मेदिनी च) । ३. साधुर्जैने मुनौ वार्धुषिके सज्जनरम्ययोः । इति हेमचन्द्रः । ४. शोभनो योगभेदे ना सुन्दरे वाच्यलिङ्गकः । इति मेदिनी । ५. कान्ता नार्यां प्रियङ्गौ स्त्री शोभने त्रिषु ना धवे । लोहे च चन्द्रसूर्यय. पर्यायात्तु शिलासु च । इति विश्व-मेदिन्यौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।
अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५१ ॥
निकृष्टप्रतिकृष्टाऽर्वरेफ-याप्याऽवमाऽधमाः ।
कुपूय-कुत्सिताऽवद्य-खेट-गर्ह्याऽणकाः समाः ॥ ५२ ॥
मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
पूतं पवित्रं मेध्यं च, वीध्रं तु विमलार्थकम् ॥ ५३ ॥

मनोज्ञम् (मनसा जानाति इति कः) मञ्जु (मञ्जयते इति बाहुलकादुः) [1]मञ्जुलम् (मञ्जु मञ्जुत्वं लाति इति कः) ये १२ त्रि० नाम सुन्दर, मनोहर के हैं ॥ ५० ॥

यस्य दर्शनात् तृप्तेर्नास्त्यन्तःतन्—आसेचनकम् (न सिच्यते मनोऽत्र इति ल्युट् कन् च) यह १ त्रि० नाम जिसके देखते रहने से मन तृप्त न हो ऐसे सुन्दर पदार्थ का है।

[2]अभीष्टम् (अभितः इष्यते स्मेति क्तः) अभीप्सितम् (अभ्याप्तुमिष्यते स्म इति सन् क्तः इच इत् च) [3]हृद्यम् (हृदयस्य प्रियम् इति यत् हृदादेशश्च) दयितम् (दय्यते स्मेति क्तः) [4]वल्लभम् (वल्ल्यते वल्लते चेति अभच्) [5]प्रियम् (प्रीणाति दयितम् इति कः) ये ६ त्रि० नाम प्रिय के हैं ॥ ५१ ॥

निकृष्टः (निकृष्यते स्मेति क्तः) प्रतिकृष्टः (प्रतिकृष्यते स्मेति क्तः) [6]अर्वा (ऋच्छति इति वनिप्) [7]रेफः (रिफ्यते इति घञ्) [8]याप्यः (याप्यते इति ण्यन्तात् यत्) अवमः (अवत्यस्मादात्मानम् इति कुत्सितेऽर्थे मप्रत्ययान्तो निपातः) [9]अधमः (तत्रैव वकारस्य पक्षे धकारः) कुपूयः (कुत्सितं पूयते इति अच्) कुत्सितः (कुत्सा संजाताऽस्य इति तारकादिः) अवद्यः (न उद्यते इति 'अवद्यावमा' इति कुत्सिते वदेर्नञि यत् निपातनात् साधुः) [10]खेटः (खेटति इति अच्) गर्ह्यः (गर्ह्यते इति गर्ह कुत्सायामिति ण्यत्) अणकः (अणति इति अच् कुत्सायां कन् च) ये १३ त्रि० समानार्थक नाम खराब, नीच के हैं ॥ ५२ ॥

[11]मलीमसम् (मलोऽस्यास्ति इति 'ज्योत्स्ना तमिस्रा' इति निपातनात् मलशब्दादिनच् ईमसश्च साधुः) [12]मलिनम् (मलतेपूर्ववदकच् इति निपातनात् साधुः) कच्चरम् (कुत्सितं चरति इति अच्, कोः कदादेशश्च) मलदूषितम् (मलेन दूषितम् 'कर्तृकरणे' इति समासः) ये ४ त्रि० नाम मैले, गँन्दे के हैं।

---

१. मञ्जुलं च चलाञ्चले। रम्ये कुञ्जे मञ्जुलस्तु दात्यूहे। इति हैमः। २. अभीत्यंभूतकथने। अभि वीप्साभिमुख्ययोः। इति विश्वः। ३. हृद्यं धवलजीरे च हृत्प्रिये हृद्भवेऽपि च। वशकृद्वेदमन्त्रे च हृद्या वृद्ध्याख्यभेषजे। इति विश्वः। ४. वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरङ्गमे। इति विश्वः (मेदिनी च) ५. त्रिषु वृद्ध्यौषधे हृद्ये धवे। इति हैमः। ६. अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिङ्गकः। इति मेदिनी। ७. रेफो रवर्णे पुंसि स्यात्कुत्सिते वाच्यवत् पुनः। इति विश्वः। रेपः स्यान्निन्दिते क्रूरे। इति विश्वः। ८. याप्यं तु यापनीये स्यान्निन्दितेऽप्यभिधेयवत्। इति मेदिनी। ९. अधमः स्याद्गर्ह्ये ऊने। इति विश्वः। १०. खेटः कफे ग्राममेदे चर्मण्यस्त्यवन्ति त्रिषु, इति मेदिनी। ११. मलीमसं तु मलिने पुष्पकासीसलोहयोः। इति विश्वमेदिन्यौ। १२. मलिनं कृष्णदोषयोः। मलिनी रजस्वलायाम्। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।
असारं फल्गु, शून्यं तु वशिकं तुच्छ रिक्तके ॥ ५४ ॥
क्लीबे प्रधानं प्रमुख-प्रवेकाऽनुत्तमोत्तमाः ।
शख्य-वर्य-वरेण्याश्च प्रवर्हाऽनवराध्यंवत् ॥ ५५ ॥

---

[1]पूतम् (पूयते स्मेति क्तः) [2]पवित्रम् (पुनाति पूयतेऽनेन इति वा इत्रः) [3]मेध्यम् (मेधनार्हम् इति ण्यत्) ये ३ त्रि० नाम पवित्र के हैं ।

वीध्रम् (वीन्धे इति क्रन्) विमलात्मकम् (विमल आत्मा स्वभावो यस्य) ये २ त्रि० नाम स्वभावतः निर्मल के हैं ॥ ५३ ॥

निर्णिक्तम् (निर्णिज्यते स्मेति क्तः) शोधितम् (शोध्यते स्मेति ण्यन्तात् क्तः) मृष्टम् (मृज्यते स्मेति क्तः) निःशोध्यम् (निष्क्रान्तं शोध्यमस्मात् शोध्यान्निष्क्रान्तम् इति वा) अनवस्करम् (नावस्करोऽत्र) ये ५ त्रि० नाम साफ किये हुए के हैं ।

असारम् (न सारोऽत्र) [4]फल्गुः (फलति इति 'फलि पाटि' इति फलेगुक् निपातनात् साधुः) ये २ त्रि० नाम निर्बल या निःसार के हैं ।

[5]शून्यम् (शुने हितम् इति यति, संप्रसारणे, दीर्घे च) वशिकम् (उश्यते इति इन् कन् च) तुच्छम् (तोदनम् इति भावे क्विप् , तुदा व्ययया छ्यति इति कः) रिक्तम् (रिच्यते स्मेति क्तः स्वार्थे कन् च) ये ४ त्रि० नाम तुच्छ (खाली) के हैं ॥ ५४ ॥

[6]प्रधानम् (प्रदधाति इति ल्युट् युच् वा) [7]प्रमुखः (प्रकृष्टं मुखं यस्य) प्रवेकः (प्रविच्यते इति घञ्) अनुत्तमः (नोत्तमोऽस्मात्) उत्तमः (अतिशयेनोत्कृष्टः, उत्कृष्टार्थवृत्तेरुच्छब्दात् तमप्, द्रव्यप्रकर्षार्थत्वान्नामुः । उत्ताम्यति अचि, उत्ताम्यते घञि वृद्ध्यभावे च वा उत्तमः) मुख्यः (मुखमिव इति यः) वर्यः (वर्यते इति यत्) वरेण्यः (व्रियते इति एण्यः) प्रवर्हः (प्रवर्हति इति अच्) अनवराध्यः (अवरस्मिन्नर्धे भवः परावराधमोत्तमपूर्वाच्चेति अर्धात् इति यत् न अवरार्ध्यः इति नञ् समासे) परार्ध्यः (परस्मिन्नर्धे भवः इति यत्) [8]अग्रः (अगति इति 'ऋज्रेन्द्र' इति निपातनात् साधुः) प्राग्रहरः (प्रकृष्टमग्रम्, प्राग्रे हरति इति अच्) प्राग्र्यः ' प्राग्रे भवः इति यत्) अग्र्यः (अग्रे भवः इति यत्) अग्रीयः (अग्रे भवः इति छः) अग्रियः (अग्रे भवः इति घः) ये क्रम से १ न० १६ त्रि० = १७ नाम मुखिया के हैं । वत् इति समानेऽर्थेऽव्ययम् ॥ ५५½ ॥

---

१. पूतं त्रिपु पवित्रे च शठिते बहुलीकृते । इति मेदिनी । २. पवित्रं तु मेध्ये ताम्रे कुशे जले अर्घोपकरणे चापि पवित्रा तु नदी भिदि । इति हेमः । ३. मेध्यं त्रिपु शुचौ रक्तवचारोचनयोः स्त्रियाम् । इति मेदिनी । ४. फल्गुः काकोदुम्बरिके वृक्षे निरर्थकेऽपि च । इति हैमः । फल्ग्वसारेऽभिधेयवत् । नदीभेदे मलय्वां स्त्री । इति विश्वः (मेदिनी च) ५. शून्यं विन्दौ च निर्जने । शून्या तु नलिका । इति हेमः । ६. प्रधानं स्यान्महापात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीवमेकत्वे तूत्तमे सदा । इति मेदिनी । ७. प्रमुखं प्रथमे मुख्ये । इति हैमः । ८. अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पराध्यर्याऽग्र-प्राग्रहर-प्राग्रयाऽग्र्याऽग्रीयमग्रियम् ।
श्रेयान्श्रेष्ठः पुष्कलः स्यात् सत्तमश्चातिशोभने ॥ ५६ ॥
स्युत्तरपदे व्याघ्र-पुंगव-र्षभ-कुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ ५७ ॥
अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।
विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥ ५८ ॥
वड्रोरु-विपुलं, पीन-पीव्नी तु स्थूल—पीवरे ।

[1]श्रेयान् (अतिशयेन प्रशस्यः इति 'द्विवचनविभज्योपपदे तरबीयसुनो, 'अजादी गुणवचनादेव' इति ईयसुनि, 'प्रशस्यस्य श्रः' इति श्रादेशे गुणे च) [2]श्रेष्ठः (अतिशयेन प्रशस्यः इति 'अतिशायने तमबिष्ठनौ' इति इष्ठनि प्रशस्यस्य श्रादेशे गुणे च) [3]पुष्कलः (पुष्यति इति 'पुषः कित्' कलश्च) [4]सत्तमः (अतिशयेन सन् इति तमप्) अतिशोभनः (अतिशयेन शोभनः) ये ५ त्रि० नाम अधिक शोभने वाले के हैं ॥५६॥

व्याघ्र—पुङ्गव—ऋषभ—कुञ्जर—सिंह—शार्दूल—नागादिशब्द उत्तर पद में रहने पर श्रेष्ठार्थ को कहते हैं तथा पुंलिङ्ग में ही प्रयुक्त होते हैं। जैसे—पुरुषव्याघ्रः, मुनिपुङ्गवः; पुरुषर्षभः, मनुष्यकुञ्जरः, नृपसिंहः, नृपशार्दूलः, नृपनागः, आद्यशब्द से चन्द्रसोम मुखादि का परिग्रह जानना चाहिये इसलिये—नृसोमादि की सिद्धि होती है ॥ ५७ ॥

अप्राग्र्यम् (प्राग्र्याद् भिन्नम्) अप्रधानम् (प्रधानादन्यत्) उपसर्जनम् (उपसृज्यते इति कर्मणि ल्युट्) ये ३ नाम क्रम से १ त्रि० २ न० अप्रधान के हैं। अप्रधानम्, उपसर्जनम् इमे द्वे द्वयाभ्यां स्त्रीपुंसाभ्यां हीने क्लीवे स्याताम् इति सम्बन्धः।

विशङ्कटम् (विस्तृतार्थवृत्तेर्विशद्वात् शङ्कटच्) [5]पृथु (प्रथते इति कुः सम्प्रसारणं च) बृहत् (बर्हति इति अति प्रत्ययान्तो निपातनात् साधुः) विशालम्[6] (विस्तृतं विस्तृतार्थवृतिर्विशद्वात् शालच्) पृथुलम् (पृथुत्वमप्यस्ति इति लच् पृथुत्वं लातीति वा) महत् (महति इति 'वर्तमाने पृषद् बृहन्महत् इति अतिप्रत्ययान्तो निपातनात् साधुः) वड्रम् (वलते इति रक्, डलयोरैक्यात्) उरु (ऊर्णोति इति कुः प्रत्यये, नु लोपे, ह्रस्वे च) [7]विपुलम् (विपोलति इति कः) ये ९ त्रि० नाम विशाल के हैं।

पीनम् (प्यायते स्मेति ओप्यायीवृद्धौ अस्मात् क्तः, नत्वे पी आदेशे च) पीव (प्यायते इति प्यैङ् वृद्धौ, अस्मात् क्वनिप् सम्प्रसारणं च) [8]स्थूलम् (स्थूलयति इति अच्) [9]पीवरः (प्यायते इति 'ष्वरच्-प्रत्ययान्तो निपातनात् साधुः) ये ४ त्रि० नाम मोटे के हैं ॥ ५८½ ॥

१. श्रेयो मुक्तौ शुभे धर्मेऽति-प्रशस्ते च वाच्यवत्। श्रेयसी करिपिप्पल्यामभयापाठयोरपि। इति विश्वमेदिन्यौ २. श्रेष्ठो वरे कुबेरे च। इति हैमः। ३. पुष्कलस्तु पूर्णे श्रेष्ठे। इति हैमः। ४. सत्तमः स्यात्पूज्यतमे साधीयस्युत्तमे त्रिषु। इति मेदिनी। वर्यं प्रधानं युक्तमनुत्तमं सत्तमं प्रवर्हणं च। इति नाममालायाम्,(सत्तमस्य) अग्रं प्राग्र-हरं श्रेष्ठं मुख्यवर्यप्रवर्हशम्। इति त्रिकाण्डशेषे च। ५ पृथुर्विशाले भूपाले वाष्पिका कृष्णजीरयोः। इति हेमचन्द्रः। ६. विशाला त्विन्द्रवारुण्यामुज्जयिन्यां च योषिति। नृपवृक्षं भिदोः पुंसि पृथुले त्वभिधेयवत्। इति विश्वमेदिन्यौ। ७. विपुलः पृथुलेऽगाधे मेरुपश्चिमभूधरे। इति विश्वमेदिन्यौ। ८. स्थूलः पीने जडे। इति हैमः। ९. पीवरः स्थूलकूर्मयोः। इति हेमचन्द्रः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोकाऽल्पक्षुल्लकाः, श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु ॥ ५९ ॥
स्त्रियां मात्रा त्रुटिः पुंसि लवलेश-कणाणवः ।
अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥ ६० ॥
प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहं पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥ ६१ ॥

---

[१]स्तोकः (स्तुच्यते इति घञि कुत्वे च) अल्पः (अल्यते वार्यते इति बाहुलकात् पः) [२]क्षुल्लकः (क्षोदनम् इति संपदादिः क्षुदं लाति इति कः, तोर्लि इति लत्वम् स्वार्थे कन् च) श्लक्ष्णम् (श्लिष्यते श्लिष्यति वेति क्स्नः) [३]सूक्ष्मम् (सूच्यते इति स्मन् णिलोपे कुत्वे षत्वे) दभ्रम् (दभ्यते इति रक्) कृशम् (कृश्यते स्मेति 'फुल्लक्षीब' इति निपातनात् साधुः) [४]तनु (तन्यते इति उः) [५]मात्रा (मीयते इति ष्ट्रन्, टाप् च) त्रुटिः (त्रुट्यते इति इन्) [६]लवः (लूयते इति अप्) लेशः (लिशति इति अच्) [७]कणः (कणति इति अच्) [८]अणुः (अणति अण्यते वेति दुः) ये १४ नाम क्रम से ८ त्रि० २ नि० स्त्री० ४ पुं० पतले के हैं ॥५९॥

अत्यल्पम् (अतिशयेनाल्पः) अल्पिष्ठम् (अतिशयेनाल्पः इति इष्ठन्) अल्पीयः (अतिशयेनाल्पः इति ईयसुन्) कनीयः (अतिशयेन अल्पः इति ईयसुन् अल्पशब्दस्य कनादेशः) अणीयः (अतिशयेनाणुः इति ईयसुन्) ये ५ त्रि० नाम अत्यधिक थोड़े के हैं ॥ ६० ॥

[९]प्रभूतम् (प्रभवति स्मेति क्तः) प्रचुरम् (प्रचोरति इति कः चुरादीनां णिज्वैकल्पिकः) प्राज्यम् (प्रवीयते इति क्यप् व्यभावश्च, अदभ्रम् (न दभ्रादन्यत् इति नञ् समासः) [१०]बहुलम् (बहून् लाति इति कः) [११]बहु (बहते इति उः) पुरुहम् (पुरून् हन्ति गच्छति इति डः) [१२]पुरु (पिपर्ति पूर्यते वा इति कुः, उदादेशे रपरत्वे च) भूयिष्ठम् (अतिशयेन बहु इति इष्ठनि,-इलोपे, भू आदेशे यिडागमे च) [१३]स्फिरम् (स्फायते इति 'अजिरशिशिर' इति निपातनात् साधुः) भूयः (अतिशयेन बहु इति ईयसुनि 'बहोर्लोपो भू च बहोः' इति इलोपे भ्वादेशे च) [१४]भूरि (भवति इति क्रिन्) ये १२ त्रि० नाम बहुत (अधिक) के हैं ॥ ६१ ॥

---

१. स्तोकस्त्रिष्वल्पे चातके पुमान् इति मेदिनी । २. क्षुल्लकास्त्रिषु नीचेऽल्पे । इति विश्वः । ३. सूक्ष्मं स्यात्कण्टकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके । इति विश्वः । ४. तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे । इति विश्वमेदिन्यौ । ५. मात्रं त्ववधृतौ स्वार्थे कार्त्स्न्ये मात्रा परिच्छदे । अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे । काले वृत्ते च । इति हैमः । ६. लवः कालभिदि च्छिदि । विलासे रामजे लेशे तथा किंजल्क-पक्ष्मणोः । गोपुच्छलोमस्वपि च । इति हैमः । ७. कणो धान्यांशलेशयोः । कणा जीरकपिप्पल्योः इति हेमचन्द्रः । ८. अणुः व्रीह्यल्पयोः । इति हैमः ९. प्रभूतमुद्गते प्राज्ये । इति हैमः । १०. बहुला नीलिकायां स्याद् एलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः, इति विश्वमेदिन्यौ । ११. बहु स्यात्त्र्यादिसंख्यासु विपुलेऽप्यभिधेयवत् । इति विश्वः मेदिनी च । १२. पुरुः प्राज्येऽभिधेयवत् । पुंसि स्याद्देवलोके च नृपभेदपरागयोः । इति हैमः (मेदिनी च) १३. स्फारस्तु स्फारकादीनां बुद्बुदे विपुलेऽपि च, इति हेमचन्द्रः । १४. भूरि स्यात्प्रचुरे स्वर्णे । इति हैमः । भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परश्शताद्यास्ते येषां परा संख्या शतादिकात्।
गणनीये तु गणेयं संख्याते गणितमथ समं सर्वम् ॥ ६२ ॥
विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥ ६३ ॥
घनं निरन्तरं सान्द्रं पेलवं विरलं तनु।
समीपे निकटासन्नसन्निकृष्टसनीडवत् ॥ ६४ ॥

परश्शतम् (शतात् परे इति 'पञ्चमी'योगविभागात् समासः, राजदन्तादिः सुट् च) यह त्रि० नाम सौ से अधिक का है। आदि पद से परस्सहस्राः का परिग्रह जानना। येषां संख्येयानां संख्या ॥ गणना शतादिकात्परा अधिका चेत्तदा ते क्रमशः परश्शताद्याः स्युरिति सम्बन्धः।

गणनीयम् (गण्यते इति अनीयर्) गणेयम् (गणयितुं शक्यम् इति यत् णिलोपाभावे गुणे च) ये २ त्रि० नाम गणना करने योग्य पदार्थ के हैं।

संख्यातम् (संख्यायते स्मेति क्तः) गणितम् (गण्यते स्मेति क्तः) ये २ त्रि० नाम गिने हुए के हैं।

[1]समम् (समति षम-वैक्लव्ये अस्मात्पचाद्यचि) सर्वम् (सरति इति सर्वनीघृष्वेति निपातनात् साधुः) [2]विश्वम् (विशति इति क्वुन्) अशेषम् (न शेषोऽस्य) [3]कृत्स्नम् (कृत्यते इति क्स्नः) समस्तम् (समस्यते स्मेति क्तः) निखिलम् (निवृत्तं खिलमस्य) अखिलम् (न खिलमस्य) निःशेषम् (निष्क्रान्तं शेषात् इति निरादयः इति समासः) समग्रम् (संगतमग्रमस्य, समं ग्रसते वेति डः) सकलम् (सहकलाभिः कलाभिः सहितं वा) [4]पूर्णम् (पूर्यते स्मेति क्तः, नत्वञ्च) अखण्डम् (न खण्ड्यते इति घञ्) अनूनकम् (ऊनयति इति अचि ऊनम् न ऊनम् इति नञ्समासे, ततः स्वार्थे कन्) ये १४ त्रि० नाम सम्पूर्ण (समूचे) के हैं ॥ ६२–६३ ॥

[5]घनम् (हन्यते इति अप् घनादेशश्च) निरन्तरम् (निर्गतम् अन्तरात् निर्गतमन्तरमस्मिन् वा) सान्द्रम् (सह अद्यते इति रक् सनस्य स आदेशः) ये ३ त्रि० नाम घन (गझिन) के हैं।

पेलवम् (पेलनम् इति घञ् पेलः सोऽस्यास्ति इति वः) विरलम् (विराति इति बाहुलकात्कलन् आलोपे च) [6]तनु (तन्यते इति उः) ये ३ त्रि० नाम विरल-फरक वाले के हैं।

समीपः (संगता आपो अस्मिन् इति अः, अप ईदादेशे च) निकटः (निबद्धम् इति संप्रोदश्चेत्यापन्ने कटच्, निकटति वा अच्) आसन्नः (आसीदति स्म इति क्तः) सन्निकृष्टः (संनिकृष्यते स्मेति क्तः) सनीडः (समानं नीडं वासस्थानमस्येति समानस्य सादेशः) सदेशः (समानो देशोऽस्य) [7]अभ्याशः (अभ्यश्यते इति घञ्) सविधः (समाना विधाऽस्य) समर्यादः (समाना मर्यादाऽस्य) सवेशः (समानो

---

१. समा संवत्सरे स्त्रियाम्। सर्वसाधुसमानेषु समं स्यादभिधेयवत्। इति विश्वः (मेदिनी च)।
२. विश्वं कृत्स्ने च भुवने विश्वे देवेषु नागरे। विश्वाऽप्यतिविषायां स्यात्। इति विश्वः। ३. कृत्स्नं सर्वाम्बु कुक्षिषु। इति मेदिनी। ४. पूर्णशब्दे (शक्ते) समग्रे ना पूरिते त्वभिधेयवत्। इति मेदिनी।
५. घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे। संघे मुस्ते घनं मध्ये नृत्यवाद्यप्रभेदयोः। इति हेमचन्द्रः। ६. तनुर्वपुस्त्वचोः। विरलेऽल्पे कृशे। इति हैमः। ७. अभ्यासोऽभ्यसनेऽन्तिके। इति दन्त्यान्तेषु विश्वमेदिन्यौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदेशाभ्याशसविधसमर्यादसवेशवत् ।
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ॥ ६५ ॥
संसक्ते त्वव्यवहितमपदान्तरमित्यपि ।
नेदिष्ठमन्तिकतमं स्याद्दूरं विप्रकृष्टकम् ॥ ६६ ॥
दवीयश्च दविष्ठं च सुदूरं दीर्घमायतम् ।
वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम् ॥ ६७ ॥
उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेऽथ वासने ।

वेशोऽस्य) उपकण्ठः (उपगतः कण्ठः सामीप्यस्य इति) [1]अन्तिकः (अन्तोऽस्यास्ति इति ठन्) अभ्यर्णः (अभ्यर्द्यते स्मेति क्तः इडभावश्च) अभ्यग्रः (अभिमुखमग्रमस्य) अभितः (आभिमुख्यार्थकाभि-अव्ययात् तसिल्, उभयतः इत्यर्थः) ये १५ नाम क्रम से १४ त्रि० १ अ० समीप के हैं ॥ ६४–६५ ॥

ससक्ते-संयुक्ते—संसक्तम् (संसज्यते स्मेति क्तः) अव्यवहितम् (न व्यवधीयते स्मेति क्तः दधातेर्हिः) अपटान्तरम् इत्यपि-इति पाठे (पटेनान्तरम्, न पटान्तरमत्र) ये ३ त्रि ० नाम सटे हुए के हैं ।

नेदिष्ठम् (अतिशयेनान्तिकम् इति इष्ठन् 'अन्तिकबाढयोर्नेदसाधौ' इति नेदादेशे अन्तिकतमम् इति तमप्) ये २ त्रि० नाम अधिक समीप के हैं ।

दूरम् (दुःखनेयते प्राप्यते इति दुरुपसर्गात् इण् गतौ अस्मात् 'दुरीणीलोपश्च' इति रकि इणो लोपे रलोपे दीर्घे च साधुः) विप्रकृष्टम् (विप्रकृष्यते स्मेति क्तः स्वार्थे कन् च) ये २ त्रि० नाम दूर के हैं ॥ ६६ ॥

दवीयः (अत्यन्तं दूरम् इति ईयसुन्, 'स्थूलदूरयुव' इति रलोपे गुणे अवादेशे च साधुः) दविष्ठम् (अत्यन्तं दूरम् इति इष्ठन्) सुदूरम् (सु अत्यन्तं दूरम्) ये ३ त्रि० नाम अत्यन्त दूर के हैं ।

दीर्घम् (दृणाति इति बाहुलकात् घकि इदादेशे दीर्घे च) आयतम् (आयम्यते स्मेति क्तः, आयते वेति अच्) ये २ त्रि० नाम लम्बे के हैं ।

वर्तुलम् (वर्तते इति बाहुलकादुलच्) [2]निस्तलम् (निर्गतं तलमस्य) [3]वृत्तम् (वर्तते स्मेति क्तः) ये ३ त्रि० नाम गोलाकार के हैं ।

[4]बन्धुरम् ((बध्नाति इति 'मद्गुरादयश्च' इति निपातनात् उरचि साधुः) उन्नतानतम् (उन्नतं च तदानतं च इति) ये २ त्रि० नाम ऊँचे खाल के हैं ॥ ६७ ॥

उच्चः (उच्चिनोति इति डः) प्रांशुः (प्रकृष्टा अंशवोऽस्य) उन्नतः (उन्नमति स्मेति क्तः) उदग्रः (उद्गतमग्रमस्य) [5]उच्छ्रितः (उच्छ्रयति स्मेति क्तः) [6]तुङ्गः (तुञ्ज्यते इति घञ्) ये ६ त्रि० नाम ऊँचे के हैं ।

१. अन्तिकं निकटे वाच्यलिङ्गस्त्री शोभनौषधौ । चुल्ल्यां ज्येष्ठभगिन्यां च नाट्योक्त्यां कीर्त्यतेऽन्तिका । इति विश्वमेदिन्यौ । २. निस्तलं वर्तुले चले । इति विश्वः । ३. वृत्तम् (वृत्तौ) दृढमृते । चरित्रे वर्तुले छन्दः स्वतीताधीतयोर्वृते इति हैमः । ४. बन्धुर मुकुटे पुंसि स्त्री चङ्गतैलकल्ककयोः । बन्धूके बधिरे हंसे त्रिषु स्याद्रम्यनम्रयोः । बन्धुरा पण्ययोषायां स्त्रियां भूम्नि च सक्तुषु ॥ इति मेदिनी । बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः । बन्धूके च विडङ्गे च बन्धुरा पण्ययोषिति ॥ (इति विश्वाद्यौ-घोऽपि)। ५. उच्छ्रितं त्रिषु संजाते समुन्नद्ध (त) प्रवृद्धयोः । इति मेदिनी । ६. तुङ्गः पुंनागन-बर्बुधे स्यादुन्नतेऽन्यवत् । तुङ्गी मोक्ता हरिद्रायां वर्वरायामपीष्यते इति हैमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

R. 266

न्यङ्नीचखर्वह्रस्वाः स्युरवाग्रेऽवनतानतम् ॥ ६८ ॥
अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ ६९ ॥
ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ।
शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ॥ ७० ॥

वामनः (वामयति मदम् इति ल्युः) न्यङ् (न्यञ्चति इति क्विन्) १नीचः (नीचैस्त्वमस्त्यत्र इति अच् टिलोपश्च) २खर्वः (खर्वति इति अच्) ३ह्रस्वः (ह्रसति इति बाहुलकाद्वः) ये ५ त्रि० नाम वामन (छोटे) के हैं ।

अवाग्रम् (अवनतमग्रमस्य) अवनतम् (अवनमति स्मेति क्तः) आनतम् (आनमति स्मेति क्तः) ये ३ त्रि० नाम नीचे की तरफ झुके हुए के हैं ॥ ६८ ॥

४अरालम् (ऋच्छति इति विच्, अरमालाति इति मूलविभुजादिकः) ५वृजिनम् (वृज्यते इतीनन्) ६जिह्मम् (जहाति हीयते वा इति मन्) ७ऊर्मिमत् (ऊर्मिरस्यास्ति इति मतुप्) कुञ्चितम् (कुञ्चति स्मेति क्तः, नलोपाभावश्च) ८नतम् (नमति स्म इति क्तः) ९आविद्धम् (आविध्यते स्मेति क्तः सम्प्रसारणञ्च) १०कुटिलम् (कुटिं कौटिल्यं लाति इति कः, कुटति वेति इलच्) भुग्नम् (भुजति स्मेति क्तः नत्वञ्च) ११वेल्लितम् (वेल्लति स्मेति क्तः) वक्रम् (वञ्चति इति रक्) ये ११ त्रि० नाम टेढ़े के हैं ॥ ६९ ॥

ऋजुः (अर्जति इति अर्जि दृशि इति निपातनात् धातोः ऋजिरादेशः कुप्रत्ययश्च) अजिह्मः भिन्नो जिह्मात्) प्रगुणः (प्रकृष्टा गुणा यस्य) ये ३ त्रि० नाम सीधे के हैं ।

व्यस्ते तु—१२व्यस्तः (व्यस्यते स्मेति क्तः) अप्रगुणः (भिन्नः प्रगुणात्) आकुलः (आकोलति इति कः) ये ३ त्रि० नाम घबड़ाये हुए के हैं

शाश्वतः (शश्वद्भवः इति अण्) १३ध्रुवः (ध्रुवति इति कः) १४नित्यः (नियतं भवः इति त्यप्) सदातनः (सदाभवः इति ट्युलनादेशे तुडागमे च) १५सनातनः (सनाभवः इति ट्युट्युल् अनादेशे तुडागमे च) ये ५ त्रि० नाम सर्वदा स्थिर रहने वाले के हैं ॥ ७० ॥

---

१. नीचः पामरखर्वयोः । इति हेमचन्द्रः । २. खर्वसंख्यान्तरे क्लीबं नीचे वामनके त्रिषु इति मेदिनी । ३. खर्वह्रस्वौ न्यग्वामनौ । इति हैममेदिन्यौ । ४. अरालः कुटिले सर्जरसे च समदन्तिनि । इति विश्वः । ५. वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु इति मेदिनी । ६. जिह्मस्तु कुटिले मन्दे जिह्मं तगरपादपे । इति हैमः । ७. ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयो । वस्त्रसंकोचरेखायां वेदनापीडयोरपि ॥ इति मेदिनी । ८. नतं तगरपाद्यां स्यात् क्लीबं कुटिलनम्रयोः (त्रिषु) । इति मेदिनी । ९. आविद्धो वाच्यलिङ्गः स्यात्कुटिले च पराहते । इति मेदिनी । १०. कुटिलात्वापगायां स्त्री भुग्ने तु वाच्यलिङ्गकः । इति मेदिनी । ११. वेल्लितं गमने क्लीवं कुटिले विधुते त्रिषु । इति मेदिनी । १२. व्यस्तं तु व्याकुले व्याप्ते । इति विश्वः । १३. ध्रुवो वटे । वसुयोगभिदोः शंभौ शङ्कावुत्तानपादजे । स्थिरे (नित्ये) निश्चिते च ध्रुवं खेऽजस्रतर्कयोः । ध्रुवा मूर्वाशालपर्ण्योः स्रग्भेदे गीतभिद्यपि । इति हैमः । १४. नित्यं स्यात्संततेऽपि च शाश्वते त्रिषु । इति मेदिनी । १५. सनातनोऽच्युते । पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे । इति हेमचन्द्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थास्नुः स्थिरतरः स्थेयानेकरूपतया तु यः।
कालव्यापी स कूटस्थः स्थावरो जङ्गमेतरः ॥ ७१ ॥
चरिष्णु जङ्गमचरं त्रसमिङ्गं चराचरम्।
चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ॥ ७२ ॥
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे।
अतिरिक्तः समधिको दृढसंधिस्तु संहतः ॥ ७३ ॥
कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्।

स्थास्नुः (स्थानशालः इति ग्स्नुः) स्थिरतरः (अतिशयेन स्थिरः इति तरप्) स्थेयान् (अतिशयेन स्थिरः 'ईयसुनि' 'प्रियस्थिर' इति निपातनात् साधुः) ये ३ त्रि० नाम अत्यन्त स्थिर के हैं।

[1]कूटस्थः (कूटवत् तिष्ठति इति कः) यह १ त्रि० नाम सदा एक समान रहने वाले का है।

स्थावरः (स्थानशीलः इति वरच्) जङ्गमेतरः (जङ्गमादितरः) ये २ त्रि० नाम न चलने वाले वृक्षादि के है ॥ ७१ ॥

चरिष्णु (चरणशीलम् इति इष्णुच्) जङ्गमम् (वक्रं गच्छति इति यङन्तादच्) [2]चरम् (चरति इति अच्) त्रसम् (त्रसति इति अच्) [3]इङ्गम् (इङ्गति इति अच्) [4]चराचरम् (चरति इति अच् 'चरिचलि' इति द्वित्वादिः) ये ६ त्रि० नाम चलने फिरने वाले पशु-पक्षी मनुष्य आदि के हैं।

[5]चलनम् (चलनशीलम् इति युच्) [6]कम्पनम् (कम्पनशीलम् इति युच्) कम्प्रम् (कम्पनशीलम् इति रः) चलम् (चलति इति अच्) लोलम् (लोडति इति अच्, डलयोरेकत्वम्) चलाचलम् (चलति इति अच् द्वित्वादिश्च) [7]चञ्चलम् (चञ्चति इति वाहुलकादलच्) [8]तरलम् (तरति इति वाहुलकादलच्) [9]पारिप्लवम् (परिप्लवते इति अण्) परिप्लवम् (परिप्लवते इति अच्) ये १० त्रि० नाम चल (चलने वाले) के हैं।

अतिरिक्तः (अतिरिच्यते स्मेति क्तः) समधिकः (सम्यगधिकः) ये २ त्रि० नाम अतिरिक्त के हैं।

दृढसन्धिः (दृढः सन्धिः सन्धानमस्य) संहतः (संहन्यते स्मेति क्तः) ये २ त्रि० नाम अच्छी तरह मिले हुए के हैं ॥ ७२–७३ ॥

कक्खटम् (कक्खति इति अटन्) [10]कठिनम् (कठति इति इनच्) [11]क्रूरम् (कृन्तति इति रक् क्रू

---

१. कूटोऽस्त्री निश्चले राशौ। इति मेदिनी। २. चरोऽक्षद्यूतभेदे च भौमे चारे त्रसे चले। इति मेदिनी। ३. इङ्गः स्यादिङ्गितेऽद्भुते। ज्ञानजङ्गमयोश्चापि। इति हेमचन्द्रः ४. चराचरं जङ्गमे स्यादिङ्ग-विष्टपयोरपि। इति हैमः। ५. चलनं भ्रमणे कम्पे कम्प्रे तु वाच्यलिङ्गकम्। चलनी वस्त्रवयां वारिभेदेऽपि च क्वचित्। इति विश्व-मेदिन्या। ६. कम्पनं न द्वयोः कम्पे कम्प्रे स्यादभिधेयवत्। इति मेदिनी। ७. चञ्चला तु तडिल्लक्ष्म्योश्चञ्चलश्चपले (कामुके) ऽनिले। इति मेदिनी। ८. तरलं चञ्चले पिङ्गे भास्करेऽपि त्रिलिङ्गकम्। हारमध्यमणौ पुंसि यवागूसुरयोः स्त्रियाम् ॥ इति विश्वमेदिन्यौ। ९. पारिप्लवश्चाकुले स्याच्चञ्चले च। इति हैमः (मेदिनी) १०. कठिनमपि निष्ठुरे स्यात् स्तब्धेऽपि त्रिपु नपुंसकं स्याल्याम्। कठिनी खटिकायामपि कठिना गुडशर्करायां च ॥ इति विश्वः (मेदिनी)। ११. क्रूरा नृशंसघोरोऽपककठिनाः। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जरठं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ॥ ७४ ॥
पुराणे प्रतनप्रत्नपुरातनचिरंतनाः ।
प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ ७५ ॥
नूत्नश्च सुकुमारं तु कोमलं मृदुलं मृदु ।
अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥ ७६ ॥
प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ।

आदेशश्च) [१]कठोरम् (कठत् इति ओरन्) निष्ठुरम् (नितिष्ठति इति 'मद्गुरादिः') [२]दृढम् (दहंति दृंहति स्म वेति 'दृढः स्थूलबलयोः' इति निपातनात् साधुः) [३]जठरम् (जीर्यति इति बाहुलकादठच्) मूर्तिमत् (मूर्तिः काठिन्यमस्यास्ति इति मतुप्) [४]मूर्तम् (मूर्च्छति इति क्तः इडभावः नत्वाभावश्च) ये ९ त्रि० नाम कठोर के हैं ।

प्रवृद्धम् (प्रवर्धते स्मेति क्तः) प्रौढम् (प्रोह्यते स्मेति क्तः वृद्धिश्च) एधितम् (एधते स्मेति क्तः) ये ३ त्रि० नाम बढ़े हुए के हैं ॥ ७४ ॥

[५]पुराणम् (पुरा भवम् इति 'सायंचिरम्' इति ट्युः, 'पुराणप्रोक्तेषु' इति निर्देशात्तुण् न) प्रतनम् (प्रकृष्टं भवम् इति तनप्) प्रत्नः (इति प्रात् त्नः) पुरातनम् (पुरा भवम् इति ट्युः तुट् च) चिरन्तनम् (चिरं भवम् इति ट्युः निपातनात् मान्तत्वमपि) ये ५ त्रि० नाम प्राचीन के हैं ।

प्रत्यग्रः (प्रतिनवमग्रमस्य) अभिनवः (अभिनवते इति अप्) नव्यः (नवते इति यत्) नवीनः (नव एव इति खः नूरादेशः प्रत्ययस्य इनादेशश्च) नूतनः (नव एव इति तनप् नूरादेशश्च) नवः (नवते इति अप्) नूत्नः (नव एत त्नप्) ये ७ त्रि० नाम नवीन के हैं ॥ ७५ ॥

सुकुमारम् (सुष्ठु कुमार्यते कुमार-क्रीडायां धातोः घः, एरच् वा) [६]कोमलम् (कौतीति कलचि मुडागमे गुणे च) मृदुलम् (मृदुर्गुणोऽस्यास्ति इति लच्) [७]मृदु (मृद्यते इति कुः) ये ४ त्रि० नाम मुलायम के हैं ।

अन्वक् (अन्वञ्चति इति क्विन्) अन्वक्षम् (अनुगतमक्षमिन्द्रियम्) अनुगम् (अनुगच्छति इति डः) अनुपदम् (पदस्य पश्चात् पश्चादर्थेऽव्ययीभाव अव्यय हैं ।) ये ४ त्रि० नाम पीछे के हैं । अनुगे वर्तमानम् अन्वग् अन्वक्षम् अनुपदम्–त्रयमव्ययम् , क्लीबत्व तु अन्वक्षानुपदयोरेव ॥ ७६ ॥

प्रत्यक्षम् (अक्षमिन्द्रियम् प्रतिगतम् इति अत्यादयः इति समासः) ऐन्द्रियकम् (इन्द्रियेणानुभूयते इति वुञ्) ये २ त्रि० नाम इन्द्रिय से ग्रहण किये हुए के हैं ।

अप्रत्यक्षम् (भिन्नं प्रत्यक्षात्) अतीन्द्रियम् (इन्द्रियमतिक्रान्तम्) ये २ त्रि० नाम इन्द्रिय से ग्रहण न किये हुए के हैं ।

---

१. कठोरौ पूर्णकठिनौ इति हैमः । २. दृढं स्थूले नितान्ते च प्रगाढ़े बलवत्यपि । इति मेदिनी । ३. जरठः कर्कशे पाण्डौ कठिनेऽप्यमिधेयवत् । इति विश्वः । ४. मूर्तं स्यात्त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि । इति विश्वः (मेदिनी) । ५. पुराणं प्रत्नशास्त्रयोः । पुराणः षोडशपले । इति हैमः । ६. कोमलं मृदुले जले । इति विश्वः (मेदिनी) । ७. मृदृतीक्ष्णे च कोमले । इति हैमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥ ७७ ॥
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि सः ।
पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम् ॥ ७८ ॥
अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः ।
मोघं निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥ ७९ ॥
साधारणं तु सामान्यमेकाकी त्वेक एककः ।
भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ॥ ८० ॥

एकतानः (एकं तानयति इति अण् एकस्तानो विस्तारोऽस्य वा) अनन्यवृत्तिः (न अन्या वृत्तिरस्य) एकाग्रः (एकम् एकस्मिन् वा अग्रमस्य) एकायनः (एकमयनमस्य) एकसर्गः (एक एकस्मिन् सर्गो निश्चयोऽस्य) एकाग्र्यः (एकमग्र्यम् ज्ञेयमस्य) एकायनगतः (एकं च तदयनं च एकायनं गतः, एकस्मिन्नयने गतं ज्ञानमस्य वा) ये ९ त्रि० नाम एकाग्र के हैं ।

[1]आदिः (प्रथमम् आदीयते इति किः) [2]पूर्वः (पूर्वति इति अच्) पौरस्त्यः (पुरो भवः इति त्यक्) [3]प्रथमः (प्रथते इति अमच्) आद्यः (आदौ भवः इति यत्) ये ५ त्रि० नाम प्रथम के हैं ॥७७-७८॥

पुंनपुंसकयोः—[4]अन्तः (अमति इति बाहुलकात्तन्) [5]जघन्यम् (जघने भवम् इति यत्) चरमम् (चरति इति अमच्) [6]अन्त्यः (अन्ते भवम् इति यत्) पाश्चात्यः (पश्चाद् भव इति त्यक्) पश्चिमः (पश्चाद् भवम् इति डिमच्) ये ६ नाम अन्त के हैं जिनमें १ पुं० न०, ५ त्रि० के हैं ।

[7]मोघम् (मुह्यन्त्यस्मिन् इति घञ् , न्यङ्क्वादिः) निरर्थकम् (निर्गतोऽर्थोऽस्मात्) ये २ त्रि० नाम निष्फल के हैं ।

स्पष्टम् (स्पाश्यते इति ण्यन्तः, क्तः, 'वा दान्त' इति साधुः) [8]स्फुटम् (स्फुटति इति कः) प्रव्यक्तम् (प्रव्यज्यते स्मेति क्तः) उल्बणम् (उद्बणति इति अच् पृषोदरादिः) ये ४ त्रि० नाम स्पष्ट के हैं ॥७९॥

साधारणम् (सह आधारेण इति स्वार्थेऽञ् सभावश्च साधारणी साधारणा च) सामान्यम् (सह मानेन इति समानस्य सभावः ततः ष्यञ् स्वार्थे) ये २ त्रि० नाम साधारण के हैं ।

एकाकी (एक एव इति आकिनिच्) एककः (एक एव इति कन्) [9]एकः (एक एवेति कनो लुक्) ये ३ त्रि० नाम असहाय के हैं ।

भिन्नः (भिन्नोऽर्थो येषां ते) अन्यतरः (अन्य एव इति स्वार्थे तरप्) एकः (एति इति कन्) त्वः (तनोति इति वः) [10]अन्यः (अनिति इति यः) [11]इतरः (तरणम् इति अप्, एः कामस्य तरः) ये ६ त्रि० नाम भिन्न अलग के हैं ॥ ८० ॥

---

१. सामीप्ये च व्यवस्थायां प्रकारेऽवयवे तथा । चतुःष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेदिति । २. पूर्वं तु पूर्वजे । प्रागयं श्रुतभेदेषु । इति हैमः । ३. प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत् । इति मेदिनी । ४. अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । (अवयवेऽपि) इति हेमचन्द्रः । ५. जघन्यं मेहने क्लीबं चरमे गर्हितेऽन्यवत् । इति मेदिनी । ६. अन्त्यस्त्वन्तभवेऽधमे । इति हैमः । ७. मोघो दिने निष्फले च मोघा स्यात्पाटलातरौ । इति हैमः । ८. स्फुटो व्यक्तप्रफुल्लयोः । सिते व्याप्ते । इति हैमः । ९. एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु । इति मेदिनी । १०. अन्योऽसदृशेतरयोः । इति हैमः । ११. इतरः पामरेऽन्यस्मिन् । इति हेमचन्द्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उच्चावचं नैकभेदमुच्चण्डमविलम्बितम् ।
अरुन्तुदं तु मर्मस्पृगबाधं तु निरर्गलम् ॥ ८१ ॥
प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ।
वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिणम् ॥ ८२ ॥
संकटं ना तु संबाधः कलिलं गहनं समे ।
संकीर्णे संकुलाकीर्णे मुण्डितं परिवापितम् ॥ ८३ ॥

उच्चावचम् (उदक् च अवाक् च इति मयूरव्यंसकादिना साधुः) नैकभेदम् (एको भेदोऽस्य न एकभेदम् इति 'सुप्सुपा' इति समासः) ये २ त्रि० नाम अनेक प्रकार के हैं ।

उच्चण्डम् (उच्चण्डनम् इति घञ्) अविलम्बितम् (विलम्ब्यते इति क्तः, न विलम्बितम्) ये २ त्रि० नाम शीघ्रता करने के हैं ।

अरुन्तुदम् (अरूंषि तुदति इति खच् मुम् च) मर्मस्पृक् (मर्म स्पृशति इति क्विन्) ये २ त्रि० नाम मर्मस्थल को पीड़ा देने वाले के हैं ।

अबाधम् (न बाधाऽस्य) निरर्गलम् (निष्क्रान्तमर्गलायाः इति समासः) ये २ त्रि० नाम बाधा-रहित (बिना रोकटोक) के हैं ॥ ८१ ॥

[1]प्रसव्यम् (प्रगतं सव्यात्) प्रतिकूलम् (प्रतीपं कूलात्) [2]अपसव्यम् (अपगतं सव्यात्) [3]अपष्ठु (अपतिष्ठति इति कुः आलोपे षत्वे च) ये ४ त्रि० नाम प्रतिकूल के हैं ।

[4]सव्यम् (सूयते इति यत्) यह १ त्रि० नाम शरीर के बाम भाग का है । शरीरे यद् वामं तत् सव्यं स्यादिति सम्बन्धः ।

दक्षिणाङ्गे—अपसव्यम् (अपक्रान्तं सव्यात्) यह १ त्रि० नाम शरीर के दाहिने भाग का है ॥८२॥

संकटम् (संकटति इति अच्) [5]संबाधः (सम्यग् बाधन्तेऽत्र इति घञ् नि० पु०) ये २ त्रि० नाम संकीर्ण (मार्ग या गली) के हैं ।

कलिलम् (कलते कल्यते वेति इलच्) [6]गहनम् (गाह्यते इति युच् ह्रस्वश्च) ये २ त्रि० नाम कठिनाई से प्रवेश करने योग्य गली जङ्गल आदि के हैं ।

[7]संकीर्णम् (संकीर्यते स्मेति क्तः) संकुलम् (संकोलति इति कः) आकीर्णम् (आकीर्यते स्मेति क्तः) ये ३ त्रि० नाम देवदर्शन, सभा आदि के कारण मनुष्यों से ठसाठस भरे हुए स्थान के हैं ।

मुण्डितम् (मुण्ड्यते स्मेति क्तः) परिवापितम् (परिवाप्यते स्मेति क्तः) ये २ त्रि० नाम मुण्डन किये हुए के हैं ॥ ८३ ॥

---

१. प्रसव्यं वाच्यलिङ्गं च प्रतिकूलानुकूलयोः । इति मेदिनी । २. अपसव्यं त्रिलिङ्गं तु दक्षिण-प्रतिकूलयोः । इति मेदिनी । ३. अपष्ठुः पुंसि काले च वामे स्यादन्यलिङ्गकः । इति मेदिनी । ४. सव्यं वामे च दक्षिणे । इत्यजयः । सव्यं तु दक्षिणे । वामे च प्रतिकूले च । इति विश्वः (हैमः) । ५. संबाधः संकटे भगे । इति विश्वः । भगे यथा-करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिटे । उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥ इति अनेकार्थकैरवाकरकौमुदी । ६. गहनं वनदुःखयोः । गह्वरे कलिले चापि । इति विश्वहैमौ । ७. संकीर्णं निचितेऽपि स्यादशुद्धे त्वभिधेयवत् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रन्थितं संदितं दृब्धं विसृत त्रिस्तृतं ततम् ।
अन्तर्गतं विस्मृतं स्यात् प्राप्तप्रणिहिते समे ॥ ८४ ॥
वेल्लितप्रेङ्खिताधूत-चलिताकम्पिता धुते ।
नुत्तनुन्नास्तनिष्ठ्यूतवद्धक्षिप्तेरिताः समाः ॥ ८५ ॥
परिक्षिप्तं तु निवृतं मूषित मुषितार्थकम् ।
प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते ॥ ८६ ॥

[1]ग्रन्थितम् (ग्रथ्यते स्मेति क्तः, ग्रन्थसन्दर्भे अस्मात् क्तः नलोपे च) सन्दितम् (संदीयते स्मेति क्त इत्वञ्च) दृब्धम् (दृभ्यते स्मेति क्तः) ये ३ त्रि० नाम गुथी हुई माला आदि के हैं ।

विसृतम् (विसरति स्मेति क्तः) विस्तृतम् (विस्तीर्यते स्मेति क्तः) [2]ततम् (तन्यते स्मेति क्तः) ये ३ त्रि० नाम फैले हुए के हैं

[3]अन्तर्गतम् (अन्तर्गम्यते स्मेति, गच्छति स्म वा क्तः) विस्मृतम् (विस्मर्यते स्मेति क्तः) ये २ त्रि० नाम भूले हुए के हैं ।

[4]प्राप्तम् (प्राप्यते स्मेति क्तः) प्रणिहितम् (प्रणिधीयते स्मेति क्तः, दधातेर्हिः) ये २ त्रि० नाम प्राप्त किये हुए के हैं ॥ ८४ ॥

[5]वेल्लितः (वेल्ल्यते स्मेति क्तः) प्रेङ्खितः (प्रेङ्खते स्मेति क्तः) आधूतः (आधूयते स्मेति क्तः) चलितः (चल्यते स्मेति क्तः) आकम्पितः (आकम्प्यते स्मेति क्तः) [6]धुतः (धूयते स्मेति क्तः) ये ६ त्रि० नाम थोड़ा-सा कँपे हुए (ईषत्कम्पित) के हैं ।

नुत्तः (नुद्यते स्मेति क्तः) नुन्नः (नुद्यते स्मेति क्तः वा नत्वञ्च) [7]अस्तः (अस्यते स्मेति क्तः) निष्ठ्यूतः (निष्ठीव्यते स्मेति क्तः, इडभावः ऊठ्च) [8]आविद्धः (आविध्यते स्मेति क्तः) क्षिप्तः (क्षिप्यते स्मेति क्तः) ईरितः (ईर्यते स्मेति क्तः) ये ७ त्रि० नाम भेजे या किसी कार्य में लगाये हुए (प्रेरित) के हैं ॥ ८५ ॥

परिक्षिप्तम् (परितः क्षिप्यते स्मेति क्तः) निवृतम् (निव्रियते स्मेति क्तः) ये २ त्रि० नाम खाँई या दीवाल से घिरे हुए के हैं । मूषितम् (मूष्यते स्मेति कर्मणि क्तः) मुषितम् (मुष्यते स्मेति क्रैयादिकात्कर्मणि क्तः) ये २ त्रि० नाम चुराये हुए के हैं । प्रवृद्धम् (प्रवर्धते स्मेति क्तः) प्रसृतम् (प्रसरति स्मेति क्तः) ये २ त्रि० नाम पसरे हुए के हैं । न्यस्तम् (न्यस्यते स्मेति क्तः) निसृष्टम् (निसृज्यते स्मेति क्तः) ये २ त्रि० नाम फेंके हुए के हैं । गुणितम् (गुण्यते स्मेति क्तः) आहतम् (आहन्यते स्मेति क्तः) ये २ त्रि० नाम गुणा किये हुए अङ्क या बटी हुई रस्सी आदि के हैं ॥ ८६ ॥

१. ग्रन्थितं गुम्फिते क्रान्ते हिंसिते च त्रिलिङ्गकम् । इति मेदिनी । २. ततं व्याप्ते विस्तृते च त्रिलिङ्गकम् । क्लीबं वीणादिवाद्ये स्यात्पुंल्लिङ्गस्तु सदागतौ इति मेदिनी । ३. अन्तर्गतं विस्मृते स्यान्मध्यप्राप्ते च वाच्यवत् । इति विश्वः (मेदिनी) । ४. प्राप्तं लब्धं समञ्जसे । इति मेदिनी । ५. वेल्लितं गमने क्लीबं कुटिले विधुते त्रिषु । इति मेदिनी । ६. धुतम् । त्यक्ते विधूते । इति हैमः (मेदिनी च) । ७. अस्तः क्षिप्ते पश्चिमाद्रौ । इति हैमः । ८. अविद्धो वाच्यलिङ्गः स्यात्कुटिले च पराहते । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निदिग्धोपचिते गूढगुप्ते गुण्ठितरूषिते ।
द्रुतावदीर्णे उद्गूर्णोद्यते काचितशिक्यिते ॥ ८७ ॥
घ्राणघ्राते दिग्धलिप्ते समुदक्तोद्धृते समे ।
वेष्टितं स्याद्वलयितं संवीतं रुद्धमावृतम् ॥ ८८ ॥
रुग्णं भुग्नेऽथ निशितक्ष्णुतशातानि तेजिते ।
रुग्णं भुग्नेऽथ निशितक्ष्णुतशातानि तेजिते ।

निदिग्धम् (निदिह्यते स्मेति क्तः) [1]उपचितम् (उपचीयते स्मेति क्तः) ये २ त्रि० नाम बढ़े हुए के हैं । [2]गूढम् (गुह्यते स्मेति क्तः) [3]गुप्तम् (गुप्यते स्मेति क्तः) ये २ त्रि० नाम गुप्त के हैं । गुण्ठितम् (गुण्ठ्यते स्मेति क्तः) रूषितम् (रूष्यते स्मेति क्तः) ये २ त्रि० नाम धूल आदि में लिपटे हुए के हैं । [4]द्रुतम् (द्रूयते स्मेति क्तः) अवदीर्णः (अवदीर्यते स्मेति क्तः) ये २ त्रि० नाम पिघले हुए के हैं । उद्गूर्णम् (उद्गूर्यते स्मेति क्तः) उद्यतम् (उद्यम्यते स्मेति क्तः) ये २ त्रि० नाम उठाकर तौल आदि अन्दाजा किये हुए के हैं । काचितम् (काचे धृतम् इति प्रातिपदिकाद्धात्वर्थे णिचि, क्तश्च) शिक्यितम् (शिक्ये धृतम् इति प्रातिपदिकाद्धात्वर्थे णिचि, क्तश्च) ये २ त्रि० नाम सिकहर पर रक्खे हुए के हैं ॥८७॥

[5]घ्राणम् (घ्रायते स्मेति क्तः नत्वणत्वे च) घ्रातम् (नत्वाभावे इदं रूपम्) ये २ त्रि० नाम सूँघे हुए के हैं

[6]दिग्धम् (दिह्यते स्मेति क्तः) [7]लिप्तम् (लिप्यते स्मेति क्तः) ये २ त्रि० नाम लिपे हुए (स्थान आदि) के हैं ।

समुदक्तम् (समुदच्यते स्मेति क्तः) [8]उद्धृतम् (उद्ध्रियते स्मेति क्तः) ये २ त्रि० नाम कूप आदि से निकाले हुए जल आदि के हैं ।

[9]वेष्टितम् (वेष्ट्यते स्मेति क्तः) वलयितम् (वलयवत् कृतम् इति णिचि क्तश्च) संवीतम् (संवीयते स्मेति क्तः) रुद्धम् (रुध्यते स्मेति क्तः) आवृतम् (आव्रियते स्मेति क्तः) ये ५ त्रि० नाम चारों तरफ घिरे हुए के हैं ॥ ८८ ॥

रुग्णम् (रुज्यते स्मेति क्तः नत्वे णत्वे च) भुग्नम् (भुज्यते स्मेति क्तः) ये २ त्रि० नाम व्यथित या टेढ़े टूटे हुए के हैं ।

निशितम् (निशीयते स्मेति क्तः वेत्वञ्च) क्ष्णुतम् (क्ष्णूयते स्मेति क्तः) शातम् (शायते स्मेति क्तः) तेजितम् (तेज्यते स्मेति क्तः) ये ४ त्रि० नाम शान आदि देकर तेज किए हुए (चाकू, भाला आदि) के हैं ।

---

१. भवेदुपचितं दिग्धे समृद्धे वाच्यलिङ्गकम् । इति मेदिनी । २. गूढं रहसि गुह्ये च न द्वयोः संवृत्ते त्रिषु । इति मेदिनी । ३. गुप्तं गूढे त्राते । इति हैमः । ४. द्रुतं शीघ्रविलीनयोः । इति हैमः ५. घ्राणं तु घ्रातघोणयोः । इति हैमः । ६. दिग्धो विषाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गकः । इति मेदिनी । ७. लिप्तं भुक्तविलिप्तयोः । विषाक्ते । इति हैमः । ८. उद्धृतं स्यात् त्रिषूत्क्षिप्ते परिमुक्तोज्झितेऽपि च । इति मेदिनी । ९. वेष्टितं रुद्धे लासके करणान्तरे । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याद्विनाशोन्मुखं पक्वं ह्रीणह्रीतौ तु लज्जिते ॥ ८९ ॥
वृत्ते तु वृतव्यावृत्तौ संयोजित उपाहितः ।
प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्रुतं स्नुतम् ॥ ९० ॥
संगूढः स्यात्संकलितोऽवगीतः ख्यातगर्हणः ।
विविधः स्याद्बहुविधो नानारूपः पृथग्विधः ॥ ९१ ॥
अवरीणो धिक्कृतश्चाप्यवध्वस्तोऽवचूर्णितः ।
अनायासकृतं फाण्टं स्वनितं ध्वनितं समे ॥ ९२ ॥

विनाशोन्मुखम् (विनशनं विनाशः इति घञ्, उद्गतं मुखमारम्भोऽस्य, विनाशे उन्मुखम्) [१]पक्वम् (पच्यते स्मेति क्तः 'पचो वः') ये २ त्रि० नाम पके हुए या शीघ्र नष्ट होने वाले के हैं ;

ह्रीणः (अह्रीपीत् इति क्तः नत्वञ्च वैकल्पिकम्) ह्रीतः (अह्रीपीत् इति क्तः नत्वाभावः) लज्जितः (लज्जा जाताऽस्येति तारकादिः) ये ३ त्रि० नाम शर्माये हुए के हैं ॥ ८९ ॥

वृत्ते वरणीकृते [२]वृतः (व्रियते स्मेति क्तः) [३]व्यावृत्तः (व्यावृत्यते स्मेति क्तः) ये ३ त्रि० नाम स्वयम्वर आदि में स्वीकार किये वर आदि के हैं। वृतु वरणे धातु से क्त करने पर 'वृत्तः' 'वावृतु' पाठ मानने वालों के मत में 'वावृत्यते स्म' कर्म में क्त होने से 'वावृत्तः' प्रयोग होगा। संयोजितः (संयोज्यते स्मेति ण्यन्तः, क्तः) [४]उपाहितः (उपाधीयते स्मेति क्तः, दधातेर्हिः) ये २ त्रि० नाम जोड़े हुए के हैं। प्राप्यम् (प्राप्यते स्मेति ण्यत्) गम्यम् (गम्यते स्मेति यत्) समासाद्यम् (समासाद्यते स्मेति ण्यत्) ये ३ त्रि० नाम जो प्राप्त हो सके उसके हैं।

स्यन्नम् (स्यन्दते स्मेति क्तः नत्वञ्च) रीणम् (रीयते स्मेति क्तः नत्वं णत्वञ्च) स्रुतम् (स्रूयते स्मेति क्तः) स्नुतम् (स्नूयते स्मेति क्तः) ये ४ त्रि० नाम टपके या बहे हुए जल आदि के हैं ॥ ९० ॥

संगूढः (संगूह्यते स्मेति क्तः) संकलितः (संकल्यते स्मेति क्तः) ये २ त्रिं० नाम जोड़े हुए अङ्क आदि के हैं। [५]अवगीतः (अवगीयते स्मेति क्तः ईत्वञ्च) ख्यातगर्हणः (ख्याता गर्हणा यस्य) ये २ त्रि० नाम संसार प्रसिद्ध निन्दित के हैं।

विविधः (विचित्रा विधा यस्य) बहुविधः (बहवो विधा यस्य) नानारूपः (नाना रूपमस्य) पृथग्विधः (पृथग् विधा यस्य) ये ४ त्रि० नाम अनेक प्रकार के हैं ॥ ९१ ॥

अवरीणः (अवरीयते स्मेति क्तः नत्वं णत्वञ्च) धिक्कृतः (धिगकारि इति क्तः) ये २ त्रि० नाम धिक्कारे हुए के हैं। [६]अवरीणः (अवरीयते स्मेति क्तः) अवचूर्णितः (अवचूर्ण्यते स्मेति ण्यन्तात् क्तः) ये २ त्रि० नाम चूर्ण किये हुए के हैं। अनायासकृतम् (अनायासेन कृतम्) फाण्टम् (फण्यते स्मेति कर्मणि क्तः 'क्षुब्धस्वान्त' इति साधुः) ये २ त्रि० नाम विना परिश्रम के तैयार होने वाले काढ़ा विशेष के हैं। स्वनितम् (स्वन्यते स्मेति क्तः) ध्वनितम् (ध्वन्यते स्मेति क्तः) ये २ त्रि० नाम अव्यक्त शब्द के हैं ॥ ९२ ॥

---

१. पक्वं परिणते नाशाभिमुखे इति हैमः। २. पौरोहित्याय भगवान् वृतः शत्रुः किलासुरैः। ३. वृत्तं कृत्तौ दृढे मृते। चरित्रे वर्तुले छन्दः स्वतीताधीतयोर्वृते। इति हेमचन्द्रः। ४. उपाहितोऽनलोत्पाते पुमानारोपिते त्रिषु। इति मेदिनी। ५. अवगीतं तु निर्वादे दृष्टगर्हितयोरपि। इति विश्वः। ६. अवध्वस्तं परित्यक्ते निन्दितेऽप्यवचूर्णिते। इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बद्धे संदानितं मूतमुद्दितं संदितं सितम् ।
निष्पक्वे क्वथितं पाके क्षीराज्यहविषां श्रृतम् ॥ ९३ ॥
निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतेऽनिले ।
पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते ॥ ९४ ॥
पुष्टे तु पुषितं सोढे क्षान्तमुद्वान्तमुद्गते ।
दान्तस्तु दमिते शान्तः शमिते प्रार्थितेऽर्दितः ॥ ९५ ॥

बद्धम् (बध्यते स्मेति क्तः) संदानितम् (संदान्यते स्मेति क्तः) मूतम् (मूयते स्मेति क्तः) उद्दितम् (उद्दीयते स्मेति कर्मणि क्तः दैवादिकाद्दो अवखण्डने धातोः, इत्वञ्च) संदितम् (संदीयते स्मेति क्तः इत्वञ्च पूर्ववत्) सितम् (सीयते स्मेति षिञ् बन्धने कर्मणि क्तः) ये ६ त्रि० नाम बँधे हुए के हैं ।

निष्पक्वम् (निश्चयेन पक्वम्) क्वथितम् (क्वथ्यते स्मेति क्तः) ये २ त्रि० नाम अच्छी तरह पके हुए या उबाले हुए के हैं ।

श्रृतम् (श्रायते स्मेति क्तः, 'श्रृतं पाके' इति साधुः) यह १ त्रि० नाम अच्छी तरह दूध, घी या जलमें पके हुए के हैं ॥ ९३ ॥

[1]निर्वाणः (निर्वाति स्मेति क्तः 'निर्वाणोऽवाते' इति साधुः) यह १ त्रि० नाम मोक्ष प्राप्त ऋषि या बुझी हुई अग्नि आदि के हैं । अनिले गते—निर्वातः (निर्वाति स्मेति क्तः) यह १ त्रि० नाम वायु शून्य स्थान का है । गतश्चासौ अनिलश्च तस्मिन् । पक्वम् (पच्यते स्मेति क्तः पचो वः) परिणतम् (परिणमति स्मेति क्तः) ये २ त्रि० नाम पके हुए के हैं । गूनम् (गूयते स्मेति क्तः नत्वञ्च) हन्नम् (हद्यते स्मेति क्तः) ये २ त्रि० नाम पाखाना किए हुए के हैं । मीढम् (मिह्यते स्मेति क्तः) मूत्रितम् (मूत्र्यते स्मेति क्तः) ये २ त्रि० नाम लघुशंका किए हुए के हैं ॥ ९४ ॥

पुष्टम् (पुष्यते स्मेति दैवादिकात्कर्मणि क्तः इडभावे च) पुषितम् (पुष्यते स्मेति क्तः इट्च) ये २ त्रि० नाम पाले हुए के हैं । सोढम् (सह्यते स्मेति क्तः ओत् च) क्षान्तम् (क्षम्यते स्मेति क्तः दीर्घश्च) ये २ त्रि० नाम क्षमा-सहन किये हुए के हैं । उद्वान्तम् (उद्वम्यते स्मेति क्तः) उद्गतम् (उद्गम्यते स्मेति क्तः) ये २ त्रि० नाम वमन उल्टी किए हुए के हैं । [2]दान्तः (दम्यते स्मेति क्तः, 'वा दान्तशान्त' इति साधुः) दमितः (दम्यते स्मेति क्तः इट् च) ये २ त्रि० नाम दमन किए हुए वृषभादि के हैं । [3]शान्तः (शम्यते स्मेति ण्यन्तः, क्तः) शमितः (शम्यते स्मेति क्तः इट् च) ये २ त्रि० नाम शान्त किए हुए के हैं । प्रार्थितः (प्रार्थ्यते स्मेति क्तः) [4]अर्दितः (अर्द्यते स्मेति क्तः) ये २ त्रि० नाम प्रार्थना किए हुए के हैं ॥ ९५ ॥

---

१. निर्वाणमस्तं गमने निवृत्तौ गजमज्जने । संगमेऽप्यपवर्गे च । इति विश्वः (मेदिनी च) ।
२. दान्तस्तु दमितेऽपि स्यात्तपःक्लेशसहे त्रिषु । इति मेदिनी । ३. शान्तोऽतिमुक्तरसयोः पुंसि त्रिषु शमान्विते । अव्ययं धारणे शान्तम् । इति मेदिनी । ४. अर्दितं याचितेऽपि स्याद्गतव्याधौ च हिंसिते । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञप्तस्तु ज्ञपिते छन्नश्छादिते पूजितेऽञ्चितः ।
पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः ॥ ९६ ॥
प्रुष्टप्लुष्टोषिता दग्धे तष्टत्वष्टौ तनूकृते ।
वेधितच्छिद्रितौ विद्धे विन्नवित्तौ विचारिते ॥ ९७ ॥
निष्प्रभे विगतारोकौ विलीने विद्रुतद्रुतौ ।
सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ॥ ९८ ॥

ज्ञप्तः (ज्ञप्यते स्मेति ण्यन्तात् क्तः 'वादान्त' इति साधुः) ज्ञपितः (ज्ञप्यते स्मेति क्तः इट् च) ये
२ त्रि० नाम जनाये हुए के हैं। छन्नः (छाद्यते स्मेति क्तः, 'वादान्त' इति साधुः) छादितः (छाद्यते
स्मेति क्तः इट् च) ये २ त्रि० नाम ढके (छिपाए) हुए के हैं। पूजितः (पूज्यते स्मेति क्तः) अञ्चितः
(अञ्च्यते स्मेति क्तः इट् नलोपाभावश्च) ये २ त्रि० नाम पूजा किए हुए के हैं। [1]पूर्णः (पूर्यते स्मेति
'वादान्त' इति साधुः) पूरितः (पूर्यते स्मेति क्तः इट् च) ये २ त्रि० नाम पूरा किए हुए के हैं।
क्लिष्टः (क्लिश्यते स्मेति क्रैयादिकात् क्लिशू विबाधने धातोः कर्मणि क्ते वेट्कत्वादिडभावे वत्वे ष्टुत्वे
च) क्लिशितः (क्लिश्यते स्मेति क्तः इट् च) ये २ त्रि० नाम क्लेश पाये हुए के हैं। अवसितः
(अवस्यति स्मेति कर्तरि कर्मणि वा क्तः इत्वञ्च) [2]सितः (स्यति स्मेति केवलात्पोऽन्तकर्मणि धातोः
क्तः इत्वञ्च) ये २ त्रि० नाम समाप्त किए के हैं ॥ ९६ ॥

दग्धे—प्रुष्टः (प्रुष्यते स्मेति क्तः इडभावश्च) प्लुष्टः (प्लुष्यते स्मेति क्तः) [3]उषितः (उष्यते स्मेति
क्तः इट् च) दग्धः (दह्यते स्मेति क्तः) ये ४ त्रि० नाम जले हुए के हैं। तष्टः (तक्ष्यते स्मेति क्तः)
त्वष्टः (त्वक्ष्यते स्मेति क्तः) तनूकृतः (अतनुः तनुरकारि इति क्तः दीर्घे च) ये ३ त्रि० नाम वसुला
आदि से छीलकर पतली की हुई लकड़ी आदि के हैं। वेधितः (वेध्यते स्मेति क्तः) छिद्रितः (छिद्यते
स्मेति क्तः) [4]विद्धः (विध्यते स्मेति क्तः) ये ३ त्रि० नाम वर्मा, सुई आदि से छेदे हुए के हैं।

[5]विन्नः (विद्यते स्मेति क्तः नत्वञ्च) [6]वित्तः (विद्यते स्मेति क्तः नत्वाभावश्च) विचारितः
(विचार्यते स्मेति ण्यन्तात् क्तः) ये ३ त्रि० नाम विचार किए हुए के हैं ॥ ९७ ॥

निष्प्रभः (निष्क्रान्ता प्रभाऽस्मात्) [7]विगतः (विगच्छति स्मेति क्तः) अरोकः (रोचनम् इति
घञ्, न रोकोऽस्य) ये ३ त्रि० नाम प्रभाहीन के हैं। विलीनः (विलीयते स्मेति क्तः नत्वञ्च) विद्रुतः
(विद्रवति स्मेति क्तः) [8]द्रुतः (द्रवति स्मेति क्तः) ये ३ त्रि० नाम स्वयं पिघले हुए बर्फ आदि के हैं।
[9]सिद्धः (सिध्यति स्मेति क्तः) निर्वृत्तः (निर्वर्तते स्मेति क्तः) निष्पन्नः (निष्पद्यते स्मेति क्तः) ये
३ त्रि० नाम सिद्ध हुए कार्य आदि के हैं।

दारितः (दार्यते स्मेति ण्यन्तात् क्तः) भिन्नः (भिद्यते स्मेति क्तः नत्वञ्च) भेदितः (भिद्यते स्मेति
चुरादिण्यन्तात् क्तः) ये ३ त्रि० नाम चीरे हुए काष्ठ वस्त्र आदि के हैं ॥ ९८ ॥

---

१. पूर्णः कृत्स्नं पूरिते च। इति हैमः। २. सितस्त्ववसिते बद्धे वर्णे सिता तु शर्करा। इति हैमः।
३. उषितं न्युषिते प्लुष्टे। इति हैमः। ४. विद्धं स्याद्वोधिते क्षिप्ते सदृशे बाधिते त्रिषु। इति विश्वः
(मेदिनी च)। ५. विन्नं विचारिते लब्धे। इति विश्वः मेदिनी च ६. वित्तं क्लीवं धने, वाच्यलिङ्गं
ख्याते विचारिते। इति मेदिनी। ७. विगतौ वीतनिष्प्रभौ। इति रुद्रः। ८. द्रुतं शीघ्रविलीनयोः। इति
हैमः। ९. सिद्धो व्यासादिके देवयोनौ निष्पन्नमुक्तयोः। नित्ये प्रसिद्धे। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊतं स्यूतमुतं चेति त्रितयं तन्तुसंतते ।
स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितम् ॥ ९९ ॥
वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ।
संतापितसन्तप्तौ धूपितधूपायितौ च दूनश्च ॥१००॥
हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ।
छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥१०१॥

तन्तुसन्तते—ऊतम् (ऊयते स्मेति क्तः) [1]स्यूतम् (सीव्यते स्मेति क्ते ऊठि यणि च) उतम् (ऊयते स्मेति क्ते सम्प्रसारणे च) तन्तुसन्ततम् (संतन्यते स्मेति क्ते नलोपे च सन्ततम्, तन्तुभिः संततम् इति 'कर्तृकरणे' इति समासः) ये ४ त्रि० नाम बने हुए वस्त्रादि के हैं अर्हितम् (अर्ह्यते स्मेति क्तः इडागमे) नमस्यितम् (नमः कृतम् इति क्यचि तदन्तात्कर्मणि क्ते यलोपाभावे इडागमे च) नमसितम् (नमः कृतम् इति क्यचि क्ते यलोपे च) अपचायितम् (अपचाय्यते स्मेति क्ते इडागमे च) अर्चितम् (अर्च्यते स्मेति क्तः) अपचितम् (अपचीयते स्म इति तु निपातनात् साधुः) ये ६ त्रि० नाम पूजा किये गये माता पिता देवादि) के हैं ॥ ९९ ॥

वरिवसितम् (वरिवः कृतम् इति क्यचि तदन्तात् क्ते यलोपे) वरिवस्यितम् (यलोपाभावपक्षे रूपम्) उपासितम् (उपास्यते स्मेति क्तः) उपचरितम् (उपचर्यते स्मेति क्तः) ये ४ त्रि० नाम पूजा किये गये (देवता माता पिता गुरु आदि के हैं ।

संतापितः (संतापयति स्म वा संताप्यते स्मेति कर्तरि कर्मणि वा क्तः) संतप्तः (संतप्यते स्मेति तप-सन्तापे भौवादिकात्कर्तरि कमणि वा क्तः) धूपितः (धूप्यते स्मेति क्तः आयाभावे) धूपायितः (धूपाय्यते स्मेति क्तः आयश्च) दूनः (दूयते स्मेति क्तः नत्वञ्च) ये ५ त्रि० नाम तपे या तपाये (गरम किये हुए सोना आदि) के हैं ॥ १०० ॥

[2]हृष्टः (हृष्यति इति क्तः इडभावे) मत्तः (माद्यति स्मेति क्तः नत्वाभावश्च) तृप्तः (तृप्यति स्मेति क्तः) प्रह्लन्नः (प्रह्लादते स्मेति क्तः नत्वम् ह्रस्वश्च) प्रमुदितः (प्रमोदते स्मेति क्तः) प्रीतः (प्रीयते स्मेति क्तः) ये ६ त्रि० नाम खुश हुए के हैं ।

[3]छिन्नम् (छिद्यते स्मेति क्तः नत्वञ्च) छातम् (छायते स्मेति दैवादिकात् छो-छेदने धातोः कर्मणि क्तः इत्वाभावे इदं रूपम्) लूनम् (लूयते स्मेति क्तः नत्वञ्च) कृत्तम् (कृत्यते स्मेति क्तः) दातम् (दायते स्मेति क्तः) दितम् (दीयते स्मेति दो धातोः क्तः द्यति स्यति इति इत्वम्) छितम् (छायते स्मेति क्तः वा इत्वम्) वृक्णम् (वृश्च्यते स्मेति ओव्रश्चू-छेदने धातोः क्तः सम्प्रसारणे नत्वञ्च, नत्वस्यासिद्धत्वात् व्रश्चेति षत्वे प्राप्ते निष्ठादेश-षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः इति षत्वाभावे सलोपे कुत्वे णत्वे च) ये ८ त्रि० नाम काटे हुए काष्ठ आदि के हैं ॥ १०१ ॥

१. स्यूतिः सीवनसन्तत्योः स्त्रियां स्यूतः प्रसेवके (ना त्रिषूते) । इति मेदिनी । २. हृष्टो रोमाञ्चितेऽपि स्यात् । जातहर्षे प्रतिहते विस्मितेऽप्यभिधेयवत् । इति मेदिनी । ३. छिन्नं कृत्ते त्रिलिङ्गं स्याद्गुडूच्यामपि योषिति । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।
लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥ १०२ ॥
अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ।
आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ॥ १०३ ॥
त्रातं त्राणं रक्षितमवितं गोपायितं च गुप्तं च ।
अवगणितमवमतावज्ञातेऽवमानितं च परिभूते ॥ १०४ ॥
त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे ।

स्रस्तम् (स्रस्यते स्मेति क्तः इडभावे) ध्वस्तम् (ध्वस्यते स्मेति क्तः) भ्रष्टम् (भ्रश्यते स्मेति क्तः) स्कन्नम् (स्कद्यते स्मेति क्तः नःबन्च) पन्नम् (पद्यते स्मेति क्तः नत्वञ्च) च्युतम् (च्यूयते स्मेति क्तः) गलितम् (गल्यते स्मेति क्तः इट्च) ये ७ त्रि० नाम गिरे हुए के हैं ।

लब्धम् (लभ्यते स्मेति क्तः) प्राप्तम् (प्राप्यते स्मेति क्तः) विन्नम् (विद्यते स्मेति क्तः नत्वञ्च) भावितम् (भाव्यते स्मेति णिजन्तात् क्तः) आसादितम् (आसाद्यते स्मेति ण्यन्तात् क्तः भूतम् (भाव्यते स्मेति क्तः) ये ६ त्रि० नाम प्राप्त किये हुए के हैं ॥ १०२ ॥

अन्वेषितम् (अन्वेष्यते स्मेति क्तः) गवेषितम् (गवेष्यते स्मेति क्तः) अन्विष्टम् (अन्विष्यते स्मेति क्तः) मार्गितम् (मार्ग्यते स्मेति क्तः) मृगितम् (मृग्यते स्मेति क्तः) ये २ त्रि० नाम खोजे हुए के हैं ।

[1]आर्द्रम् (अर्द्यते स्मेति रक्त्वे दीर्घश्च) सार्द्रम् (सहार्द्रत्वेनेति सह इत्यस्य सभावः) क्लिन्नम् (क्लिद्यति स्मेति क्तः नत्वञ्च) तिमितम् (तिम्यति स्मेति कर्तरि क्तः इट्च) [2]स्तिमितम् (स्तिम्यति स्मेति अकर्मकत्वात् कर्तरि क्तः इट्च) समुन्नम् (समुनति स्मेति अ० कर्तरि क्तः वा नत्वम्) नत्वाभावे—उत्तम् (उततिस्म इति कर्तरि क्तः) ये ७ त्रि० नाम भीगे हुए के हैं ॥ १०३ ॥

[3]त्राणम् (त्रायते स्मेति क्तः वा नत्वम् णत्वञ्च) त्रातम् (त्रायते स्मेति क्तः, नत्वाभावः) रक्षितम् (रक्ष्यते स्मेति क्तः इट्च) अवितम् (अव्यते स्मेति कर्मणि क्तः इडागमे च) गोपायितम् (गोपाय्यते स्मेति आयादय आर्धधातुके वा' आयान्तात् इति क्तश्च) [4]गुप्तम् (आयाभावे गुप्यते स्मेति कर्मणि क्तः) ये ६ त्रि० नाम रक्षा किये हुए (रक्षित) के हैं ।

अवगणितम् (अवगण्यते स्मेति कर्मणि क्तः) अवमतम् (अवमन्यते स्मेति कर्मणि क्तः नलोपश्च) अवज्ञातम् (अवज्ञायते स्मेति कर्मणि क्तः) अवमानितम् (अवमान्यते स्मेति कर्मणि क्तः) परिभूत (परिभूयते स्मेति कर्मणि क्तः) ये ५ त्रि० नाम अपमान किये हुए के हैं ॥ १०४ ॥

त्यक्तम् (त्यज्यते स्मेति कर्मणि क्तः) हीनम् (हीयते स्मेति कर्मणि क्तः 'घुमास्था' इति ईत्वनत्वे च) विधुतम् (विधूयते स्मेति कर्मणि क्तः) समुज्झितम् (समुज्झ्यते स्मेति कर्मणि क्तः) [1]धूतम (धूयते स्मेति कर्मणि क्तः) उत्सृष्टम् (उत्सृज्यते स्मेति कर्मणि क्तः षत्वे ष्टुत्वे च) ये ६ त्रि० नाम छोड़े हुए के हैं ।

---

१. आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिधेयवत् । इति मेदिनी । २. स्तिमितस्तरले क्लिन्ने इति रुद्रः । ३. त्राणं त्राते रक्षणे च त्रायमाणौषधावपि । इति हैमः । ४. गुप्तं गूढं त्राते । इति हैमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ॥ १०५ ॥

बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ।
ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥ १०६ ॥

संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ।
ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ॥ १०७ ॥

अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ।

उक्तम् (उच्यते स्मेति क्तः सम्प्रसारणे कुत्वे च) भाषितम् (भाष्यते स्मेति कर्मणि क्तः इट् च) उदितम् (उद्यते स्मेति क्तः सम्प्रसारणे इडागमे च) जल्पितम् (जल्प्यते स्मेति क्तः इट्च) आख्यातम् (आख्यायते स्मेति कर्मणि क्तः) अभिहितम् (अभिधीयते स्मेति क्तः दधातेर्हिश्च) लपितम् (लप्यते स्मेति क्तः इट्च) ये ७ त्रि० नाम कहे हुए के हैं ॥ १०५

[2]बुद्धम् (बुध्यते क्तः) बुधितम् (बोध्यते इति क्तः इट् च) मनितम् (मन्यते स्मेति क्तः निषेधस्यानित्यत्वात् इट्) विदितम् (विद्यते स्मेति क्तः इट् च) प्रतिपन्नम् (प्रतिपद्यते स्मेति क्तः नत्वञ्च) अवसितम् (अवसीयते स्मेति क्तः 'द्यतिस्यति' इति इत्वम्) अवगतम् (अवगम्यते स्मेति क्तः) ये ७ त्रि० नाम समझे हुए (ज्ञात) के हैं ।

ऊरीकृतम् (ऊरीक्रियते स्मेति कर्मणि क्तः) उररीकृतम् (उररीक्रियते स्मेति क्तः) अङ्गीकृतम् (ऊरीक्रियते स्मेति क्तः दीर्घे च) आश्रुतम् (आश्रूयते स्मेति क्तः) प्रतिज्ञातम् (प्रतिज्ञायते स्मेति क्तः) संगीर्णम् (संगीर्यते स्मेति क्तः नत्वं) [3]विदितम् (विद्यते स्मेति क्तः इडागमे च) संश्रुतम् (संश्रूयते स्मेति क्तः) समाहितम् (समाधीयते स्मेति क्तः दधातेर्हिश्च) उपश्रुतम् (उपश्रूयते स्मेति क्तः) उपगतम् (उपगम्यते स्मेति क्तः) ये ११ त्रि० नाम स्वीकार किये हुए के हैं ।

ईलितम् (ईड्यते स्मेति क्तः डलयोरेकत्वे लत्वे च) [4]शस्तम् (शस्यते स्मेति क्तः इडभावे च) पणायितम् (पणाय्यते स्मेति आयान्तात् क्तः, आलोपे च) पनायितम् (पनाय्यते स्मेति आयान्तात् क्तः इडागमे च) प्रणुतम् (प्रणूयते स्मेति क्तः) पणेरायाभावे पणितम् (पणाय्यते स्म इति क्तः इडागमे) पनितम् (पन्यते स्म इत्यत्रायाभावे रूपमिदम्) गीर्णम् (गीर्यते स्मेति क्तः नत्वंच) वर्णितम् (वर्ण्यते स्मेति क्तः) अभिष्टुतम् (अभिष्टूयते स्मेति क्तः) ईडितम् (ईड्यते स्मेति क्तः) स्तुतम् (स्तूयते स्मेति क्तः, स्तुतमर्थो येषां तानि) ये १२ त्रि० नाम बड़ाई (सराहना) किये हुए के हैं ॥ १०६–१०७[1]

---

१. धूतो कम्पितभर्त्सितौ । इति हेमचन्द्रः । २. बुद्धः पण्डिते बोधिते जिने । इति हैमः । ३. विदितं बुधिताश्रुतयोः । इति मेदिनी । ४. शस्तं क्षेमे प्रशस्ते च । इति हैमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्षितचर्वितलीढप्रत्यवसितगिलितखादितप्सातम् ॥ १०८ ॥
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते ।
क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ॥ १०९ ॥
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुलप्रकर्षार्थाः ।
साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ॥ ११० ॥
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ॥ ११०१/२ ॥

भक्षितम् (भक्ष्यते स्मेति क्तः इट्) चर्वितम् (चर्व्यते स्मेति क्तः इडागमे) लिप्तम् (लिप्यते स्मेति क्तः) प्रत्यवसितम् (प्रत्यवसीयते स्मेति क्तः इत्वे) गिलितम् (गरणं गिलिः सा जातास्येति तारकादिः) खादितम् (खाद्यते स्मेति क्तः इडागमे च) प्सातम् (प्सायते स्मेति क्तः) अभ्यवहृतम् (अभ्यवह्रियते स्मेति क्तः) अन्नम् (अद्यते स्मेति क्तः नत्वञ्च) जग्धम् (अद्यते स्मेति क्तः 'अदोऽन्ने' इति ज्ञापकात् जग्धिर्वा धत्वे धलोपे) ग्रस्तम् (ग्रस्यते स्मेति क्तः इडभावे) ग्लस्तम् (ग्लस्यते स्मेति क्तः इडभावे) अशितम् (अश्यते स्मेति क्तः इडागमे) भुक्तम् (भुज्यते स्मेति क्तः इडभावे) ये १४ त्रि० नाम खाये-चबाये (निगले) हुए के हैं।

क्षिप्रादीनां प्रकर्ष एव अर्थो येषां ते क्षेपिष्ठादयो भवन्तीति सम्बन्धः—तथा च क्षेपिष्ठादीनां क्षिप्रादिभिर्यथासंख्यं ज्ञेयम्। क्षेपिष्ठः (अतिशयेन क्षिप्रः इति इष्ठन्. 'स्थूलदूर' इति साधुः) क्षोदिष्ठः (अतिशयेन क्षुद्रः इति इष्ठन्) प्रेष्ठः (अतिशयेन प्रियः इति 'प्रियस्थिर' इति निपातनात् साधुः) वरिष्ठः (अतिशयेन उरुः इति 'स्थूलदूर' इति निपातनात् इष्ठनि वरादेशे च साधुः) स्थविष्ठः (अतिशयेन स्थूलः इति 'स्थूलदूर' इति निपातनात् इष्ठनि यणो लोपे गुणे साधुः) बंहिष्ठः (अतिशयेन बहुलः इति इष्ठनि 'प्रियस्थिर' इति निपातनात् बंहादेशे साधुः) ये ६ त्रि० नाम क्रम से १—१ बहुत जल्द, बहुत खोटा या छोटा, बहुत प्रिय, बहुत बड़ा, बहुत मोटा, और बहुत ज्यादा के हैं।

साधिष्ठः (अतिशयेन बाढः इति इष्ठन्, 'अन्तिकबाढयोर्नेदसाधौ' इति बाढस्य साधादेशे) द्राघिष्ठः (अतिशयेन दीर्घः इति 'प्रियस्थिर' इति निपातनात् दीर्घस्य द्राघादेशे साधुः) स्फेष्ठः (अतिशयेन स्फिरः इति 'प्रियस्फिर' इति निपातनात् स्फादेशे साधुः) गरिष्ठः (अतिशयेन गुरुः इति 'प्रियस्थिर' इति निपातनात् गादेशे साधुः) ह्रसिष्ठः (अतिशयेन ह्रस्वः इति 'स्थूलदूर' इति निपातनात् वलोपे साधुः) वृन्दिष्ठः (अतिशयेन वृन्दारकः इति इष्ठनि प्रियस्थिर इति निपातनात् वृन्दादेशे साधुः) ये ६ त्रि० नाम क्रम से १—१ बहुत भला, बहुत लम्बा, अधिक स्थिर, बहुत भारी, बहुत छोटा और बहुत प्रधान के हैं। यहाँ व्यायत—बाहु-वामन शब्दों के क्रम से दीर्घ-स्फिर-ह्रस्व अर्थ होते हैं और वृन्दारक शब्द का अर्थ मुख्य होते हैं। साधिष्ठादियों का बाढादि के साथ यथासंख्य जानना चाहिये ॥ १०९-११०१/२ ॥

इति विशेष्यनिघ्नवर्गः समाप्तः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. संकीर्णवर्गः

प्रकृतिप्रत्ययार्थाद्यैः संकीर्णे लिङ्गमुन्नयेत् ।
कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्पराः ॥ १ ॥
साकल्यासङ्गवचने पारायणतुरायणे ।
यदृच्छा स्वैरिता हेतुशून्या त्वास्या विलक्षणम् ॥ २ ॥

---

२. अथ संकीर्णवर्गः

(इस वर्ग में लिङ्ग ज्ञानोपाय कहते हैं)

संकीर्णे प्रकृतिप्रत्ययार्थादयैः लिङ्गमुन्नयेदिति सम्बन्धः । संकीर्ण अर्थों एवं संकीर्ण लिङ्गों से आरम्भ होने के कारण संकीर्ण वर्ग में प्रकृत्यर्थ और प्रत्ययार्थादि से लिङ्ग ज्ञान करना चाहिए । आदि-पद से रूप भेद, साहचर्य के अर्थों का संग्रह है । प्रकृत्यर्थ जैसे—'अपरस्पराः' यहाँ लिङ्गविशेष को कहने वाले प्रत्यय के अभाव से यह प्रकृति है । 'अपरे च परे च' इस विग्रह में द्वन्द्व समास हुआ और "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इस अतिदेश से पर शब्द का ही लिङ्ग होता है । यहाँ 'अपरस्पर' में 'पर' शब्द सर्वनाम होने से त्रिलिङ्ग है । समुदायपरक होने से 'द्वन्द्वे च' की अवयव में प्रवृत्ति नहीं होती । प्रत्ययार्थ जैसे—'शान्तिः' स्त्रीलिङ्ग में 'क्तिन्' प्रत्यय का विधान होने से 'शान्तिः' 'चितिः' आदि स्त्रीलिङ्ग हैं । नपुंसक में 'ल्युट्' प्रत्यय का विधान होने से 'विधूननम्' में नपुंसक लिङ्ग है । रूपभेद से कर्मादि में नपुंसकत्व और साहचर्य से डिम्बादि में पुंस्त्व की प्रसिद्धि होती है । अथवा भिन्न जातीय लिङ्गों के संसर्ग होने पर इस वर्ग में या अन्य वर्गों में प्रकृत्यर्थादि से ही लिंगों का निर्णय करना चाहिए ।

कर्म (क्रियते इति कर्मणि भावे च मनिन्) क्रिया (क्रियते इति शे, यकि रिङादेशे पक्षे श्यङि च) ये दो नाम क्रमशः १ नपुं० १ स्त्री० कार्य के हैं ।

तस्याः क्रियायाः क्रियावतां च नैरन्तर्ये गम्ये अपरस्पराः स्युरिति सम्बन्धः अपरस्पराः (अपरे च परे च इति द्वन्द्वे क्रियासातत्ये निपातनात् सुटि) यह एक नपुं० और त्रि० नाम अनवरत कार्य होते रहना और सतत कार्य करने वाला का है ।

अभिप्राय यह है कि 'अपरस्पर' शब्द के दो अर्थ हैं—१म अनवरत कार्य होते रहना, और २रा 'सतत कार्य करने वाला' यहाँ प्रथम अर्थ में–नित्य नपुंसक ही होगा । जैसे–अपरस्परं गच्छन्ति । भागुरि ने भी कहा है–निर्दिष्टं कर्म सातत्ये सुधीभिरपरस्परम् । २ रे अर्थ में अर्थात् 'सतत कार्य करने वाला' अर्थ में तीनों लिङ्ग होंगे । जैसे—अपरस्पराः पुरुषाः स्त्रियश्च गच्छन्ति, अपरस्पराणि कुलानि आदि ॥१॥

साकल्यासंगवचने साकल्यं च आसंगश्च तौ वक्तः इति ल्युटि परायणतुरायणे स्याताम् इति सम्बन्धः–

[१]पारायणम् (पारस्य अयनम् इति णत्वम्) तुरायणम् (तोतोर्ति इति कः, तुरस्यायनम् इति णत्वं च) ये २ त्रि० नाम पूर्ण कथन और प्रासङ्गिक कथन के हैं । यदृच्छा (ऋच्छनम् ऋच्छा इति अप्रत्ययः, या ऋच्छा इति 'विशेषणम्' इति समासः) स्वैरिता (स्वेनेरितुं शीलमस्येति णिनिः, स्वैरिणो भावः इति तल्) ये २ त्रि० नाम स्वतन्त्रता के हैं । [१]विलक्षणम् (विगतं लक्षणमालोचनं यत्र हेतुना कारणेन शून्या आस्या स्थितिः) यह १ न० नाम निष्कारण रुकने का है ॥ २ ॥

रत्नपारायणं नाम लङ्केयं मम मैथिली । इति भट्टिः । परायणम् इति वा पाठः । तत्र परं च तदयनं चेति विग्रहः । आश्रये तत्पराभीष्टे परायणपदं विदुः । इति शाश्वतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः ।
अवदानं कर्म वृत्तं काम्यदानं प्रवारणम् ॥ ३ ॥
वशक्रिया संवननं मूलकर्म तु कार्मणम् ।
विधूननं विधुवनं तर्पणं प्रीणनावनम् ॥ ४ ॥
पर्याप्तिः स्यात्परित्राणं हस्तवारणमित्यपि ।

शमथः (शमनम् अथच्) शमः (शमनम् इति घञ् वृद्ध्यभावश्च) शान्तिः (शमनम् इति क्तिन् दीर्घश्च) ये ३ नाम क्रम से २ पु० १ स्त्री० शान्ति के हैं । दान्तिः (दमनम् इति क्तिन् दीर्घश्च) दमथः (दमनम् इति अथच्) दमः (दमनम् इति घञ् वृद्ध्यभावश्च) ये ३ नाम क्रम से १ स्त्री० २ पु० नाम इन्द्रियों को वश में करने के हैं । अवदानम् (अवदानम् दैप् शोधने इति भावे ल्युट् अनादेशे च) कर्मवृत्तम् (वर्तनम् इति भावे क्तः, कर्मणः कर्मणि वा वृत्तम्) ये २ त्रि० नाम अच्छे कार्य के हैं । काम्यदानम् (कामोऽस्ति यत्र इति यप् काम्येनेच्छा, काम्यस्य वरस्त्री-हस्त्यश्वादेर्वा दानम्) [२]प्रवारणम् (प्रव्रियते इति ल्युट्) ये २ न० नाम इच्छानुसार दान देने के हैं ।

वशक्रिया (वशस्य करणम् कृञः शच इति शे यकि रिङादेशे च) संवननम् (संवनितम् संपूर्वः वनु याचने वशीकरणार्थे इति ल्युट् अनादेशे) ये २ नाम क्रम से १ स्त्री १ न० मन्त्र मणि आदि से वश में करने के हैं ।

मूलकर्म (ओषध्यादिमूलेन कर्म) [३]कार्मणम् (कर्म एव इति अण् वृद्धौ च) ये २ न० जड़ी बूटी आदि से मारण-मोहन आदि करने के हैं ।

विधूननम् (विधूनितम् विपूर्वकात्, धूञ् कम्पने इति चुरादिः, धूञ्प्रीञोः इति नुकि ल्युटि च) विधुवनम् (विधूतम् विपूर्वकात् धू विधूनने इति भावे ल्युट् ङित्वात् गुणाभावे) ये २ न० नाम काँपने के हैं ।

तर्पणम् (तृप्तम् तृप् प्रीणने इति भावे ल्युटि गुणे अमादेशे णत्वे) प्रीणनम् (प्रीणितम् स्वार्थण्यन्तात् प्रीञ् तर्पणे धातोः इति नुक् भावे ल्युटि च) अवनम् (अवितम् अव् रक्षणे इति ल्युट्) ये ३ न० नाम तृप्त करने के हैं ॥ ४ ॥

पर्याप्तिः (पर्यापणम्, पर्याप्नोतिः त्राणार्थस्तस्मात् क्तिन्) परित्राणम् (परित्रातम् परिपूर्वकात् त्रैङ् पालने इति ल्युट्) [४]हस्तवारणम् (वारितम् इति हस्तेन हस्तस्य वा वारणम्) ये ३ नाम क्रम से १ स्त्री० २ न० मारने के लिए उद्यम को रोकने के हैं ।

---

१. विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम् । इति भागुरिः । २. प्रवारणं महादानम् । इति त्रिकाण्डशेषः । प्रवारणं निषेधे स्यात्काम्यदाने च न द्वयोः । इति मेदिनी । ३. कार्मणं मन्त्रतन्त्रादियोजने कर्मठेऽपि च । इति मेदिनी । ४. अपिशब्दात्—'हस्तधारणम्' इति वा क्वचित्पाठः (तत्र धृञ् धारणे धातोः ण्यन्तात् भावे ल्युटि धारणम्, प्रहारोद्यतस्य हस्तस्य धारणम् रोधः इति हस्तधारणम्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ॥ ५ ॥
आक्रोशनमभीषङ्गः संवेदो वेदना न ना ।
संमूर्च्छनमभिव्याप्तिर्याच्ञा भिक्षार्थनार्दना ॥ ६ ॥
वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने ।
आप्रच्छन्नमथाम्नायः संप्रदायः क्षये क्षिया ॥ ७ ॥

सेवनम् (स्यूतम्–षिवु तन्तुसन्ताने इति ल्युट्) सीवनम् (इत्यत्र ल्युट् पृषोदरादित्वात् दीर्घश्च) (स्यूतिः षिवु तन्तुसन्ताने इति क्तिनि ऊठि यणि च) ये ३ नाम क्रम से २ न० १ स्त्री सिलाई करने के हैं।

विदरः (विदरणम् इति अपि गुणे) स्फुटितम् (स्फुट् विकसने इति ल्युट् गुणाभावे भिदा (भेदनम् भिदिर् विदारणे इति अङ् गुणाभावे टाप् च) ये ३ नाम क्रम से १ पुं० १ न० १ स्त्री फटने या अलग होने के हैं ॥ ५ ॥

आक्रोशनम् (आक्रुष्टम् क्रुश आह्वाने इति भावे ल्युट् गुणे अनादेशे च ।) अभीषङ्गः (अभिषञ्जनम् षञ्ज सङ्गे धातोर्भावे घञ् उपसर्गस्य दीर्घः कुत्वं च) ये २ नाम क्रम से १ न० १ पुं० गाली या शाप देने के हैं ।

संवेदः (संवेदनम् (संपूर्वक विद्ज्ञाने धातोर्घञ्, गुणे) वेदना (वेदयति वेद्यते वा विद-चेतनाख्याननिवासेषु इति स्वार्थण्यंतात् युच् ल्युटि सति क्लीबत्वम्) ये क्रम से १ पुं० १ स्त्री न० नाम अनुभव के हैं ।

संमूर्च्छनम् (संमूर्तम् मूर्च्छा मोहसमुच्छ्राययोः, इति भावे ल्युटि अनादेशे च) अभिव्याप्तिः (अभिव्यापनम् इति अभिपूर्वकात् आप्लृधातोः क्तिन्) ये २ नाम क्रम से १ न० १ स्त्री० चारों तरफ से भरने या बढ़ने के हैं ।

याच्ञा (याचनम् इति नङि चुत्वे टापि) भिक्षा (भिक्षणम् इति अः टापि च) अर्थना (अर्थयति अर्थ याच्ञायाम् इति युच्) अर्दना (अर्दयति अर्दगतौ याचने च इति स्वार्थण्यन्तः, युचि) ये ४ स्त्री० नाम माँगने के हैं ॥ ६ ॥

छेदने– [1]वर्धनम् (वर्धितम् वर्ध छेदनपूरणयोः इति भावे ल्युट्) छेदनम् (छिन्नम् छिदिर् द्वैधीकरणे इति भावे ल्युट्) ये २ न० नाम काटने के हैं ।

अथ–आनन्दनम् [2](आनन्दितम् टुनदि समृद्धौ इति भावे ल्युटि) सभाजनम् (सभाजितम् सभाज प्रीतिदर्शनयोः इति भा युट्) आप्रच्छन्नम् (आपृष्टम् आङ्पूर्वः प्रच्छिरानन्दनार्थ इति भावे ल्युट्) ये ३ न० नाम गुरुजन मित्र आदि के आने पर उठकर अगवानी, आलिङ्गन और कुशल-प्रश्न द्वारा उनके सत्कार करने के हैं । अथ—आम्नायः (आम्नानम् इति घञि युकि च) सम्प्रदायः (संप्रदानम् इति भावे घञि युकि च) ये २ पु० नाम कुलपरम्परागत रहन सहन या गुरुपरम्परागत उपदेश आदि के हैं) क्षयः (क्षयणम् इति अचि गुणे अयादेशे च) क्षिया (क्षीयृ हिंसायाम् इष्टि अङि तयङि टापि च) ये २ नाम क्रम से १ पुं० १ नाम घटने या कम होने के हैं ॥ ७ ॥

१. वर्धनं छेदने वृद्धौ । इति दन्तोष्ठ्यादावजयः । २. आमन्त्रणम् इति वा क्वचित् पाठः । तत्र आङ्पूर्वको मन्त्रि गुप्तपरिभाषणे चौरादिक-धातोर्भावे ल्युटि बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे ।
व्यधो वेधे पचा पाके हवो हूतो वरो वृतौ ॥ ८ ॥
ओषः प्लोषे नयो नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ ।
स्फातिर्वृद्धौ प्रथा ख्यातौ स्पृष्टिः पृक्तौ स्नवः स्रवे ॥ ९ ॥

ग्रहे ग्रहः (ग्रहणम् इति भावे अप्) ग्राहः (ग्राहणम् इति स्वार्थण्यन्ताद्भावे अचि घञि वा) ये २ पुं० नाम ग्रहण करने के हैं। कान्तौ—वशः (वशनम् वश कान्तौ इति भावे अप्) कान्तिः (कमनम् कमु कान्तौ इति भावे क्तिनि दीर्घे अनुस्वारे परसवर्णे च) ये २ नाम क्रम से १ पुं० १ स्त्री० इच्छा के हैं। त्राणे—रक्षणः (रक्षणम् रक्ष् पालने इति भावे नङ्) त्राणः (त्रातम् त्रैङ् पालने इति भावे ल्युट्) ये २ पुं० नाम रक्षा के हैं।

क्वणे—रणः (रणनम् इति अप्) क्वणः (क्वणनम् इति 'क्वणो वीणायाम्' इति निपातनात् साधुः) ये २ पुं० नाम शब्द करने के हैं।

वेधे—व्यधः (व्यधनम् इति भावे अप्) वेधः (वेधनम् विध-विधाने धातोः भावे घञि गुणे) ये २ पुं० नाम छेदने के हैं।

पाके—पचा (पचनम् इति भावे अङ् टाप् च) पाकः (पचनम् इति भावे घञ्) ये २ नाम क्रम से १ स्त्री० १ पुं० पकाने के हैं।

हवः (ह्वानम् इति भावे अप् सम्प्रसारणञ्च गुणे अवादेशे) हूतिः (ह्वानम् इति क्तिनि सम्प्रसारणे) ये २ नाम क्रम से १ पुं० १ स्त्री० पुकारने के हैं।

वृतौ— [1]वरः (वरणम् इति भावे अपि गुणे रपरे च) वृतिः (वरणम् इति भावे क्तिनि) ये २ नाम क्रम से १ पुं० १ स्त्री० वेरे या तप सेवा आदि से प्रसन्न होकर देवता गुरु आदि के वरदान के हैं ॥८॥

प्लोषे = दाहे—ओषः (ओषणम् इति भावे घञ्) प्लोषः (प्लोषणम् इति भावे घञि) ये २ पुं० नाम जलाने के हैं।

नाये नीतौ—नयः (नयनम् इति भावे घञि संज्ञापूर्वकत्वाद् वृद्ध्यभावश्च णीञ् धातोः भावे इवर्णान्तादचि वा) नायः (णीञ् प्रापणे इति भावे घञ् वृद्धिश्च) ये २ पुं० नाम नीति के हैं।

जीर्णौ—ज्यानिः (ज्यानम् इति भावे निः) जीर्णिः (जरणम् इति भावे क्तिन् इदादेशे रपरत्वदीर्घे नत्वणत्वे) ये २ स्त्री० नाम जीर्ण होने के हैं। भ्रमौ—भ्रमः (भ्रमणम् इति भावे घञि वृद्ध्यभावश्च) भ्रमिः (भ्रमणम् इति इक्) ये २ नाम क्रम से १ पुं० १ स्त्री घूमने के हैं।

वृद्धौ— [2]स्फातिः (स्फातम् स्फायी वृद्धौ इति क्तिनि यलोपे) वृद्धिः वर्धनम् इति क्तिनि धत्वे दत्वे च) ये २ स्त्री० नाम वृद्धि के हैं।

ख्यातौ—प्रथा (प्रथनम् इति भावे घटादित्वात् अङ् टाप् च) ख्यातिः (ख्यानम् इति भावे क्तिन्) ये २ स्त्री० नाम जाहिर-प्रसिद्ध होने के हैं।

पृक्तौ—स्पृष्टिः (स्पर्शनम् इति क्तिनि षत्वे ष्टुत्वे च) पृक्तिः (पर्चनम् इति क्तिनि कुत्वे च) ये २ स्त्री० नाम छूने के हैं।

स्रवे—स्नवः (स्नवनम् इति भावे अपि गुणे) स्रवः (स्रवम् इति भावे अपि) ये २ पुं० नाम शनैः २ चूने के हैं। घञ् करने पर स्नावः ३ और ४ स्रावः होंगे ॥ ९ ॥

---

१. तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः । २. स्फातिर्वृद्धिः प्रसारो ना । इति बोपालितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधा समृद्धौ स्फुरणे स्फुरणा प्रमितौ प्रमा।
प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्लमे ॥ १० ॥
उत्कर्षोऽतिशये संधिः श्लेषे विषय आशये।
क्षिपायां क्षेपणं गीर्णिर्गिरौ गुरणमुद्यमे ॥ ११ ॥
उन्नाय उन्नये श्रायः श्रयणे जयने जयः।

समृद्धौ—विधा [1] (विधानम् इति भावे अङि आलोपे टापि च) क्वचित् एधा इति पाठः, एध वृद्धौ इति अः टापि च) समृद्धिः (समर्धनम् इति भावे क्तिन्) ये २ स्त्री० नाम धन सम्पत्ति (बढ़ने) के हैं। स्फुरणे स्फुरणम् (स्फुरितम् स्फुर-स्फुरणे संचलने च इति भावे ल्युटि कुटादित्वात् गुणाभावे)स्फुरणा (स्फुर स्फुरणे संचलने च इति युच् गुणाभावश्च) ये २ नाम क्रमसे १ न० १ स्त्री फरकने के हैं।

प्रमितौ—प्रमितिः (प्रमाणम् इति भावे क्तिनि) प्रमा (प्रपूर्वको माङ् माने इति अङि टापि च) ये २ स्त्री० नाम सत्य ज्ञान के हैं। प्रसवे—प्रसूतिः (प्रसवनम् इति भावे क्तिनि) प्रसवः (प्रसवनम् इति अपि गुणे अवादेशे च) ये २ नाम क्रम से १ स्त्री० १ पुं० सन्तान उत्पन्न करने के हैं। श्च्योते क्षरणे—श्च्योतः (श्च्योतनम् इति घञि गुणे च) प्राघारः (प्रघरणम् इति भावे घञि उपसर्गस्य दीर्घे च) ये २ पुं० नाम जल आदि के धारा से चूने या बहने के हैं।

क्लमे—क्लमथः (क्लमनम् इति भावे अथचि) क्लमः (क्लमनम् इति घञि वृद्ध्यभावश्च) ये २ पुं० नाम ग्लानि के हैं ॥ १० ॥

अतिशये—उत्कर्षः (उत्कर्षणम् इति घञ्) अतिशयः (अतिशयनम् इति अच्) ये २ पुं० बड़ाई के हैं। श्लेषे—सन्धिः (संधानम् इति किः) श्लेषः (श्लेषणम् इति घञ्) ये २ पुं० नाम मेल के हैं। आशये—विषयः (विषयणम् इति अच् षत्वञ्च) आशयः (आङ्पूर्वात् शीङः अचि, आश्रयः इत्यपि पाठः ततोऽपि अच्) ये २ पुं० नाम अवलम्ब (सहारा) के हैं। क्षिपायां—क्षिपा (क्षेपणम् इति भावे अङि टापि च) क्षेपणम् (क्षिप् प्रेरणे इति ल्युटि) ये क्रम से १ स्त्री० न० नाम प्रेरित करने या फेंकने के हैं।

गिरौ—गीर्णिः (गरणम् इति गॄधातोः भावे क्तिन् इदादेशे रपरत्वे दीर्घे निष्ठावत्त्वात् नत्वे णत्वे च) गिरिः (इकि) ये २ स्त्री० नाम निगल जाने के हैं। उद्यमे—गुरणम् (गूर्णम् गुरी उद्यमे इति ल्युट् कुटादित्वात् गुणाभावे च) उद्यमः (उद्यमनम् इति घञ् वृद्ध्यभावश्च) ये २ नाम क्रम से १ न० १ पुं० उद्योग के हैं ॥ ११ ॥

उन्नये—उन्नायः (उन्नयनम् इति घञ्) उन्नयः (उन्नयनम् इति 'क्वचिदपवादविषये उत्सर्गोऽभिनिविशते' इत्यच्) ये २ पुं नाम उन्नति के हैं।

श्रयणे—श्रायः (श्रयणम् इति घञ् वृद्धौ च) श्रयणम् (श्रिञ् सेवायाम् इति ल्युट्) ये २ नाम क्रम से १ पुं० १ न० सेवा के हैं।

जयने—जयनम् (जितम् जीयते वा इति भावे ल्युट्) जयः (जयनम् इति अच्) ये २ नाम क्रम से १ न० १ पुं० विजय के हैं।

---

१. विधा गजान्ने ऋद्धौ च। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निगादो निगदे मादो मद उद्वेग उद्भ्रमे ॥ १२ ॥
विमर्दनं परिमलोऽभ्युपपत्तिरनुग्रहः ।
निग्रहस्तु निरोधः स्यादभियोगस्त्वभिग्रहः ॥ १३ ॥
मुष्टिबन्धस्तु संग्राहो डिम्बे डमरविप्लवौ ।
बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥

निगदे—निगादः (निगदनम् इति घञ् वृद्धिश्च) निगदः (निगदनम् इति अप्) ये २ पुं० नाम स्पष्ट कहने के हैं।

मदे—मादः (मदनम् इति 'सधमादस्थयोः' इति निर्देशात् क्वचित् घञपि) मदः (मदनम् इति अप्) ये २ पुं० नाम प्रसन्नता के हैं।

उद्भ्रमे—उद्वेगः (उद्वेजनम् इति घञ्) उद्भ्रमः (उद्भ्रमणम् इति घञ् वृद्धिनिषेधश्च ये २ पुं० नाम व्याकुलता के हैं ॥ १२ ॥

परिमले-विमर्दनम् (विमृदितम् मृदक्षोदे इति ल्युटि गुणे अनादेशे च) परिमलः (परिमलनम् इति घञ् वृद्ध्यभावश्च) ये २ नाम क्रम से १ न० १ पुं० शरीर में कुङ्कुम चन्दन आदि लगाने के हैं

अभ्युपपत्तिः (अभ्युपपदनम् इति भावे क्तिनि) अनुग्रहः (अनुग्रहणम् इति भावे अप्) ये २ नाम क्रम से १ स्त्री० १ पुं० कल्याण करने या अहित से बचाने के हैं।

निग्रहः (निग्रहणम् इति अपि) निरोधः (निरोधनम् इति भावे घञि गुणे च) ये २ पुं० नाम निरोध के हैं। अर्थात् अहित करने या कल्याण से बचाने के हैं।

अभियोगः (अभियोजनम् इति घञि गुणे कुत्वे च) [1]अभिग्रहः (अभिग्रहणम् इति अपि) ये २ पुं० नाम रणक्षेत्र में ललकारने के हैं ॥ १३ ॥

मुष्टिबन्धः (मुष्यते अनया क्तिनि मुष्टिः, मुष्टेः बन्धः) संग्रहः (संग्रहणम् इति घञ् वृद्धिश्च) ये २ पु० नाम मुट्ठी बाँधने के हैं।

[2]डिम्बः (डिम्बनम् इति डिवि नोदे धातोः घञ्) डमरः (डम इति शब्दस्य राणम् रा दाने इति बाहुलकाद् घञर्थे कः आलोपे) विप्लवः (विप्लवनम् इति अप्) ३ पुं० नाम प्रलय या लूटने के हैं।

बन्धनम् (बद्धम् बन्ध बन्धने इति ल्युट्) प्रसितिः (प्रसयनम् इति षिञ्धातोः क्तिन्) [3]चारः (चरणम् इति घञ् भावे, स्वारम् इति कुत्रचित् पाठः तत्र स्वरति अचि अणि च स्वारम्) ये ३ नाम क्रम से १ न० १ स्त्री० १ पुं० बन्धन के हैं।

स्पर्शः (स्पृशति इति कर्तरि घञ् । स्पशः इत्यपि पाठः तत्र स्पश् धातोः अच्) स्प्रष्टा (स्पृशति इति तृच् अमागमश्च) उपतप्ता (उपतपति इति तृच्) ये ३ पुं० नाम संतप्त या उपताप से पीड़ित के हैं ॥१४॥

---

१. अनुग्रहोऽभिग्रहणेऽप्यभियोगे च गौरवे। इति रुद्रः। २. भयध्वनौ पुष्कसेऽपि डिम्बः प्लीहनि विप्लवे। इति रभसः। ३. बन्धापसर्पयोश्चारः। इति रुद्रः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निकारो विप्रकारः स्यादाकारस्त्विङ्ग इङ्गितम् ।
परिणामो विकारो द्वे समे विकृतिविक्रिये ॥ १५ ॥
अपहारस्त्वपचयः समाहारः समुच्चयः ।
प्रत्याहार उपादानं विहारस्तु परिक्रमः ॥ १६ ॥
अभिहारोऽभिग्रहणं निर्हारोऽभ्यवकर्षणम् ।
अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः ॥ १७ ॥

---

[1]निकारः (निकृष्टीकरणम् इति भावे घञ् वृद्धौ) विप्रकारः (विप्रकरणम् इति भावे घञि वृद्धौ) ये २ पु० नाम अपकार के हैं ।

आकारः (आकरणम् इति घञ्) इङ्गः (इङ्गनम् इति घञ्) इङ्गितम् (इङ्गनम् इति क्तः इट् च) ये ३ नाम क्रम से २ पुं० १ न० अभिप्राय के अनुरूप चेष्टा के हैं ।

परिणामः (परिणमनम् इति परिपूर्वकाद् णम् धातोः भावे घञि वृद्धौ) विकारः (विकरणम् इति विपूर्वकात्कृधातोर्भावे घञि वृद्धौ) विकृतिः (विकरणम् इति क्तिन्) विक्रिया (विकरणम् इति 'कृञः शः' शे यकि रिगागमे च) ये ४ नाम क्रम से २ पुं० २ स्त्री०, स्वभाव के विकृत होने के हैं ॥ १५ ॥

अपहारः (अपहरणम् इति घञि वृद्धौ) अपचयः (अपचयनम् इति अच्) ये २ पुं० नाम अपहरण करने के हैं ।

समाहारः (समाहरणम् इति घञ्) समुच्चयः (समुच्चयनम् इति अच्) ये २ पुं० नाम इकट्ठा करने के हैं ।

प्रत्याहारः (प्रत्याहरणम् इति घञ्) उपादानम् (उपात्तम् , उपाङ् पूर्वकात् दाञो भावे ल्युटि) ये २ नाम क्रम से १ पुं० १ न० अपने २ विषयों से इन्द्रियों को हटाकर वशीभूत करने के हैं ।

विहारः (विहरणम् इति घञ्) परिक्रमः (परिक्रमणम् इति घञ् वृद्ध्यभावश्च) ये २ पुं० नाम क्रीडार्थ पैदल चलने के हैं ॥ १६ ॥

अभिहारः (अभिहरणम् इति घञ्) अभिग्रहणम् (अभिगृहीतम् अभिग्रहेः ल्युटि णत्वे च) ये २ नाम क्रम से १ पुं० १ न० चुराने के हैं ।

निर्हारः (निर्हरणम् इति घञ्) अभ्यवकर्षणम् (अभ्यवकृष्टम् अभ्यवपूर्वकात् कृषेः ल्युटि णत्वं च) ये २ नाम क्रम से १ पुं० १ न० चरण आदि में गड़े हुए काँटे आदि को निकालने के हैं ।

अनुहारः (अनुहरणम् इति घञ्) अनुकारः (अनुकरणम् इति घञ्) ये २ पुं० नाम नकल करने के हैं ।

व्ययः (व्ययनम् इति घञ् अज्वा) यह १ पुं० नाम धन खर्च करने का है १७ ॥

---

१. निकारः स्यात् परिभवे धान्यस्योत्क्षेपणेऽपि च । इति धरणिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवाहस्तु प्रवृत्तिः स्यात् प्रवहो गमनं बहिः ।
वियामो वियमो यामो यमः संयामसंयमौ ॥ १८ ॥
हिंसाकर्माऽभिचारः स्याज्जागर्या जागरा द्वयोः ।
विघ्नोऽन्तरायः प्रत्यूहः स्यादुपघ्नोऽन्तिकाश्रये ॥ १९ ॥
निर्वेश उपभोगः स्यात् परिसर्पः परिक्रिया ।
विधुरं तु प्रविश्लेषेऽभिप्रायश्छन्द आशयः ॥ २० ॥

प्रवाहः (प्रवहणम् इति घञि वृद्धौ च) प्रवृत्तिः (प्रवर्तनम् इति क्तिन्) ये २ नाम क्रम से १ पुं० १ स्त्री० जल आदि के अनवरत प्रवाह (बहने) के हैं ।

[१]प्रवहः (बहिर्गमनम् प्रवहः प्रकृष्टो वहः इति 'गोचरसंचर' इति निपातनात् घान्तो वहः साधुः) यह १ पुं० नाम बाहर यात्रा का है ।

वियामः (वियमनम् इति घञ्) वियमः (वियमनम् इति अप्) यामः (यमनम् इति घञ्) यमः (यमनम् इति अप्) संयामः (संयमनम् इति घञ्) संयमः (संयमनम् इति अप्) ये ६ पुं० नाम संयम के हैं ॥ १८ ॥

हिंसाकर्म (हिंसाफलं कर्म इति शाकपार्थिवादित्वात् मध्यमपदलोपे) अभिचारः (अभिचरणम् इति घञ्) ये २ नाम क्रम से १ न० १ पुं० मारण आदि क्रिया के हैं ।

जागर्या (जागरणम् इति भावे शे यकि गुणे टापि जागर्या गुणात्परत्वाद्रिङादेशे जाग्रिया, क्तिनि जागर्तिः अपि) जागरा (जागरणम् इति जागर्तेरकारो वा इति अप्रत्यये गुणे टापि च) ये २ नाम क्रम से १ स्त्री १ स्त्री पुं० जागरण के हैं ।

विघ्नः (विहननम् इति घञर्थे कः उपधालोपे कुत्वे) अन्तरायः (अन्तर्मध्ये अन्तरस्य व्यवधानस्य वा अयनम् इति अयगतौ इति धातोः घञ् अज् वा) प्रत्यूहः (प्रत्यूहनम् इति घञ्) ये ३ पुं० नाम विघ्न के हैं।

उपघ्नः (उपहन्यते उपहननं वा अप्प्रत्यये, उपधालोपे कुत्वे च 'उपघ्न आश्रये' इति निपातनात् साधुः) अन्तिकाश्रयः (अन्तिके आश्रीयते इति अच्) ये २ पुं० नाम समीप में रहने (आश्रय करने) वाले के हैं ॥ १९ ॥

निर्वेशः (निर्वेशनम् इति घञ्) उपभोगः (उपभोजनम् इति घञि गुणे कुत्वे च) ये २ पुं० नाम उपभोग के हैं ।

परिसर्पः (परि समन्तात् सर्पणम् इति घञ्) परिक्रिया (परिकरणम् इति कृञः शे यकि रिङादेशे च) ये २ नाम क्रम से १ पुं० १ स्त्री० परिजन आदि से घिरे रहने के हैं ।

[२]विधुरम् (विगता धूः कार्यभारः इति अः क्लीबत्वं लोकात्) प्रविश्लेषः (प्रविश्लेषणम् इति घञि गुणे) ये २ नाम क्रम से १ न० १ पुं० परिवार आदि से अलग होने के हैं ।।

अभिप्रायः (अभिप्रयणम् इति घञ्) छन्दः (छन्दनम् इति छदि धातोः घञ्) आशयः (आशयनम् इति अच्) ये ३ पुं० नाम अभिप्राय के हैं ॥ २० ॥

---

१. प्रवहस्तु बहिर्यात्रा मातरिश्वप्रभेदयोः । इति विश्वः (मेदिनी च) । २. वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिषु । इति त्रिकाण्डशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्षेपणं समसनं पर्यवस्था विरोधनम् ।
परिसर्या परीसारः स्यादास्या त्वासना स्थितिः ॥ २१ ॥
विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः ।
संवाहनं मर्दनं स्याद्विनाशः स्याददर्शनम् ॥ २२ ॥
संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणम् ।
नीवाकस्तु प्रयामः स्यात् संनिधिः संनिकर्षणम् ॥ २३ ॥

संक्षेपणम् (संक्षिप्तम् संक्षिपेः ल्युट्) समसनम् (समस्तम् सम्पूर्वकः असु क्षेपणे इति ल्युट्) ये २ न० नाम संक्षेप करने के हैं ।

पर्यवस्था (पर्यवस्थानम् इति अङि आलोपे टापि च) विरोधनम् (विरुद्धम् विपूर्वको रुधिर आवरणे इति ल्युट्) ये २ नाम क्रम से १ स्त्री० १ न० विरोध करने के हैं ।

परिसर्या (परिसरणम् इति 'परिचर्या परिसर्या' इति निपातनात् साधुः) परीसारः (परिसरणम् इति घञि उपसर्गस्य दीर्घवृद्धी) ये २ नाम क्रम से १ स्त्री० १ पुं० सब दिशा में जाने के हैं ।

आस्या (आसनम् इति ण्यत्) आसना (आसनम् इति युच्) स्थिति. (स्थानम् इति क्तिन् इत्वञ्च) ये ३ स्त्री० नाम टिकाव या स्थिति के हैं ॥ २१ ॥

विस्तारः (विस्तरणम् इति घञ्) विग्रहः (विग्रहणम् इति अप्) व्यासः (व्यसनम् इति घञ्) ये ३ पुं० नाम विस्तार के हैं ।

स च व्यासः शब्दस्य चेत्तदा—विस्तरः (विस्तरणम् इति अप्) यह १ पुं० नाम शब्द विस्तार का है ।

[1]संवाहनम् (संवाहितम् वह प्रापणे इति स्वार्थण्यन्तात् ल्युट्) मर्दनम् (मृदितम् मृदक्षोदे इति धातुः तस्मात् ल्युट्) ये २ न० नाम शरीर मर्दन करने (दवाने) के हैं

विनाशः (विनशनम् इति घञ् वृद्धिश्च) अदर्शनम् (दर्शनस्य अभावः, ल्युट्) ये २ नाम क्रम से १ पुं० १ न० तिरोधान (छिप जाने) के हैं ॥ २२ ॥

संस्तवः (संस्तवनम इति अप्) परिचयः (परि समन्ताच्चयनम् इति अच्) ये २ पुं० नाम परिचय (पहिचान) के हैं ।

प्रसरः (प्रसरणम् इति वाहुलकादप्) विसर्पणम् (विसृप्तम् सृप्लृ गतौ इति ल्युटि गुणे च) ये २ नाम क्रम से १ पुं० १ न० व्रण (घांव) के फैलने के हैं ।

नीवाकः (निवचनम् इति घञ् उपसर्गस्य दीर्घश्च) प्रयामः (प्रयमणम् इति घञ्) ये २ पुं० नाम धान्य संचय (इकट्ठा) करने के हैं ।

संन्निधिः (संनिधानम् इति किः) संनिकर्षणम् (संनिकृष्टम् कृषेर्भावे ल्युट् णत्वञ्च) ये २ नाम क्रम से १ पुं० १ न० नजदीक करने के हैं ॥ २३ ॥

---

१. संभोगान्ते सभमुपचितौ हस्तसंवाहनानाम् । इति मेघदूतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लवोऽभिलावो लवने निष्पावः पवने पवः ।
प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनम् ॥ २४ ॥
प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ ।
धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः ॥ २५ ॥
प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रम ।

लवः (लवनम् इति अप्) अभिलावः (अभिलवनम् इति घञ् वृद्धिश्च) लवनम् (लूनम् , लूञ् धातोर्भावे ल्युट्) ये ३ नाम क्रम से २ पुं० १ न० काटने के हैं।

पवने—निष्पावः (निष्पवनम् इति घञ्) पवनम् (पूतम् इति विग्रहे तु ल्युटि गुणे) पवः (अत्र तु अप्) ये ३ नाम क्रम से १ पुं० १ न० १ पुं० धान आदि को ओसाकर भूसा अलग करने के हैं।

प्रस्तावः (प्रस्तवनम् इति घञ्) अवसरः (अवसरणम् इति बाहुलकादप्) ये २ पुं० नाम प्रसङ्ग के हैं।

त्रसरः (त्रसनम् इति बाहुलकात् अरन् तसरः इत्यपि पाठः तत्र तु क्सरन् बोध्यः (सूत्रवेष्टनम् (सूत्रस्य वेष्टनम्) ये २ नाम क्रम से १ पुं० १ न० वस्त्र बनाने के लिए तन्तुवाय (जुलाहा) आदि के सूत लपेटने की नरी के हैं ॥ २४ ॥

प्रजनः (प्रजननम् इति घञि वृद्धिनिषेधश्च) उपसरः (उपसरणम् इति अप्) ये २ पुं० नाम प्रथम गर्भ धारण करने के हैं।

प्रश्रयः (प्रश्रयणम् इति अच् , [1]प्रसरः इत्यपि पाठः तत्र अप्) प्रणयः (प्रणयनम् इति अच्) ये २ पुं० नाम प्रेम के हैं।

[2]धीशक्तिः (धियः शक्तिः) [3]निष्क्रमः (निष्क्रमणम् इति घञ् वृद्ध्यभावश्च) ये २ नाम क्रम से १ स्त्री० १ पुं० बुद्धि के सामर्थ्य के हैं।

संक्रमः (संक्रमणम् इति घञ् वृद्धिनिषेधश्च) दुर्गसंचरः (संचरणम् इति घः दुर्गस्य संचरः, घञि तु [4]संचारः) ये २ पुं० नाम दुर्ग (किला) में प्रवेश करने के हैं ॥ २५ ॥

प्रत्युत्क्रमः (प्रत्युत्क्रमणम् इति घञ्) [5]प्रयोगार्थः (प्रयोजनम् इति घञ् , प्रयोगोऽर्थो यस्य, प्रयुद्धार्थः इति पाठे प्रकृष्टं युद्धमर्थोऽस्य) ये २ पुं० नाम कार्य के शुरू में प्रथम प्रयोग करने या लड़ाई के अच्छी तरह उद्योग करने के हैं।

---

१. प्रसरः प्रणये वेगे। इति मेदिनी। २. साऽष्टधा—शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा। ऊहापोहौ च विज्ञानं तत्वज्ञानं च धीगुणाः। ३. निष्क्रमो निर्गमे ख्यातौ बुद्धिसंपदि निष्क्रमः। इति रुद्रः। ४. संचारो निर्गमो भ्रमाम्बुपयः। इति रत्नकोशः। ५. प्रत्युत्क्रमः प्रयुद्धार्थः। इति भागुरिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादभ्यादानमुद्घात आरम्भः संभ्रमस्त्वरा ॥ २६ ॥
प्रतिबन्धः प्रतिष्टम्भोऽवनायस्तु निपातनम् ।
उपलम्भस्त्वनुभवः, समालम्भो विलेपनम् ॥ २७ ॥
विप्रलम्भो विप्रयोगो विलम्भस्त्वतिसर्जनम् ।
विश्रावस्तु प्रतिख्यातिरवेक्षा प्रतिजागरः ॥ २८ ॥
निपाठ-निपठौ पाठे, तेमस्तेमौ समुन्दने ।

प्रक्रमः (प्रक्रमणम् इति घञ्) उपक्रमः (उपक्रमणम् इति घञ् वृद्ध्यभावश्च) अभ्यादानम् (आभिमुख्येनादानम) उद्घातः (उद्घननम् इति घञि नस्य तकारादेशे कुत्वे वृद्धौ च) आरम्भः (आरम्भणम् इति घञ् नुम् च) ये ५ नाम क्रम से २ पुं० १ नपुं० आरम्भ के हैं । भानुदीक्षित के मत से आदि के २ नाम प्रथमारम्भ के शेष ३ नाम आरम्भ मात्र के हैं ।

सम्भ्रमः (सम्भ्रमणम् इतिं घञ् वृद्धिनिषेधश्च) [1]त्वरा (त्वरणम् इति षित्वातिदेशात् अङ् टाप् च) ये २ नाम क्रम से १ पुं० १ स्त्री० शीघ्रता के हैं ॥ २६ ॥

[2]प्रतिबन्धः (प्रतिबन्धनम् इति घञ्) प्रतिष्टम्भः (प्रतिष्टम्भनम् इति घञि षत्वे च) ये २ पुं० नाम कार्य में रुकावट पड़ने के हैं ।

अवनायः (अवनयनन् इति घञि वृद्धौ आयादेशे च) निपातनम् (निपातितम् निपूर्वकात् पततेः स्वार्थण्यन्तात् ल्युटि, निपातनम् इति वा पाठः तत्र तु यत निकारोपस्कारयोः धातुः ततः ल्युट्) ये २ नाम क्रमसे १ पुं० १ न० नीचे झुकने के हैं ।

उपलम्भः (उपलम्भनम् इति भावे घञि नुमि च) अनुभवः (अनुभवनम् इति भावे अपि गुणे अवादेशे च) ये २ पुं० नाम अनुभव के हैं ।

समालम्भः (समालम्भनम् इति भावे घञि नुमि च) विलेपनम् (विलिप्तम् इति लिप् उपदेहे इति ल्युट्) ये २ नाम क्रम से १ पुं० १ न० कुङ्कुम आदि लपेटने के हैं ॥ २७ ॥

विप्रलम्भः (विप्रलब्धिः इति घञ् नुम् च) विप्रयोगः (विप्रयोजनम् इति घञ्) ये २ पुं० नाम प्रिय के वियोग होने के हैं ।

विलम्भः (विलब्धिः इति घञि नुमि च) अतिसर्जनम् (अतिसृष्टम् इति सृज् विसर्गे इति ल्युट्) ये २ नाम क्रम से १ पुं० १ न० अधिक दान करने के हैं

विश्रावः (विश्रवणम् इति घञि) प्रविख्यातिः (प्रविख्यानम् इति क्तिन्) ये २ नाम क्रम से १ पुं० १ स्त्री० अधिक प्रसिद्धि के हैं ।

अवेक्षा (अवेक्षणम् इति अः टाप् च) प्रतिजागरः (प्रतिजागरणम् इति घञि गुणे रपरे च) ये २ नाम क्रम से १ स्त्री० १ पुं० सम्मान आदि की देखभाल करने के हैं ॥ २८ ॥

पाठे—निपाठः (निपठनम् निपूर्वकात्पठधातोः घञ्) निपठः (निपठनम् इति अप्) पाठः (पठनम् इति केवलात्पठधातोः घञ्) ये ३ पुं० नाम पढ़ने के हैं ।

---

१. आवेगस्तु त्वरा त्वरी । वाचस्पतिः । २. विष्कम्भः प्रतिबन्धो वियोगः । इति बोपालितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लवोऽभिलावो लवने निष्पावः पवने पवः ।
प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनम् ॥ २४ ॥
प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ ।
धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः ॥ २५ ॥
प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रम ।

लवः (लवनम् इति अप्) अभिलावः (अभिलवनम् इति घञ् वृद्धिश्च) लवनम् (लूनम् , लूञ् धातोर्भावे ल्युट्) ये ३ नाम क्रम से २ पुं० १ न० काटने के हैं ।

पवने—निष्पावः (निष्पवनम् इति घञ्) पवनम् (पूतम् इति विग्रहे तु ल्युटि गुणे) पवः (अत्र तु अप्) ये ३ नाम क्रम से १ पुं० १ न० १ पुं० धान आदि को ओसाकर भूसा अलग करने के हैं ।

प्रस्तावः (प्रस्तवनम् इति घञ्) अवसरः (अवसरणम् इति बाहुलकादप्) ये २ पुं० नाम प्रसङ्ग के हैं ।

त्रसरः (त्रसनम् इति बाहुलकात् अरन् तसरः इत्यपि पाठः तत्र तु क्सरन् बोध्यः (सूत्रवेष्टनम् (सूत्रस्य वेष्टनम्) ये २ नाम क्रम से १ पुं० १ न० वस्त्र बनाने के लिए तन्तुवाय (जुलाहा) आदि के सूत लपेटने को नरी के हैं ॥ २४ ॥

प्रजनः (प्रजननम् इति घञि वृद्धिनिषेधश्च) उपसरः (उपसरणम् इति अप्) ये २ पुं० नाम प्रथम गर्भ धारण करने के हैं ।

प्रश्रयः (प्रश्रयणम् इति अच् , [१]प्रसरः इत्यपि पाठः तत्र अप्) प्रणयः (प्रणयनम् इति अच्) ये २ पुं० नाम प्रेम के हैं ।

[२]धीशक्तिः (धियः शक्तिः) [३]निष्क्रमः (निष्क्रमणम् इति घञ् वृद्ध्यभावश्च) ये २ नाम क्रम से १ स्त्री० १ पुं० बुद्धि के सामर्थ्य के हैं ।

संक्रमः (संक्रमणम् इति घञ् वृद्धिनिषेधश्च) दुर्गसंचरः (संचरणम् इति घः दुर्गस्य संचरः, घञि तु [४]संचारः) ये २ पुं० नाम दुर्ग (किला) में प्रवेश करने के हैं ॥ २५ ॥

प्रत्युत्क्रमः (प्रत्युत्क्रमणम् इति घञ्) [५]प्रयोगार्थः (प्रयोजनम् इति घञ् , प्रयोगोऽर्थो यस्य, प्रयुद्धार्थः इति पाठे प्रकृष्टं युद्धमर्थोऽस्य) ये २ पुं० नाम कार्य के शुरू में प्रथम प्रयोग करने या लड़ाई के अच्छी तरह उद्योग करने के हैं ।

---

१. प्रसरः प्रणये वेगे । इति मेदिनी । २. साऽष्टधा—शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहौ च विज्ञानं तत्वज्ञानं च धीगुणाः । ३. निष्क्रमो निर्गमे ख्यातौ बुद्धिसंपदि निष्क्रमः । इति रुद्रः । ४. संचारो निर्गमो अमाम्बुपथः । इति रत्नकोशः । ५. प्रत्युत्क्रमः प्रयुद्धार्थः । इति भागुरिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यादभ्यादानमुद्घात आरम्भः संभ्रमस्त्वरा ॥ २६ ॥
प्रतिबन्धः प्रतिष्टम्भोऽवनायस्तु निपातनम् ।
उपलम्भस्त्वनुभवः, समालम्भो विलेपनम् ॥ २७ ॥
विप्रलम्भो विप्रयोगो विलम्भस्त्वतिसर्जनम् ।
विश्रावस्तु प्रतिख्यातिरवेक्षा प्रतिजागरः ॥ २८ ॥
निपाठ-निपठौ पाठे, तेमस्तेमौ समुन्दने ।

प्रक्रमः (प्रक्रमणम् इति घञ्) उपक्रमः (उपक्रमणम् इति घञ् वृद्ध्यभावश्च) अभ्यादानम् (आभिमुख्येनादानम) उद्घातः (उद्घननम् इति घञि नस्य तकारादेशे कुत्वे वृद्धौ च) आरम्भः (आरम्भणम् इति घञ् नुम् च) ये ५ नाम क्रम से २ पुं० १ नपुं० आरम्भ के हैं। भानुदीक्षित के मत से आदि के २ नाम प्रथमारम्भ के शेष ३ नाम आरम्भ मात्र के हैं।

सम्भ्रमः (सम्भ्रमणम् इति घञ् वृद्धिनिषेधश्च) [1]त्वरा (त्वरणम् इति षित्वातिदेशात् अङ् टाप् च) ये २ नाम क्रम से १ पुं० १ स्त्री० शीघ्रता के हैं ॥ २६ ॥

[2]प्रतिबन्धः (प्रतिबन्धनम् इति घञ्) प्रतिष्टम्भः (प्रतिष्टम्भनम् इति घञि षत्वे च) ये २ पुं० नाम कार्य में रुकावट पड़ने के हैं।

अवनायः (अवनयनन् इति घञि वृद्धौ आयादेशे च) निपातनम् (निपातितम् निपूर्वकात् पततेः स्वार्थण्यन्तात् ल्युटि, निपातनम् इति वा पाठः तत्र तु यत निकारोपस्कारयोः धातुः ततः ल्युट्) ये २ नाम क्रमसे १ पुं० १ न० नीचे झुकने के हैं।

उपलम्भः (उपलम्भनम् इति भावे घञि नुमि च) अनुभवः (अनुभवनम् इति भावे अपि गुणे अवादेशे च) ये २ पुं० नाम अनुभव के हैं।

समालम्भः (समालम्भनम् इति भावे घञि नुमि च) विलेपनम् (विलिप्तम् इति लिप् उपदेहे इति ल्युट्) ये २ नाम क्रम से १ पुं० १ न० कुङ्कुम आदि लपेटने के हैं ॥ २७ ॥

विप्रलम्भः (विप्रलब्धिः इति घञ् नुम् च) विप्रयोगः (विप्रयोजनम् इति घञ्) ये २ पुं० नाम प्रिय के वियोग होने के हैं।

विलम्भः (विलब्धिः इति घञि नुमि च) अतिसर्जनम् (अतिसृष्टम् इति सृज् विसर्गे इति ल्युट्) ये २ नाम क्रम से १ पुं० १ न० अधिक दान करने के हैं

विश्रावः (विश्रवणम् इति घञि) प्रविख्यातिः (प्रविख्यानम् इति क्तिन्) ये २ नाम क्रम से १ पुं० १ स्त्री० अधिक प्रसिद्धि के हैं।

अवेक्षा (अवेक्षणम् इति अः टाप् च) प्रतिजागरः (प्रतिजागरणम् इति घञि गुणे रपरे च) ये २ नाम क्रम से १ स्त्री० १ पुं० सम्मान आदि की देखभाल करने के हैं ॥ २८ ॥

पाठे—निपाठः (निपठनम् निपूर्वकात्पठधातोः घञ्) निपठः (निपठनम् इति अप्) पाठः (पठनम् इति केवलात्पठधातोः घञ्) ये ३ पुं० नाम पढ़ने के हैं।

---

१. आवेगस्तु त्वरा त्वरी। वाचस्पतिः। २. विष्कम्भः प्रतिबन्धो वियोगः। इति बोपालितः।

४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदीनवाऽऽस्रवौ क्लेशे, मेलके संग-संगमौ ॥ २९ ॥

संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥

निर्वर्णनं तु निध्यानं दर्शनाऽऽलोकनेक्षणम् ।
प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥

उपशायो विशायश्च पर्यायशयनार्थकौ ।

समुन्दने=संक्लेदने—तेमः (तेमनम् इति भावे घञ्) स्तेमः (स्तेमनम् इति भावे घञ्) समुन्दनम् (समुन्नम् समुत्तं वा उन्दी क्लेदने इति ल्युट्) ये ३ नाम क्रम से २ पुं० १ न० जल आदि से भीगने के हैं ।

क्लेशे—आदीनवः (आदानम् इति भावे क्ते नत्वे च आदीनम्, वानम् इति घञर्थे कः आलोपे च वः, आदीनस्य वः) आस्रवः (आस्रवणम् इति अप् गुणे अवादेशे च) क्लेशः (क्लेशनम् इति घञ् गुणे च) ये ३ पुं० नाम क्लेश के हैं ।

मेलकः (मेलनम् इति घञ् स्वार्थे कन् च) सङ्गः (सञ्जनम् इति घञ् कुत्वे च) [1]सङ्गमः (संगमनम् इति अप्) ये ३ पुं० नाम संगम (मिलाप) के हैं ॥ २९ ॥

संवीक्षणम् (सम्यक् विविधमीक्षणम् इति ल्युट्) विचयनम् (विचितम् चिञ् चयने इति ल्युट् गुणे, अनादेशे अयादेशे च) मार्गणम् (मार्गितम् मार्ग अन्वेषणे इति ल्युट्) मृगणा (मृगणम् मृग अन्वेषणे इति युचि अनादेशे टापि च) मृगः (मृगधातोः घञ्) ये ५ नाम क्रम से ३ न० १ स्त्री० १ पुं० अन्वेषण (खोज) करने के हैं ।

परिरम्भः (परिरम्भणम् इति घञ् नुम् च) परिष्वङ्गः (परिष्वञ्जनम् इति घञि कुत्वे परसवर्णे पत्वे च) संश्लेषः (संश्लेषणम् इति घञि) उपगूहनम् (उपगूढम् उपपूर्वकगुहूधातोः ल्युट्) ये ४ नाम क्रम से ३ पुं० १ न० आलिङ्गन के हैं ॥ ३० ॥

निर्वर्णनम् (निर्वर्णितम् वर्णशब्दात् णिच् , ण्यन्ताद्भावे ल्युट्) निध्यानम्) निध्यातम् ध्यै धातोः ल्युट् आत्वं च) दर्शनम् (दृष्टम् प्रेक्षणार्थकदृशिर् धातोः ल्युट्) ;आलोकनम् (आलोकितम् दर्शनार्थकलोकृधातोः ल्युट्) ईक्षणम् (ईक्षितम् ईक्ष् दर्शने इति ल्युट्) ये ५ न० नाम देखने के हैं ।

प्रत्याख्यानम् (प्रत्याख्यातम् ख्याप्रकथने इति ल्युट्) निरसनम् (निरस्तम् असु क्षेपणे इति भावे ल्युटि) प्रत्यादेशः (प्रत्यादेशनम् इति घञि गुणे च) निराकृतिः (निराकरणम् इति क्तिन्) ये ४ नाम क्रम से २ न० १ पुं० १ स्त्री० निराकरण (खण्डन) करने के हैं ॥ ३१ ॥

उपशायः (उपशयनम् इति घञि वृद्धौ आयादेशे) विशायः (विशयनम् इति घञ्) ये २ पुं० नाम पहरा देने वालों के क्रम से शयन करने के हैं । उपशायी विशायश्चेत्युभौ पर्यायेण शयनं तदेवार्थो ययोः इमौ पर्यायशयनार्थकौ स्यातामिति सम्बन्धः ।

---

१. ना मेलः संगमो ना वा । इत्यमरमाला ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्तनं च ऋतीया च हृणीया च घृणार्थकाः ॥ ३२ ॥
स्याद् व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।
पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥
प्रेषणं यत् समाहूय तत्र स्यात् प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥ ३४ ॥
निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥ ३५ ॥
आविधो विध्यते येन, तत्र विष्वक्समे निघः ।

घृणा एव अर्थोयस्य तस्मिन्—अर्तनम् (ऋतिः सौत्रः तस्मात् ईयङोऽभावे भावे ल्युट् गुणे, मनादेशे च) ऋतीया (ईयङ् पक्षे अप्रत्यये टापि च) हृणीया (हृणीयनम् हृणीङ् धातोः कण्ड्वादित्वात् यकि अप्रत्यये टापि च) [1]घृणा (घर्णनम् इति अङि टापि) ये ४ नाम क्रम से १ न० ३ स्त्री० घृणा के हैं ॥ ३२ ॥

विपर्यये—व्यत्या..: (व्यतसनम् इति घञि वृद्धौ च) विपर्यासः (विपर्यसनम् इति घञि वृद्धौ च) व्यत्ययः (व्यत्ययनम् इति एतेर्भावे अच्) विपर्ययः (विपर्ययणम् इति अच्) ये ४ पुं० नाम व्यतिक्रम (उलटा) के हैं ।

पर्ययः (पर्ययणम् इति अचि) अतिक्रमः (अतिक्रमणम् इति घञि) अतिपातः (अतिपतनम् इति घञ्) उपात्ययः (उपात्ययनम् इति अच्) ये ४ पुं० नाम क्रम का त्याग करके आगे बढ़ने के हैं ॥ ३३ ॥

प्रतिशासनम् (प्रतिपूर्वकशासु-अनुशिष्टौ इति भावे ल्युटि) यह १ न० नाम भृत्यों को बुलाकर कहीं भेजना या कार्य में लगाने का है । समाहूय यत् प्रेषणम् भृत्यादीनामाज्ञाकरणं तत्र प्रतिशासनं स्यादिति सम्बन्धः ।

संस्तावः (समेत्य स्तुवन्ति अत्र इति घञ्) यह १ पुं० नाम यज्ञादि में द्विजों (ब्राह्मणों) की स्तुति करने के लिए निश्चित स्थान का है । क्रतुषु द्विजन्मनां या स्तुतिभूमिः स संस्तावः स्यादिति सम्बन्धः ॥ ३४ ॥

यत्र काष्ठे काष्ठं निधाय तक्ष्यते स—उद्घनः (ऊर्ध्वं हन्यतेऽस्मिन् इति उत्पूर्वकात् हन्तेरधिकरणे अपि 'उद्घनोऽत्याधानम्' इति निपातनात् साधुः) यह १ पुं० नाम ठीहा या परिकठ (जिस काष्ठ के ऊपर रखकर दूसरा काष्ठ काटते हैं उस नीचे वाले काष्ठ को ठीहा या परिकठ कहते हैं) का है ।

स्तम्बघ्नः (स्तम्बो हन्यते येन शस्त्रेण इति कः उपधालोपे कुत्वे) स्तम्बघनः (स्तम्बो हन्यते येन इति अप् घनादेशश्च) ये २ पुं० नाम तृण काटने के खुरपा, हँसिया, गँडासा आदि, व वीनी झाड़ने के लिए बाँस के दंडे में लगे हुए पात्र विशेष के हैं ॥ ३५ ॥

येन पदार्थो विध्यते तत्र—आविधः (आविध्यते येन इति घञर्थे कः) यह १ पुं० नाम छेद करने वाले वर्मा का है ।

१, मोहो वीज्या जुगुप्सा च हृणीया हृणिया घृणा । इति वाचस्पतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥ ३६ ॥
निगारोद्गार-विक्षावोद्ग्राहास्तु गरणादिषु ।
आरत्यवरति-विरतय उपरामेऽथास्त्रियां तु निष्ठेवः ॥ ३७ ॥
निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि ।
जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे जूर्तिः ॥ ३८ ॥
उदजस्तु पशुप्रेरणमकरणिरित्यादयः शापे ।

निघः (नियतं हन्यते इति 'निघो निमित्तम्' इति निपातनात् साधुः) यह १ पुं० नाम सब दिशा में समान जमे हुए या आरोपण किए हुए वृक्ष आदि का है। विष्वक् समन्तात् समे तुल्ये इति सम्बन्धः ।

उत्कारः (उत्करणम् इति भावे घञ्) निकारः (निकरणम् इति भावे घञ्) ये २ पुं० नाम धान आदि को ओसाने या फटकने के हैं। द्वौ धान्योत्क्षेपणार्थकौ स्यातामिति सम्बन्धः ॥ ३६ ॥

निगारः (निगरणम् इति भावे घञ् वृद्धौ) उद्गारः (उद्गरणम् इति भावे घञ्) विक्षावः (विक्षवणम् इति भावे घञ् वृद्धौ आवादेशे) उद्ग्राहः (उद्ग्रहणम् भावे घञ्) ये ४ पुं० नाम क्रम से १—१ निगलने, वमन करने, छींकने, डकार लेने के हैं।

आरतिः (आरमणम् इति क्तिन् मलोपे च) अवरतिः (अवरमणम् इति क्तिन् मलोपे) विरतिः (विरमणम् इति क्तिन् मलोपे) उपरामः (उपरमणम् इति घञ् वृद्धौ) ये ४ नाम क्रम से ३ स्त्री० १ पुं० रुकने के हैं।

निष्ठेवः (ष्ठिवु निरसने इति घञ् गुणे) निष्ठ्यूतिः (इत्यत्र क्तिनि ऊठि यणादेशे) निष्ठेवनम् (इत्यत्र ल्युट् दीर्घाभावे गुणः) निष्ठीवनम् (अत्र तु ल्युट् पृषोदरादिः दीर्घः) ये ४ नाम क्रम से १ पुं० न०, १ स्त्री० २ न० नाम थूकने के हैं ॥ ३७½ ॥

जवनम् (जुः सौत्रो वेगे इति भावे ल्युट्) जूतिः (इति तु 'ऊतियूति' इति निपातनात् साधुः) ये २ नाम क्रम से १ न० १ स्त्री० वेग के हैं।

सातिः (सानमिति स्यतेर्भावे क्तिनि 'ऊतियूति' इति निपातनात् साधुः) अवसानम् (अवासेतम् इत्यत्र तु भावे ल्युट्) ये २ नाम क्रम से १ स्त्री० १ न० अन्त के हैं।

ज्वरः (ज्वरणम् इति घञ् वृद्ध्यभावश्च) जूर्तिः (ज्वरणम् इति क्तिन् ऊठ् च) ये २ नाम क्रम से १ पुं० १ स्त्री० बुखार के हैं ॥ ३८ ॥

उदजः (उदजनम् इति अजधातोः भावे अप् अपेरिति पर्युदासात् व्यभावश्च) पशुप्रेरणम् (पशूनां प्रेरणम्) ये २ नाम क्रम से १ पुं० १ न० जानवरों को प्रेरणा करने के हैं।

शापे—अकरणिः (अकरणम् इति नञ् पूर्वकात् करोतेर्भावे आक्रोशे अनिः गुणे णत्वे चआदिना अजननिः इत्यपि बोध्यम् तत्रापि अनिः, अवग्राहः अवपूर्वकात् गृणातेः घञि वृद्धौ अवग्राहः भावे निग्राहः निग्रहणम् अत्र तु घञ्) यह १ स्त्री० नाम शाप देने के हैं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रान्तेभ्यस्तस्य वृन्दमि'त्यौपगवका'दिकम् ॥ ३९ ॥
आपूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ।
माणवानां तु माणव्यं, सहायानां सहायता ॥ ४० ॥
हल्या हलानां, ब्राह्मण्य-वाडव्ये तु द्विजन्मनाम् ।
द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमनुक्रमात् ॥ ४१ ॥
खलानां खलिनी खल्याऽप्यथ मानुष्यकं नृणाम् ।
ग्रामता जनता धूम्या पाश्या गल्या पृथक्पृथक् ॥ ४२ ॥

गोत्रान्तेभ्यः—अपत्यप्रत्ययान्तेभ्यः तस्य वृन्दं इत्यर्थे—औपगवकम् (अपत्यप्रत्ययान्तेभ्यः 'तस्य समूहः' इत्यर्थे वुञ्, आदिना गार्गकम् दाक्षकम् इत्यपि) यह १ न० नाम औपगव समूह का है ॥ ३९ ॥

अचेतसां वृन्दे—आपूपिकम् (अपूपानां समूहः इति ठक्) शाष्कुलिकम् (शष्कुलीनां समूहः इति ठक्) ये २ न० नाम मालपूआ, पूड़ी आदि के समूह के हैं। आदि पद से साक्तुकादि का ग्रहण है, ये जडपदार्थों के समूह हैं।

माणवानां वृन्दे—माणव्यम् (माणवानां समूहः इति यत्) यह १ न० नाम बालकों के समूह का है।

सहायता (सहायानां समूहः इति तल् टाप् च) यह १ स्त्री० नाम सहायकों के समूह का है ॥४०॥

हलानां वृन्दे—हल्या (हलानां समूहः इति यः टाप् च) यह १ स्त्री नाम हलों के झुण्ड का है।

ब्राह्मण्यम् (ब्राह्मणानां समूहः इति यत्) वाडव्यम् (वाडवानां समूहः इति यत्) ये २ न० नाम विप्रों के समूह का है।

पार्श्वम् (पर्शूनां समूहः इति णस् 'सिति च' इति पदत्वात् भत्वाभावः गुणाभावश्च) पृष्ठ्यम् (पृष्ठानां समूहः इति यत्) ये २ न० नाम क्रमशः १ म पर्शुवों और २ य पीठों के समूह के हैं ये दोनों यज्ञीय पदार्थ हैं ॥ ४१ ॥

खलिनी (खलानां समूहः इति इनिः अलोपे ङीपि) खल्या (खलानां समूहः इति यः टाप् च) ये २ स्त्री० नाम खलिहान के समूह के हैं।

मानुष्यकम् (मनुष्याणां समूहः इति वुञ् यलोपाभावश्च) यह १ न० नाम मनुष्यों के समूह का हैं।

ग्रामता (ग्रामाणां समूहः इति तल् टाप् च) जनता (जनानां समूहः इति तल् टाप् च) धूम्या (धूमानां समूहः इति यः टाप् च) पाश्या (पाशानां समूहः इति यः टाप् च) गल्या (गलानां समूहः इति यः टाप् च) ये ५ स्त्री० नाम पृथक्-पृथक् क्रम से ग्राम, जन, धूम, पाश, गल, इनके समूह के हैं ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि साहस्र-कारीषचार्मणाऽऽथर्वणादिकम् ।

साहस्रम् (सहस्राणाम् समूहः इति अण्) कारीषम् (करीषाणां समूहः इति अण् वृद्धिश्च) चार्मणम् (चर्मणाम् समूहः इति अण्) आथर्वणम् (अथर्वणाम् समूहः इति अण्) आदिना वार्मणम् इत्यपि बोध्यम् (अत्र तु वर्मणाम् समूहः इति अण्) ये ४ न० नाम क्रम से सहस्र, उपली (गोहरा) चमड़ा, अथर्वण आदि के समूह के हैं ॥ ४२½ ॥

॥ इति संकीर्णवर्गविवरणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३. अथ नानार्थवर्गः

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥
आकाशे त्रिदिवे नाको, लोकस्तु भुवने जने।
पद्ये यशसि च श्लोकः, शरे खड्गे च सायकः ॥ २ ॥
जम्बुकौ क्रोष्टु-वरुणौ, पृथुकौ चिपिटार्भकौ।
आलोकौ दर्शनोद्योतौ, भेरीपटहमानकौ ॥ ३ ॥

अथ नानार्थ-वर्गः

अन्वयः—अत्रैव कान्तादिवर्गेषु कान्ता आदयो येषामिति तेषां वर्गाः समूहाः तेषु केऽपि नानार्थाः अनेकार्थाः कीर्तिताः कथिताः। ये कान्तादयो येषु पर्यायेषु भूरिप्रयोगाः प्रचुरप्रयोगाः ते तेषु शब्दिताः।

इस नानार्थ वर्ग में ककारान्त आदि (खकारान्त, गकारान्तादि) कुछ अनेक अर्थ वाले शब्द कहे गये हैं। जैसे—वायु, ब्रह्मा और सूर्य अर्थ में 'कः' शब्द पुं० है और शिर एवं पानी अर्थ में 'कम्' शब्द नपुं० है। जिन कान्तादि शब्दों का जिन पर्यायों में अधिक प्रयोग मिलते हैं, वे तत्तद्वर्गों में कहे गये हैं। इसलिए 'नाक' आदि शब्द स्वर्गादि अर्थों में उनके पर्याय शब्दों के साथ एक वार अन्यान्य वर्गों में आने पर भी यहाँ उन शब्दों का पुनर्ग्रहण पुनरुक्त नहीं माना जायगा।

नाकः (न अकं दुःखमत्र) यह १ पुं० नाम आकाश और स्वर्ग दोनों का वाचक है।

लोकः (लोक्यते इति घञ्) इस १ पुं० नाम के संसार और प्राणी २ अर्थ हैं।

श्लोकः (श्लोक्यते इति घञ्) इस १ पुं० नाम के पद्य और यश २ अर्थ हैं।

सायकः (स्यति इति ण्वुल् युक् च) इस १ पुं० शब्द के शर और तलवार २ अर्थ हैं ॥ २ ॥

[१]जम्बुकः (जमिति इति 'मितद्र्वादयश्च' इति निपातनात् साधुः) इस १ पुं० शब्द के शृगाल और वरुण २ अर्थ हैं।

[२]पृथुकः (पृथुरेव इति कन् 'अर्भकपृथुक' इति निपातनात् साधुः) इस १ पुं० शब्द के चिउड़ा और शिशु २ अर्थ हैं।

[३]आलोकः (आलोकनम् इति घञ्) इस १ पुं० शब्द के देखना और प्रकाश २ अर्थ हैं।

आनकः (अनिति इति ण्वुल् वृद्धिश्च) इस १ पुं० शब्द के भेरी और पटह (नगाड़ा) २ अर्थ हैं ॥ ३ ॥

[४]अङ्कः (अङ्क्यतेऽनेन इति घञ्) इस १ पुं० शब्द के गोदी (गोद) और चिह्न २ अर्थ हैं।

---

१. जम्बुकः फेरवे नीचे पश्चिमाशापतावपि। इति मेदिनी। २. पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवत्। इति मेदिनी। ३. आलोकस्तु पुमान् द्योते दर्शने वन्दिभाषणे। इति मेदिनी। ४. अङ्को रूपकभेदाङ्कचिह्ने रेखाजिभूषणे। रूपकाशान्तिकोत्सङ्गस्यानेऽकं पापदुःखयोः॥ इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्संगचिह्नयोरङ्कः, कलङ्कोऽङ्कापवादयोः ।
तक्षको नाग-वर्धक्योरर्कः स्फटिक-सूर्ययोः ॥ ४ ॥
मारुते वेधसि ब्रध्ने पुंसि कः, कं शिरोऽम्बुनोः ।
स्यात् पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ ५ ॥
उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।
कमण्डलौ च करकः, सुगते च विनायकः ॥ ६ ॥
किष्कुर्हस्ते वितस्तौ च, शूककीटे च वृश्चिकः ।

---

[1]कलङ्कः (कलति इति क्विप्, कल् चासौ अङ्कश्च) इस १ पुं० शब्द के अङ्क (लाञ्छन) और कलङ्क (अपवाद) २ अर्थ हैं ।

तक्षकः (तक्षति इति ण्वुल) इस १ पुं० शब्द के तक्षक संज्ञक सर्प और बढ़ई २ अर्थ हैं ।

[2]अर्कः (अर्क्यते इति घञ्) इस १ पुं० नाम का स्फटिकमणि और मदार (आकनाम का पौधा) सूर्य ३ अर्थ हैं ॥ ४ ॥

[3]कः (कायति इति डः) इस १ पुं० शब्द के क्रम से वायु, विधाता, सूर्य, ३ अर्थ हैं, और कम् नपुं० शब्द के शिर और जल २ अर्थ हैं ।

पुलाकः (पोलनम् पोलतेर्भावे क्विप्, पुलमकति इति अण्) इस १ पुं० शब्द के नीवार, धान वा धान की भूसी, संक्षेप और भात की लेई ४ अर्थ हैं ॥ ५ ॥

पेचकः (पचति पच्यते वा इति वुन् उपधायाः इत्वे अकादेशे गुणे च) इस १ पुं० शब्द के उल्लू (कुचकुचवा), हाथी की पूँछ की जड़ के समीप वाला मांस २ अर्थ हैं ।

[4]करकः (करोति इति वुन्) इस १ पुं० शब्द के कमंडलु और ओला (बनौरी) २ अर्थ हैं ।

[5]विनायकः (विनयति इति कर्तरि ण्वुल्) इस १ पुं० शब्द के गरुड़, विघ्न, गणेश, बुद्धदेव, गुरु ५ अर्थहैं ॥ ६ ॥

[6]किष्कुः (कायतेऽनेनेति 'मृगय्वादिः' कैधातोः कुः इत्वे सुकि कुकि च निपातनात्) इस १ पुं० शब्द के हस्तप्रमाण और वित्ताप्रमाण २ अर्थ हैं ।

[7]वृश्चिकः (वृश्चति इति किकनित्सम्प्रसारणे) इस १ पुं० शब्द के विच्छू, भ्रमर, राशि, दवा, केकड़ा ५ अर्थ हैं ।

---

१. कलङ्कोऽङ्क-ऽपवादे च कालायस्मलेऽपि च । इति मेदिनी । २. अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ । इति मेदिनी । ३. को ब्राह्मणे समीरात्मयमदक्षेपु भास्करे । मयूरेऽग्नौ च पुंसि स्यात् सुखशीर्षजलेषु कम् ॥ इति मेदिनी । ४. करकस्तु पुमान्पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले न स्त्री करङ्के च कमंडलौ ॥ इति मेदिनी । ५. विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ । इति मेदिनी । ६. किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठकरेऽपि च । इति मेदिनी । ७. वृश्चिकस्तु द्रुणौ राशौ शूककीटौषधिभिदोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिकूले प्रतीकस्त्रिष्वेकदेशे तु पुंस्ययम् ॥ ७ ॥
स्याद्भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च।
ज्योत्स्निकायां च घोषे च कोशातक्यथ कट्फले ॥ ८ ॥
सिते च खदिरे सोमवल्कः स्यादथ सिह्लके।
तिलकल्के च पिण्याको वाह्लीकं रामठेऽपि च ॥ ९ ॥
महेन्द्र-गुग्गुलूलूक-व्यालग्राहिषु कौशिकः।
रुक्तापशङ्कास्वातङ्कः, स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥

---

[१]प्रतीकः (प्रतिगता ईर्लक्ष्मीर्येन यं वा इति कप्) इस १ त्रि० शब्द का १ प्रतिकूल और प्रतीक पुं० शब्द का १ अंगावयव २ अर्थ हैं ॥ ७ ॥

[२]भूतिकम् (भवति इति क्तिच् कन् च) इस १ न० शब्द के भूनिम्ब (चिरायता) गन्धतृण (घास विशेष) कुकुरमुत्ता ३ अर्थ हैं।

[३]कोशातकी (कोशमतति इति क्वुन् ङीप् च) इस १ स्त्री० शब्द के परवल या तरोई, और अपामार्ग (चिचिड़ा) २ अर्थ हैं ॥ ८ ॥

सोमवल्कः (सोम इव वल्को वल्मस्य) इस १ पुं० शब्द के सफेद खैर, कायफल २ अर्थ हैं।

[४]पिण्याकः (पिण्यते इति 'पिनाकादयश्च' इति निपातनात् साधुः , इस १ पुं० शब्द के तिलकी खली, लोहबान २ अर्थ हैं।

[५]वाह्लीकम् (उह्यते वहति वा इति 'अलीकादयश्च' इति निपातनात् साधुः) इस १ न० शब्द के हींग, वाह्लीकी (काबुली) घोड़ा, कुंकुम ३ अर्थ हैं ॥ ९ ॥

[६]कौशिकः (कुशिकस्यापत्यम् इत्यण् वृद्धौ अलोपे च) इस १ पुं० शब्द के इन्द्र, गुग्गुलु, उलूक, सपेरा, विश्वामित्र, नेवला ६ अर्थ हैं।

आतङ्कः (आतङ्कनम् इति घञ्) इस १ पुं० शब्द के ताप, रोग, शङ्का, इतिं क्वुन्) मुरजध्वनि ४ अर्थ हैं।

[७]क्षुल्लकः (क्षोदनम् क्षोधनं वा इति भावे क्विप् , क्षुद्रतां लाति) इस १ त्रि० शब्द के अल्प, नीच २ अर्थ हैं ॥ १० ॥

---

१. प्रतीकोऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः। इति मेदिनी। २. स्याद्भूतिकं तु भूनिम्बे दीप्यभूस्तृणकत्तृणे। इति मेदिनी। ३. कोशातकः कचे पुंसि पटोल्यां घोषके स्त्रियाम्। इति मेदिनी। ज्योत्स्ना चन्द्रमसो भासि स्फुरज्ज्योतिनिर्णि मृता इत्यजयः। ज्यौत्स्नी पटोली ज्योत्स्नावत निशोः। इति हैमः। ज्यौत्स्निका पटोलिका घोषः अपामार्गः। इति स्वामी। ४. पिण्याकोऽस्त्री तिलकल्के हिङ्गु वाह्लीकसिह्लके। इति मेदिनी। ६. वाह्लीकं वाह्लिकं धीरहिङ्गुनोर्नारवदेशयोः। इति रभसः। ५. कौशिको नकुले व्यालग्राहि गुग्गुल शक्रयोः। विश्वामित्रे च कोशशोलूकयोरपि कौशिकः। कौशिकी चण्डिकायां च नदीभेदे च कौशिकी। इति विश्वः। ७. क्षुल्लकास्त्रिषु नीचेऽल्पे। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जैवातृकः शशाङ्केऽपि, खुरेऽप्यश्वस्य वर्तकः ।
व्याघ्रेऽपि पुण्डरीको ना, यवान्यामपि दीपकः ॥ ११ ॥
शालावृकाः कपिक्रोष्टुश्वानः, स्वर्णेऽपि गैरिकम् ।
पीडार्थेऽपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते ॥ १२ ॥
शीलान्वयावनूके द्वे शल्के शकल-वल्कले ।
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ १३ ॥
दीनारेऽपि च निष्कोऽस्त्री, कल्कोऽस्त्री समलैनसोः ।

---

[1]जैवातृकः (जीवति इति आतृकन् वृद्धिश्च) इस १ पुं० शब्द के चन्द्रमा, दीर्घायु और दुर्बल ३ अर्थ हैं ।

[2]वर्तकः (वर्तते ण्वुल्) इस १ पुं० शब्द के अश्व का खुर, वत्तक नाम का पक्षी २ अर्थ हैं ।

[3]पुण्डरीकः (पुण्डयति 'फर्फरीकादयश्च' इति निपातनात् साधुः) इस १ पुं० शब्द के व्याघ्र, श्वेतकमल, सफेद छाता, अग्नि, दिग्गज ५ अर्थ हैं ।

[4]दीपकः (दीपयति इति ण्वुल्) इस १ पुं० शब्द के जवाइन, मोरशिखा, दीया ३ अर्थ हैं । दीपकम् नपुं० शब्द का दीपकालङ्कार भी १ अर्थ हैं ॥ ११ ॥

शालावृकः (शालां वृणोति इति कक्) इस एक पुं० शब्द के बन्दर, शृगाल, कुत्ता ३ अर्थ हैं ।

[5]गैरिकम् (गिरौ भवम् इति ठक्) इस १ न० शब्द के स्वर्ण, गेरू २ अर्थ हैं ।

[6]व्यलीकम् (अलति इति 'अलीकादयश्च' इति कीकन्नन्ते निपातिते साधुः, विगतमलीकम्) इस १ न० शब्द के पीडा, वैलक्ष्य, अप्रिय, अकार्य ४ अर्थ हैं ।

[7]अलीकम् (अलति इति निपातनात् पूर्ववत् साधुः) इस १ न० शब्द के अप्रिय, असत्य २ अर्थ हैं ॥ १२ ॥

[8]अनूकम् (अनूच्यन्ति इति कः 'न्यङ्क्वादिः') इस १ न० शब्द के शील, वंश २ अर्थ हैं ।

शल्कम् (शलति इति कन्) इस १ न० शब्द के टुकड़ा, छिलका २ अर्थ हैं ।

[9]निष्कः (निस्त्रयेन कायति इति कः षत्वे च) इस १ पुं० न० शब्द के १०८ कर्ष सोना, सोनामात्र, चन्द्रहार, ४ भर स्वर्ण, मोहर ५ अर्थ हैं ।

[10]कल्कः (कल्यते इति कः) इस १ पुं० शब्द के मैला (विट्) पाप, दम्भ ३ अर्थ हैं ।

---

१. जैवातृकः पुमान्सोमे दीर्घायुःकृशयोस्त्रिपु । इति मेदिनी । २. वर्तकस्तु खुरेऽश्वस्य विहगे वर्तिका द्वयोः । इति मेदिनी । ३. पुण्डरीकः सिताम्भोजे सितच्छत्रे च भेषजे । पुंसि व्याघ्रोऽग्निर्दिङ्नागे कोशकारान्तरे ऽपि च । इति मेदिनी । ४. दीपकं वागलङ्कारे वाच्यवद्दीपिकारके । दीपकश्चाजमोदायां यवानीबर्हिचूडयोः । इति मेदिनी । ५. गैरिकम् धातुरुक्मयोः । इति मेदिनी । ६. व्यलीको नागरे स्मृतः । व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने । इति विश्वः । ७. अलीकमप्रियेऽपि स्यात् दिव्यसत्ये नपुंसकम् । इति मेदिनी । ८. अनूकं तु कुले शीले पुंसि स्याद्गतजन्मनि । इति मेदिनी । ९. निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेममात्रे हेमपदेऽपि च । इति मेदिनी । १०. त्रिषु पापाशये कल्कोऽस्त्रीविट् किट्टे भदन्तयोः (कल्कः पापाशये तापे दम्भे विट्किट्टयोरपि) इति विश्वः । कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके । विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दम्भेऽप्यथ पिनाकोऽस्त्री शूल-शङ्करधन्वनोः ॥ १४ ॥
धेनुका तु करेण्वां च मेघजाले च कालिका ।
कारिका यातनावृत्त्योः, कर्णिका कर्णभूषणे ॥ १५ ॥
करिहस्तेऽङ्गुलौ पद्मबीजकोश्यां, त्रिषूत्तरे ।
वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः ॥ १६ ॥
स्याद्दाम्भिकः कौक्कुटिको यश्चादूरेरितेक्षणः ।

[1]पिनाकः (पनाय्यते इति 'पिनाकादयश्च' इति निपातनात् साधुः) इस १ पुं० न० शब्द के शिवधनुष, त्रिशूल, धूलिवर्षा ३ अर्थ हैं ॥ १४ ॥

धेनुका (धेनुरेव इति स्वार्थे कन्) इस १ स्त्री० शब्द के हस्तिनी, जल्द की व्याई हुई गाय २ अर्थ हैं । धेनुक पुं० शब्द का धेनुकासुर-राक्षस विशेष अर्थ है ।

[3]कालिका (कालो वर्णोऽस्त्यस्याः इति ठन्) इस १ पुं० शब्द के मेघसमूह, मदिरा, काली देवी, स्वर्ण विकार ४ अर्थ हैं ।

[4]कारिका (करणम् इति ण्वुल्) इस १ स्त्री० शब्द के नरक यातना नटस्त्री, कृति, विवरण, श्लोक आदि ५ अर्थ हैं ।

[5]कर्णिका (कर्णस्यालङ्कारः इति कन् टाप् च) इस १ स्त्री० शब्द के कान का अलङ्कार (गहना), गज का सूँड़, मध्यमा अँगुली, कमलकोश आदि ४ अर्थ हैं ।

उत्तरे वक्ष्यमाणाः शब्दाः त्रिलिङ्ग्यां भवन्ति— [6]वृन्दारकाः (प्रशस्तं वृन्दमस्य इति आकरन्) इस १ त्रि० नाम के सुन्दर, सुर, श्रेष्ठ, मायावी ४ अर्थ हैं ।

[7]एकः (एति इति कन्) इस १ त्रि० शब्द के मुख्य, अन्य, केवल और संख्या ४ अर्थ हैं ॥ १५-१६ ॥

दाम्भिकः (दम्भन, घञ् दम्भः लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भः तेन चरति इति ठक) यह १ त्रि० नाम मायावी का है ।

यश्च दूरदर्शी सः—कौक्कुटिकः (कुक्कुटीं पश्यति इति ठक् वृद्धिश्च) इस १ त्रि० शब्द का दूर से अवलोकन करनेवाला १ अर्थ है ।

---

१. पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः । इति मेदिनी । २. स्याद्धेनुका करिण्यां च धेनावपि ना तु दानवविशेषे । इति मेदिनी । ३. धूसरी योगिनीभेदो मानवाब्देषु कालिका । क्रमदेयवस्तुमूल्ये काष्ण्यें काक्यां धनेपु च । इति रभसः । कालिका चण्डिकाभेदे काष्ण्यें वृश्चिकपत्रयोः । क्रमदेयवस्तुमूल्ये धूसरीनवमेघयोः । पटोलशाखारोमालीमांसी काकीशिवासु च । मेघावली च । इति मेदिनी । ४. कारिका नटयोषिति । कृतौ विवरणश्लोके शिल्पयातनयोरपि । नपुंसकं तु कर्मादौ कारकं कर्तरि त्रिषु ॥ इति मेदिनी । ५. कर्णिका करिहस्ताग्रे करमध्यांगुलावपि । क्रमुकादिच्छटांशेऽब्जवराटे कर्णभूषणे ॥ कर्णिका कथ्यतेऽत्यन्तसूक्ष्मवस्त्वग्निमन्थयोः । इति मेदिनी । ६. वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु । इति मेदिनी । ७. एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिपु । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्रीन्द्रियेऽपि खम् ॥१८॥
घृणिज्वाले अपि शिखे, शैलवृक्षौ नगावगौ ।
आशुगौ वायु-विशिखौ, शरार्कविहगाः खगाः ॥ १९ ॥
पतङ्गौ पक्षिसूर्यौ च, पूगः क्रमुक-वृन्दयोः ।
पशवोऽपि मृगा वेगः प्रवाह-जवयोरपि ॥ २० ॥
परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि ।

[1]शङ्खः (शम्यति अनेन इति खः) इस १ पुं० शब्द के कोश (खजाना) और मस्तक की हड्डी २ अर्थ हैं । निधौ ललाटास्थ्नि कम्बौ कङ्कणे च शङ्खः स्यादिति सम्बन्धः ।

[2]खम् (खनति इति डः) इस १ न० शब्द के इन्द्रिय, आकाश, शून्य क्षेत्र, विन्दु, देवलोक आदि ६ अर्थ हैं ॥ १८ ॥

[3]शिखा (शेते इति खः ह्रस्वश्च टावपि) इस १ स्त्री० शब्द के चूनी, ज्वाला, मयूर शिखा, किरण ४ अर्थ हैं । घृणिः ज्वाला उभे शिखे इति सम्बन्धः । अपिशब्दात् शाखाद्याश्च शिखाया वाच्याः ।

[4]नगः अगः (न गच्छति इति डः, 'नगोऽप्राणिष्वः' इति नञ् वा प्रकृत्या, नलोपे तु अगः) इन २ पुं० शब्दों के पर्वत, वृक्ष, सूर्य, सर्प ४ अर्थ हैं ।

आशुगः (आशु गच्छति इति डः) इस १ पु० शब्द के पवन, शरभानु ३ अर्थ हैं ।

[5]खगः (खे गच्छति इति डः) इस १ पुं० शब्द के शर, रवि, पक्षी ३ अर्थ हैं ॥ १९ ॥

[6]पतङ्गः (पतति इति अङ्गच्) इस १ पुं० शब्द के शलभ (पतङ्ग कीड़ा), भानु, पक्षी ३ अर्थ हैं ।

पूगः (पुनाति इति गन्) इस १ पुं० शब्द के सुपारी, समूह २ अर्थ हैं ।

पशवो वृषादयः अपिशब्दात् कुरङ्गादयोऽपि मृगपदवाच्याः स्युरिति सम्बन्धः । मृगः (मृग्यते इति घञ्) इस १ पुं० शब्द के पशु, याचना, नक्षत्र, हरिण, अन्वेपण ५ अर्थ हैं ।

प्रवाहजवयोः अपिशब्दात् रेतःकिम्पाचयोरपि इति सम्बन्धः—[8]वेगः (वेजनम् इति घञ्) इस १ पुं० शब्द के प्रवाह, तेज चलना २ अर्थ हैं ॥ २० ॥

[9]परागः (परा गच्छति इति डः) इस १ पुं० शब्द के पुष्परज, धूल, सुगन्धित-चूर्ण, पहाड़, चन्दन रज ४ अर्थ हैं ।

---

१. शङ्खः कम्बौ न योषित्ना भालास्थ्नि निधिभिन्नखे । इति मेदिनी । २. खमिन्द्रिये पुरे क्षेत्रे शून्ये विन्दौ विहायसि । सवेदने देवलोके शर्मण्यपि नपुंसकम् ॥ इति मेदिनी । ३. शिखाशाखाबर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च । इति मेदिनी । ४. नगो महीरुहे शैले भास्करे पन्नगाशने । अगः स्यान्नगवत्तरौ शैले, सरीसृपे भानौ । इति हैमः । ५. खगः सूर्ये ग्रहे देवे मार्गणे च विहङ्गमे । इति मेदिनी । ६. पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबं सूते । इति मेदिनी । ७. मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः । अन्वेषणायां याच्ञायां मृगी तु वनितान्तरे । इति मेदिनी । ८. वेगो रयप्रवाहयोः । रेतःकिंपाकयोश्चापि । इति हैमः । ९. परागः कौसुमे रेणौ धूलिस्नानीययोरपि । गिरिप्रभेदे विख्यातावुपरागे च चन्दने । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गजेऽपि नागमातङ्गावपाङ्गस्तिलकेऽपि च ॥ २१ ॥
सर्गः स्वभाव-निर्मोक्ष—निश्चयाऽध्याय-सृष्टिषु ।
योगः सन्नहनोपाय-ध्यान-सङ्गति-युक्तिषु ॥ २२ ॥
भोगः सुखे स्त्र्यादिभृतावहेश्च फण-काययोः ।
चातके हरिणे पुंसि सारङ्गः शबले त्रिषु ॥ २३ ॥
कपौ च प्लवगः शापे त्वभिषङ्गः पराभवे ।

---

[१]नागः (न अगः) इस १ पु० शब्द के गज, साँप, नागकेसर ३ अर्थ हैं। [२]मातङ्गः (मतङ्गस्यायम् इति अण्) इस १ पुं० शब्द के राक्षस, हाथी २ अर्थ हैं।

[३]अपाङ्गः अपगतोऽङ्गात् इति समासः) इस १ पुं० शब्द के अङ्गहीन, आँख का किनारा, तिलक ३ अर्थ हैं ॥ २१ ॥

[४]सर्गः (सृज्यते इति घञ्) इस १ पुं० शब्द के स्वभाव व त्याग, निश्चय, अध्याय, सृष्टि, मोह, उत्साह आदि ६ अर्थ हैं।

[५]योगः (योजनम् इति घञ्) इस १ पुं० शब्द के कवच, उपाय, ध्यान, संगति, युक्ति, चिन्तन आदि ६ अर्थ हैं। सन्नहनम् = कवच-उपायः = सामादिः-ध्यानं चिन्तनं-संगतिः = संगमः युक्तिश्च-एषु अर्थेषु योगः स्यादिति सम्बन्धः ॥ २२ ॥

[६]भोगः (भोजनम् इति घञ्) इस १ पुं० शब्द के सुख, सर्प का फन और उसका शरीर, स्त्री आदि की मजदूरी ४ अर्थ हैं।

[७]सारङ्गः (सारमङ्गं यस्य शकन्ध्वादिः, सारं गच्छति इति खचि डित्वाट्टिलोपे च) इस १ पुं० शब्द के पपीहा (चातक), मृग, गज, ३ अर्थ हैं और सारङ्ग त्रि० शब्द के चित्र-विचित्र (कर्बुर) १ अर्थ हैं ॥ २३ ॥

[८]प्लवगः (प्लवेन गच्छति इति डः) इस १ पुं० शब्द के कपि, मण्डूक (मेढक), सूर्य का रथ, चातक, ४ अर्थ हैं।

[९]अभिषङ्गः (अभिषजनम् इति घञि षत्वे कुत्वे च) इस १ पुं० शब्द के पराजय, शाप, निन्दा, शपथ ४ अर्थ हैं।

---

१. नागं नपुंसकं रङ्गे सीसके करणान्तरे। नागः पन्नगमातङ्गक्रूराचारिषु तोयदे। नागकेसरपुंनागनागदन्तकमस्तके। देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः। इति मेदिनी। २. मातङ्गः श्वपचे गजे। इति मेदिनी। ३. अपाङ्गो नयनस्यान्ते स्याच्चित्रकप्रधानयोः। इत्यजयः। अपाङ्गस्त्वङ्गहीने स्यात्क्षेत्रान्ते तिलकेऽपि च। इति मेदिनी। ४. सर्गस्तु निश्चयाध्यायमोहोत्साहात्यसृष्टिषु। इति मेदिनी। ५. योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु। वपुस्थैर्य-प्रयोगे च विषकुम्भादिषु भेषजे। विश्वब्धघातके द्रव्योपायसंहननेष्वपि। कार्मणेऽपि च। इति मेदिनी। ६. भोगः सुखे धने पुंसि (चाहेः) शरीरफणयोर्मतः। पालनेऽभ्यवहारे च योषिदादिभृतावपि। इति मेदिनी। 'भृतिः भाडिः, आदिना हस्त्यश्वादिकर्मकाराणां भृतिः। पालनेऽभ्यवहारे च निर्वेशे पण्ययोषिताम्। इति विश्वः। ७. सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शबले त्रिषु। इति मेदिनी। ८. प्लवगो वानरे भेके सारथौ चोष्णदीधितेः। इति मेदिनी। ९. अभिषङ्गः पुंलिङ्गः पराभवाक्रोश शपथेषु। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानाद्यङ्गे युगः पुंसि, युगं युग्मे कृतादिषु ॥ २४ ॥
स्वर्गेषु-पशु-वाग्वज्र-दिङ्-नेत्र-घृणि-भू-जले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौ, लिङ्गं चिह्न-शेफसोः ॥ २५ ॥
शृङ्गं प्राधान्य-सान्वोश्च, वराङ्गं-मूर्ध-गुह्ययोः ।
भगं श्री-काम-महात्म्य-वीर्य-यत्नाऽर्क-कीर्तिषु ॥ २६ ॥
परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये ।

---

[१]युगः (योजनम् युज्यते वा घञ् गुणाभावश्च) इस १ पु० शब्द के रथादि का जुवा (जुआठ) १ अर्थ है, और युगम् न० के द्वापर आदि युग, दो वस्तु (जोड़ा), २ अर्थ हैं ॥ २४ ॥

लक्ष्यदृष्ट्या स्त्रियां पुंसि— [६]गौः (गच्छति गम्यते वा अनेन इति डोः) इस १ प्रयोगानुसार पुं० स्त्री० शब्द के स्वर्ग, शर, पशु (गाय—बैल) वाणी, कुलिश (वज्र) पूर्वादिदिशा, आँख, रश्मि, मही, जल १० अर्थ हैं। स्वर्गः = नाकः, इषुः = बाणः, पशवोः = वृषादयः, वाक् = वाणी वज्रं = कुलिशं दिक् = दिशा नेत्रम् = लोचनम् घृणिः = रश्मिः भूः = भूमिः जलम् = आपः एषु लक्ष्यदृष्ट्या गौः स्त्रियां पुंसि च स्यात् इति सम्बन्धः ।

[२]चिह्नशेफसोः = चिह्नं = लक्ष्म शेफो = मेहनम् तयोः—लिङ्गम् (लिङ्ग्यते अनेनेति घञ्) इस १ पुं० शब्द के सांख्योक्त प्रकृति, चिह्न, अनुमान, पुरुष मूत्रेन्द्रय, शिवमूर्तिविशेष ५ अर्थ हैं ॥ २५ ॥

[३]शृङ्गम् (शृणाति इति गन् नुट्) इस १ न० शब्द के प्रभुत्व, पर्वत-शिखर, सींग ३ अर्थ हैं।

[४]वराङ्गम् (वरं च तदङ्गं च) इस १ न० शब्द के ललाट, योनि, मातङ्ग, आदि ३ अर्थ हैं।

[५]भगम् (भज्यते इति घः कुत्वे च) इस १ न० शब्द के सम्पत्ति, सुन्दरता, कामना, माहात्म्य, पराक्रम, प्रयत्न, सूर्य, कीर्ति ८ अर्थ हैं। शोभाभिलाषैश्वर्यपराक्रमप्रयत्न-सूर्य-यशस्सु चार्थेषु इति सम्बन्धः ॥ २६ ॥ इति गान्ताः ॥

[६]परिघः (परिहननम् इति अप् घादेशश्च) इस १ पुं० शब्द के मारना परिघनामक शस्त्र,

१. युगो रथे हलाद्यङ्गे न द्वयोस्तु कृतादिषु। युग्मे हस्तचतुष्केपि वृद्धिनामौषधेऽपि च। इति मेदिनी। ६. गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु। इति केशवः। गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्; स्त्री सौरभेयी दृग्वाग्भूष्वप्सु भूम्नि च ॥ इति मेदिनी।२. लिङ्गं चिह्नेऽनुमाने च सांख्योक्त-प्रकृतावपि। शिवमूर्तिविशेषे च मेहनेऽपि नपुंसकम् ॥ इति मेदिनी। ३. शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके। स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ ॥ इति मेदिनी ॥ ४. वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वचि।इति मेदिनी। ५. भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु। माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ। इति मेदिनी। ६. परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः। इति मेदिनी। पलिघः काचकलशे घटे प्राकारगोपुरे। इति हैममेदिन्यौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूल्ये पूजाविधावर्घोऽहोदुःखव्यसनेष्वघम् ॥ २७ ॥
त्रिष्विष्टेऽल्पे लघुः, काचाः शिक्य-मृद्भेद-दृग्रुजः ।
विपर्यासे विस्तरे च प्रपञ्चः, पावके शुचिः ॥ २८ ॥
मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिपु ।
अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् ॥ २९ ॥

योगभेद और अर्गला ४ अर्थ हैं। परेश्च घाङ्कयोः इति लत्वे कृते 'पलिघः' इत्यपि पाठः। वृन्दे = समूहे अम्भसां = जलानां रये = वेगे [1]ओघः (आ ऊह्यतेऽनेन इति आङ् पूर्वकात् ऊहवितर्के धातोः करणे घञि गुणे न्यङ्क्वादित्वात् कुत्वे साधुः) इस १ पुं० शब्द के समूह, जलवेग, परम्परा, तेजी से नृत्य करना ४ अर्थ हैं।

अर्घः (अर्घ्यते इति अत्र न्यङ्क्वादित्वात् साधुः) इस १ पुं० शब्द के दाम (मूल्य), आये हुए अतिथि की पूजा में चरण प्रक्षालन के लिए दिये हुए जल २ अर्थ हैं।

अघम् (अघ्यतेऽनेन इति घञ् नुमभावश्च) इस १ न० शब्द के पाप, कष्ट, आदत (व्यसन) ३ अर्थ हैं ॥ २७ ॥

[2]लघुः (लङ्घ्यते इति डः नलोपश्च) इस १ त्रि० शब्द के मनोज्ञ, अल्प २ अर्थ हैं ॥ इति घान्ताः ॥

[3]काचः (कच्यते अनेन वा इति घञ् कुत्वाभावः, णिजन्तात् अच् वा) इस १ पुं० नाम के सिकहर, मृद्भेद (काच), नेत्र रोग ३ अर्थ हैं।

[4]प्रपञ्चः (प्रपञ्च्यते इति अच् नुमि अनुस्वारे परसवर्णे च) इस १ पु० शब्द के विपर्यय उलट-फेर, शब्द विस्तर (फैलाव), झंझट, संचय, ठगना ५ अर्थ हैं।

[5]शुचिः (शोचति इति इन्) इस १ पुं० शब्द के अग्नि, आषाढ़ मास, घूस न लेने वाले सचिव ३ अर्थ हैं और पवित्र, उज्ज्वल २ अर्थों में त्रिलिङ्ग शुचिशब्द है।

[6]रुचिः (रोचते इति क्विप्) इस १ स्त्री० शब्द के कोई की इच्छा, अत्यासक्ति, रश्मि (किरण) सुन्दरता, प्रकाश, शोभा ६ अर्थ हैं ॥ २९ ॥ इति चान्ताः।

---

१. ओघो वेगे जलस्य च। वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः। इति मेदिनी। २. कृष्णागुरुणि शीघ्रे च लघु क्लीबेऽगुरौ त्रिपु। निःसारे च मनोज्ञे च पृक्कायां च लघुः स्त्रियाम्। इति रभसः। लघुन गुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीबम्। शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ तु स्त्री। इति मेदिनी। ३. काचः शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे। इति मेदिनी। ४. प्रपञ्चः संचयेऽपि स्याद्विस्तरे च प्रतारणे। इति मेदिनी। ५. शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमन्त्रिणि। ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिपु। इति मेदिनी। ६. रुचिः स्त्री दीप्तिशोभायामभिष्वङ्गाभिलाषयोः। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसन्ने भल्लुकेप्यच्छो, गुच्छः स्तबक-हारयोः ।
परिधानाञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः ॥ प्र० ॥
केकि-तार्क्ष्यावहिभुजौ दन्त-विप्राऽण्डजा द्विजाः ।
अजा विष्णुहरच्छागा गोष्ठाध्वनिवहा व्रजाः ॥ ३० ॥
धर्मराजौ जिन-यमौ, कुञ्जो दन्तेऽपि न स्त्रियाम् ।
वलजे क्षेत्रपूर्द्वारे, वलजा वल्गुदर्शना ॥ ३१ ॥

आनन्दिते भल्लूके अपिशब्दात् स्फटिकामलयोरपि—१अच्छः (न छ्यति दृष्टिम् इति कः) इस एक पुं० नाम के प्रसन्न, भालू, स्वच्छ ३ अर्थ हैं। स्तवकहारयोः—गुच्छः (गवनम् क्विपि तुंकि गुत् तां छ्यतीति के आलोपे) इस एक त्रि० नाम के पल्लव और हार २ अर्थ हैं।

परिधानाञ्चले—२कच्छः (कं जलं छ्यति के आलोपे च) इस एक पुं० नाम के कपड़े का छोर औ[illegible]त दो अर्थ हैं। जल का किनारा अर्थ में त्रिलिंग है ॥ प्र० ॥

अहिभुक् (अहिं भुङ्क्ते इति क्विप्) इस १ पुं० शब्द के मयूर और गरुड़ २ अर्थ हैं।

३द्विजा (द्विर्जायते इति डः) इस १ पुं० शब्द के पक्षी, ब्राह्मण, क्षत्रिय, वैश्य, और रद (दाँत) ५ अर्थ हैं।

४अजः (न जायते इति डः, अजति इति अच् व्यादेशाभावे च) इस १ पुं० शब्द के हरि (विष्णु) हर (शिव) खसी (छाग) रघुपुत्र अज ४ अर्थ हैं।

व्रजः (व्रजति इति कर्तरि पचादयचि, व्रजत्यस्मिन् वा घे) इस १ पुं० शब्द के गोशाला, मार्ग, समूह ३ अर्थ हैं ॥ ३० ॥

५धर्मराजः (धर्मेण राजति इति अच् धर्मस्य राजा धर्मश्चासौ राजा च) इस १ पुं० शब्द के यमराज, बुद्ध, युधिष्ठिर ३ अर्थ हैं

६कुञ्जः (कौ जायते इति डः पृषोदरादित्वान्नुमागमे) इस १ पुं० शब्द के लताओं से घिरा हुआ स्थान और हाथी का दाँत २ अर्थ हैं।

७वलजम् (वले जातम् इति डः) इस १ न० शब्द के क्षेत्र, नगरद्वार २ अर्थ हैं और वलजा स्त्री० शब्द का देखने में सुन्दर लगने वाला भी अर्थ है। वल्गु मनोहरं दर्शनं यस्याः सा वल्गुदर्शना वराऽवला वलजा स्यात् (वले जाता इति डे टिलोपे टापि) इस एक स्त्री० नाम का देखने में सुन्दरी अर्थ है ॥३१॥

---

१. अच्छो भल्लूके स्फटिकेऽमलेऽच्छाभिमुखेऽव्ययम् इति हैमः। २. कच्छोऽनुमेदे नौकाङ्गेऽनूपप्राये तटेऽपि न। कच्छस्तु देशे, कच्छा स्यात्परिधानपराञ्चले। चीर्यां वराह्याम्। इति हैमः। ३. द्विजः स्याद्ब्राह्मण-क्षत्रवैश्यदन्ताण्डजेषु ना। द्विजा भार्ग्या हरेण्वां च। इति मेदिनी। ४. अजो हरौ हरे कामे विधौ छागे रवोः सुते। इति विश्वः। ५. धर्मराजो यमे बुद्धे युधिष्ठिरनृपे पुमान्। इति मेदिनी ६. कुञ्जोऽस्त्रियां निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनाम्। इति मेदिनी। ७. वलजं गोपुरे क्षेत्रे सस्यसंगरयोरपि। वलजा वरयोषायां यूथ्याम्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समे क्ष्मांशे रणेऽप्याजिः, प्रजा स्यात् सन्ततौ जने ।
अब्जौ शङ्ख-शशाङ्कौ च, स्वके नित्ये निजं त्रिषु ॥ ३२ ॥
पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः ।
संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ॥ ३३ ॥
दोषज्ञौ वैद्यविद्वांसौ ज्ञो विद्वान्सोमजोऽपि च ॥ प्र० ॥
काकेभ-गण्डौ करटौ, गजगण्डकटी कटौ ।

---

[1]आजिः (अजन्त्यस्याम् इति इण्) इस १ स्त्री० शब्द के समभूमि, सङ्ग्रम २ अर्थ हैं ।
प्रजा (प्रजायते इति डः टाप् च) इस १ स्त्री० शब्द के सन्तान (बालक बालिका) और प्रजा २ अर्थ हैं ।

[2]अब्जः (अप्सु जायते इति डः जस्त्वे च) इस १ पुं० शब्द के कम्बु (शंख) चन्द्रमा, धन्वन्तरि अर्थ हैं । और न० अब्ज शब्द का कमल अर्थ है ।

स्वके = आत्मीये नित्ये = चिरस्थायिनि च—निजम् (निजायते इति डः) इस १ त्रि० शब्द के अपना, नित्य २ अर्थ हैं । ३२ ॥ (इति जान्ताः) ।

क्षेत्रज्ञः (क्षेत्रं जानाति इति कः आलोपे) इस १ पुं० शब्द का आत्मा १ अर्थ है, और त्रि० क्षेत्रज्ञ शब्द का देह को जानने वाला, बुद्धिमान पुरुष २ अर्थ हैं ।

[3]संज्ञा (संज्ञानम् इति अङ्) इस १ स्त्री० शब्द के बुद्धि, नाम, गायत्री, ज्ञान, सूर्य की पत्नी, भ्रू आदि का इशारा ६ अर्थ हैं । चेतना = बुद्धिः, नाम = अभिधानम्, हस्ताद्यैरर्थस्य सूचना च एते संज्ञापद-वाच्याः ॥ ३३ ॥

वैद्यश्चिकित्सको विद्वान् प्राज्ञः पण्डितश्च उभौ दोषज्ञौ स्यातामिति सम्बन्धः—दोषज्ञः (दोषं जानातीति कः आलोपे च) इस एक पुं० नाम के वैद्य और विद्वान् २ अर्थ हैं ।

अध्यात्मवेदकः चन्द्रजश्च शब्दात् ब्रह्मा च— [4]ज्ञः (जानातीति कः) इस एक पुं० नाम का विद्वान्, बुध, ब्रह्मा ३ अर्थ हैं ।

[5]करटः (क इति रटति इति अच्) इस १ पुं० शब्द का काक, गजगण्डस्थल, कुसुम्भ निन्द्य जीवन ३ अर्थ हैं ।

[6]कटः (कटति इति अच्) इस १ स्त्री शब्द के हस्तिकोल, कमर २ अर्थ हैं ।

---

१. अथाजिः स्त्री समभूमौ च सङ्ग्रामे । इति मेदिनी । २. अजोऽस्त्री शङ्खे ना निचुले धन्वन्तरौ च हिमकिरणे । क्लीबं पद्मे । इति मेदिनी । ३. 'संज्ञा नामनि गायत्र्यां चेतनारवियोषितोः । अर्थस्य सूचनायां च हस्ताद्यैरपि योषिति' इति मेदिनी । ४. ज्ञो ब्रह्मबुधविद्वत्सु । इति मेदिनी । ५. करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीवने । एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे ॥ करटो वाद्यभेदे' इति मेदिनी ६. 'कटः श्रोणौ क्रियाकारे कलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पल्यां च कटी मता ॥ इति विश्वः । कटः श्रोणौ द्वयोः पुंसि कलिञ्जेऽतिशये शवे ॥ इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ३४ ॥
देवशिल्पिन्यपि त्वष्टा, दिष्टं दैवेऽपि न द्वयोः ।
रसे कटुः कट्वकार्ये त्रिषु मत्सर-तीक्ष्णयोः ॥ ३५ ॥
रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाऽशुभे ।
माया-निश्चल-यन्त्रेपु कैतवाऽनृत-राशिषु ॥ ३६ ॥
अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् ।
सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे संशयेऽपि सा ॥ ३७ ॥

---

¹शिपिविष्टः (शिपिषु रश्मिषु विष्टः) इस १ पुं० शब्द के रोग के कारण जिसके शिर के बाल गिर गये हों, खराब चमड़े वाला, शंकर जी और केशव ४ अर्थ हैं ॥ ३४ ॥

²त्वष्टा (त्वक्ष्यते इति 'नप्तृनेष्टृ' इति साधुः) इस १ पुं० शब्द के विश्वकर्मा (देवलोक का बढ़ई) आदित्य, बढ़ई ३ अर्थ हैं ।

³दिष्टम् (दिश्यते स्मेति क्तः) इस १ न० शब्द का सौभाग्य १ अर्थ है और अपि-शब्द से पुं० दिष्ट का काल (समय) १ अर्थ है ।

⁴कटुः (कटति इति उः) इस १ पुं० शब्द का तीत (कड़ुवा) १ अर्थ है और न० कटु शब्द का अकरणीय (न करने योग्य) १ अर्थ है । और त्रि० कटु शब्द के दूसरे के कल्याण से ईर्ष्या रखना, तीक्ष्ण २ अर्थ हैं ।। ३५ ॥

⁵रिष्टम् (रेषणम् इति रिष्यते स्मेति वा क्तः) इस १ न० शब्द के भलाई, अशुभ, अभाव ३ अर्थ हैं ।

⁶अरिष्टम् (न रिष्टम्) इस १ न० शब्द के अशुभ, शुभ, तक्र, सूतिकागार, आसव ५ अर्थ हैं । पुं० अरिष्ट शब्द के लशुन, नीम आदि २ अर्थ हैं ।

कूटम् (कूट्यते इति अच्) इस १ पुं० न० शब्द के माया, निश्चल, यन्त्र, कपट, असत्य, राशि (समूह), हथौड़ा, पर्वतशृङ्ग, हल का अग्रभाग ९ अर्थ हैं ॥ ३६½ ॥

⁷त्रुटिः (त्रुट्यते अनेन इति इन्) इस १ स्त्री० शब्द के छोटी इलायची, कालभेद, अल्पता (थोड़ा), संदेह ४ अर्थ हैं ॥ ३७ ॥

---

१. शिपिविष्टः शिवः शौरिर्दुश्चर्मा खलतिस्तथा । २. 'त्वष्टा पुमान्देवशिल्पितक्षणोरादित्यभिद्यपि' । इति मेदिनी । ३. दिष्टं दैवे पुमान्काले । इति मेदिनी । ४. कटुः स्त्री कटुरोहिण्यां लताराजिकयोरपि । नपुंसकमकार्ये स्यात्पुंलिङ्गो रसमात्रके । त्रिषु तद्वत्सुगन्ध्योश्च मत्सरेऽपि खरेऽपि च ॥ इति मेदिनी । ५. रिष्टं स्यादशुभेनसोः । इत्यजयः । रिष्टं क्षेमाशुभाभावे पुंसि खड्गे च फेनिले । इति मेदिनी । ६. अरिष्टो लशुने निम्बे फेनिले काककङ्कयो । अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च । इति मेदिनी । ७. त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मैलाकालमानयोः इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्र्युत्कर्षाश्रयः कोट्यो, मूले लग्नकचे जटा।
व्युष्टिः फले समृद्धौ च, दृष्टिर्ज्ञानेऽक्ष्णि दर्शने ॥ ३८ ॥
इष्टिर्यागेच्छयोः, सृष्टिः निश्चिते बहुनि त्रिषु।
कष्टे तु कृच्छ्र-गहने दक्षाऽमन्दाऽगदेषु तु ॥ ३९ ॥
पटुर्द्वौ वाच्यलिङ्गौ च, नीलकण्ठः शिवेऽपि च।
पुंसि कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ॥ ४० ॥

---

[1]कोटिः (कोट्यते इति टः) इस १ स्त्री० शब्द के धनुष का किनारा, उत्कर्ष, खड्गादि का कोना (कोण), संख्या विशेष (करोड़) ४ अर्थ हैं।

[2]जटा (जटति इति अच् टाप् च) इस १ स्त्री० शब्द के वृक्ष की जड़, बढ़कर सटे हुए बाल, जटामासी ३ अर्थ हैं।

व्युष्टिः (व्युच्छनम् इति क्तिन्) इस १ स्त्री० शब्द के फल, समृद्धि २ अर्थ हैं।

दृष्टिः (दर्शनम् इति क्तिन् पत्वे ष्टुत्वे च) इस १ स्त्री० शब्द के ज्ञान, नेत्र, देखना ३ अर्थ हैं। दृष्टिर्ज्ञानेक्ष्णि दर्शने इति हैमः ॥ ३८ ॥

[3]इष्टिः (एषणम् इति क्तिन्) इस १ स्त्री० शब्द के यज्ञ, अभिलाषा, श्लोक संग्रह ३ अर्थ हैं।

[4]सृष्टिः (सर्जनम् इति क्तिन्) इस १ स्त्री० शब्द के अधिक, सही-सही (निश्चित), त्यागा हुआ, निर्माण किया हुआ ४ अर्थ हैं।

कष्टम् (कष्यते स्मेति क्तः इडभावश्च) इस १ त्रि० शब्द के क्लेश, कठिनाई से करने योग्य कार्य २ अर्थ हैं।

[5]पटुः (पाटयति इति ण्यन्तः उः पटादेशश्च) इस १ त्रि० शब्द के बुद्धिमान तीक्ष्ण, रोग रहित ३ अर्थ हैं ॥ ३९ ॥ ॥ इति टान्ताः ॥

[6]नीलकण्ठः (नीलः कण्ठो यस्य) इस १ पुं० शब्द के पक्षिविशेष, शङ्कर जी २ अर्थ हैं।

[7]कोष्ठः (कुष्यते इति थन्) इस १ पुं० शब्द के उदर के अन्दर का एक भाग, कोठी (कोठिला), मकान के अन्दर का भाग, आत्मीय, मध्य, कुसुल (भूसी), आदि ६ अर्थ हैं ॥ ४० ॥

---

१. कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः। इति मेदिनी। २. जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटी। इति मेदिनी। ३. इष्टिर्मताभिलाषेऽपि संग्रहश्लोकयागयोः। इति मेदिनी। ४. मुक्त-निर्मितयोः प्राज्ये त्रिषु सृष्टं तु निश्चिते। इति रुद्रः। ५. पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्दयेऽपि च। इति रुद्रः। पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्। पटोले तु पुमान् क्लीबे छत्रालवणयोरपि। इति मेदिनी। ६. कालकण्ठन्तु दात्यूहे कलविङ्के च खञ्जने। सितापाङ्गे हरे पीतसारके नीलकण्ठवत्॥ इति विश्वः। ७. कोष्ठः कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्ठा निष्पत्ति-नाशाऽन्ताः काष्ठोत्कर्षे स्थितौ दिशि ।
त्रिषु ज्येष्ठोऽतिशस्तेऽपि, कनिष्ठोऽतियुवाल्पयोः ॥ ४१ ॥
दण्डोऽस्त्री लगुडेऽपि स्याद्, गुडो गोलेक्षुपाकयोः ।
सर्पमांसात्पशू व्याडौ गो-भू-वाचस्त्विडा इलाः ॥ ४२ ॥
क्ष्वेडा वंशशलाकाऽपि, नाडी नालेऽपि षट्क्षणे ।

---

[1]निष्ठा (निष्ठानम् इति अङ् टाप् च) इस १ स्त्री० शब्द के सिद्ध होना, नाश, अन्त, ३ अर्थ हैं ।

[2]काष्ठा (काशते इति क्थन् षत्वे ष्टुत्वे टापि च) इस १ स्त्री० शब्द के बढ़ना, स्थिति, मर्यादा, पूर्वादि दिशा, दारुहल्दी, कालमान ५ अर्थ हैं ।

[3]ज्येष्ठः (अतिशयेन प्रशस्यः इति इष्ठन् प्रशस्यस्य ज्यादेशे गुणे च) इस १ त्रि० शब्द के अधिक श्रेष्ठ, ज्येष्ठ भाई, वृद्ध ३ अर्थ हैं और ज्येष्ठ पुं० शब्द का महीना भी अर्थ है ।

[4]कनिष्ठः (अतिशयेन युवा अल्पो वा इति इष्ठनि कनादेशे च) इस १ त्रि० शब्द के अधिक युवा, अति अल्प, २ अर्थ हैं, और स्त्री० शब्द के दुर्बल, कनिष्ठा अंगुली २ अर्थ हैं ॥ ४१ ॥ इति ठान्ताः ॥

[5]दण्डः (दण्डयति इति अच्) इस १ पुं० शब्द के लाठी (डंडा) यम, मानभेद, सजा ४ अर्थ हैं ।

[6]गुडः (गुडति इति कः) इस १ पुं० शब्द के गुड़, मिट्टी की गोली २ अर्थ हैं । गोलो वर्तुलपिण्डः पचनं पाकः इक्षूणां पाकः इक्षुपाकः अनयोः गुडः स्यादिति सम्बन्धः ।

[7]व्याडः (व्याडति इति अच्) इस १ पुं० शब्द के दुष्ट, अहि (सर्प) बाघ ३ अर्थ हैं । सर्पो भुजंगः मांसं अत्तीति मांसात् स चासौ पशुश्चेति मांसात्पशुर्व्याघ्रः इमौ व्याडौ व्याडपदवाच्यौ स्यातामिति सम्बन्धः ।

[8]इडा-इला (इलति इति कः डलयोरेकत्वम्) इन २ स्त्री० शब्दों के गाय, भूमि, वाणी, बुध की पत्नी ४ अर्थ हैं ॥ ४२ ॥

[9]क्ष्वेडा (क्ष्वेलति इति अच् टाप् च डलयोरेकत्वम्) इस १ स्त्री० शब्द के पिंजड़ा, बाँस की पतली नोकीली शलाका, सिंहनाद ३ अर्थ हैं ।

षट्क्षणे = षट्क्षणपरिमिते काले = समये अपिशब्दात् शिरादिष्वपि—[10]नाडी (नालयति इति अच् ङीप् च डलयोरेकत्वम्) इस १ स्त्री० शब्द के १ घटी, नाल (डंठल), नस, षट्क्षणात्मक काल ४ अर्थ हैं ।

---

१. निष्ठा निष्पत्तिनाशान्तयाच्ञानिर्वहणेषु च । इति मेदिनी । २. काष्ठा दारुहरिद्रायां कालमान-प्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम् ॥ इति मेदिनी । ३. ज्येष्ठः श्रेष्ठे च वृद्धे च त्रिषु मासान्तरे पुमान् । ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः ॥ इति मेदिनी । ४. कनिष्ठोऽतियुवाल्पयो-ल्पानुजे स्त्री दुर्बलाङ्गुलौ । इति मेदिनी । ५. दण्डो यमे मानभेदे लगुडे दमसैन्ययोः । व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि । अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके । इति विश्वः । ६. गुडः स्याद् गोलके हस्तिसंनाहेक्षुविकारयोः । गुडा स्नुह्यां च कथिता गुटिकायां च योषिति ॥ इति मेदिनी । ७. 'व्याडो व्याघ्रे खले सर्पे. इति रभसः । ८. इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च । इति मेदिनी । इडा तु बुधयोषिति । सौरभेय्यां च वचने वसुमत्यामपि स्त्रियाम् । इति मेदिनी । ९. क्ष्वेडो ध्वनौ कर्णामये विषे । क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति । लोहितार्कपर्णफाले घोषपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्तितः । इति मेदिनी । १०. नाडी नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च । तथा षट्क्षणकालेऽपि । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काण्डोऽस्त्री दण्ड-बाणाऽर्ववर्गाऽवसर - वारिषु ॥ ४३ ॥
स्याद् भाण्डमश्वाभरणेऽमत्रे मूलवणिग्धने ।
भृशप्रतिज्ञयोर्वाढं, प्रगाढं भृश-कृच्छ्रयोः ॥ ४४ ॥
शक्तस्थूलौ त्रिषु दृढौ, व्यूढौ विन्यस्त-संहतौ ।
भ्रूणोऽर्भके स्त्रैणगर्भे, बाणो बलिसुते शरे ॥ ४५ ॥
कणोऽतिसूक्ष्मे धान्यांशे, संघाते प्रमथे गणः ।

---

[१]काण्डः (कनति इति कनी दीप्तौ इति अमन्ताड्डः क्त्वेऽनुस्वारे परसवर्णे दीर्घश्च) इस १ पुं० न० शब्द के दण्ड, शर, अर्वा = कुत्सित, वर्ग = परिच्छद, अवसर, जल, स्तम्ब, वृक्षस्कन्ध ८ अर्थ हैं ॥ ३४ ॥

[२]भाण्डम् (भण्यते इति डः पृषोदरादिः) इस १ न० शब्द के अश्व का आभूषण, पात्र, व्यापार में व्यय किये हुए मूलधन ३ अर्थ हैं। केवल आभूषण भी १ अर्थ है ॥ इति डान्ताः ॥

[३]वाढम् (वाहते, वाह्यते स्मेति कर्तरि कर्मणि वा क्तः, 'क्षुब्धस्वान्त' इति साधुः) इस १ न० शब्द के अधिक और प्रतिज्ञा २ अर्थ हैं।

[४]प्रगाढम् (प्रगाह्यते इति क्तः इडभावश्च) इस १ न० शब्द के अधिक और क्लेश, २ अर्थ हैं ॥४४॥

[५]दृढः (दर्द्दति दंहति वा स्मेति क्तः दृढः स्थूलबलयोः इति साधुः) इस १ त्रि० शब्द के समर्थ, मोटा, २ अर्थ हैं।

[६]व्यूढः (विशेषेणोह्यते स्मेति क्तः) इस १ त्रि० शब्द के बनाया हुआ, मिला हुआ २ अर्थ हैं ॥ इति ढान्ताः ॥

[७]भ्रूणः (भ्रूण्यते इति घञ्) इस १ पुं० शब्द के शिशु, स्त्री का गर्भ २ अर्थ हैं।

[८]वाणः (वाणयति इति स्वार्थण्यन्तः, तस्मात् अच्) इस १ पुं० शब्द के बाणासुर, शर, २ अर्थ हैं ॥ ४५ ॥

[९]कणः (कणति इति अच्) इस १ पुं० शब्द के अधिक छोटा (जैसे अन्नकण आदि) १ अर्थ हैं।

[१०]गणः (गण्यते इति घञ् अच् वा) इस १ पुं० शब्द के समूह, शङ्कर दूत २ अर्थ हैं।

---

१. काण्डं चावसरे वाणे नाले स्कन्धे च शाखिनाम्। स्तम्बे रहसि वर्गे च। इति धरणिः। काण्डः स्तम्बे तरु-स्कन्धे वाणेऽवसरनीरयोः। कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम् ॥ इति मेदिनी। २. भाण्डं भूषणमात्रे स्यात्, इति धरणिः। भाण्डं पात्रे वणिग्मूल-धने भूषाश्वभूषयोः। इति मेदिनी। ३. वाढं भृशप्रतिज्ञयोः। इति कोशान्तरम्। ४. प्रगाढं स्यात् दृढे कृच्छ्रे। इति धरणिः। ५. दृढः स्थूले नितान्ते च प्रगाढे बलवत्यपि। इति मेदिनी। ६. व्यूढः संहतविन्यस्ते पृथुलेऽप्यभिधेयवत्। इति मेदिनी। ७. भ्रूणः स्त्रीगर्भडिम्भयोः इति मेदिनी। ८. वाणः स्याद्गोस्तने दैत्यभेदे केवल-काण्डयोः। वाणा तु वाणमूलेऽस्त्री नीलझण्ट्यां पुनर्द्वयोः। इति मेदिनी। ९. कणा जीरककुम्भीरमाक्षिकापिप्पलीषु च। कणोऽतिसूक्ष्मे धान्यांशे। इति मेदिनी। १०. गणः स्यात्प्रमथे संघे संख्यासैन्यप्रभेदयोः। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ४६ ॥
मौर्व्यां द्रव्याश्रिते सत्त्वशुक्लसन्ध्यादिके गुणः ।
निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ॥ ४७ ॥
वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे ।
अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु ॥ ४८ ॥
स्थाणुः शर्वोऽप्यथ द्रोणः काकेऽप्याजौ रवे रणः ।

---

[१]पणः (पणनम् इति अप्) इस १ पुं० शब्द के द्यूतक्रीडा (जुवा) में दाव पर रक्खा हुआ रुपया आदि, जीविका (वेतन) मूल्य, सम्पत्ति ४ अर्थ हैं ॥ ४६ ॥

[२]गुणः (गुण्यते इति घञ्) इस १ पुं० शब्द के धनुष की डोरी, द्रव्याश्रित रूप रसादि और सत्त्वादि, शुक्लादि, सन्धि विग्रहादि, और इन्द्रिय ७ अर्थ हैं ।

[३]क्षणः (क्षणोति इति अच्) इस १ पुं० शब्द के मूर्ख बनकर बैठना, कालविशेष अर्थात् ३ मिनट का समय और उत्सव ३ अर्थ हैं ॥ ४७ ॥

[४]वर्णः (वर्ण्यते इति घञ्) इस १ पुं० शब्द के ब्राह्मण-क्षत्रिय आदि ४ जाति, लाल हरा आदि रंग, स्तुति ३ अर्थ हैं । नपुं० वर्ण शब्द का क, ख, आदि अक्षर भी १ अर्थ है ।

[५]अरुणः (ऋच्छति इति उनन् गुणे) इस १ पुं० शब्द के रवि, सूर्य का रथ चालक, सायंकालीन रक्तिमा और कोढ़ ३ अर्थ हैं । त्रि० अरुण शब्द का रक्तवर्ण वाला १ अर्थ है ॥ ४८ ॥

[६]स्थाणुः (तिष्ठति इति णुः) इस १ पुं० शब्द के शङ्कर जी, ठूँठा वृक्ष (जिसमें शाखा आदि न हों इस प्रकार का पेड़) और ध्रुव ३ अर्थ हैं ।

[७]द्रोणः (द्रवति इति नः) इस १ पुं० शब्द के काक, द्रोणाचार्य, नापने का परिमाण ३ अर्थ हैं ।

[८]रणः (रणति इति अच्) इस १ पुं० शब्द के युद्ध और शब्द २ अर्थ हैं ।

---

१. पणो माने वराटानां मूल्ये कार्षापणे धने । द्यूते विक्रय्यशाकादेर्वद्धमुष्टौ ग्लहे भृतौ । इति धरणिः । २. गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्याग-शौर्यादिसत्वादिसन्ध्याद्यावृत्तिरज्जुषु । शुक्लादावपि बुद्धयां च । इति मेदिनी । ३. क्षणो व्यापारशून्यत्वमुहूर्त्तोत्सवपर्वसु । इति रुद्रः । ४. वर्णो द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां मेदरूपाक्षरविलेखने । इति मेदिनी । ५. अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्क सारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु । अरुणातिविषा श्यामा माञ्जिष्ठात्रिवृतासु च । इति मेदिनी । ६. स्थाणुः कीले हरे पुमान् अस्त्री ध्रुवे । इति मेदिनी । ७. द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये । पुमान् कृपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादिन्यामपीष्यते । इति मेदिनी । ८. रणः कोणे क्वणे पुंसि समरे पुंनपुंसकम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥ ४९ ॥
ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः ।
हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥ ५० ॥
त्रिषु पाण्डौ च हरिणः, स्थूणा स्तम्भेऽपि वेश्मनः ।
तृष्णे स्पृहा-पिपासे द्वे, जुगुप्साकरुणे घृणे ॥ ५१ ॥
वणिक्पथे च विपणिः, सुरा प्रत्यक् च वारुणी ।

---

[1]ग्रामणीः (ग्रामं नयति इति क्विप् णत्वञ्च) इस १ पुं० शब्द का नापित (नाई) १ अर्थ है और त्रि० ग्रामणी शब्द के प्रधान (मुखिया), श्रेष्ठ अर्थ हैं ॥ ४९ ॥

ऊर्णा (ऊर्णोति इति डः टाप् च) इस १ स्त्री० शब्द के भेंड़ का बाल (ऊन), भौंहों का मध्य भाग २ अर्थ हैं ।

[2]हरिणी (हरिणस्य स्त्री इति ङीप्) इस १ स्त्री० शब्द के मृगी, सुवर्ण प्रतिमा, हरे वर्णवाली, ३ अर्थ हैं ॥ ५० ॥

[3]हरिणः (हरति इति इनच्) इस १ त्रि० शब्द के पाण्डुर पीलापन लिये सफेद युक्त रंग, सारङ्ग (मृग) २ अर्थ हैं ।

[4]स्थूणा (तिष्ठति 'रास्ना सास्ना' इति निपातनात् साधुः) इस १ स्त्री० शब्द के गृह खम्भ, लोहे की प्रतिमा और विषय ३ अर्थ हैं ।

तृष्णा (तर्षणम् इति नः कित्वात् गुणाभावे टापि च) इस १ स्त्री० शब्द के इच्छा, पिपासा (प्यास) २ अर्थ हैं ।

[5]घृणा (घर्णनम् इति अङि टापि च) इस १ स्त्री शब्द के घृणा, दया २ अर्थ हैं ॥ ५१ ॥

विपणिः (विपण्यते इति इन्) इस १ स्त्री० शब्द के बाजार का मार्ग, दुकान २ अर्थ हैं ।

[6]वारुणी (वरुणस्य इयम् इति अण् ङीप् च) इस १ स्त्री० शब्द के शराब, पश्चिम दिशा, २ अर्थ हैं ।

---

१. ग्रामणीर्भोगिके पत्यौ प्रधाने नापितेऽपि च । ग्रामणीर्नालिकायां च ग्रामेयी पण्ययोषितोः ॥ इति विश्वः । ग्रामीणा नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत् । इति मेदिनी । २. हरिणी हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च । इति मेदिनी । ३. हरिणः पुंसि सारङ्गे शबले त्वभिधेयवत् । इति मेदिनी । ४. स्थूणा स्यात् सूर्म्यां स्तम्भेऽपि वेश्मनः । इति मेदिनी । ५. आपणे पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम् । इति रुद्रः । ६. वारुणी गण्डदूर्वायां प्रतीचीसुरयोः स्त्रियाम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करेणुरिभ्यां स्त्री, नेभे, द्रविणं तु बलं धनम् ॥ ५२ ॥
शरणं गृह-रक्षित्रोः, श्रीपर्णं कमलेऽपि च।
विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ॥ ५३ ॥
प्रमाणं हेतु-मर्यादा-शास्त्रेयत्ता-प्रमातृषु ।
करणं साधकतमं क्षेत्र-गात्रेन्द्रियेष्वपि ॥ ५४ ॥
प्राण्युत्पादे संसरणमसम्बाधचमूगतौ ।

---

[१]करेणुः (करोति इति एणुः, के रेणुरस्य वा) इस १ स्त्री० शब्द के हस्तिनी (गज की स्त्री) और पुं० करेणु शब्द का गज (हाथी) १ अर्थ हैं। इभ्यां करेणुः स्त्री, इभे ना स्यादिति सम्बन्धः।

[२]द्रविणम् (द्रूयते द्रवति वा इनन्) इस १ न० शब्द के ताकत (पौरुष), वित्त (धन), स्वर्ण ३ अर्थ हैं ॥ ५२ ॥

[३]शरणम् (शृणाति इति ल्युट्) इस १ न० शब्द के गृह (मकान) रक्षा करने वाला २ अर्थ हैं।

[४]श्रीपर्णम् (श्रीः पर्णेऽस्य) इस १ न० शब्द के कमल, और यज्ञ के लिए रगड़ कर अग्नि उत्पन्न करने का काष्ठ (अग्निमन्थ) २ अर्थ हैं।

[५]तीक्ष्णम् (तेजयति इति क्स्नः कुत्वे चत्वें पत्वे च) इस १ न० शब्द के जहर, युद्धोत्साह, लोहा, लवण ४ अर्थ हैं और त्रि० तीक्ष्ण शब्द का अच्छी धार वाला अस्त्र १ अर्थ है। खरे = तिग्मे ॥ ५३ ॥

[६]प्रमाणम् (प्रमिमीते, प्रमितम्, प्रमीयते वा इति ल्युट्) इस १ न० शब्द के हेतु = कारण, (जैसे पर्वत पर आग का अनुमान करने में धूम कारण है), सीमा, शास्त्र, परिमाण, प्रमाता = ज्ञाता ५ अर्थ हैं।

[७]करणम् (क्रियते इति ल्युट्) इस १ न० शब्द के कार्य की सिद्धि में अधिक सहायक (जैसे हनन क्रिया में शर आदि) क्षेत्र, देह और इन्द्रिय ४ अर्थ हैं ॥ ५४ ॥

संसरणम् (सम्यक् सरन्त्यनेन इति ल्युट्) इस १ न० शब्द के जीवों की उत्पत्ति, सेना का बाधा रहित आगे चलना, सड़क आदि ३ अर्थ हैं। प्राण्युत्पादे = जीवानामुत्पादे, असम्बाधचमूगतौ = अव्याहतसेनागतौ, घण्टापथे = नगरमार्गे च संसरणं स्यादिति सम्बन्धः।

---

१. करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे। इति मेदिनी। करेणुश्च गरेणुश्च करिणी कर्णिकारयोः। इति रन्तिदेवः। २. द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे। इति मेदिनी। ३. शरणं गृहरक्षित्रोर्वधरक्षणयोरपि। इति मेदिनी। ४. श्रीपर्णी कुम्भिगम्भार्योः क्लीबे पद्माग्निमन्थयोः। इति रभसः। ५. तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके। क्लीबं यवाग्रजे पुंसि तिग्मात्मत्यागिनोस्त्रिषु॥ इति मेदिनी। भवेदभिमरो युद्धे बले स्वबलसाध्वसे। इति मेदिनी। ६. प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि। इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि। इति मेदिनी। ७. करणं कारणे काये साधनेन्द्रियकर्मसु। कायस्थे व्रतबन्धे च नाट्यगीतप्रभेदयोः। पुमान् शूद्राविशोः पुत्रे वानरादौ च कीर्त्यते। इत्यजयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घण्टापथेऽथ वान्तान्ने समुद्गिरणमुन्नये ॥ ५५ ॥
अतस्त्रिषु, विषाणं स्यात् पशुशृंगेभदन्तयोः ।
प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥ ५६ ॥
सङ्कीर्णौ निचिताशुद्धावीरिणं शून्यमूषरम् ।
(सेतौ च वरणौ वेणी नदीभेदे कचोच्चये) ॥ प्र० ॥
देवसूर्यौ विवस्वन्तौ, सरस्वन्तौ, नदार्णवौ ॥ ५७ ॥

---

[1]समुद्धरणम् (सम्यक् उद्ध्रियते इति भावे ल्युट्) इस १ न० शब्द के पेट से मुख के रास्ते गिरा हुआ अन्न अर्थात् कय, किसी वस्तु को ऊपर उठाना या खींचना, उपार लेना (उखाड़ना) ३ अर्थ हैं। वान्तान्ने = भुक्तोज्झिते, उन्नये = ऊर्ध्वनयने, उन्मूलिते च समुद्धरणं स्यादिति सम्वन्धः ॥ ५५ ॥

अतः परिमाणान्तं त्रिष्विति सम्बन्धः— [2]विषाणम् (व्यस्ति इति विपूर्वकासधातोः चानशि अलोपे षत्वे णत्वे च) इस १ त्रि० शब्द के पशुओं की सींग, गज के दाँत २ अर्थ हैं।

[3]प्रवणम् (प्रवन्तेऽनेन अत्र वा ल्युट्) इस १ त्रि० शब्द के ढालू भूमि, विनम्र २ अर्थ हैं और पुं० प्रवण शब्द का जहां पर चार मार्ग मिले हों अर्थात् चौराहा १ अर्थ है ॥ ५६ ॥

[4]संकीर्णः (संकीर्यते स्मेति क्तः इत्वे रपरत्वे दीर्घे नत्वे णत्वे च) इस १ त्रि० शब्द के सब जगह फैला हुआ परिपूर्ण व्याप्त, अशुद्ध (दो वर्णों का संयोग अर्थात् वर्ण संकर और संकट) २ अर्थ हैं। निचितो व्याप्तः ।

[5]ईरिणम् (ऋच्छन्ति यस्मिन् इति ईनन् कित्वात् गुणाभावे रपरे णत्वे च) इस १ न० शब्द के शून्य = प्राणि रहित देश, फसल आदि से शून्य ऊपर जमीन २ अर्थ हैं।

[6]विवस्वान् (विवस्तेजोऽस्यास्ति इति मतुप् वत्वे दीर्घे नुमि सुलोपे संयोगान्तलोपे च) इस १ पुं० शब्द के सुर (देव), सूर्य २ अर्थ हैं।

[7]सरस्वान् (सरो गमनमस्यास्ति इति मतुप्) इस १ पुं० शब्द के सिन्धु ब्रह्मपुत्र आदि नद, सागर २ अर्थ हैं ॥ ५७ ।

---

१. भुक्तोज्झितोन्मूलितयोः स्यादुद्धरणमुन्नये । इति रभसः । २. विषाणी क्षीरकाकोल्यामजशृङ्ग्यां च योषिति । कुष्ठनामौषधौ क्लीबं त्रिषु शृङ्गेभदन्तयोः । इति मेदिनी । ३. प्रवणः क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे । आयत्ते च तथा क्षीणे प्रगुणे समुदाहृतः । इति धरणिः । प्रवणो ना चतुष्पथे । क्रमनिम्नमहीभागोदारप्रह्वेषु च त्रिषु । इति मेदिनी । ४. संकीर्णं संकटे व्याप्ते कुत्रचिद्वर्णसंकरे । इत्यजयः । संकीर्णं निचितेऽपि स्यादशुद्धे चाभिधेयवत् । इति मेदिनी । ५. ईरिणं तूषरे शून्ये । इति मेदिनी । इरिणं निराश्रये भूभागे कथितमूषरे । इति ह्रस्वादावजयः । ६. विवस्वांस्तु सुरे सूर्ये तन्नगर्यां विवस्वति । इति मेदिनी । देवे सुरे घने राज्ञि देवमाख्यातमिन्द्रिये । देवी कृताभिषेकायां तेजनी-स्पृक्कयोरपि । इति कोषान्तरम् । ७. सरस्वांस्तु नदे चाब्धौ नान्यवद्रसिके स्त्रियाम् । वाणीस्त्रीरत्न-वाग्देवीगोनदीषु नदीभिदि । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षि-तार्क्ष्यौ गरुत्मन्तौ, शकुन्तौ भास-पक्षिणौ।
अग्न्युत्पातौ धूमकेतू, जीमूतौ मेघ-पर्वतौ ॥ ५८ ॥
हस्तौ तु पाणिनक्षत्रे, मरुतौ पवनामरौ।
यन्ता हस्तिपके सूते, भर्ता धातरि पोष्टरि ॥ ५९ ॥
पानपात्रे शिशौ पोतः, प्रेतः प्राण्यन्तरे मृते।
ग्रहभेदे ध्वजे केतुः, पार्थिवे तनये सुतः ॥ ६० ॥

गरुत्मान् (गरुतः पक्षाः सन्त्यस्य इति मतुप् वत्वाभावे) इस १ पुं० शब्द के चिड़ियाँ, (पक्षी) गरुड़ २ अर्थ हैं।

[१]शकुन्तः (शक्नोति इति उन्तः) इस १ पुं० शब्द के पक्षी मात्र, गृध्र (गिद्ध) २ अर्थ हैं।

[२]धूमकेतुः (धूमः केतुः चिह्नमस्य) इस १ पुं नाम के अग्नि, आगामी उत्पात सूचक नक्षत्र (तारा) विशेष २ अर्थ हैं।

[३]जीमूतः (जीवनं मूतं बद्धमनेन इति पृषोदरादिः) इस १ पुं० शब्द के मेघ (बादल), पर्वत २ अर्थ हैं ॥ ५८ ।

[४]हस्तः (हसति इति तन्) इस १ पुं० शब्द के कर (हाथ) हस्तनक्षत्र, २ अर्थ हैं।

[५]मरुत् (म्रियतेऽनेनेति मृङ् धातोः उति गुणे च) इस १ पुं० शब्द के पवन, सुर, (देव) २ अर्थ हैं।

यन्ता (यच्छति इति तृच्) इस १ पुं० शब्द के हस्तिपक (पिलवान), सारथी (रथादि चालक) २ अर्थ हैं।

[६]भर्ता (बिभर्ति इति तृच्) इस १ पुं० शब्द के विधाता, (ब्रह्मा) पालन करने वाला, पति ३ अर्थ हैं ॥ ५९ ।

[७]पोतः (पुनाति इति तन्) इस १ पुं० शब्द के पीने का पात्र, यान (नौकादि), शिशु (बालक) ३ अर्थ हैं।

[८]प्रेतः (प्रकर्षेण इतः) इस १ पुं० शब्द के प्रेत योनि विशेष, मरा हुआ प्राणी २ अर्थ हैं।

ग्रहभेदे ध्वजे च–[९]केतुः (चाय्यते अनेन इति चायः किः तुः गुणे च) इस १ पु० शब्द के चिह्न (पताका) केतु संज्ञक ग्रह २ अर्थ हैं।

[१०]सुतः (सूयते स्मेति षुञ् धातोः क्तः) इस १ पुं० शब्द के नृप और पुत्र २ अर्थ हैं ॥ ६० ॥

---

१. 'भासो भासि समाख्यातौ गोष्ठकुक्कुटगृध्रयोः' इति विश्वः। २. 'धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः' । इति विश्वः। ३. जीमूतोऽद्रौ धृतिकरे देवताडे पयोधरे। इति मेदिनी। ४. हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च। ऋक्षे केशात्परो व्राते। इति मेदिनी। ५. मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम्। इति मेदिनी। ६. भर्ता स्वामिनि पुंसि स्यात्त्रिषु धातरि पोष्टरि। इति मेदिनी। ७. पोतः शिशौ वहित्रे च गृहस्थाने च वाससि। इति मेदिनी। यानपात्रे वा पाठः। ८. प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः। इति मेदिनी। ९. केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि। इति मेदिनी। १०. सुतः स्यात्पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थपतिः कारुभेदेऽपि, भूभृद्भूमिधरे नृपे।
मूर्धाभिषिक्तो भूपेऽपि, ऋतुः स्त्रीकुसुमेऽपि च॥ ६१॥
विष्णावप्यजिताऽव्यक्तौ, सूतस्त्वष्टरि सारथौ।
व्यक्तः प्राज्ञेऽपि, दृष्टान्तावुभौ शास्त्रनिदर्शने॥ ६२॥
क्षत्ता स्यात् सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे।

---

[1]स्थपतिः (तिष्ठन्त्यस्मिन् इति घञर्थे कः, स्थश्चासौ पतिश्च) इस १ पुं० शब्द के कारीगर, अपि शब्द से कञ्चुकी बृहस्पति के मन्त्र से यज्ञ करने वाला ३ अर्थ हैं।

भूभृत् (भुवं बिभर्ति इति क्विप् तुक् च) इस १ पुं० शब्द के पर्वत, नृप २ अर्थ हैं।

[2]मूर्धाभिषिक्तः (मूर्धनि अभिषिच्यते स्मेति क्तः) इस १ पुं० नाम के भूपाल, (राजा) अपि शब्द से सचिव क्षत्रिय ३ अर्थ हैं।

[3]ऋतुः (ऋच्छति इति तुः किच्च) इस १ पुं० शब्द के स्त्रियों का मासिक धर्म, वसन्त आदि ६ ऋतु २ अर्थ हैं॥ ६१॥

[4]अजितः (न जीयते स्मेति क्तः) इस १ पुं० शब्द के हरि (विष्णु=वेवेष्टि सर्वं जगदिति) शंकर २ अर्थ हैं और त्रि० का नहीं हारा हुआ १ अर्थ है।

अव्यक्तः (न व्यज्यते स्मेति क्तः) अव्यक्त पुं० शब्द के विष्णु, शिव, मूर्ख ३ अर्थ हैं। न० के महदादि (बुद्धि, अहङ्कार, पञ्चतन्मात्रा पञ्च महाभूत एकादशेन्द्रिय) और आत्मा २ अर्थ हैं। त्रि० का अस्पष्ट १ अर्थ है।

[5]सूतः (सुवति स्म, सूयते स्मेति वा षू प्रेरणे धातोः क्तः) इस १ पुं० शब्द के बढ़ई, रथचालक, क्षत्रिय वर्ण के पुरुष से ब्राह्मण वर्ण की कन्या में उत्पन्न सन्तति ३ अर्थ हैं। त्रि० सूत के उत्पन्न हुआ, प्रेरित २ अर्थ हैं।

[6]व्यक्तः (व्यज्यते स्मेति क्तः कुत्वे चत्वे च) इस १ पुं० शब्द के विचक्षण (विद्वान्), स्पष्ट २ अर्थ हैं।

[7]दृष्टांतः दृष्टोऽन्तः पारोऽत्र) इस १ पुं० शब्द के तर्क आदि शास्त्र, उदाहरण, मरण आदि ३ अर्थ हैं। शिष्यते अनेनेति शासनं शास्त्रम्, निदर्शनम्, उदाहरणं च उभे दृष्टान्तौ स्यातामिति सम्बन्धः॥ ६२॥

[8]क्षत्ता (क्षदति इति तृन्) इस १ पुं० शब्द के रथ चालक, द्वारपाल, शूद्र वर्ण के पुरुष से क्षत्रिय वर्ण की स्त्री में उत्पन्न सन्तति, गणिका (वेश्या) पुत्र, नियुक्त, विधाता ६ अर्थ हैं।

---

१. स्थपतिः कञ्चुकिन्यपि जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु। इति मेदिनी। २. मूर्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च। इति मेदिनी। ३. ऋतुर्मासि वसन्तादौ धीरे स्त्रीकुसुमेऽपि च। इति धरणिः। ४. अजितो ना हरौ त्रिषु अनिर्जिते च। इति विश्वः मेदिनी च। अव्यक्तः शंकरे विष्णावव्यक्तं महदादिके। आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत्। इति विश्वः। ५. सूतस्तु सारथौ तक्षिण क्षत्रियाद् ब्राह्मणीसुते। वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु॥ इति मेदिनी। ६. व्यक्तः स्फुटमनीषिणोः। इति मेदिनी। ७. अन्तः प्रान्तेऽन्तिके नाशे। इति विश्वः। दृष्टान्त उदाहृतौ। शास्त्रे च मरणे चेति मेदिनी। ८. क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ। भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजि। इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृत्तान्तः स्यात् प्रकरणे प्रकारे कात्स्न्यं-वार्तयोः ॥ ६३ ॥
आनर्तः समरे नृत्यस्थान-नीवृद्विशेषयोः ।
कृतान्तो यम-सिद्धान्त-दैवाऽकुशलकर्मसु ॥ ६४ ॥
श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥ ६५ ॥
कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे ।
कासू-सामर्थ्ययोः शक्तिः मूर्तिः काठिन्य-काययोः ॥ ६६ ॥

---

[1]वृत्तान्तः (वृत्तोऽन्तोऽस्य, वृत्तस्यान्तः वा) इस १ पुं० शब्द के प्रकरण (प्रसंग), प्रकार (सदृश तुल्य), सम्पूर्ण, वार्ता (वात) ४ अर्थ हैं ॥ ६३ ॥

[2]आनर्त्तः (आनृत्यन्त्यत्र इति घञ्) इस १ पुं० शब्द के युद्ध, नृत्यस्थान (नृत्यशाला), देश विशेष, ३ अर्थ हैं।

कृतान्तः (कृतोऽन्तो येन, यस्य वा) इस १ पुं० शब्द के धर्मराज (यमराज), सिद्धान्त, भाग्य, अकल्याणकारक कर्म (पापकर्म) ४ अर्थ हैं ॥ ६४ ॥

धातुः (दधाति धीयते वा इति तुन्) इस १ पुं० शब्द के कफ (थूक, खखार, पित्त आदि), रस (भोजन के पश्चात् प्रथम उत्पन्न अन्न का विकार विशेष) रक्त आदि रस, रक्त मांस वीर्य चर्वी हड्डी आदि), पृथ्वी जल तेज वायु आदि पञ्चमहाभूत (पृथ्वी जल तेज वायु आकाश) और उनके गुण (गन्ध, रस, रूप, स्पर्श, शब्द) इन्द्रिय (आँख कान गुदा लिङ्ग हाथ पैर घ्राण आदि), पाषाण विकार, गेरु वर्ण, रजत आदि, भू पच् गम् आदि अर्थ हैं ॥ ६५ ॥

[3]शुद्धान्तः (शुद्धोऽन्तोऽस्य इति 'असर्व' इति पूर्वविशेषणम्, असर्वगोचरे सर्वजनागम्ये नृपस्य कक्षान्तरे=गुह्यकक्षाभेदे अपिशब्दादन्तःपुरे अशौचान्तेऽपि) इस १ पुं० शब्द के राजाओं के अन्तःपुर (रनिवास), अशौचका अन्त २ अर्थ हैं।

[4]शक्तिः (शक्यतेऽनया इति क्तिन्) इस १ स्त्री० शब्द के सामर्थ्य, बर्छा २ अर्थ हैं। पार्वती, उत्साह, बल आदि भी अर्थ हैं।

मूर्तिः (मूर्च्छ्य इति क्तिन्) इस १ स्त्री० शब्द के कठोरता, शरीर २ अर्थ हैं ॥ ६६ ॥

---

१. वृत्तान्तोऽवसरे भावे कात्स्न्यवार्ताविशेषयोः । वृत्तान्तः प्रक्रियायां च । इति विश्वः । २. आनर्तो नृत्यशालायां जने जनपदान्तरे । इत्यजयः । आनर्तो देशभेदेऽपि नृत्यस्थाने जने रणे । इति मेदिनी । ३. शुद्धान्तोऽन्तःपुरे गुह्यकक्षाभेदे च भूपतेः इत्यजयः । ४. शक्तिरस्त्रान्तरे शौर्यामुत्साहादौ बले स्त्रियाम् । इति मेदिनी । कासूर्विकलवाचि स्यात्कासूः शक्त्यायुधेऽपि च । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्तार-वल्ल्योर्व्रततिर्वसती रात्रि-वेश्मनोः ।
क्षयार्चयोरपचितिः सातिर्दानाऽवसानयोः ॥ ६७ ॥
अर्तिः पीडा-धनुष्कोट्योर्जातिः सामान्य-जन्मनोः ।
प्रचारस्यन्दयो रीति,-रीतिर्डिम्ब-प्रवासयोः ॥ ६८ ॥
उदयेऽधिगमे प्राप्ति स्त्रेता त्वग्नित्रये युगे ।

व्रततिः (व्रतं करोति इति णिजन्तात् कर्तरि अतिः व्रजन्ती ततिरस्याः इति पृषोदरादिर्वा) इस १ स्त्री० शब्द के फैलाव (विस्तार) लता २ अर्थ हैं ।

[1]वसतिः (वसन्त्यस्याम् इति अतिः) इस १ स्त्री० शब्द के निशा (रात), गृह (घर) २ अर्थ हैं और निवास भी १ अर्थ है ।

[2]अपचितिः (अपचीयते इति क्तिन्, अपाचाय्यते स्मेति वा क्तिन् चि आदेशश्च) इस १ स्त्री० शब्द के हानि, पूजा २ अर्थ हैं ।

सातिः (सननं सानं वा भावे क्तिन् ऊतियूतिजूति इति निपातनात् साधुः) इस १ स्त्री० शब्द के दान, (गजपद) अवसान (अन्त) २ अर्थ हैं ॥ ६७ ॥

आर्तिः (अर्दनम् इति क्तिन् , ऋच्छतेः क्तिन् वृद्धिश्च आर्तिः इति कश्चित्) इस १ स्त्री० शब्द के कष्ट (दुःख, क्लेश) धनुष का दोनों किनारा २ अर्थ हैं ।

[3]जातिः (जननम् इति क्तिन् आत्वञ्च) इस १ स्त्री० शब्द के ब्राह्मणत्व आदि सामान्य जाति, गोत्र, जातीफल, (जायफल) आमलक (आँवला), वृत्त (छन्द), मालती पुष्प (फूल), उत्पत्ति (जन्म) ७ अर्थ हैं ।

[4]रीतिः (रीयते इति क्तिच्) इस १ स्त्री० शब्द के धीरे-धीरे बहना, टपकना, लोकाचार (रिवाज), वृत्त (छन्द), लोह पीतल आदि को मैल (मुर्चा, मण्डूर) पाञ्चाली, गौडी वैदर्भी आदि रसादि सम्बन्धी रीति, अर्थ हैं ।

[5]ईतिः (ईयतेऽनया इति क्तिन्) इस १ स्त्री० शब्द के अधिक वर्षा, सूखा पड़ना, नृप का पास आना, सुग्गा का लगना, मूषक (चूहा) टिड्डी आदि का लगना, विदेश गमन, डिम्ब = विप्लव आदि ८ अर्थ हैं ॥ ६८ ॥

[6]प्राप्तिः (प्रापणम् इति क्तिन्) इस १ स्त्री० शब्द के उदय, लाभ २ अर्थ हैं ।

---

१. वसतिः स्यात् स्त्रियां वासयामिन्यां च निकेतने । इति मेदिनी । २. भवेदपचितिः पूजाव्यय-निष्कृतिहानिषु । इति मेदिनी । ३. जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः । जातिर्जातीफले धात्र्यां चुल्लीकम्पिल्लयोरपि । इति विश्वः । जातिः स्त्री गोत्रजन्मनोः । अश्मन्तिकामलक्योश्च सामान्य-च्छन्दसोरपि । जातीफले च मालत्याम् । इति मेदिनी । ४. रीतिः प्रचारे स्यन्दे च लोहाकट्टारकूटयोः । इति विश्वः । ५. ईतिर्डिम्बे (विप्लवे) प्रवासे (विदेशे) इति वृष्ट्यादि षट्सु च स्त्रियाम् । इति मेदिनी । अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः । ६. प्राप्तिर्महोदये । लाभेऽपि च स्त्रियाम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीणाभेदेऽपि महती, भूतिर्भस्मनि सम्पदि ॥ ६९ ॥
नदीनगर्योर्नागानां भोगवत्यथ सङ्गरे ।
सङ्गे सभायां समितिः, क्षयवासावपि क्षिती ॥ ७० ॥
रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतयः ।
जगती जगति च्छन्दोविशेषेऽपि क्षितावपि ॥ ७१ ॥
पंक्तिश्छन्दोऽपि दशमं, स्यात् प्रभावेऽपि चायतिः ।

त्रेता (त्रीन्भेदानिता प्राप्ता पृषोदरादिः) इस १ स्त्री० शब्द के आहवनीय, गार्हपत्य, दक्षिण ये तीन अग्नि और त्रेता युग २ अर्थ हैं ।

[१]महती (मह्यते इति वर्तमाने पृषत् इति निपातनात् साधुः) इस १ स्त्री० शब्द के महती नाम की नारद की वीणा, महत्त्व से युक्त नारी (स्त्री) २ अर्थ हैं ।

[२]भूतिः (भवति अनया क्तिन् भवनम् वा क्तिन्) इस १ स्त्री० शब्द के सम्पत्ति और भस्म (विभूति, राख) २ अर्थ हैं ॥ ६९ ॥

[३]भोगवती (भोगोऽस्ति अस्याम् इति मतुप्) इस १ स्त्री० शब्द के साँपों की नदी, साँपों की नगरी (पाताल) २ अर्थ हैं ।

समितिः (समयनम् समीयते वा अस्याम् इति क्तिन्) इस १ स्त्री शब्द के लड़ाई, मित्रता (सङ्ग) सभा ३ अर्थ हैं ।

[४]क्षितिः (क्षयणम् क्षीयते वा अस्याम् इति क्तिन्) इस १ स्त्री० शब्द के निवास, नाश २ अर्थ हैं । अपि शब्द से काल भेद भी १ अर्थ है ॥ ७० ॥

हेतिः (हन्ति हिनोति वा क्तिन् 'ऊतियूति' इत्यादिना साधुः) इस १ स्त्री० शब्द के अग्नि ज्वाला (लपट), रविकिरण, अस्त्र (हथियार) ३ अर्थ हैं ।

[१]जगती (गच्छति इति 'वर्तमाने पृषत्' इति निपातनात् साधुः) इस १ स्त्री० शब्द के विश्व (संसार), जन (प्राणी), भूमि (पृथ्वी), बारह वर्ण (अक्षर) का वृत्त (छन्द) ५ अर्थ हैं ॥ ७१ ॥

[२]पङ्क्तिः (पञ्चनम् इति क्तिन्) इस १ स्त्री० शब्द के लाइन (कतार), दशवर्ण (अक्षर) के वृत्त (छन्द) जैसे मत्ता, मनोरमा आदि २ अर्थ हैं ।

[३]आयतिः (आयम्यतेऽनया आयमनं वा इति क्तिन्) इस १ स्त्री० शब्द के प्रताप, संयम, दीर्घ (बड़ा, लम्बा चौड़ा), आगामी समय (उत्तर काल) ४ अर्थ हैं ।

---

१. महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान् श्रेष्ठे (वृद्धे) वाच्यवत् । इति मेदिनी । विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी । इति वैजयन्ती । २. भूतिर्भस्मनि संपत्तिहस्तिश्रृङ्गारयोः स्त्रियाम् । इति मेदिनी । ३. अथ भोगवती नागपुरीनद्योरहौ पुमान् । इति मेदिनी । ४. क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम् । इति मेदिनी । ४. जगत् स्यात् विष्टपे क्लीवं ना वायौ जंगमे त्रिषु । जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च । इति मेदिनी । ५. पंक्तिः दशाक्षरच्छन्दो दशसंख्यादिषु स्त्रियाम् । इति मेदिनी । ३. आयतिः संयमे दैर्घ्ये प्रभावागामिकालयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्तिर्गतौ च, मूले तु पक्षतिः पक्षभेदयोः ॥ ७२ ॥
प्रकृतिर्योनिलिङ्गे च, कैशिक्याद्याश्च वृत्तयः ।
सिकताः स्युर्वालुकापि, वेदे श्रवसि च श्रुतिः ॥ ७३ ॥
वनिता जनितात्यर्थानुरागायां च योषिति ।
गुप्तिः क्षितिव्युदासेऽपि, धृतिर्धारण-धैर्ययोः ॥ ७४ ॥

---

[1]पत्तिः (पतति इति क्तिच्) इस १ स्त्री० शब्द के गमन, पैदल सेना (जिसमें १ रथ, १ हाथी, ३ घोड़ा ५ पैदल हों) २ अर्थ हैं ।

पक्षतिः (पक्षस्य मूलम् इति तिः) इस १ स्त्री० शब्द के कृष्ण, शुक्ल पक्ष की प्रथम तिथि (प्रतिपदा), पक्षियों के पंख की जड़ २ अर्थ हैं ॥ ७२ ॥

[2]प्रकृतिः (प्रकुरुते इति क्तिच्) इस १ स्त्री० शब्द के योनि, लिङ्ग, च शब्द से गुण की समता, स्वभाव, नागरिक, सचिव (मंत्री) ६ अर्थ हैं ।

[3]वृत्तिः (वर्ततेऽनया क्तिनि) इस १ स्त्री० शब्द के भारती, सात्वती कैशिकी आरभटी ये काव्यसम्बन्धी ४ वृत्तियाँ, सूत्रादि का भावार्थ, जीविका, विवरण आदि ४ अर्थ हैं ।

[4]सिकता (सिच्यते इति बाहुलकात् अतच्, 'पृषोदरादिः') इस १ स्त्री० शब्द के रेत, अपि शब्द से रेत वाला देश या स्थान २ अर्थ हैं ।

[5]श्रुतिः (श्रूयते अनया वा क्तिन्) इस १ स्त्री० शब्द के चार वेद (ऋग्वेद, यजुर्वेद, साम, अथर्व) कर्ण और वार्ता सुनना ४ अर्थ हैं ॥ ७३ ॥

[6]वनिता (वन्यते स्मेति क्तः इट् टाप् च) इस १ स्त्री० शब्द के अधिक प्यारी स्त्री, स्त्रीमात्र २ अर्थ हैं । जनितः उत्पादितः अत्यर्थोऽनुरागो यस्यां तस्यां नार्याम्, चशब्दात् योषायां चेति सम्बन्धः ।

[7]गुप्तिः (गुप्यते इति क्तिनि) इस १ स्त्री० शब्द के भूमि (पृथ्वी) के भीतर की सुरङ्ग या गुफा, कारागार (जेल), सुरक्षा ३ अर्थ हैं ।

[8]धृतिः (धरणम् इति क्तिन् , इस १ स्त्री० शब्द के योग विशेष, धैर्य, यश, धारण, सन्तोष ५ अर्थ हैं ॥ ७४ ॥

---

१. पत्तिर्ना पदगे स्त्रियाम् । 'गतावेकरथैकेभत्र्यश्वपञ्चपदातिके' । इति मेदिनी । २. प्रकृतिः गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे । इति मेदिनी । ३. भारती सात्वती चैव कैशिक्यारभटी तथा । चतस्रो वृत्तयश्चैताः यासु नाट्यं प्रतिष्ठितम् । इति भरतः । वृत्तिर्विवरणे जीव्ये कैशिक्यादिषु चेष्यते । इति विश्वः । कौशिक्याद्यपि वा पाठः । ४. सिकता स्त्री सिकतिले वालुकायां तु भूमनि । इति मेदिनी । ५. श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि' । इति विश्वः । ६. वनिता जातरागस्त्री स्त्रियोः स्त्री त्रिषु याचिते । इति मेदिनी । ७. गुप्तिः कारा च रक्षा च दीर्घं च विवरं भुवः । इति शाश्वतः । गुप्तिस्त्र्यवकरस्थाने (कूड़ा की जगह) कारागारे च रक्षणे । इति मेदिनी । ८. धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहती क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ।
वासिता स्त्रीकरिण्योश्च, वार्ता वृत्तौ जनश्रुतौ ॥ ७५ ॥
वार्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृताऽमृते ।
कलधौतं रूप्यहेम्नोर्निमित्तं हेतु-लक्ष्मणोः ॥ ७६ ॥
श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतम् ।
अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ॥ ७७ ॥

[१]बृहती (वर्हते इति 'वर्तमाने पृषद्' इति निपातनात् साधुः) इस १ स्त्री० शब्द के विश्वावसु की वीणा, भटकटैया (वनभटा, रेगनी), नव वर्ण का वृत्त (छन्द) बड़ी, कपड़ा (वस्त्र) विशेष ५ अर्थ हैं ।

[२]वासिता (वासयति इति ण्यन्तः, क्तः टाप् च) इस १ स्त्री० शब्द के स्त्री, हथिनी २ अर्थ हैं ।

[३]वार्ता (वृत्तिरस्त्यस्याम्) इस १ स्त्री० शब्द के बात, जीविका २ अर्थ हैं ॥ ७५ ॥

वार्तम्-इस १ त्रि० शब्द के निस्तत्त्व (सारहीन), कमजोर (निर्बल) और रोगरहित (नीरोग) २ अर्थ हैं ।

[४]घृतम् (घ्रियते जिघर्ति वा क्तः) इस १ न० शब्द के जल, घृत (घी) २ अर्थ हैं । त्रि० घृत शब्द का प्रदीप्त १ अर्थ है ।

[५]अमृतम् (न मृतम् मरणमत्र) इस १ न० शब्द के जल और घृत २ अर्थ हैं ।

[६]कलधौतम् (कलो मलो धौतोऽस्य) इस १ न० शब्द के रजत (चाँदी), सुवर्ण (सोना, स्वर्ण) २ अर्थ हैं ।

निमित्तम् (निमेद्यति इति क्तः नत्वाभावश्च) इस १ न० शब्द के चिह्न, कारण (हेतु) २ अर्थ हैं ॥ ७६ ॥

श्रुतम् (श्रूयते स्मेति क्तः) इस १ न० शब्द का शास्त्र १ अर्थ है । और त्रि० श्रुत शब्द का श्रवण किया हुआ (सुना हुआ) १ अर्थ है ।

[७]कृतम् (अकारि इति क्तः) इस १ न० शब्द के सत्ययुग, पर्याप्त, शक्ति, निवारण, तृप्ति, अभीष्ट ६ अर्थ हैं ।

अत्याहितम् (अतीवाधीयते स्म इत्याङ्पूर्वकात् दधातेर्हिः) इस १ न० शब्द के बड़ा भय, जीवन की आशा त्यागकर किया हुआ बहुत बड़ा साहस वाला कार्य २ अर्थ हैं ॥ ७७ ॥

---

१. बृहती क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च । वारिधान्यां महत्यां च छन्दोवसनभेदयोः । इति विश्वः । २. वासिता करिणीनार्योर्वासितं सुरभीकृते । ध्यानमात्रे खगारावे वासितं वस्त्रवेष्टिते । इति विश्वः । स्वामी तु (वाशिता) । ३. वार्ता वातिङ्गणे वृत्तौ वार्ता कृष्याद्युदन्तयोः । वृत्तिमन्त्र्यारुजोर्वार्ता वार्तमारोग्य-फल्गुनोः । इति विश्वः । वार्तं फल्गुन्यरोगे स्यादारोग्ये वृत्तिमत्यपि । इति धरणिः । ४. घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत् । इति मेदिनी । ५. अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते । अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः । इति मेदिनी ।६. कलधौतं सुवर्णे स्याद् रजते च नपुंसकम् । इति मेदिनी । ७ शक्तौ निवारणे तृप्तौ पर्याप्तं स्याद्यथेप्सिते । इति रुद्रः । कृतं युगेऽप्यमये स्याद्विहिते हिंसिते त्रिषु । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।
वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ॥ ७८ ॥
महद्राज्यं चावगीतं जन्ये स्याद् गर्हिते त्रिषु ।
श्वेतं रूप्येऽपि, रजतं हेम्नि रूप्ये सिते त्रिषु ॥ ७९ ॥
त्रिष्वितो, जगदिङ्गेऽपि रक्तं नील्यादि-रागि च ।

युक्ते, क्ष्मादौ = पृथिव्यादिपञ्चभूतके, ऋते सत्ये, प्राण्यतीते समे त्रिषु इति सम्बन्धः—[1]भूतम् (अभवत् इति क्तः) इस १ न० शब्द के पृथ्वी, जल, तेज, वायु आदि, उचित (युक्त), सत्य ३ अर्थ हैं । त्रि० भूत शब्द के प्राणी समान, अतीत काल (बीता समय), प्राप्त ४ अर्थ हैं ।

[2]वृत्तम् (वर्तते स्म, वर्तनं वेति क्तः) इस १ न० शब्द के जिस पद्य में अक्षरों की गणना हो ऐसा पद्य विशेष, चरित्र २ अर्थ हैं और त्रि० शब्द के अतीत काल (बीता समय) गोलाकार, पढ़ा हुआ, मजबूत ४ अर्थ हैं ॥ ७८ ॥

[3]महत् (मह्यते 'वर्तमाने पृषत्' इति निपातनात् अतिप्रत्यये साधुः) इस १ न० शब्द का राज्य १ अर्थ है और चकार से महत् शब्द का बड़ा १ अर्थ है ।

[4]अवगीतम् (अवगीयते स्मेति क्तः) इस १ न० शब्द की जनापवाद १ अर्थ है और त्रि० अवगीत शब्द के निन्दित, सिद्धान्त, देखा गया ३ अर्थ हैं ।

[5]श्वेतम् (श्वेतते इति अच्) इस १ न० शब्द का चाँदी १ अर्थ है, और त्रि० श्वेत शब्द का उज्ज्वल पदार्थ १ अर्थ है । पुं० श्वेत शब्द के पहाड़ विशेष, द्वीप विशेष २ अर्थ हैं । स्त्री० श्वेत शब्द के काष्ठपाटला, कौड़ी, शङ्खिनी ३ अर्थ हैं ।

[6]रजतम् (रजति, रज्यतेऽनेन इति अतच्) इस १ न० शब्द के चाँदी, सोना २ अर्थ हैं और त्रि० रजत शब्द का उज्ज्वल (सफेद) वर्णवाला पदार्थ १ अर्थ है ॥ ७९ ॥

इतः परम् आतान्ताः ये शब्दाः ते त्रिलिङ्ग्यां भवन्तीति—[7]जगत् (गच्छति इति क्विप् द्वित्वम् मलोपः तुक् च) इस त्रि० शब्द का जङ्गम पदार्थ, न० का भुवन, पुं० का वायु ३ अर्थ हैं ।

[8]रक्तम् (रजति रज्यते वा क्तः जस्य कुत्वे चर्त्वे च) इस १ त्रि० शब्द रंगा हुआ वस्त्र आदि, अनुरक्त २ अर्थ हैं और न० रक्त शब्द के खून, लालरंग, कुंकुम, पुराना आँवला ४ अर्थ हैं ।

---

१. भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते । प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना । कुमारेऽपि । इति मेदिनी । २. वृत्तोऽधीतेऽप्यतीतेऽपि वर्तुलेऽपि मृते वृते । वृत्तऽन्यलिङ्गं वा क्लीवे छन्दश्चारित्रवृत्तिषु । इति मेदिनी । ३. महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान्श्रेष्ठे वाच्यवत् । इति मेदिनी । ४. अवगीतस्तु निर्वादे दुष्टगर्हितयोरपि । इति मेदिनी ।५. श्वेतो द्वीपाद्रिभेदयोः । श्वेता वराटिकाकाष्ठपाटलाशङ्खिनीषु च । क्लीवं रूप्येऽन्यवच्छुक्ले । इति मेदिनी । ६. रजतं रञ्जने रूप्ये शोणिते हृदहारयोः । इत्यजयः । ७. जगत् स्यात् विष्टपे क्लीवं वायौ ना जङ्गमे त्रिषु । इति मेदिनी । ८. रक्तोऽनुरक्ते नील्यादिरञ्जिते लोहिते त्रिषु । क्लीवं तु कुंकुमे ताम्रे प्राचीनाऽमलकेऽसृजि । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवदातः सिते पीते शुद्धे, बद्धार्जुनौ सितौ ॥ ८० ॥
युक्तेऽविसंस्कृते मर्षिण्यभिनीतोऽथ संस्कृतम् ।
कृत्रिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि ॥ ८१ ॥
ख्याते हृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ।
विविक्तौ पूतविजनौ, मूर्च्छितौ मूढ-सोच्छ्रयौ ॥ ८२ ॥

---

[1]अवदातः (अवदायते स्मेति क्तः) इस १ त्रि० शब्द के सफेद, पीला निर्मल (शुद्ध) ३ अर्थ हैं ।

बद्धार्जुनौ सितपदवाच्यौ—[2]सितः (सीयते स्मेति क्तः) इस १ त्रि० शब्द के सफेद (श्वेत पदार्थ), समाप्त, बँधा हुआ ३ अर्थ हैं और स्त्री० सित शब्द का शर्करा १ अर्थ है ॥ ८० ॥

[3]अभिनीतः (अभिनीयते स्मेति क्तः) इस १ त्रि० शब्द के सर्वश्रेष्ठ (अत्युत्तम), बनावटी (कृत्रिम, नकली), सहनशील ३ अर्थ हैं ।

अथ कृत्रिमे— [4]संस्कृतम् (संस्क्रियते स्मेति क्तः संपूर्वकात् करोतेः कर्मणि क्ते सुडागमे च) इस १ त्रि० शब्द के उचित, संस्कारी, सहनशील, शास्त्र, लक्षणसम्पन्न ४ अर्थ हैं ।

[5]अनन्तः (न अन्तोऽस्य इति) इस १ त्रि० शब्द के अन्तरहित १ अर्थ है । न० अनन्त शब्द का आकाश अर्थ है । केशव और शेषनाग २ अर्थों में अनन्त शब्द पुं० है ॥ ८१ ॥

[6]प्रतीतः (प्रतीयते स्मेति क्तः) इस १ त्रि० शब्द के विख्यात (प्रसिद्ध), जाना हुआ, प्रसन्न ३ अर्थ हैं ।

[7]अभिजातः (अभिजायते स्मेति क्तः) इस १ त्रि० शब्द के उत्तम वंश में उत्पन्न (कुलीन), न्याय युक्त, विद्वान् ३ अर्थ हैं ।

[8]विविक्तः (विविज्यते स्मेति क्तः) इस १ त्रि० शब्द के शुद्ध (पवित्र) निर्जन (एकान्त) ज्ञानसम्पन्न (विवेक वाला) ३ अर्थ हैं

[9]मूर्च्छितः (मूर्च्छति स्मेति क्तः) इस १ त्रि० शब्द के वृद्धियुक्त, मूर्ख (ज्ञानशून्य), बेहोश ३ अर्थ हैं ॥ ८२ ॥

---

१. अवदातं तु विमले मनोज्ञे सितपीतयोः । इति हैमः । २. सितमवसिते च बद्धे धवले त्रिषु, शर्करायां स्त्री । इति मेदिनी । ३. अभिनीतं संस्कृते च न्याय्ये चामर्षिणि त्रिषु । इति रुद्रः । ४. संस्कृतः कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः । क्लीबं तु लक्षणोपेते । इति मेदिनी । ५. अनन्तः केशवे शेषे पुमांस्त्रिरवधौ त्रिषु । अनन्ता च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभापथ्यापार्वत्यामलकीषु च । विश्वम्भरा-गुडूच्यौ स्यादनन्तं सुरवर्त्मनि । इति मेदिनी । ६. प्रज्ञातं ज्ञातहृष्टेषु प्रतीतः सादरे त्रिषु । इति रभसः । ७. अभिजातः कुलीने स्यान्न्याय्यपण्डितयोस्त्रिषु । इति मेदिनी । ८. विविक्तं त्रिष्वसंपृक्ते रहःपूतविवेकिषु । इति मेदिनी । ९. मूर्तं स्यात् त्रिषु मूर्छाले कठिने मूर्तिमत्यपि । इति मेदिनी । मूर्च्छितमपि सोच्छ्राये च मूढे च । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वौ चाम्लपरुषौ शुक्तौ, शितौ धवल-मेचकौ।
सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ॥ ८३ ॥
पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते।
निवातावाश्रयाऽवातौ शस्त्राभेद्यं च वर्म यत् ॥ ८४ ॥
वातोद्धद्धप्रवृद्धाः स्युरुच्छ्रिता, उत्थितास्त्वमी।
वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ ॥ ८५ ॥
अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु ।

---

[1]शुक्त (शुच्यते स्मेति क्तः) इस १ त्रि० शब्द के कठोर, काँजी, (खट्टा) २ अर्थ हैं।

[2]शितिः (शीयते स्मेति क्तिन् क्तिच् वा) इस १ त्रि० शब्द के सफेद, काला २ अर्थ हैं।

[3]सत् (अस्ति इति शतृ, अकारलोपश्च) इस १ त्रि० शब्द के उपस्थित (विद्यमान, हाजिर), प्रशस्त (उत्तम, श्रेष्ठ), साधु (सज्जन), सत्य, धीर, पूजित, माननीय ७ अर्थ हैं ॥ ८३ ॥

[4]पुरस्कृतः (पुरोऽकारि इति क्तः गतित्वे नमस्पुरेति सत्वे च) इस १ त्रि० शब्द के पूजित श्रेष्ठ, दुश्मन (शत्रु) से आक्रान्त (घिरा हुआ), आगे किया हुआ ५ अर्थ हैं।

[5]निवातः (निरुद्धो निवृत्तो वा वातोऽस्मात्) इस १ त्रि० शब्द के वायु शून्य (देश-स्थान) निवास स्थान और अस्त्र से न टूटने वाला कवच आदि ३ अर्थ हैं ॥ ८४ ॥

[6]उच्छ्रितः (उच्छ्रयति उच्छ्रीयते स्म वेति कर्तरि कर्मणि वा क्तः) बढ़ा हुआ, अभिमानी (घमण्डी) उत्पन्न ३ अर्थ हैं।

अमी वृद्धिमत्प्रोद्यतोत्पन्नाः शब्दाः— [7]उत्थितः (उत्तिष्ठति स्मेति क्तः पूर्वसवर्णे थलोपे चर्त्वे इत्वे च) इस १ त्रि० शब्द के उत्पन्न, वृद्धिवाला, प्रवृत्त (लगा हुआ, तैयार) ३ अर्थ हैं।

आदृतः (आद्रियते स्मेति क्तः) इस १ त्रि० शब्द के आदर पाया हुआ, सत्कार से युक्त २ अर्थ हैं ॥ ८५ ॥ इति तान्ताः ॥

[8]अर्थः (अर्यते ऋच्छति वा थनि गुणे च) इस १ पुं० शब्द के वस्तु, धन, मतलब (उद्देश्य-प्रयोजन) निवृत्ति, कहने योग्य ५ अर्थ हैं।

---

१. शुक्तं पूताम्लनिष्ठुरे। इति मेदिनी। मृन्मयादिशुचौ भाण्डे सगुडं क्षौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते। इति वैद्यकम्। २. निशितेऽपि, शितिर्मूर्जे ना सितासितयोस्त्रिषु। इति मेदिनी। ३. सन् साधौ धीरशस्तयोः। मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियाम् ॥ इति मेदिनी। ४. पुरस्कृतोऽभिशस्तारिग्रस्ताग्रे कृतपूजिते। इति मेदिनी। ५. निवातो दृढसंनाहे निवासे वातवर्जिते। इत्यजयः। ६. उच्छ्रितं त्रिषु संजाते समुन्नद्धप्रवृद्धयोः। इति मेदिनी। ७. उत्थितं स्यात् त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि। इति मेदिनी। ८. अर्थो विषयार्थनयोर्धनकारणवस्तुषु। अभिधेये च शब्दानां निवृत्तौ च प्रयोजने ॥ इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ ॥ ८६ ॥
समर्थस्त्रिषु शक्तिस्थे सम्बद्धार्थे हितेऽपि च ।
दशमीस्थौ क्षीणरागवृद्धौ, वीथी पदव्यपि ॥ ८७ ॥
आस्थानीयत्नयोरास्था, प्रस्थोऽस्त्री सानु-मानयोः ।
शास्त्रद्रविणयोर्ग्रन्थः, संस्था धारे स्थितौ मृतौ ॥ प्र० ॥
अभिप्राय-वशौ छन्दावब्दौ जीमूत-वत्सरौ ॥ ८८ ॥

---

[1]तीर्थम् (तीर्यते अनेनेति तरते थकि इत्वे रपरत्वे दीर्घे च) इस १ न० शब्द के कुआँ के समीप का गढ़ा (जलाशय), ऋषि से सेवित जल, बौद्धशास्त्र से भिन्न शास्त्र, गुरु, यज्ञशाला, यज्ञ, स्त्री-रज, पुण्य क्षेत्र, योनि, दर्शन, पात्र, आदि ११ अर्थ हैं ॥ ८६ ॥

समर्थः (समर्थयते समर्थ्यते वा अच् घञ् वा) इस १ त्रि० शब्द के शक्तिशाली (बलवान्) कल्याण (हित) सम्बद्धार्थ ३ अर्थ हैं ।

[2]दशमीस्थः (दशम्यां तिष्ठति इति कः आलोपे च) इस १ त्रि० शब्द के क्षीणप्रेम वाला (प्रेमरहित), वृद्ध २ अर्थ हैं ;

[3]वीथी (वीथ्यतेऽनया इति घञ् पृषोदरादिः ङीष् च) इस १ स्त्री० शब्द के गृहप्रान्त, मार्ग (गली, रास्ता), पङ्क्ति (लाइन कतार) ३ अर्थ हैं ॥ ८७ ॥

[4]आस्था (आतिष्ठन्त्यस्याम् आस्थानं वा इति अङ्, आलोपे, टाप्) इस १ स्त्री० शब्द के आलम्बन, उपाय, अपेक्षा, सभा, यत्न ५ अर्थ हैं ।

[5]प्रस्थः (प्रतिष्ठतेऽस्मिन् इति घञर्थे कः) इस १ पुं० शब्द के मापक (तौलने का परिमाण विशेष सेर आदि), शिखर (कँगूरा) २ अर्थ है ॥ इति थान्ताः ॥

ग्रन्थः (ग्रन्थनम् ग्रथ्यते ग्रन्नातेर्भावे कर्मणि वा घञ्) इस १ पुं० नाम के शास्त्र और धन २ अर्थ हैं ।

संस्था (संस्थानम् संतिष्ठतेऽनया वा भावे कर्मणि वा अङ्, आलोपे टापि च) इस १ स्त्री० नाम के आधार, स्थिति, मरण ३ अर्थ हैं ।

छन्दः (छद्यते इति घञ्) इस १ पुं० नाम के वश, अभिप्राय २ अर्थ हैं ।

[6]अब्दः (अपो ददाति इति कः आलोपे च) इस १ पुं० शब्द के बादल (मेघ), साल (वर्ष), मोथा. पहाड़ विशेष ४ अर्थ हैं ॥ ८८ ॥

---

१. तीर्थं शास्त्राध्वरक्षेत्रोपायनारी रजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु ॥ इति मेदिनी । निपानं-जलावतारः । निदानम् उपायः । इति मुकुटः । आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ । मतं च वासुदेवस्य तस्मादागत उच्यते ॥ २. दशमीस्थो नष्टबीजे स्थविरेऽप्यन्यलिङ्गकः । इति मेदिनी । ३. वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः । इति मेदिनी । ४. आस्था त्वालम्बनास्थानयत्नापेक्षासु योषिति । इति मेदिनी । ५. प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि । इति मेदिनी । सानुः = शृङ्गः, पर्वताग्रभागो वा [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपवादौ तु निन्दाज्ञे, दायादौ सुतबान्धवौ।
पादा रश्म्यङ्घ्रितुर्यांशाश्चन्द्राग्न्यर्कास्तमोनुदः॥ ८९॥
निर्वादो जनवादेऽपि शादो जम्बाल-शष्पयोः।
आरावे रुदिते त्रातर्याक्रन्दो दारुणे रणे॥ ९०॥
स्यात् प्रसादोऽनुरोधेपि, सूदः स्याद् व्यञ्जने त्रिषु।
गोष्ठाध्यक्षेऽपि गोविन्दो, हर्षेऽप्यामोदवन्मदः॥ ९१॥

[1]अपवादः (अपोद्यते अपवदनं वा घञ्) इस १ पुं० शब्द के विश्रम्भ, आज्ञा (आदेश, हुक्म), अवकाशशून्य (बाधक), निन्दा (बुराई) ४ अर्थ हैं।

[2]दायादः (दायोंशः तमत्ति इति कर्मण्यण्) इस १ पुं० शब्द के परिवार (कुटुम्ब), सुत (पुत्र) २ अर्थ हैं।

[3]पादः (पद्यते इति घञ्) इस १ पुं० शब्द के चौथाई भाग (हिस्सा), चरण (पैर), रश्मि (किरण) ३ अर्थ हैं।

तमोनुद् (तमो नुदति इति क्विप्) इस १ पुं० शब्द के अग्नि, चन्द्रमा, सूर्य ३ अर्थ हैं॥ ८९॥

[4]निर्वादः (निर्वदनम् इति घञ्) इस १ पुं० शब्द के लोकापवाद, अपि शब्द से सिद्धान्त २ अर्थ हैं।

शादः—इस १ शब्द के घास और कीचड़ दो अर्थ हैं।

[5]आक्रन्दः (आक्रन्दनम् आक्रान्दति आक्रन्द्यंति, आक्रन्दयते वेति |आङ्पूर्वकात् क्रदिधातोः कर्तरि पचाद्यचि भावे घञि) इस १ पुं० शब्द के भयङ्कर युद्ध, आर्तनाद युक्त रुदन (रोना), क्लेश युक्त शब्द, रक्षक ४ अर्थ हैं॥ ९०॥

[6]प्रसादः (प्रसदनम् प्रसद्यते अनेन वा इति घञि वृद्धौ च) इस १ पुं० शब्द के प्रसन्नता, अनुग्रह, काव्य का विशेष गुण ३ अर्थ हैं।

[7]सूदः (सूद्यते सूदयति वा पचाद्यचि) इस १ त्रि० शब्द के रसोई बनाने वाला (रसोइयादार), व्यञ्जन (तरकारी, कढ़ी आदि) २ अर्थ हैं।

[8]गोविन्दः (गां विन्दति इति शः नुमि च) इस १ पुं० शब्द के गोशाला का स्वामी (मालिक), वृहस्पति, विष्णु आदि ३ अर्थ हैं।

[9]आमोदः (आमोदनम् आमोदयति वा घञि अचि वा। मदनम् मदयते अनेन वा अप्) इस १ पुं० शब्द के मन को आकृष्ट करने वाला कस्तूरी आदि का गन्ध, हर्ष (प्रसन्नता) २ अर्थ हैं। और पुं० मद शब्द के वीर्य (शुक्र), गजमद, हर्ष, कस्तूरी, अहङ्कार (गर्व) ५ अर्थ हैं॥ ९१॥

१. अपवादस्तु निन्दायामाज्ञाविश्रम्भयोरपि। इति मेदिनी। अववादस्तु निन्दायामाज्ञाविश्रम्भयोरपि। इति विश्वमुदाजहार। २. दायादस्तु भवेत्पुंसि सपिण्डे तनयेऽपि च। इति मेदिनी। ३. पादो बुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते। चरणे च मयूखे च। इति मेदिनी। ४. निर्वादः स्याल्लोकवादपरिनिष्ठित-वादयोः। इति मेदिनी। ५. आक्रन्दः क्रन्दने ह्वाने मित्रदारुणयुद्धयो। इति मेदिनी। ६. प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु। इति मेदिनी। ७. सूदस्तु सूपवत्सूपकारे च व्यञ्जनेऽपि च। इति विश्वः। ८, गोविन्दो वासुदेवे स्याद् गवाध्यक्षे वृहस्पतौ। इति मेदिनी। ९. आमोदो गन्धहर्षयोः। इति मेदिनी। मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः। इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।
स्त्री संविज्ज्ञान-सम्भाषा-क्रियाकाराजि-नामसु ॥ ९२ ॥
धर्मे रहस्युपनिषत्, स्यादृतौ वत्सरे शरत् ।
पदं व्यवसित-त्राण-स्थान-लक्ष्माऽङ्घ्रि-वस्तुषु ॥ ९३ ॥
गोष्पदं सेविते माने, प्रतिष्ठा कृत्यमास्पदम् ।
त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ॥ ९४ ॥

---

[1]ककुदः (कं सुखं कौति इति कपूर्वकात् कौतेः कर्तरि दे पृषोदरादित्वात् गुणाभावे च यदा हलन्त-स्तदा क्विपि तुकि च) इस १ पुं० नाम के प्राधान्य (मुख्य), राजचिह्न, बैल या साँड़ का डील (लाट) ३ अर्थ हैं ।

[2]संवित् (संवेदनम् संविद्यतेऽनया वेति संपूर्वकात् विद ज्ञाने धातोः भावे करणे वा क्विप्) इस १ स्त्री शब्द के विद्या, संभाषण क्रिया का नियम (अथवा व्यवस्थापन), युद्ध, संज्ञा ५ अर्थ हैं ॥ ९२ ॥

[3]उपनिषत् (उपनिषदनम् उपनिषीदति श्रेयोऽस्यां वेति उपनिपूर्वकात्सीदतेर्भावाधारयोः क्विपि) इस १ स्त्री० शब्द के वेदान्त, धर्म (श्रुति स्मृति विहित कर्म), एकान्त ३ अर्थ हैं ।

[4]शरत् (शृणाति शीर्यन्तेऽस्यामिति अत्) इस १ स्त्री० शब्द के वर्ष (साल), शरद ऋतु २ अर्थ हैं ।

[5]पदम् (पदति पद्यति वा अच्) इस १ न० शब्द के व्यवसाय, रक्षा, चिह्न, पैर, वस्तु आदि ६ अर्थ हैं ॥ ९३ ॥

[6]गोष्पदम् (गावः पद्यन्तेऽस्मिन्देशे गोपूर्वकात् पद-गतौ अस्मादाधारे घञि वृद्ध्यभावे च गोः पदम् इति 'गोष्पदं सेवितासेवितप्रमाणेषु' इति निपातनात् सुटि सस्य षत्वे च गोष्पदमिति साधुः) इस १ न० शब्द के गायों से सेवित स्थान, गाय के चरण समान प्रमाण वाला गढ़ा ३ अर्थ हैं ।

[7]आस्पदम् (आपद्यतेऽस्मिन् इति घञि 'आस्पदं प्रतिष्ठायाम्' इति निपातनात् सुडागमे साधुः) इस १ न० शब्द के कार्य, सम्मान (प्रतिष्ठा) का स्थान २ अर्थ हैं ।

[8]स्वादुः (स्वदते इति उण् वृद्धौ) इस १ त्रि० शब्द के मधुर, इष्ट २ अर्थ हैं

मृदुः (मृद्यते इति कुः सम्प्रसारणञ्च) इस १ शब्द के कोमल, तेजहीन २ अर्थ हैं ॥ ९४ ॥

---

१. ककुद्वत् ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणि । इति विश्वः । २. संवित् स्त्रियां प्रतिज्ञायामाचारे ज्ञानसंगरे । संभाषणे क्रियाकारे, संकेते नाम्नि तोषणे । इति मेदिनी । ३. भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियाम् । इति मेदिनी । ४. शरत् स्त्री वत्सरेऽपि ऋतौ । इति मेदिनी । ५. पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः । इति विश्वः । श्लोकपादेपि च क्लीवं पुंलिङ्गः किरणे पुनः । इति मेदिन्यां विशेषः । ६. गोष्पदं गोपदे श्वभ्रे गवां च गतिगोचरे । इति विश्वः । (मेदिनी) । ७. आस्पदं पदकृत्ययोः । इति मेदिनी । ८. स्वादू मिष्टमनोज्ञयोः इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु शारदौ ।
प्रत्यग्राप्रतिभौ, विद्वत्सुप्रगल्भौ विशारदौ ॥ ९५ ॥
व्यामो वटश्च न्यग्रोधा,-वुत्सेधः काय उन्नतिः ।
पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ॥ ९६ ॥
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः ॥ ९७ ॥
स्युः समर्थन-नीवाक-नियमाश्च समाधयः ।

[1]मन्दः (मन्दते इति अच्) इस १ त्रि० शब्द के शिथिल, मूर्ख, भाग्यहीन, थोड़ा (अल्प), शनि, रोगी, स्वच्छन्द ७ अर्थ हैं ।

[2]शारदः (शरदि भवः इत्यण्) इस १ त्रि० शब्द के नवीन (ताजा-टटका), शरद ऋतु में होने वाले (उत्पन्न), डरपोक (भयभीत) ३ अर्थ हैं ।

[3]विशारदः (विशिष्टो विपरीतो वा शारदः इति समासः) इस १ त्रि० शब्द के प्रतिभाशाली, मनीषी (विद्वान्) २ अर्थ है ॥ ९५ ॥

[4]न्यग्रोधः (न्यञ्चं रुणद्धि इति अप् गुणे) इस १ पुं० शब्द के वट (बरगद) वृक्ष, फैले दोनों हाथों के बीच का प्रमाण २ अर्थ हैं ।

उत्सेधः (उत्सेधनम् इति उत्पूर्वकात् षिधु गत्यां धातोः भावे करणे वा घञि गुणे च) इस १ पुं० शब्द के कार्य (शरीर), ऊँचाई (उन्नति) २ अर्थ हैं ।

[5]विवधः, वीवधः (विविधः वधो हननं गमनं वा प्रादिभ्यो धातुजस्य इति समासे उत्तरपदलोपे पक्षे दीर्घश्च) इन २ पुं० शब्दों के काँवर (बहँगी) मार्ग २ अर्थ हैं ॥ ९६ ॥

परिधिः (परिधीयते इति किः आलोपे च) इस १ पुं० शब्द के पलाशादि वृक्षों की शाखा और सूर्य के चारों तरफ की गोलाई (घेरा) २ अर्थ हैं ।

[6]आधिः (आधानम् इति किः आलोपे च) इस १ पुं० शब्द के कर्ज लेने के समय धनी को विश्वास देने के लिए उसके पास रखी धरोहर, मानसिक व्यथा (पीड़ा), आपत्ति (विपत्ति), अधिष्ठान (आश्रय) ४ अर्थ हैं ॥ ९७ ॥

[7]समाधिः (समाधानम् समाधीयते अनेन वा इति किः आलोपे च) इस १ पुं० शब्द के मौन रहना (चुप रहना), नियम (अपने को ब्रह्म जानना), समर्थन (शङ्का का परिहार) आदि ३ अर्थ हैं ।

१. मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ । इति मेदिनी । २. शारदोऽब्दे स्त्रियां तोयपिप्पली सप्तपर्णयोः । शस्ये क्लीवं शरज्जातनूतनाप्रतिभे त्रिषु । इति मेदिनी । ३. विशारदः पण्डिते च धृष्टे । इति मेदिनी । ४. न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरौ । इति विश्वः । ५. विवधो वीवधश्चापि पर्याहारेऽध्वभारयोः । इति विश्वः । ६. आधिः पुमांश्चित्तपीडाप्रत्याशाबन्धकेषु च । व्यसने चाप्यधिष्ठाने । इति मेदिनी । ७. समाधिर्ध्याननीवाकनियमेषु समर्थने । इति विश्वः (रभसः) । समाधिर्ना समर्थने । ध्याने वैरस्य (ध्यान नीवाक) नियमे काव्यस्य च गुणान्तरे । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोषोत्पादेऽनुबन्धः स्यात् प्रकृत्यादिविनश्वरे ॥ ९८ ॥
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ।
विधुर्विष्णौ चन्द्रमसि, परिच्छेदे बिलेऽवधिः ॥ ९९ ॥
विधिर्विधाने दैवेऽपि, प्रणिधिः प्रार्थने चरे ।
बुध-वृद्धौ पण्डितेऽपि, स्कन्धः समुदयेऽपि च ॥ १०० ॥
देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ।

---

[१]अनुबन्धः (अनुबध्यते इति घञ्) इस १ पुं० शब्द के इत्संज्ञकशील अक्षर (जैसे अण् में ण और शस् में श आदि), पिता माता का आदेश स्वीकार करने वाला बालक, दोष लगाना, प्रकरणागत विषयों का अनुवर्तन (यथा वैरानुबन्ध) आदि ४ अर्थ हैं।

[२]विधुः (विध्यति विरहिणम् इति कुः सम्प्रसारणे च) इस १ पुं० शब्द के चन्द्रमा, विष्णु, कपूर ३ अर्थ हैं।

[३]अवधिः (अवधानम् इति किः आलोपे च) इस १ पुं शब्द के बिल या गढ़ा, सीमा, समय, आदि ३ अर्थ हैं ॥ ९९ ॥

[४]विधिः (विधानम् विधीयतेऽनेन वा इति किः आलोपे च) इस १ पुं० शब्द के भाग्य, प्रकार, समय, ब्रह्मा, कानून (विधान) ५ अर्थ हैं।

[५]प्रणिधिः (प्रणिधानम् प्रणिधीयतेऽनेन वा इति किः) इस १ पुं ० शब्द के माँगना, दूत (सन्देशवाहक) २ अर्थ हैं।

[६]बुधः (बुध्यते इति कः) इस १ पुं० शब्द के बुध ग्रह, पण्डित २ अर्थ हैं। वृद्धः (वर्धते स्मेति क्तः धत्वे दत्वे च) इस १ त्रि० शब्द के पण्डित, वृद्ध (बूढ़ा) बढ़ा हुआ ३ अर्थ हैं।

[७]स्कन्धः (कं शिरो दधाति इति कः पारस्करादित्वात् सुटि आलोपे च) इस १ पुं० शब्द के सेना का भाग, काण्ड (शाखा), समूह, राजा, कन्धा ५ अर्थ हैं ॥ १०० ॥

[८]सिन्धुः (स्यन्दते इति उः संप्रसारणे धश्च) इस १ पुं० शब्द के समुद्र, नदविशेष, सिन्धु देश ३ अर्थ हैं। स्त्री० सिन्धु शब्द का नदी १ अर्थ है।

---

१. अनुबन्धस्तु बन्धे स्याद्दोषोत्पादे विनश्वरे। मुख्यानुयायिबाले च प्रकृतस्यानिवर्तने। अनुबन्धी तु हिक्कायां तृष्णायामपि। इति मेदिनी। २. विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे। इति विश्वः। ३. अवधिस्त्ववधाने स्यात्सीम्नि काले बिले पुमान्। इति मेदिनी। ४. विधिर्ना नियतौ काले विधाने परमेष्ठिनि। इति मेदिनी। ५. प्रणिधिर्याचने चरे। इति हैमः। ६. बुधः कवौ रौहिणेये। इति विश्वः। वृद्धो जीर्णे प्रवृद्धे च त्रिषु क्लीबं तु शैलजे। इति मेदिनी। ७. स्कन्धः स्यान्नृपतावंसे संपरायसमूहयोः। काये तरुप्रकाण्डे च मद्रादौ छन्दसो भिदि। इति मेदिनी। ८. सिन्धुः समुद्रनद्यां च नदे देशभेदानयोः। इति विश्वः। सिन्धुर्वमथुदेशाब्धिनदे ना सरिति स्त्रियाम्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधा विधौ प्रकारे च, साधू रम्येऽपि च त्रिषु ॥ १०१ ॥
वधूर्जाया स्नुषा स्त्री च, सुधा लेपोऽमृतं स्नुही ।
सन्धा प्रतिज्ञा मर्यादा, श्रद्धा सम्प्रत्ययः स्पृहा ॥ १०२ ॥
मधु मद्ये पुष्परसे क्षौद्रेऽप्यन्धं तमस्यपि ।
अतस्त्रिपु, समुन्नद्धौ पण्डितम्मन्य-गर्वितौ ॥ १०३ ॥
ब्रह्मबन्धुरधिक्षेपे निर्देशे, ऽथावलम्बितः ।

---

[१]विधा (विधानम् इति अङ् टाप् च) इस १ स्त्री० शब्द के अश्वगज आदि का भोजन, प्रकार, (भेद-सादृश्य), विधि, वेतन, वृद्धि आदि ५ अर्थ हैं ।

[२]साधुः (साध्नोति इति उश्) इस १ त्रि० शब्द के सज्जन, रमणीय, वणिक् (बनियाँ) ३ अर्थ हैं ॥ १०१ ॥

[३]वधूः (वहति इति ङः धश्च) इस १ स्त्री० शब्द के पुत्रवधू (पतोहू), पत्नी, स्त्रीमात्र आदि ३ अर्थ हैं ।

[४]सुधा (सुष्ठु धीयते इति अङ् टाप् च) इस १ स्त्री० शब्द के अमृत, लेप, सेंहुड़ ३ अर्थ हैं ।

संधा (संधानम् इति अङ्) इस १ स्त्री० शब्द के प्रतिज्ञा, मर्यादा २ अर्थ हैं ।

[५]श्रद्धा (श्रद्धानम् इति अङ् टाप् च) इस १ स्त्री शब्द के कांक्षा, आदर (सम्मान) २ अर्थ हैं ॥ १०२ ॥

[६]मधु (मन्यते इति उः धश्च) इस १ न० शब्द के पुष्परस, दूध, शहद, शराव (मदिरा) ४ अर्थ हैं और पुं० मधु शब्द के मधु नामक राक्षस, चैत्रमहीना, वसन्तऋतु, वृक्षविशेष ४ अर्थ हैं ।

[७]अन्धम् (अन्धयति इति अच्) इस १ न० शब्द के अन्धकार १ अर्थ है और त्रि० अन्ध शब्द का अन्धा १ अर्थ है ।

[८]समुन्नद्धः (समुन्नह्यते स्मेति क्तः हस्य धत्वे जश्त्वे च) इस १ त्रि० शब्द के पण्डित न होते हुए भी अपने को पण्डित समझने वाला, अभिमानी २ अर्थ हैं ॥ १०३ ॥

[९]ब्रह्मबन्धुः (ब्रह्मेव ब्राह्मणजातिः बन्धुरस्य) इस १ त्रि० शब्द का प्रयोग-अपमान (निन्दा) का निर्देश जहाँ हो जैसे, 'हे ब्रह्मबन्धो दुष्टोऽसि' ऐसे स्थल में होता है । अभिप्राय यह कि ब्राह्मणों के आचार से रहित व्यक्ति में, निन्दित कर्म करने वाले में 'ब्रह्मबन्धु' शब्द का प्रयोग होता है ।

---

१. विधा गजान्ने ऋद्धे च प्रकारे वेतने विधौ । इति विश्वः । २. साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत् । इति विश्वः । ३. वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च । शट्यां च शारिवायां च । इति विश्वः । ४. सुधागङ्गेष्टकाचूर्णस्नुही चामृतमूर्वयोः । इत्यजयः । ५, श्रद्धाऽऽदरे च काङ्क्षायाम् इति मेदिनी । गुरुवेदान्तवाक्यादिषु विश्वासः श्रद्धा । इति तत्त्वबोधः । ६. मधु क्षौद्रे जले क्षीरे, मद्ये पुष्परसे मधुः । दैत्ये चैत्रे वसन्ते च जीवकोशे मधुद्रुमे । इति कल्पद्रुमः । भाषाकोशकारने मधु पराग मधु चैत है, मधु मदिरा मकरन्द । मधु नभ मधु खग मधु सुधा मधुसूदन गोविन्द ॥ कहा है । ७. अन्धं तु तिमिरे क्लीबं चक्षुर्हीनेऽभिधेयवत् । इति मेदिनी । ८. समुन्नद्धः समुद्भूते पण्डितंमन्य-दृप्तयोः । इति विश्वः । ९. ब्रह्मबन्धुरधिक्षेपे निर्देशे च द्विजन्मनाम् । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिदूरोऽप्यवष्टब्धः प्रसिद्धौ ख्यात-भूषितौ ॥ १०४ ॥
सूर्यवह्नी चित्रभानू, भानू रश्मि-दिवाकरौ ।
भूतात्मानौ धातृदेहौ, मूर्खनीचौ पृथग्जनौ ॥ १०५ ॥
ग्रावाणौ शैलपाषाणौ पत्त्रिणौ शर-पक्षिणौ ।
तरु-शैलौ शिखरिणौ, शिखिनौ वह्नि-बर्हिणौ ॥ १०६ ॥
प्रतियत्नावुभौ लिप्सोपग्रहौ, वथ सादिनौ ।

---

[१]अवष्टब्धः (अवष्टभ्यते स्मेति षत्वे जश्त्वे षत्वे च) इस १ त्रि० शब्द के अवलम्बित (आश्रित), बँधा हुआ, रुका हुआ, समीप ४ अर्थ हैं ।

प्रसिद्धः (प्रसिद्ध्यति इति क्तः षत्वे दत्वे च) इस १ त्रि० शब्द के सुशोभित, प्रसिद्ध (विख्यात) २ अर्थ हैं ॥ १०४ ॥

[२] चित्रभानुः (चित्रा भानवो रश्मयोऽस्य) इस १ पुं० शब्द के अग्नि और सूर्य २ अर्थ हैं ।

[३]भानुः (भाति इति नुः) इस १ पुं० शब्द के रवि और किरण २ अर्थ हैं ।

भूतात्मा (भूतानामात्मा, भूतानि आत्मा स्वभावो यस्य वा) इस १ पुं० शब्द के ब्रह्मा और शरीर २ अर्थ हैं ।

पृथग्जनः (पृथक्कार्यः जनः इति शाकपार्थिवादिः) इस १ पुं० शब्द के नीच और मूर्ख २ अर्थ हैं ॥ १०५ ॥

[४]ग्रावा (ग्रसते इति डः, आवनति विच्, ग्रश्चासौ आवा च) इस १ पुं० शब्द के पर्वत और पाषाण (पत्थर) २ अर्थ हैं ।

[५]पत्त्री (पत्त्राणि सन्त्यस्य इति इनिः) इस १ पुं० शब्द के पक्षी, शर (बाण), बाज पक्षी, पर्वत, रथिक ५ अर्थ हैं ।

[६]शिखरी (शिखरमस्यास्ति इति इनिः) इस १ पुं० शब्द के पर्वत और वृक्ष २ अर्थ हैं ।

[७]शिखी (शिखाः सन्त्यस्य इति इनिः) इस १ पुं० शब्द के मयूर, वृक्ष, अग्नि, पक्षी, मुर्गा, बाण, केतु ग्रह ७ अर्थ हैं ॥ १०६ ॥

[८]प्रतियत्नः (प्रतियतनम् प्रतियत्यते वा इति नङ्) इस १ पुं० शब्द के लिप्सा (इच्छा) वन्दीग्रहण, संस्कार ३ अर्थ हैं । उपग्रहः = वन्दीग्रहणम् ।

[९]सादी (अवश्यं सीदति सादयति वा णिनिः) इस १ पुं० शब्द के घुड़सवार, सारथि २ अर्थ हैं ।

---

१. अवष्टब्धोऽविदूरे स्यादाक्रान्ते चावलम्बिते । इति मेदिनी । २. चित्रभानुः पुमान् वैश्वानरे चाहस्करेऽपि च । ३. भानुरंशौ रवौ दिने । ४. ग्रावा प्रस्तरे जलदे गिरौ । इति विश्वः । ५. पत्री श्येने रथे काण्डे खगद्रुरथिकाद्रिषु । इति विश्वः । ६. शिखरी स्यादपामार्गे शैलपादपयोः पुमान् । ७. शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः । इति मेदिनी । ८. प्रतियत्नश्च संस्कारलिप्सोपग्रहणेषु च । इति मेदिनी । ९. सादी तुरंगमातङ्गरथारोहेषु दृश्यते । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वौ सारथिहयारोहौ, वाजिनोऽश्वेषु पक्षिणः ॥ १०७ ॥
कुलेऽप्यभिजनो जन्मभूम्यामप्यथ हायनाः ।
वर्षाऽर्चि-र्व्रीहिभेदाश्च, चन्द्राग्न्यर्का विरोचनाः ॥ १०८ ॥
क्लेशेऽपि वृजिनो, विश्वकर्माऽर्क-सुरशिल्पिनोः ।
आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च ॥ १०९ ॥
शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः ।
अभिमानोऽर्थादिदर्पे ज्ञाने प्रणय-हिंसयोः ॥ ११० ॥

---

[३]वाजी (वाजाः पक्षाः सन्त्यस्य इति इनिः) इस १ पुं० शब्द के अश्व (घोड़ा) पक्षी, वाण ३ अर्थ हैं ॥ १०७ ॥

[४]अभिजनः (अभिजायतेऽस्मिन् घञ् वृद्धिनिषेधश्च) इस १ पुं० शब्द के जन्मभूमि, ख्याति, कुल (वंश), कुल समूह ४ अर्थ हैं।

[५]हायनः (जहाति इति ल्युट्) इस १ पुं० शब्द के साल (वर्ष), नीवार, रश्मि (किरण) ३ अर्थ हैं।

[६]विरोचनः (विरोचते इति युच्) इस १ पुं० शब्द के सूर्य, चन्द्र, अग्नि ३ अर्थ हैं ॥ १०८ ॥

[७]वृजिनः (वृज्यते इति इननि कित्वात् गुणाभावः) इस १ पुं० शब्द के केश, वरुण, वासुदेव ३ अर्थ हैं। और न० वृजिन शब्द के पाप १ अर्थ है। त्रि० वृजिन शब्द का कुटिल १ अर्थ है।

[८]विश्वकर्मा (विश्वं कर्मास्मात् अस्य वा) इस १ पुं० शब्द के देवताओं का बढ़ई, रवि (सूर्य) २ अर्थ हैं।

[१]आत्मा (अतति इति मनिन्) इस १ पुं० शब्द के परिश्रम (उद्योग), धृति (तुष्टि), बुद्धि (ज्ञान), स्वभाव, ब्रह्म, देह आदि ६ अर्थ हैं ॥ १०९ ॥

[२]घनाघनः (हन्ति इति पचाद्यचि द्वित्वे आक् चाभ्यासस्य कुत्वे च) इस १ पुं० शब्द के पुरन्दर (इन्द्र), हिंसा करनेवाला (घातुक), हाथी, बरसने वाला मेघ, वर्ष (साल), मतवाला ४ अर्थ हैं।

अभिमानः (अभिमननम् इति मन-ज्ञाने अस्मात् भावे घञि वृद्धौ, मीञ् हिंसायामस्मात् भावे ल्युट् आत्वञ्च वा) इस १ पुं० शब्द के ज्ञान, हिंसा, प्रेम, धन आदि का घमण्ड ४ अर्थ हैं ॥ ११० ॥

---

१. वाजी वाणाश्वपक्षिषु। इति मेदिनी। २. अभिजनः कुले ख्यातौ जन्मभूम्यां कुलध्वजे। इति विश्वः। ३. हायनो न स्त्रियां वर्षे पुंस्यर्चिर्व्रीहिभेदयोः। इति मेदिनी। ४. विरोचनः प्रह्लादस्य तनयेऽर्केऽग्निचन्द्रयोः। इति मेदिनी। ४. वृजिनं कल्मषे क्लीबं क्लेशे (केशे) ना कुटिले त्रिषु। इति रभसः। ५. विश्वकर्मा सहस्रांशौ मुनिभिद्वशिल्पिनोः। इति मेदिनी। ६. आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च। इति धरणिः। ७. अन्योन्यघट्टने चैव घातुके च घनाघनः। इति धरणिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घनो मेघे मूर्तगुणे त्रिषु मूर्ते निरन्तरे।
इनः सूर्ये प्रभौ, राजा मृगाङ्के क्षत्रिये नृपे ॥ १११ ॥
वाणिन्यौ नर्तकी-दूत्यौ, स्रवन्त्यामपि वाहिनी।
ह्लादिन्यौ वज्र-तडितौ, वन्दायामपि कामिनी ॥ ११२ ॥
त्वग्देहयोरपि तनुः, सूनाऽधोजिह्विकाऽपि च।
क्रतु-विस्तारयोरस्त्री वितानं त्रिषु तुच्छके ॥ ११३ ॥

---

³घनः (हननम् इति अप्) इस १ पुं० शब्द के मेघ (बादल), लोहे का मुद्गर, मुस्त, कड़ापन, बाहुल्य ५ अर्थ हैं। और त्रि० घन शब्द के गझिन (सटाहुआ , काँसे का बाजा, कठोर ३ अर्थ हैं।

इनः (एति इनि नक्) इस १ पुं० शब्द के प्रभु या समर्थ, श्रेष्ठ, सूर्य ३ अर्थ हैं।

⁴राजा (राजति इति कनिन्) इस १ पुं० शब्द के क्षत्रिय, चन्द्रमा, नृप, स्वामी, पुरन्दर (इन्द्र), यक्ष ६ अर्थ हैं ॥ १११ ॥

⁵वाणिनी (अवश्यं वणति इति णिनिः) इस १ स्त्री० शब्द के दूती, नृत्य करने वाली वेश्या आदि, चतुर स्त्री, मतवाली स्त्री ४ अर्थ हैं।

¹वाहिनी (वहति इति णिनिः) इस १ स्त्री० शब्द के सेना, सेना का भेद विशेष, नदी आदि ३ अर्थ हैं।

ह्लादिनी (ह्लादतेऽवश्यम् इति णिनिः) इस १ स्त्री० शब्द के बिजली, वज्र (इन्द्र का हथियार विशेष) २ अर्थ हैं।

²कामिनी (अवश्यं काम्यते इति णिनिः) इस १ स्त्री० शब्द के वृक्ष के ऊपर उत्पन्न विजातीय काष्ठ विशेष (बाना), अपि शब्द से—काम (अभिलाषा) करने वाली स्त्री, विलासिनी नारी, स्त्री मात्र ५ अर्थ हैं ॥ ११२ ॥

³तनुः (तनोति तन्यते वेति उः) इस १ स्त्री० शब्द के चमड़ा, शरीर २ अर्थ हैं और त्रि० तनु शब्द के थोड़ा, कृश (पतला), विरल ३ अर्थ हैं।

⁴सूना (सवनम् सूयते वा क्तः नत्वे टापि च) इस १ स्त्री० शब्द के प्राणियों का वधस्थान, गर्दन की घाँटी, संन्तान ३ अर्थ हैं।

⁵वितानम् (विततनम् वितन्यते वा घञ् वृद्धिश्च) इस १ पुं० न० शब्द के विस्तार, यज्ञ, चँदोवा ३ अर्थ हैं और त्रि० वितान शब्द के मन्द, तुच्छ २ अर्थ हैं ॥ ११३ ॥

---

१. घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः। घनः काठिन्यसंघातो विस्तारो लोहमुद्गरौ। इति धरणिः। २. राजा प्रभौ च नृपतौ क्षत्त्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यात्। इति मेदिनी। ३. वाणिनिर्नर्तकी मत्ताविदग्धवनितासु च। इति मेदिनी ४. वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः। इति विश्वः। ५. कामिनी भीरुवन्दयोः। कामी तु कामुके चक्रवाके पारावतेऽपि च। इति मेदिनी। ६. तनुः काये त्वचि स्त्री स्याद् त्रिष्वल्पे विरले कृशे। इति मेदिनी। ७. सूनाख्या पुष्पिते पुष्पे जिह्वातले वधालये। इत्यजयः। सूनं प्रसवपुष्पयोः।(सूना पुत्र्यां वधस्थानगलशुण्डिकयोरपि। इति विश्वः। ८. वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि। वृत्तभेदावसरयोर्वितानं तुच्छ-मन्दयोः। इति विश्वः। वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्। क्लीबं वृत्तविशेषे स्याद् त्रिलिङ्गो मन्दतुच्छयोः। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दे, ऽथ केतनं कृत्ये केतावुपनिमन्त्रणे ।
वेदस्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः ॥ ११४ ॥
उत्साहने च हिंसायां सूचने चापि गन्धनम् ।
आतञ्चनं प्रतीवाप-जवनाऽप्यायनार्थकम् ॥ ११५ ॥
व्यञ्जनं लाञ्छनं श्मश्रुनिष्ठानावयवेष्वपि ।
स्यात् कौलीनं लोकवादे युद्धे पश्वहि-पक्षिणाम् ॥ ११६ ॥
स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ।

---

[1]केतनम् (केतनम्, कित्यते वा कित निवासादौ इति भावकर्मकरणाधिकरणेषु ल्युटि गुणे अनादेशे) इस १ न० शब्द के पताका, निवास, कार्य, निमन्त्रण (उत्सव में मित्रों को बुलाना) ४ अर्थ हैं ।

[2]ब्रह्म (बृंहति इति बृहि वृद्धौ अस्मात् मनिन् नस्याकारो) इस १ न० शब्द के तीन वेद (ऋग्यजुः साम), तत्त्व, (ज्ञानशास्त्रसाधन), तप = कृच्छ्रकर्म, ब्रह्म ४ अर्थ हैं ।

ब्रह्मा (बृंहति वर्धयति प्रजाः अन्तर्भावितण्यन्ताद् बृंहेर्मननि नस्याकारे दीर्घे सुलोपे नलोपे च) इस १ पुं० शब्द के ब्राह्मण और प्रजापति २ अर्थ हैं ॥ ११४ ॥

[3]गन्धनम् (गन्धितम् गन्ध मर्दने इति ल्युटि) इस १ न० शब्द के आशय प्रकट करना, हिंसा करना, प्रकाशन, उत्साहित करना ४ अर्थ हैं ।

आतञ्चनम् (आतञ्चितम् तन्चु गतौ इति ल्युट्) इस १ न० शब्द के दूध में दही या मट्ठा डालकर दही जमाना (जामन छोड़ना), पिघलाये हुए स्वर्ण में दूसरे द्रव्य के साथ अवचूर्णन करना, तृप्त (तर्पण) करना, वेग ४ अर्थ हैं ॥ ११५ ॥

[4]व्यञ्जनम् (व्यक्तम् , व्यज्यते अनेन इति ल्युट्) इस १ न० शब्द के कढ़ी दही वारा आदि (तेमन), चिह्न, दाढ़ी मूँछ, अवयव ४ अर्थ हैं ।

[5]कौलीनम् (कुलीनस्य कर्म भावो वा 'युवाद्यण्' (इस १ न० शब्द के पक्षियों का युद्ध, भेड़ा बकरा आदि पशु, कुलीनता, लोकापवाद आदि ४ अर्थ हैं ॥ ११६ ॥

[6]उद्यानम् (उद्यात्यनेन अस्मिन् वेति उत्पूर्वकात् या प्रापणे धातोः ल्युट्) इस १ न० शब्द के प्रयोजन, बाहर निकलना, बगीचा, आदि ३ अर्थ हैं ।

---

१. केतनं तु ध्वजे कार्ये निमन्त्रणनिवासयोः । इत्यजयः । २. ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि । ऋत्विग्योगभिदो विप्रे । इति मेदिनी । ३. गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने । इति विश्वः । ४. व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽपि च । इति मेदिनी । ५. कौलीनं पशुभिर्युद्धे कुलीनत्वापवादयोः । इति धरणिः । ६. उद्यानं वनभेदे स्यान्निःसृतौ च प्रयोजने । इति धरणिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवकाशे स्थितौ स्थानं, क्रीडादावपि देवनम् ॥ ११७ ॥
उत्थानं पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च ।
व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ॥ ११८ ॥
मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने ।
निर्वर्तनोपकरणाऽनुव्रज्यासु च साधनम् ॥ ११९ ॥
निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ।
व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥ १२० ॥

---

[१]स्थानम् (स्थीयतेऽत्र इति ल्युट्) इस १ न० शब्द के सादृश्य (समान, बराबरी) स्थिति, (एक ही प्रकार से रहना न घटना न बढ़ना) अवकाश ४ अर्थ हैं ।

[२]देवनम् (दीव्यतेऽनेन इति ल्युट्) इस १ न० शब्द के व्यवहार, क्रीड़ा आदि में विजय की अभिलाषा १ अर्थ है । और पुं० देवन शब्द का जुवा १ अर्थ है ॥ ११७ ॥

[३]उत्थानम् (उद् स्थानम् इति पूर्वसवर्णः) इस १ न० शब्द के तन्त्र (राज्य विषयक चिन्ता, परिवार का कार्य, सैन्य). ऊँचा उठना, पुरुषार्थ, युद्ध, सिद्धान्त, पुस्तक आदि ६ अर्थ हैं ।

व्युत्थानम् (विरुद्धम् उत्थानम् इति समासः) इस १ न० शब्द के स्वतन्त्रता, विरुद्ध आचरण करना (चोरी आदि), तिरस्कार ३ अर्थ हैं ॥ ११८ ॥

[४]साधनम् (साद्धम्, साध्यते, साध्नोति इति साध् संसिद्धौ इति करणादौ ल्युट्) इस १ न० शब्द के मरे हुए का दाह आदि संस्कार करना, धन, मारना (शोधना), धन पैदा करना, धन दिलाना, सैन्य, उपाय, मेढ़, पीछे चलना, जाना आदि ९ अर्थ हैं ॥ ११९ ॥

निर्यातनम् (निर्यातितम् निर्यात्यते वा इति यत निकारादौ धातोः भावादौ ल्युट्) इस १ न० शब्द के दुश्मन से बदला लेना, धरोहरको लौटाना (वापस करना), दान ३ अर्थ हैं ।

[५]व्यसनम् (व्यस्तम् व्यस्यतेऽनेन वा इति असु क्षेपणे धातोः इति भावादौ ल्युटि) इस १ न० शब्द के नीचे गिरना, क्रोध से उत्पन्न दोष (जैसे कठोर वचन आदि) काम से उत्पन्न दोष (जुवा, शराब पीना स्त्री सङ्ग् आदि से उत्पन्न), विपत्ति, अशुभ भाग्य का बुरा फल, निष्फल उद्यम आदि ६ अर्थ हैं ॥ १२० ॥

---

१. स्थानं सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे । इति मेदिनी । २. देवनं व्यवहारे स्याज्जिगीषाक्रीडयोरपि । अक्षेषु देवनः प्रोक्तः । इति विश्वः । ३. उत्थानमुद्यते तन्त्रे पौरुषे पुस्तके रणे । प्राङ्गणोद्गमहर्षेषु मलवेगेऽपि न द्वयोः । इति मेदिनी । तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे । प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके । इति मेदिनी । ४. साधनं मृतसंस्कारे सैन्ये सिद्धौषधे गतौ । निर्वर्तनोपायमेढ्रे दापनेऽनुगमे धने । इति मेदिनी । ५. व्यसनं त्वशुभे सक्तौ पानस्त्रीमृगयादिषु । दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे । इति विश्वः (मेदिनी च) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ।
तिथिभेदे क्षणे पर्व, वर्त्म नेत्रच्छदेऽध्वनि ॥ १२१ ॥
अकार्यगुह्ये कौपीनं, मैथुनं सङ्गतौ रते ।
प्रधानं परमात्मा धीः, प्रज्ञानं बुद्धिचिह्नयोः ॥ १२२ ॥
प्रसूनं पुष्पफलयो, र्निधनं कुल-नाशयोः ।
क्रन्दने रोदनाऽऽह्वाने, वर्ष्मं देह-प्रमाणयोः ॥ १२३ ॥

पक्ष्म (पक्ष्यते अनेन वा मनिन्) इस १ न० शब्द के आंख का वाल (वरौनी), कमल का केश (किजल्क), सूत का वहुत वारीक हिस्सा ३ अर्थ हैं ।

१पर्व (पर्वति पर्व्यते वा पर्व-पूरणे धातोः वाहुलकात् कनिन् सुब्लुकि नलोपे च) इस १ न शब्द के तिथिभेद (अमावस्या, पूर्णिमा आदि) ग्रन्थ का भाग (जैसे वनपर्व आदि), उत्सव ३ अर्थ हैं

वर्त्म (वर्तते अनेन अस्मिन् वा इति मनिन्) इस १ न० शब्द के पलक (नेत्रको तोपने वाल चमड़ा) रास्ता २ अर्थ हैं ॥ १२१ ॥

२कौपीनम् (कूपपतनमर्हति 'शालीनकापीने' इति निपातनात् खञ्, वृद्धौ, ईनादेशे, अलोपे च साधुः) इस १ न० शब्द के लँगोटा, न करने योग्य कार्य २ अर्थ हैं ।

संगतौ = भार्यादिसंगमे, रते = सुरते च— ३मैथुनम् (मिथुनम एव, मिथुनस्येदं वा अणि वृद्धं अलोपे च) इस १ न० शब्द के नारी-सम्बन्ध, नारी (स्त्री) के साथ संभोग करना २ अर्थ हैं ।

४प्रधानम् (प्रधत्ते प्रधीयतेऽनेन अस्मिन् वा ल्युट्) इस न० शब्द के ईश्वर, मति (बुद्धि मुख्य, राजा का प्रधान सहाय, सांख्योक्त प्रकृति ५ अर्थ हैं ।

प्रज्ञानम् (प्रज्ञायते इति ल्युट्) इस १ न० शब्द के चिह्न और बुद्धि २ अर्थ हैं ॥ १२२ ॥

प्रसूनम् (प्रसूयते इति प्रपूर्वकात् सूनोतेः कर्मणि नप्रत्यये दीर्घे च) इस १ न० शब्द के पुष्प (फूल), फल (नारियल आदि) २ अर्थ हैं ।

निधनम् (निधानम् निधीयतेऽत्र वा इति क्युः अनादेशे आलोपे च) इस १ न० शब्द के वंश (खानदान, कुल) मृत्यु (नाश) २ अर्थ हैं ।

क्रन्दनम् (क्रन्दितम् क्रदि रोदने आह्वाने च इति ल्युट्) इस १ न० शब्द के बुलाना (पुकारना रोना २ अर्थ हैं ।

---

१. पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे त्रिपुवादिषु । दर्शप्रतण्दोः सन्धौ स्यात्तिथेः पन्वकान्तरे इति धरणिः । २. कौपीनं स्यादकार्येऽपि चीरगुह्यप्रदेशयोः । इति विश्वः । ३. सम्बन्धे सुरते युग्मं राशौ मिथुनमिष्यते । इति व्याडिः । ४. प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि क्लीवमेकत्वे तूत्तमे सदा ॥ इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रह-देह-त्विट्-प्रभावा धामान्यथ चतुष्पथे ।
सन्निवेशे च संस्थानं, लक्ष्म चिह्न-प्रधानयोः ॥ १२४ ॥
आच्छादने संपिधानमपवारणमित्युभे ।
आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ॥ १२५ ॥
अधिष्ठानं चक्र-पुर-प्रभावाऽध्यासनेष्वपि ।
रत्नं स्वजातिश्रेष्ठेऽपि, वने सलिल-कानने ॥ १२६ ॥
तलिनं विरले स्तोके, वाच्यलिङ्गं तथोत्तरे ।

१वर्ष्म (वर्षति इति मनिन्) इस १ न० शब्द के देह (शरीर) प्रमाण, अत्यन्त सुन्दर आकृति अर्थ हैं ॥ १२३ ॥

२धाम (दधाति धीयते वा इति मनिन्) इस १ न०-शब्द के गृह, तेज, प्रभाव, शक्ति जन्म आदि अर्थ हैं ।

३संस्थानम् (संस्थितम्, संस्थीयतेऽत्र अनेन वा इति ल्युट्) इस १ न० शब्द के आकृति, अङ्गमारा (अवयवभेद), चौरास्ता, मरना ४ अर्थ हैं ।

लक्ष्म (लक्ष्यते अनेन वा इति मनिन्) इस १ न० शब्द के मुख्य (प्रधान) चिह्न (लक्षण) अर्थ हैं ॥ १२४ ॥

४आच्छादनम् (आच्छाद्यतेऽनेनेति ल्युट्) इस १ न० शब्द के अच्छी तरह छिपना, वस्त्र आदि ढकना २ अर्थ हैं ।

आराधनम् (आराध्यतेऽनेनेति आङ्पूर्वकात् राध्नोतेः करणे ल्युट्) इस १ न० शब्द के प्राप्ति, साधन, संतोष करना ३ अर्थ हैं ॥ १२५ ॥

५अधिष्ठानम् (अधिष्ठितम्, अधिष्ठीयते अनेन वा इति ल्युट्) इस १ न० शब्द के गाँव (ग्राम) प्रभाव, पहिया, अध्यासन = आक्रमण आदि ४ अर्थ हैं ।

६रत्नम् (रमयति इति नः डभावे, णिलोपे मस्य तकारादेशश्च) इस १ न० शब्द के अपने वर्ग (जाति) वालों में श्रेष्ठ, मणि २ अर्थ हैं ।

७वनम् (वन्यते इति कर्मणि घञ् वृद्ध्यभावश्च) इस १ न० शब्द के जल, वन, (जङ्गल) निवास, गृह ४ अर्थ हैं ॥ १२६ ॥

८तलिनम् (तलति तल्यते वेति इनन्) इस १ त्रि० शब्द के अल्प (थोड़ा) स्वच्छ (साफ) विरल २ अर्थ हैं । तथा = तलिनवत् उत्तरे वक्ष्यमाणाः शब्दाः वाच्यलिङ्गाः स्युरेति सम्बन्धः ।

---

१. वर्ष्म देहप्रमाणातिसुन्दराकृतिषु स्मृतम् । इति मेदिनी । २. धाम शक्तौ प्रभावे च तेजोमन्दिर-जन्मसु । इति विश्वः । ३. संस्थानमाकृतौ मृत्यौ संनिवेशे चतुष्पथे । इति मेदिनी । लक्ष्म प्रधान-चिह्नयोः । इति मेदिनी । ४. आच्छादनं सम्पिधाने वस्त्रेऽपवृत्तिमात्रके । इति धरणिः । ५. अधिष्ठानं चक्रे दुर्गे प्रभावेऽध्यासने पुरे । इत्यजयः । ६. रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम् । इति मेदिनी । ७. जीवनं स्यात् कानने नीरे निवासे निलये वनम् । इति रभसः । ८. तलिनं विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानाः सत्समैके स्युः, पिशुनौ खल-सूचकौ ॥ १२७ ॥
हीन-न्यूनावूनगर्ह्यौ वेगि-शूरौ तरस्विनौ ।
अभिपन्नोऽपराद्धोऽभिग्रस्त-व्यापद्गतावपि ॥ १२८ ॥
कलापो भूषणे बर्हे तूणीरे संहतावपि ।
परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥ १२९ ॥
गोधुग्गोष्ठपती गोपौ, हरविष्णू वृषाकपी ।

---

[1]समानः (सर्मति इति चानश्, मुगभावश्च) इस १ त्रि० शब्द के सदृश (समान, तुल्य) मुख्य, पण्डित ३ अर्थ हैं। और पुं० समान शब्द का नाभि प्रदेश में रहने वाली वायु १ अर्थ हैं।

[2]पिशुनः (पिशति इति उनन् कित्वात् गुणाभावे च), इस १ त्रि० शब्द के चुगली करने वाला (चुगलखोर) दुष्ट २ अर्थ हैं ॥ १२७ ॥

[3]हीनः न्यूनः (जहाति हीयते स्म वेति क्तः इदादेशे नत्वे च, न्यून्यते स्म वेति कर्मणि घञि अच् वा) इन २ त्रि० शब्दों के अल्प (कम) निन्दनीय २ अर्थ हैं।

तरस्वी (तरो बलं जवो वाऽस्यास्ति इति विनिः दीर्घे च) इस १ त्रि० शब्द के शूरवीर, शीघ्रगामी (वेगवान्) २ अर्थ हैं।

[4]अभिपन्नः (अभिपद्यते स्मेति क्तः नत्वञ्च) इस १ त्रि० शब्द के अभिग्रस्त = दुश्मन से या शत्रु द्वारा घिरा हुआ आक्रान्त, आपत्ति में पड़ा हुआ, अपराधी ३ अर्थ हैं ॥ १२८ ॥ इति नान्ताः ॥

[5]कलापः (कलामाप्नोति इति अण्) इस १ पुं० शब्द के आभूषण (अलङ्कार, गहना) मयूर-पंख, तूणीर (तरकस) संहत = संलग्न (मिला हुआ) ४ अर्थ हैं।

परीवापः (परिवपनम् पर्युप्यते अनेन अत्र वेति घञ् दीर्घश्चोपसर्गस्य) इस १ पुं० शब्द के बीज बोना, आलवाल (थाला), तम्बू, परिवार आदि ४ अर्थ हैं ॥ १२९ ॥

[6]गोपः (गां पाति इति कः) इस १ पुं० शब्द के गाय दुहने वाला, गोगृह का स्वामी (यादव, अहीर) देश या वंश का अध्यक्ष ३ अर्थ हैं।

[7]वृषाकपिः (वृषं धर्मं न कम्पयति वृषाद्धर्मादाकम्पयति दुष्टान् इति वा वृषनञाङ्पूर्वकात् किञ्चिदीषच्चलनार्थककपिधातोः इप्रत्यये नलोपे च इति) इस १ पुं० शब्द के शङ्करजी, अग्नि, विष्णु भगवान् ३ अर्थ हैं।

---

१. समानं सत्समैकेषु त्रिषु ना नाभिमारुते। इति मेदिनी। २. पिशुनं कुङ्कुमेऽपि च। कपिवक्त्रे च काके ना सूचक-क्रूरयोस्त्रिषु। पृक्कायां पिशुना स्त्री स्यात्। इति मेदिनी। ३. हीनं गर्ह्योनयोस्त्रिषु। इति मेदिनी तरस्वी शूरवेगिनोः। इति मेदिनी। ४. अभिपन्नोऽपराद्धेऽभिद्रुते ग्रस्ते विपद्गते। इति विश्वः। ५. कलापसंहतौ बर्हे काञ्च्यां भूषणतूणयोः। (चन्द्रे विदग्धे व्याकरणभेदेऽपि कथ्यते बुधैः। इति मेदिन्यां विशेषः) द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्। कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥ ६. गोपो ग्रामौघ-गोष्ठाधिकृतयोर्वल्लवे। इति विश्वः। ७. वृषाकपिः पुमान् कृष्णो शंकरे जातवेदसि। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाष्पमूष्माश्रु, कशिपु त्वन्नमाच्छादनं द्वयम् ॥ १३० ॥
तल्पं शय्याट्टदारेषु, स्तम्बेऽपि विटपोऽस्त्रियाम् ।
प्राप्तरूप-स्वरूपाऽभिरूपा बुध-मनोज्ञयोः ॥ १३१ ॥
मेधलिङ्गा अमी, कूर्मी वीणाभेदश्च कच्छपी ।
कुतपो मृगरोमोत्थपटे चाह्नोऽष्टमेंऽशके ॥ प्र० ॥
रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्ककः ॥ १३२ ॥
शिफा शिखायां सरिति मांसिकायां च मातरि ॥ प्र० ॥

वाष्पम् (वाधते इति बाधतेः 'बाष्प शिल्प' इति निपातनात् साधुः) इस १ न० शब्द के ग्रीष्म, आँसू २ अर्थ हैं।

[1]कशिपुः (कशति दुःखम् इति 'मृगय्वादित्वात्' साधुः) इस १ पुं० शब्द के कपड़ा (वस्त्र) अन्न २ अर्थ हैं ॥ १३० ॥

तल्पम् (तल्यतेऽस्मिन् 'खष्प शिल्प' इति निपातनात् साधुः) इस १ न० शब्द के अटारी, शय्या, नारी (स्त्री) ३ अर्थ हैं।

[2]विटपः (वेटति विट्यते वा 'विटपविष्टपविशिपोलपाः' इति निपातनात् कपनि साधुः) इस १ पुं० शब्द के विस्तार (फैलाव), शाखा, गुच्छा, पल्लव, स्तम्ब आदि ५ अर्थ हैं।

[3]प्राप्तरूपः, स्वरूपः, अभिरूपः (प्राप्तं रूपं येन, स्वमेव रूपं यस्य, अभिलक्ष्यं रूपमस्य इति 'प्राप्तापन्ने' इति समासः) इन ३ त्रि० शब्दों के मनोहर (सुन्दर) विद्वान् २ अर्थ हैं ॥ १३१ ॥

[4]कच्छपी (कच्छे कच्छं वा पिबति, कच्छेन पातीति वेति कः सुबुत्पत्तेः प्राक् समासः ङीष् च) इस १ स्त्री० के कछुही, सरस्वती की वीणा २ अर्थ हैं ॥ इति पान्ताः ॥

मृगरोमोत्थपटे अह्नः = दिनस्याष्टमेंशके = अष्टमे भागे च (पञ्चदशमुहूर्तात्मकं दिनं तस्याष्टमे भागे)—कुतुपः (कुत्सितं तपति कुपूर्वकात् तपधातोः कर्तरि खचि मुमागमाभावे च) इस १ पुं० शब्द के पशमीना और दिन का आठवाँ भाग २ अर्थ हैं ॥ प्र० ॥

रेफः (रिंफ्यते रिफति वेति घञ् अच् वा) इस १ पुं० शब्द का र वर्ण (अक्षर) अर्थ है और त्रि० रेफ शब्द का निन्दित १ अर्थ है ॥ १३२ ॥

शिफा (शेते इति फकि ह्रस्वे टापि च) इस १ स्त्री शब्द के चूड़ा, नदी, जटामांसी, धाई (सौरमेयी) आखुपर्णी ४ अर्थ हैं ॥ प्र० ॥

---

१. एकोक्त्या कशिपुर्भक्तच्छादने च द्वयोः पृथक् । इति विश्वः । २. विटपः पल्लवे षिङ्गो विस्तारे स्तम्बशाखयोः । इति विश्वः । ३. प्राप्तरूपो बुधरम्ययोः । इति मेदिनी । अभिरूपो बुधे रम्ये । इति मेदिनी । ४. कच्छपी वल्लकीभेदे कुली क्षुद्रगदान्तरे । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शफम्मूले तरूणां स्याद् गवादीनां खुरेऽपि च ॥ प्र० ॥
गुम्फः स्याद् गुम्फने बाह्वोरलंकारे च कीर्तितः ॥ प्र० ॥
अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ।
कम्बुर्ना वलये शंखे, द्विजिह्वौ सर्प-सूचकौ ॥ १३३ ॥
पूर्वोऽन्यलिङ्गः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ।
कुम्भौ घटेभ-मूर्द्धांशौ, डिम्भौ तु शिशु-बालिशौ ॥ १३४ ॥
स्तम्भौ स्थूणा-जडीभावौ, शम्भू ब्रह्म-त्रिलोचनौ ।

शफम् (शं फणति इति शं पूर्वकात् फणगतौ अस्मात् कर्तरि ड प्रत्यये टिलोपे पृषोदरादित्वात् मलोपे च) इस १ नपुं० नाम के वृक्षों की जड़, पशुओं के खुर, २ अर्थ हैं ॥ प्र० ॥

गुम्फः (गुम्फनम्, गुम्फ्यते वेति घञ्) इस एक पुं० शब्द के गूंथना, बाँहों का आभूषण २ अर्थ हैं ॥ प्र० ॥ इति फान्ताः ।

[1]गन्धर्वः (गन्धर्वः गन्धमर्वति इति अण् शकन्ध्वादिः) इस १ पुं० शब्द के मृगविशेष, अश्व (घोड़ा), उत्पत्ति और मृत्यु के मध्य काल में मिलने वाली यातना, शरीर, पुंस्कोकिल, देवगायक विश्वावसु, तुम्बरु, चित्ररथ, हाहा, हूहू आदि स्वर्ग के गायक ५ अर्थ हैं ।

[2]कम्बुः (कम्बति इति 'मृगय्वादि' इति निपातनात् साधुः) इस १ पुं० शब्द के शङ्ख, घोंघा या सीप (सितुही) हाथी, कङ्कण ४ अर्थ हैं ।

द्विजिह्वः (द्वे जिह्वे यस्य) इस १ पुं० शब्द के पिशुन (चुगलखोर), सर्प (साँप) २ अर्थ हैं ॥ १३३ ॥

[3]पूर्वः (पूर्वयति इति अच्) इस १ त्रि० शब्द का प्रथम (पहला, जैसे पूर्वो ग्रामः) और दिशा २ अर्थ है और पुं० पूर्व शब्द का पूर्वज (पुरखा) ब्रह्मा २ अर्थ है । प्रागाद्ययोः पूर्वः अन्यलिङ्गः स्यात् ।

[4]कुम्भः (कुं भूमिं कुत्सितं वा उम्भति = पूरयति इति अण् अच् वा) इस १ पुं० शब्द के गजमस्तक का कुम्भ, कुम्भ राशि, कुम्भकर्ण का सुत (पुत्र) वेश्यापति, घड़ा ५ अर्थ हैं ।

डिम्भः (डिम्भयति इति अच् नुमागमे च) इस पुं० शब्द के बेवकूफ (मूर्ख) बालक २ अर्थ हैं ॥ १३४ ॥

स्तम्भः (स्तभ्नाति इति अच्, स्तम्भनम् वा भावे घञ्) इस १ पुं० शब्द के जड़ता, खम्भा २ अर्थ हैं ।

---

१. गन्धर्वः पशुभेदे स्यात्पुंस्कोकिलतुरंगयोः । अन्तराभवसत्त्वे च गायने खेचरेऽपि च । इति मेदिनी । २. कम्बुः शङ्खे स्त्रियां पुंसि शम्बूके वलये गजे । इति मेदिनी । ३. पूर्वे तु पूर्वजेषु स्युः पूर्वप्रागाद्ययोस्त्रिषु । इति मेदिनी । पूर्वजेषु पूर्वे स्युः । यथा पूर्वे स्युः पूर्वजाः पूर्वे ज्ञातयः । इति धरणिः । प्राक् पूर्वमग्रतः । इति धरणिः । ४. कुम्भः स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे । राशिभेदे द्विपाङ्गे च कुम्भं त्रिवृति गुग्गुले । इति विश्वः ।

२२५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुक्षि-भ्रूणार्भका गर्भा, विस्रम्भः प्रणयेऽपि च ॥ १३५ ॥
स्याद्भेर्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ।
स्यान्महारजने क्लीबं कुसुम्भं करके पुमान् ॥ १३६ ॥
क्षत्रियेऽपि च नाभिर्ना, सुरभिर्गवि च स्त्रियाम् ।

१शम्भुः (शं=सुखं भवति प्रापयति इति डुः) इस १ पुं० शब्द के शङ्कर, विधाता (ब्रह्मा), पूज्य ३ अर्थ हैं ।

२गर्भः (गिरति इति भन् गुणे च) इस १ पुं० शब्द के कोख (कुक्षि), गर्भ में रहने वाला बच्चा या गर्भ, बालक ३ अर्थ हैं ।

३विस्रम्भः (विस्रम्भणम् इति घञ्) इस १ पुं० शब्द के परिचय, शृङ्गार, याचना, केलिकलह (विश्वास), वध ५ अर्थ हैं ॥ १३५ ॥

४दुन्दुभिः (दुन्द इति शब्देन उभति इति इन् कित्वाद् गुणाभावे शकन्ध्वादिः) इस १ पुं० शब्द के वरुण, दुन्दुभि नाम का राक्षस, भेरी बाजा ३ अर्थ हैं । और स्त्री० शब्द का दुन्दुभि का जुवा १ अर्थ है ।

५कुसुम्भम् (कुषुभ्यति अनेन वेति अच् घञ् वा पृषोदरादिः) इस १ न० शब्द के स्वर्ण, वरें का फूल २ अर्थ हैं । और पुं० कुसुम्भ शब्द का कमण्डलु १ अर्थ है ॥ १३६ ॥

६नाभिः (नभ्यते इति इण् नाभयति इति स्वार्थण्यन्तात् इः वा) इस १ पुं० शब्द के विजय की अभिलाषा करने वाला या प्रधान राजा, क्षत्रिय, पहिये के बीच का भाग, ३ अर्थ हैं । और स्त्री० नाभि शब्द का कस्तूरी का मद १ अर्थ है ।

७सुरभिः (सुष्ठु रमते रम्यते वा इन्) इस १ स्त्री० शब्द का गाय अर्थ १ है । और पुं० सुरभि शब्द के जातीफल, चम्पा, वसन्त ऋतु ३ अर्थ हैं । और त्रि० सुरभि शब्द के मनोहर (सुन्दर), सुगन्धित २ अर्थ हैं ।

---

१. शम्भुः पुंसि महादेवे परमेष्ठिनि चार्हति । इति मेदिनी । २. गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनस-कण्टके । इति मेदिनी । ३. विस्रम्भः केलिकलहे विश्वासे प्रणये वधे । इति विश्वः । परिचयप्रार्थनयोः प्रणयः परिकीर्तितः । इत्यमरमाला । ४. दुन्दुभिः पुमान् । वरुणे दैत्यभेर्योश्च यक्षे विन्दुत्रिकद्वये । इति मेदिनी । ५. कुसुम्भं हेमनि महारजने ना कमण्डलौ । इति मेदिनी । ६. नाभिर्मुख्यनृपे चक्रमध्य-क्षत्रियोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे । इति मेदिनी । ७. सुरभिः शल्लकीमातृ-भित्सुरभीषु योषिति । चम्पके च वसन्ते च तथा जातीफले पुमान् । स्वर्णे गन्धोत्पले क्लीवं सुगन्धि-कान्तयोस्त्रिषु । विख्याते सचिवे धीरे चैत्रेऽपि च पुमानयम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सभा संसदि सभ्ये च, त्रिष्वध्यक्षेऽपि वल्लभः ॥ १३७ ॥
किरण-प्रग्रहौ रश्मी, कपि-भेकौ प्लवङ्गमौ ।
इच्छा-मनोभवौ कामौ, शौर्योद्योगौ पराक्रमौ ॥ १३८ ॥
धर्माः पुण्य-यमन्याय-स्वभावाऽऽचार-सोमपाः ।
उपायपूर्व आरम्भ उपधा चाप्युपक्रमः ॥ १३९ ॥
वणिक्पथः पुरं वेदो निगमो, नागरो वणिक् ।

---

[1]सभा (सह भान्ति ये यस्यां वा इति कः सभावश्च टाप् च) इस १ स्त्री० शब्द के कमेटी-बैठक, मन्दिर, द्यूत (जुवा), सभा ४ अर्थ हैं ।

[2]वल्लभः (वल्लते वल्यते वेति अभच्) इस १ त्रि० शब्द के प्रिय, अध्यक्ष २ अर्थ हैं ॥ १३७ ॥

[3]रश्मिः (अश्नुते अश्यते अनेन वा इति मिप्रत्यये अश्नोतेः रशादेशे च) इस १ पुं० शब्द के रज्जु, किरण २ अर्थ हैं ।

प्लवङ्गमः (प्लवेन प्लुत्या वा गच्छति इति खच्) इस १ पुं० शब्द के कपि (बन्दर) मेषा (मेढक) २ अर्थ हैं ।

[4]कामः (कमनम् कम्यते वा घञ्) इस १ पुं० शब्द के कामदेव, अभिलाषा (इच्छा) २ अर्थ हैं ।

[5]पराक्रमः (पराक्रमणम् पराक्रम्यते अनेन वा घञ् वृद्ध्यभावश्च) इस १ पुं० शब्द के उद्योग, सामर्थ्य, विक्रम ३ अर्थ हैं ॥ १३८ ॥

[6]धर्मः (धरति ध्रियते वेति मन्) इस १ पुं० न० शब्द के स्वभाव, उपनिषद्, पुण्य, आचार, न्याय ५ अर्थ हैं । और पुं० धर्म शब्द के सोमरस का पान करने वाला, यमराज, जिन ३ अर्थ हैं ।

[7]उपक्रमः (उपक्रमणम्, उपक्रम्यते अनेन वेति उपपूर्वकात्क्रमधातोः भावे घञि वृद्ध्यभावे च) इस १ पुं० शब्द के उपाय को विचार कर किया हुआ प्रारम्भ, सचिव (मन्त्री) के स्वभाव परीक्षा करने का उपाय, चिकित्सा, विक्रम, उत्कोच (घूस) ५ अर्थ हैं ॥ १३९ ॥

[8]निगमः (निगम्यते अनेन वा 'गोचरसंचर' इति निपातनात् साधुः) इस १ पु० शब्द के वाणिज्य (व्यापार), बाजार, गाँव (पुर, ग्राम) वेद अर्थ हैं ।

---

१. स्त्रियां सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः सभा ॥ इति रभसः । २. वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरंगमे । इति मेदिनी । ३. रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि । इति मेदिनी । ४. कामः स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम् । इति मेदिनी । ५. पराक्रमः स्यात्सामर्थ्ये विक्रमोद्यमयोरपि । इति मेदिनी । ६. धर्मोऽस्त्री पुण्य आचारे स्वभावोपसयोः क्रतौ । अहिंसोपनिषन्न्याये ना धनुर्यमसोमपे ॥ इति मेदिनी । ७. उपक्रमः स्यादुपधा चिकित्सारम्भविक्रमे । इति विश्वः । ८. निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैगमो द्वौ, बले रामो नील-चारु-सिते त्रिषु ॥ १४० ॥
शब्दादिपूर्वे वृन्देऽपि ग्रामः, कान्तौ च विक्रमः ।
स्तोमः स्तोत्रेऽध्वरे वृन्दे जिह्मस्तु कुटिलेऽलसे ॥ १४१ ॥
(उष्णेऽपि घर्मश्चेष्टालङ्कारे, भ्रान्तौ च विभ्रमः)
गुल्मा रुक्-स्तम्ब-सेनाश्च, जामिः स्वसृ-कुलस्त्रियोः ।

[१]नैगमः (निगमे भवः इति अण्) इस १ त्रि० शब्द के वेद-विषय (सम्बन्धी), नगर-निवासी २ अर्थ हैं । पुं० नैगम शब्द के वनियाँ, उपनिषद् २ अर्थ हैं ।

[२]रामः (रमते अत्र अनेन वेति णः घञ् वा) इस १ पुं० शब्द के परशुराम जी, शरभ नामक पशु, बलराम (कृष्ण के बड़े भाई), रामचन्द्र ४ अर्थ हैं और त्रि० राम शब्द के सुन्दर, उज्ज्वल (सफेद), नीला ३ अर्थ हैं ॥ १४० ॥

[३]ग्रामः (ग्रसते ग्रस्यते वेति मः सस्य आ च) इस १ पुं० शब्द के ग्राम शब्द के पूर्व (पहले) कोई दूसरा शब्द रहे तो वहाँ समूह अर्थ होता है, (जैसे गुणग्रामः शब्दग्रामः) गाँव, स्वरविशेष ३ अर्थ हैं । शब्दादिपूर्वः ग्रामः वृन्देपीति सम्बन्धः ।

[४]विक्रमः (विक्रमणम् विक्रम्यते अनेन वेति घञ्) इस १ पुं० शब्द के आक्रमण (क्रान्ति) पुरुषार्थ (पराक्रम) २ अर्थ हैं ।

स्तोमः (स्तूयते अनेन वेति मन्) इस १ पुं० शब्द के यज्ञ, झुण्ड (समूह), स्तोत्र ३ अर्थ हैं ।

जिह्मः (जहाति हीयते वा मन् आलोपः सन्वच्च) इस १ पुं० शब्द के आलसी, दुष्ट (कुटिल) २ अर्थ हैं ॥ १४१ ॥

उष्णे = ग्रीष्मे अपिशब्दात् स्वेदादौ च—घर्मः (घरति, जिघर्त्यङ्गमनेनेति वा मकि गुणे च) इस १ पुं० शब्द के ग्रीष्म ऋतु और पसीना २ अर्थ हैं ।

चेष्टालंकारे = हावे भ्रान्तौ च विभ्रमः (विभ्रमणम् भावे घञि वृद्ध्यभावे च) इस १ पुं० शब्द के हाव-भाव और भ्रान्ति २ अर्थ हैं ॥ प्र० ॥

[५]गुल्मः (गुड्यते इति बाहुलकात् मक् डलयोरेकत्वम्) इस १ पुं० शब्द के रोग, वाल, गुच्छा, सेना, किला का रक्षास्थान आदि ५ अर्थ हैं ।

[६]जामिः (जायति जायते वा जै-क्षये धातोः बाहुलकान्मिः) इस १ स्त्री० शब्द के भगिनी (बहन), कुलस्त्री २ अर्थ हैं ।

---

१. नैगमः स्यादुपनिषद्वणिजोर्नागरेऽपि च । इति विश्वः । २. रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे चासितश्वेतमनोज्ञेषु च वाच्यवत् ॥ इति विश्वः । ३. ग्रामः स्वरे सवसथे वृन्दे शब्दादिपूर्वकः । इति विश्वः । ४. विक्रमः शक्तिसंपत्तिः क्रान्तिमात्रं च विक्रमः । इति धरणिः । ५. गुल्मः स्तम्बे प्लीहि घटसैन्ययोः सैन्यरक्षणे । इति विश्वः । ६. जिह्मस्तु कुटिले मन्दे जामिः स्वसृकुलस्त्रियोः । इति चवर्गादौ अजयः । प्रहरे समये यामो यामिः स्वसृकुलस्त्रियोः । इति मुकुटः । यामिः कुलस्त्रीस्वस्रोः । स्त्री टाप् मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिति-क्षान्त्योः क्षमा, युक्ते क्षमं शक्ते हिते त्रिषु ॥ १४२ ॥
त्रिषु श्यामौ हरित्कृष्णौ, श्यामा स्याच्छारिवा निशा ।
ललामं पुच्छ-पुण्ड्राश्वभूषा-प्राधान्य-केतुषु ॥ १४३ ॥
सूक्ष्ममध्यात्ममप्याद्ये प्रधाने प्रथमस्त्रिषु ।
वामौ वल्गु-प्रतीपौ द्वा, वधमौ न्यूनकुत्सितौ ॥ १४४ ॥

---

[१]क्षमा (क्षमणम् इति अङ् टाप् क्षमते क्षम्यते वा अच् घञ् वा वृद्ध्यभावश्च) इस १ स्त्री० शब्द के भूमि, माफी २ अर्थ हैं। और क्षमम् न० शब्द का योग्य १ अर्थ है। और त्रि० क्षम शब्द के योग्य, समर्थ, कल्याण (हित) ३ अर्थ हैं ॥ १४२ ॥

[२]श्यामः (श्यायते इति मक् आत्वे च) इस १ त्रि० शब्द के नीला रङ्ग वाला, काला रङ्गवाला २ अर्थ हैं और पुं० श्याम शब्द के अक्षयवट संज्ञा वाला बरगद का पेड़, नीला रङ्ग, बादल, काला रंग, स्त्री० शारिवा औषधविशेष, सोमलता विधारा औषधि, यमुना, विना बच्चा उत्पन्न की हुई नारी, सोलह वर्ष की स्त्री, अर्थ हैं। और न० श्याम शब्द के समुद्री लवण (नमक), काली मिर्च २ अर्थ हैं।

[३]ललामम् (लडनम् इति क्विप्, डलयोरेकत्वम्, ललमति इति अण्, बाहुलकात् कनिनि नान्तोऽपि) इस १ न० शब्द के अश्व आदि के मस्तक का चिह्न विशेष, अश्व की पूँछ, अश्व-भूषण, प्रधान, शृङ्ग (सींग), पताका, प्रभाव, रमणीय आदि ९ अर्थ हैं ॥ १४३ ॥

[४]सूक्ष्मम् (सूच्यते इति स्मन् चस्य कुत्वे षत्वे क्षत्वे) इस १ न० शब्द के कपट, अध्यात्म २ अर्थ हैं और पुं० सूक्ष्म शब्द का आग १ अर्थ है और त्रि० सूक्ष्म शब्द का अधिक बारीक (महीन) या छोटा १ अर्थ हैं।

[५]प्रथमः (प्रथते इति अमच्) इस १ त्रि० शब्द के पहला, प्रधान २ अर्थ हैं।

[६]वामः (वमति वम्यते वा णः घञ् वा) इस १ त्रि० शब्द के शङ्कर जी, प्रतिकूल, पयोधर (मेघ, बादल), सुन्दर, दुश्मन, बायाँ ६ अर्थ है।

अधमः (अवति इति 'अवद्यावमाधमा' इति निपातनात् अमप्रत्ययः, वस्य धादेशश्च साधुः) इस १ त्रि० शब्द के निन्दित (नीच), थोड़ा २ अर्थ हैं ॥ १४४ ॥

---

१. क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षमम्। इति धरणिः। २. श्यामो वटे प्रयागस्य वारिदे वृद्धदारके। पिके च कृष्णहरिते पुंसि स्यात्तद्वति त्रिषु। मरिचे सिन्धुलवणे क्लीवं स्त्री शारिवौषधौ। अप्रसूताङ्गनायां च प्रियङ्गावपि चोच्यते। यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ। नीलिकायामथ श्यामो मासे मण्डपकालयोः॥ इति मेदिनी॥ ३. प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु। भूषा वाजिप्रभावेषु ललामं स्याल्ललाम च॥ इति रुद्रः। ४. सूक्ष्मं स्यात्कैतवेऽध्यात्मे पुंस्यग्नौ त्रिषु चाल्पके। इति मेदिनी। ५. प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्। इति मेदिनी। ६. वामं सव्ये प्रतीपे च द्रावणे चातिसुन्दरे। पयोधरे हरे कामे विद्याद्वामामपि स्त्रियाम्। वामी शृगालीवडवारासभीकरभीषु च॥ इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ।
तुरंग-गरुडौ तार्क्ष्यौ, निलयाऽपचयौ क्षयौ ॥ १४५ ॥
श्वशुर्यौ देवर-श्यालौ, भ्रातृव्यौ भ्रातृज-द्विषौ ।
पर्जन्यौ रणदब्देन्द्रौ, स्यादर्यः स्वामि-वैश्ययोः ॥ १४६ ॥
तिष्यः पुष्ये कलियुगे, पर्यायोऽवसरे क्रमे ।
प्रत्ययोऽधीन-शपथ-ज्ञान-विश्वास-हेतुषु ॥ १४७ ॥

[1]यातयामम् (यातो गतो याम उपभोगकालो यस्य) इस १ त्रि० शब्द के उपभोग किया हुआ (वासी या जूठा), प्राचीन (पुराना) २ अर्थ हैं।

॥ इति मान्ताः ॥

[2]तार्क्ष्यः (तार्क्ष्यस्य कश्यपस्यापत्यम् इति अण्) इस १ पुं० शब्द के साँप, अश्व (घोड़ा), गरुड का ज्येष्ठ भाई, गरुड, ४ अर्थ हैं।

[3]क्षयः (क्षयणम् क्षीयतेऽत्र वा अच् घो वा) इस १ पुं० शब्द के कल्पान्त, नाश (कमी), रोग-विशेष, घर ४ अर्थ हैं ॥ १४५ ॥

श्वशुर्य्यः (श्वशुरस्यापत्यम् इति यत्) इस १ पुं० शब्द के साला (पत्नी का भाई), पति का छोटा भाई (देवर) २ अर्थ हैं।

भ्रातृव्यः (भ्रातुरपत्यम् इति व्यत् व्यन् वा) इस १ पुं० शब्द के दुश्मन, भाई का पुत्र (लड़का) २ अर्थ हैं।

[4]पर्जन्यः (पर्षति इति पृषेः कर्तरि अन्यप्रत्यये षस्य निपातनात् जादेशे पर्जन्यः इति साधुः) इस १ पुं० शब्द के पुरन्दर (इन्द्र), बादल का गर्जन, गर्जता हुआ बादल ३ अर्थ हैं।

अर्यः (अर्यते इति 'अर्यः स्वामिवैश्ययोः' इति निपातनात् यति गुणे च साधुः) इस १ पुं० शब्द के वैश्य (बनियाँ) स्वामी (मालिक) २ अर्थ हैं ॥ १४६ ॥

[5]तिष्यः (त्वेषति इति अन्यादित्वात् यकि अलो लोपे च निपातनात् साधुः) इस १ पुं० शब्द के कलियुग, पुष्य नक्षत्र २ अर्थ हैं।

[6]पर्यायः (पर्ययणम् इति घञ् वृद्धौ यणादेशे) इस १ पुं० शब्द के अवकाश, प्रकार, क्रम (सिलसिला) निर्माण, ४ अर्थ हैं।

[7]प्रत्ययः (प्रत्ययनम् प्रतीयतेऽनेन वा इति एरच् घो वा) इस १ पुं० शब्द के ज्ञान, शपथ (कसम), कारण, अधीन, विश्वास, छिद्र, शब्द, आचार, प्रत्यय (जैसे तिप्, तस्, सु आदि), प्रसिद्ध १० अर्थ हैं ॥ १४७ ॥

---

१. यातयामोऽन्यवज्जीर्णे परिभुक्तोज्झितेऽपि च। इति मेदिनी। २. तार्क्ष्योऽश्वसर्पयोः। गरुडाग्रजे सुपर्णे च पुंसि क्लीबं रसाञ्जने ॥ इति मेदिनी। ३. क्षयो रोगान्तरे वेश्म कल्पान्तापचयेषु च। इति मेदिनी। ४. पर्जन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः। इति विश्वः। ५. तिष्यः कलियुगे ऋक्षे तिष्या धात्री च कीर्त्यते। इति विश्वः। ६. पर्यायस्तु प्रकारे स्यान्निर्माणेऽवसरे क्रमे। इति विश्वः। ७. प्रत्ययः शपथे रन्ध्रे विश्वासाचारहेतुषु। प्रथितत्वे च सन्नादावधीनज्ञानयोरपि ॥ इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रन्ध्रे शब्देऽथानुशयो दीर्घद्वेषाऽनुतापयोः ।
स्थूलोच्चयस्त्वसाकल्ये नागानां मध्यमे गते ॥ १४८ ॥
समयः शपथाऽऽचार-काल-सिद्धान्त-संविदः ।
व्यसनान्यशुभं दैवं विपदित्यनयास्त्रयः ॥ १४९ ॥
अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्य, थापदि ।
युद्धायत्योः सम्परायः, पूज्यस्तु श्वशुरेऽपि च ॥ १५० ॥
पश्चादवस्थायिबलं समवायश्च सन्नयौ ।
संघाते सन्निवेशे च संस्त्यायः, प्रणयास्त्वमी ॥ १५१ ॥

---

[१]अनुशयः (अनुशयनम् इति एरच् घो वा) इस १ पुं० शब्द के पछताव (पीछे सोच करना), बड़ा द्वेष, या बहुत दिनों की दुश्मनी २ अर्थ हैं ।

[२]स्थूलोच्चयः (उच्चयनम् इति एरच्, स्थूलस्योच्चयः) इस १ पुं० शब्द के गजों का मध्यम चाल से चलना, पर्वत का बड़ा चट्टान, असंपूर्णता ३ अर्थ हैं ॥ १४८ ॥

[३]समयः (समयनम् समीयतेऽत्र वेति एरच् घो वा) इस १ पुं० शब्द के काल (समय), आचार, सिद्धान्त, बुद्धि, शपथ (कसम), भाषा, संकेत, ८ निर्देश अर्थ हैं ।

[४]अनयः (न नयनम्, न नीयते अनेन अत्र वा इति एरच्) इस १ पुं० शब्द के दुर्भाग्य, अन्याय, जुवा, रण्डीबाजी, मद्यपान आदि अकल्याणकारक भाग्य और खराब आदत, विपत्ति अर्थ हैं ॥ १४९ ॥

[५]अत्ययः (अत्ययनम् इति एरच्) इस १ पुं० शब्द के दण्ड, उल्लङ्घन, बड़ा उत्पात, दोष, कष्ट ५ अर्थ हैं ।

[६]संपरायः (संपरायणम् इति संपरापूर्वकादिणो भावे अचि गुणे अयादेशे सवर्णदीर्घे च (इस १ पुं० शब्द के आपत्ति, युद्ध, उत्तर काल ३ अर्थ हैं ।

[७]पूज्यः (पूजयितुमर्हः इति यत्) इस १ पुं० शब्द के पूजा करने योग्य, श्वशुर २ अर्थ हैं १५०॥

संनयः (संनयनम् संनीयते वेति अच् गुण अयादेशे) इस १ पु० शब्द के झुण्ड (समूह), सेना के पीछे रहने वाली सेना २ अर्थ हैं ।

[८]संस्त्यायः (संस्त्यानम् इतिं घञ् आत्वे युगागमे च) इस १ पुं० शब्द के स्थान विशेष, झुण्ड (समूह), विस्तार ३ अर्थ हैं ।

---

१. भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः । इति विश्वः । २. स्थूलोच्चयस्त्वसाकल्ये गण्डोपलकरण्डयोः । इति विश्वः । ३. समयः शपथाचारसिद्धान्तेषु तथा धियि । क्रियाकारे च निर्देशे संकेते कालभाषयोः । इति मेदिनी । ४. अनयस्तु विपद्दैवाशुभयोर्व्यसनेषु च । इति मेदिनी । ५. अत्ययोऽतिक्रमे कृच्छ्रेऽत्युत्पाते नाशदण्डयोः । इति धरणिः । ६. संपरायः समीके स्यादापदुत्तरकालयोः । इति मेदिनी । ७. पूज्यौ श्वशुरपूजार्हौ । इति धरणिः । ८. संस्त्यायः संनिवेशे च संघाते विस्तृतावपि । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्रम्भ-याच्ञा-प्रेमाणो, विरोधेऽपि समुच्छ्रयः ।
विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥ १५२ ॥
निर्यासेऽपि कषायोऽस्त्री, सभायां च प्रतिश्रयः ।
प्रायो भूम्न्यन्तगमने, मन्युर्दैन्ये क्रतौ क्रुधि ॥ १५३ ॥
रहस्योपस्थयोर्गुह्यं सत्यं शपथ-तथ्ययोः ।

---

[1]प्रणयः (प्रणयनम् इति प्रपूर्वकान्नयतेः भावेऽच् गुणे अयादेशे) इस १ पुं० शब्द के माँगना (याचना), परिचय, विश्वास, प्रेम ४ अर्थ हैं । १५१ ॥

[2]समुच्छ्रयः (समुच्छ्रयणम् इति समुत्पूर्वकात् श्रिञो भावे अचि गुणे अयादेशे चुत्वे चर्त्वे छत्वे च) इस १ पुं० शब्द के स्थान, शब्द की ऊँचाई, विरोध अर्थ है ।

[3]विषयः (विषयणम् विषीयतेऽत्र वा इति षत्वञ्च) इस १ पुं० शब्द के स्थान, देश, जनपद, शब्द आदि (जैसे, स्पर्श त्वचा का, रूप नेत्रका, शब्द कानका आदि विषय हैं) अर्थ हैं ॥ १५२ ॥

[4]कषायः (कषति कण्ठम् इति बाहुलकादयः) इस १ पुं० न० शब्द के रस काढ़ा, गेरुआ रंग, कसाव ४ अर्थ हैं ।

[5]प्रतिश्रयः (प्रतिश्रयण अत्र वा अच् वा) इस १ पुं० शब्द के आश्रम, सभा (कमेटी) २ अर्थ हैं ।

[6]प्रायः (प्रायणम् इति घञ्) इस १ पुं० शब्द के अनशन (अन्न न खाना), अन्तिम यात्रा (मृत्यु, मरना), तुल्य, अधिकतर (अक्सर) ४ अर्थ हैं ।

[7]मन्युः (मन्यते इति 'मृगय्वादिः' इति निपातनात् साधुः) इस १ पुं० शब्द के यज्ञ, दीनता, क्रोध ३ अर्थ हैं ॥ १५३ ॥

[8]गुह्यम् (गूहनम् इति क्यप्) इस १ न० शब्द के योनि, लिङ्ग, रहस्य, अर्थ हैं । और पुं० गुह्य शब्द के कच्छप, दम्भ २ अर्थ हैं ।

[9]सत्यम् (सति साधुः इति यत्) इस १ न० शब्द के शपथ (कसम), सत्य २ अर्थ हैं ।

---

१. प्रणयः प्रसरे प्रेम्णि याच्ञाविश्रम्भयोरपि । निर्वाणेऽपि । इति मेदिनी । विश्रम्भः स्यात्परिचये विश्वासविप्रलम्भयोः । इत्यजयः । २. वैरोन्नत्योः समुच्छ्रयः । इति रभसः । ३. विषयो गोचरे देशे तथा जनपदेऽपि च । प्रबन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान् ॥ इति मेदिनी । ४. कषायो रसभेदे स्यादङ्गरागे विलेपने । निर्यासे च कषायोऽथ सुरभौ लोहितेऽन्यवत् ॥ इति विश्वः । ५. प्रतिश्रयः सभायां चाश्रयेऽभ्युपगमेऽपि च । इति मेदिनी । ६. प्रायश्चानशने मृत्यौ प्रायो बाहुल्यतुल्ययोः । इति विश्वः । ७. मन्युः पुमान् क्रुधि । दैन्ये शोके च यज्ञे च । इति मेदिनी । ८. गुह्यं रहस्युपस्थे च गुह्यः कमठदम्भयोः । इति विश्वः । ९. सत्यं कृते च शपथे तथ्ये च त्रिषु तद्वति । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीर्यं बले प्रभावे च, द्रव्यं भव्ये गुणाश्रये ॥ १५४ ॥
धिष्ण्यं स्थाने गृहे भेऽग्नौ भाग्यं कर्म शुभाशुभम् ।
कशेरुहेम्नोर्गाङ्गेयं, विशल्या दन्तिकाऽपि च ॥ १५५ ॥
वृषाकपायी श्री-गौर्यौ, रभिख्या नाम-शोभयोः ।
आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ॥ १५६ ॥
उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ।

१वीर्यम् (वीर्यतेऽनेन इति यत्) इस १ न० शब्द के शक्ति (ताकत, बल), तेज, शुक्र (पुरुष का धातु), प्रभाव आदि ४ अर्थ हैं ।

२द्रव्यम् (द्रोरिदम् इति यत् 'द्रव्यं च भव्ये' इति निपातनात् साधुः) इस १ न० शब्द के पृथ्वी, जल, तेज, वायु आकाश आदि गुणाश्रय ये ९ द्रव्य, धन, भव्य (योग्य), ओषधि, विलेप आदि ५ अर्थ हैं ॥ १५४ ॥

३धिष्ण्यम् (धिष्यते धृष्णोति वा 'सानसि वर्णसि' इति निपातनात् साधुः) इस १ न० शब्द के नक्षत्र, स्थान, आग, घर, शक्ति (सामर्थ्य) ५ अर्थ हैं ।

४भाग्यम् (भज्यतेऽनेन इति ण्यत् कुत्वञ्च) इस १ न० शब्द के ऐश्वर्य, शुभाशुभ कर्म २ अर्थ हैं ।

५गाङ्गेयम् (गङ्गायाः अपत्यम् इति ढक्) इस १ न० शब्द के स्वर्ण (सोना), कशेरू (कन्दविशेष) २ अर्थ हैं और पुं० गाङ्गेय का भीष्म पितामह १ अर्थ है ।

६विशल्या (विगता शल्यात्, विगतं शल्यं यस्या वा) इस १ स्त्री० शब्द के आग की लपट, गुडच, दन्ती ओषधिविशेष, त्रिपुटा ओषधि ४ अर्थ हैं ॥ १५५ ॥

७वृषाकपायी (वृषाकपेः स्त्री इति ङीप्, ऐ, आयादेशे च) इस १ स्त्री० शब्द के गौरी (पार्वती), लक्ष्मी, शतावर, जीवन्ती नामक ओषधि विशेष ४ अर्थ हैं ।

८अभिख्या (अभिख्यानम् इति अङ् टाप् च) इस १ स्त्री० शब्द के शोभा, नाम, कीर्ति (यश) ३ अर्थ हैं ।

९क्रिया (करणम् भावादौ करोतेः कृञः शः यक् रिङादेशः टाप् च) इस १ स्त्री० शब्द के निष्कृति (प्रायश्चित), कार्य, विकार, शिक्षा सामदान आदि उपाय, पूजा, काम, रोग आदि की चिकित्सा, चेष्टा, आदि ९ अर्थ हैं ।

---

१. वीर्यम् प्रभावे शुक्रे च तेजः सामर्थ्ययोरपि । इति मेदिनी । २. द्रव्यं स्याद् द्रविणे भव्ये पृथिव्यादौ च पित्तले । भेषजे च विलेपे च जतुद्रुमविशेषयोः । इति विश्वः । ३. धिष्ण्यं स्थानाग्निसद्मसु । शक्तावृक्षेऽपि । इति मेदिनी । ४. भाग्यं शुभात्मकविधौ स्याच्छुभाशुभकर्मणि । इति विश्वः । ५. गाङ्गेयः स्यात् पुमान् भीष्मे क्लीबं स्वर्णकशेरुणोः । इति मेदिनी । ६. विशल्याऽग्निशिखा दन्ती गुडूचीत्रिपुटासु च । इति मेदिनी । ७. वृषाकपायी श्रीगौरीवरीजीवन्तिकासु च । इति मेदिनी । ८. अभिख्या त्वभिधाने स्याच्छोभायां च यशस्यपि । इति मेदिनी । ९. क्रिया कर्मणि चेष्टायां करणे संप्रधारणे । आरम्भोपायशिक्षार्यचिकित्सानिष्कृतिष्वपि ॥ इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छाया सूर्यप्रिया कान्तिः, प्रतिविम्बमनातपः ॥ १५७ ॥
कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।
कृत्या क्रियादेवतयोस्त्रिषु भेद्यं धनादिभिः ॥ १५८ ॥
जन्यं स्याज्जनवादेऽपि, जघन्योऽन्त्येऽधमेऽपि च ।
गृह्याधीनौ च वक्तव्यौ, कल्यौ सज्ज-निरामयौ ॥ १५९ ॥
आत्मवाननपेतोऽर्थादर्थ्यौ, पुण्यं तु चार्वपि ।

१छाया (छ्यति इति णः युक् टाप् च) इस १ स्त्री० शब्द के शोभा, प्रतिबिम्ब (प्रतिच्छाया), सूर्य की पत्नी, छाँह ४ अर्थ हैं ॥ १५७ ॥

२कक्ष्या (कक्षे भवा इति यत् टाप् च) इस १ स्त्री० शब्द के राजभवन की ड्योढ़ी, काञ्ची (नारियों की करधनी, कमर का आभूषण), गजों का हौदा (नांद), गद्दा आदि कसने की डोरी ४ अर्थ हैं ।

३कृत्या (करणम् इति क्यप् तुक् टाप् च) इस १ स्त्री० शब्द के देवविशेष (मारी संज्ञक), क्रिया २ अर्थ हैं और त्रि० कृत्या शब्द के आदि से दुश्मन को फोड़ने वाला पुरुष आदि १ अर्थ हैं ॥ १५८ ॥

४जन्यः (जनानां वादः इति यत्, जायते जनयति वा ण्यत् वृद्ध्यभावश्च) इस १ पुं० न० शब्द के उत्पात, लोकापवाद, रण (युद्ध) ३ अर्थ हैं ।

५जघन्यः (जघने भवः इति यत्) इस १ त्रि० शब्द के नीच, निन्दित, अन्त, शिश्न (लिङ्ग) ४ अर्थ हैं ।

६वक्तव्यः (वचनार्हः इति तव्यः) इस १ त्रि० शब्द के कुत्सित (निन्दित), हीन, कहने योग्य ३ अर्थ हैं ।

७कल्यः (कलासु साधुः इति यत्) इस १ त्रि० शब्द के तैयार, सजा हुआ (उपाययुक्त), रोग रहित ३ अर्थ हैं ।

८अर्थ्यः (अर्थे साधुः इति यत्) इस १ पुं० शब्द के ज्ञानी (बुद्धिमान् धार्मिक), अर्थ से युक्त, न्याय से युक्त ३ अर्थ हैं ॥ १५६ ॥

९पुण्यम् (पुनाति इति यण् णुग् ह्रस्वश्च) इस १ त्रि० शब्द के शुद्ध (पवित्र), सुन्दर (मनोहर) २ अर्थ हैं और न० पुण्य शब्द के धर्म, सुकृति २ अर्थ हैं ।

---

१. छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः इति मेदिनी । २. कक्ष्या बृहतिकायां स्यात् काञ्च्यां मध्येभबन्धने । हर्म्यादीनां प्रकोष्ठे च । इति मेदिनी । ३. कृत्यो विद्विषि कार्ये च कृत्या क्रियादिवौकसोः । इति रभसः । ४. जन्यामातृवयस्या स्याज्जन्या जनीवरप्रिया । जननी जनयित्रोश्च जन्यं निर्वाद-युद्धयोः ॥ इति धरणिः । ५, जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत् इति विश्वः । ६. वक्तव्यं कुत्सिते हीने वचनार्हे च वाच्यवत् । इति मेदिनी । ७. कल्यं प्रभाते क्लीबं स्यात् कल्यो वाक्श्रुतिवर्जिते । सज्जनीरोगदक्षेषु कल्याणवचनेऽपि च । उपायवचनेऽपि स्यात् (त्रिषु मेये तु योषिति) । इति मेदिनी । ८. अर्थ्यो विज्ञार्थशालिनोः । इत्यजयः । अर्थ्यं शिलाजतुन्यर्थ्यो बुधे न्याय्ये च वाच्यवत् । इति मेदिनी । ९, पुण्यस्त्रिषु मनोज्ञे स्यात्क्लीवं सुकृतधर्मयोः । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूप्यं प्रशस्तरूपेऽपि वदान्यो वल्गुवागपि ॥ १६० ॥
न्याय्येऽपि मध्यं, सौम्यं तु सुन्दरे सोमदैवते ।
निवहावसरौ वारौ, संस्तरौ प्रस्तराध्वरौ ॥ १६१ ॥
गुरू गीष्पति-पित्राद्यौ, द्वापरौ युग-संशयौ ।
प्रकारो भेदसादृश्ये, आकाराविङ्गिताऽऽकृती ॥ १६२ ॥

---

[1]रूप्यम् (आहतं प्रशस्तं वा रूपमस्यास्ति इति यप्) इस १ त्रि० शब्द का मनोहर रूप वाला १ अर्थ है और न० रूप्य शब्द के सुवर्ण का सिक्का, (गिन्नी आदि), चाँदी का सिक्का (रुपया अठन्नी आदि) २ अर्थ हैं ।

[2]वदान्यः (वदेति इति आन्यः) इस १ त्रि० शब्द के मीठा (मधुर) बोलने वाला, अधिक दान देने वाला अर्थ हैं ॥ १६० ॥

[3]मध्यम् (मां ध्यायति इति कः) इस १ त्रि० शब्द के कमर (कटि), अधम, न्याय से युक्त, बीच अर्थ हैं ।

[4]सौम्यम् (सोमो देवताऽस्य इति ट्यण्) इस १ त्रि० शब्द के उग्रतारहित, सोम देववाला हविष्य, सुन्दर अर्थ हैं और पुं० सौम्य शब्द का बुध नाम का ग्रह अर्थ है ॥ इति यान्ताः ॥

[5]वारः (वारयति व्रियते वा अच् घञ् वा) इस १ पुं० शब्द के अवसर, सोमवार मङ्गलवार आदि सात दिन, और समूह अर्थ हैं ।

[6]संस्तरः (संस्तीर्यते इति अप्) इस १ पुं० शब्द के शय्या या दर्भ (कुश) आदि की कट (चटाई), यज्ञ अर्थ हैं ॥ १६१ ॥

[7]गुरुः (गृणाति इति उः) इस १ पुं० शब्द के बृहस्पति, पिता जननी आदि श्रेष्ठजन, शिक्षा देने वाला, अर्थ हैं ।

द्वापरः (द्वाभ्यां परः, द्वौ परावत्र वा 'पृषोदरादिः') इस १ पुं० शब्द के संशय (सन्देह), द्वापर युग अर्थ हैं ।

[8]प्रकारः (प्रकरणम् इति घञ्) इस १ पुं० शब्द के तरह (भेद), बराबरी (सादृश्य) अर्थ हैं ।

आकारः (आकरणम् इति घञ्) इस १ पुं० शब्द के आकृति (डीलडौल), चेष्टा अर्थ हैं ॥१६२॥

---

१. रूप्यः स्यात्सुन्दरे त्रिषु । आयतस्वर्णरजते रजते च नपुंसकम् । २. वदान्यो दातृवाग्मिनोः । इत्यजयः । ३. न्याय्यावलग्नयोर्मध्यमन्तरे चाधमे त्रिषु । इति रभसः । ४. सौम्यो बुधे मनोज्ञे स्यादनुग्रे सोमदैवते (इल्वलासु च सौम्याः स्युः !—) इति विश्वः । ५. वारः सूर्यादिदिवसे वारोऽवसरवृन्दयोः । कुब्जवृक्षे हरे द्वारे वारं मद्यस्य भाजने ॥ इति विश्वः । ६. संस्तरप्रस्तरावेतौ प्रस्तराध्वरयोरपि । मणिपाषाणयोश्चापि (यथाक्रममुदीरितौ) ॥ इति विश्वः । ७. गुरुस्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि ॥ इति मेदिनी । ८. प्रकारस्तुल्यभेदयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किशारू सस्यशूकेषु, मरू धन्वधरामरौ ।
अद्रयो द्रुम-शैलाऽर्काः, स्त्रीस्तनाऽब्दौ पयोधरौ ॥ १६३ ॥
ध्वान्ताऽरि-दानवा वृत्रा, बलिहस्तांशवः कराः ।
प्रदरा भङ्ग-नारीरुग्बाणा, अस्राः कचा अपि ॥ १६४ ॥
अजातश्रृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूवरौ ।
स्वर्णेऽपि राः, परिकरः पर्यङ्क-परिवारयोः ॥ १६५ ॥

---

¹किशारुः (किंचित् कुत्सितं वा शृणाति इति उण्) इस १ पुं० शब्द के यवधान आदि का टूँड़, शर (वाण) आदि अर्थ हैं ।

²मरुः (म्रियन्तेऽत्र जन्तवः इति उः) इस १ पुं० शब्द के पर्वत (पहाड़), धनुष अर्थ हैं ।

अद्रिः (अत्ति अद्यते वेति क्रिन्) इस १ पुं० शब्द के वृक्ष (पेड़) पर्वत रवि (सूर्य) अर्थ हैं ।

³पयोधरः (धरति इति अच्, पयसः धरः) इस १ पुं० शब्द के नारी कुच (स्तन), बादल, कोषकार, नारियल, कशेरु, अर्थ हैं ॥ १६३ ॥

⁴वृत्रः (वृणोति इति बाहुलकात् कः) इस १ पुं० शब्द के तम (अन्धकार) दुश्मन (शत्रु) वृत्रासुर, गिरि-भेद आदि अर्थ हैं ।

⁵करः (कीर्यते इति अप्) इस १ पुं० शब्द के हाथ, रश्मि (किरण) मालगुजारी (टैक्स, कर) हाथी का सूँड, अर्थ हैं ।

⁶प्रदरः (प्रदीर्यते प्रदरणम् अनेन वेति अप्) इस १ पुं० शब्द के विकार (भङ्ग), शर (वाण), नारी का रोग-विशेष अर्थ हैं ।

⁷अस्रः (अस्यन्ते इति बाहुलकात् रः) इस १ पुं० शब्द के कोण, केश (बाल) अर्थ हैं और न० अस्र शब्द के अश्रु (आँसू), रक्त (खून) अर्थ हैं । १६४ ॥

⁸तूवरः (तौति इति बाहुलकात् वरः दीर्घश्च) इस १ पुं० शब्द के सींग जमने के समय आनेपर भी सींग से रहित गौ, अवस्था (समय) होनेपर भी दाढ़ी मूँछ से रहित पुरुष, कसाव रस आदि अर्थ हैं ।

⁹राः (राति सुखम् रायते वा डैः आत्वञ्च) इस १ पुं० शब्द के धन, सुवर्ण (सोना) अर्थ हैं ।

¹⁰परिकरः (परिकीर्यते इति अप्) इस १ पुं० शब्द के परिवार (कुटुम्ब), सचिव (मन्त्री) आदि परिजन समूह, आरम्भ, विवेक, पर्यङ्क, यन्त्र अर्थ हैं ॥ १६५ ॥

---

१. किशारुर्ना शस्यशूके विशिखे कङ्कपत्रिणि । इति मेदिनी । २. मरुर्ना गिरिधन्वनोः । इति मेदिनी । ३. पयोधरः कोषकारे नारिकेले स्तनेऽपि च । कशेरुमेघयोः पुंसि । इति मेदिनी । ४. वृत्रो रिपौ घने ध्वान्ते शैलभेदे च दानवे । इति मेदिनी । ५. करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः । इति मेदिनी । ६. प्रदरो रोगभेदे स्याद्विकारे शरभङ्गयोः । इति मेदिनी । ७. अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते । इति मेदिनी । ८. तूवरोऽश्मश्रुपुरुषे प्रौढाश्रृङ्गगवेऽपि च । पुरुषे व्यञ्जनत्यक्ते स्यात्कषायरसेऽपि च ॥ इति मेदिनी । ९. राः पुंसि स्वर्णवित्तयोः । इति मेदिनी । १०. भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः । प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि । इति विश्वः । पत्न्यारम्भौ परिकरौ । इति त्रिकाण्डशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्ता-शुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु।
कर्बुरे, ऽथ प्रतिज्ञाऽऽजि-संविदापत्सु सङ्गरः ॥ १६६ ॥
वेदभेदे गुप्तवादे मन्त्रो, मित्रो रवावपि।
मखेषु यूपखण्डेऽपि स्वरुर्गुह्येऽप्यवस्करः ॥ १६७ ॥
आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते।
अभिहारोऽभियोगे च चौर्ये सन्नहनेऽपि च ॥ १६८ ॥

[1]तारः (तार्यते अनेन वा घञ् घः वा) इस १ पुं० शब्द के निर्मल (स्वच्छ) मोती, तैरना. सुक्ता शुद्धि, कपि (वानर) भेद, आदि अर्थ हैं और न० स्त्री० तार शब्द के आंख की पुतली, तारागण, अर्थ हैं और स्त्री० तारा शब्द के बुद्धदेवी वालो की पत्नी, बृहस्पति की स्त्री अर्थ हैं और त्रि० तार शब्द का दीर्घस्वर वाला शब्द (ऊँचा शब्द) अर्थ हैं।

[2]शारः (शृणाति इति घञ्) इस पुं० शब्द का पवन (वायु, हवा) अर्थ हैं। और त्रि० शार शब्द का चित्र विचित्र (चितकबरा) अर्थ हैं।

[3]संगरः (संगरणम् संगीर्यते वा अप् घो वा) इस १ पुं० शब्द के रण (युद्ध, लड़ाई), प्रतिज्ञा (प्रण), विपत्ति (आपत्ति), जहर (विष) अर्थ हैं। और न० संगरम् शब्द का शमीफल अर्थ है ॥ १६६ ॥

[4]मन्त्रः (मन्त्र्यते मन्त्रणं वेति घञ्) इस १ पुं० शब्द के सलाह (राय-बात), वेद-भेद (मन्त्र) अर्थ हैं।

[5]मित्रः (मेद्यति इति क्तः) इस १ पुं० शब्द का भास्कर (सूर्य, रवि) अर्थ है और न० मित्रम् शब्द का साथी (दोस्त) अर्थ है।

[6]स्वरुः (स्वरति स्वर्यते वेति उः) इस १ पुं० शब्द के यज्ञ-स्तम्भ छीलते समय प्रथम बार गिरा हुआ काष्ठ खण्ड, (इन्द्र का) वज्र, अर्थ हैं।

[7]अवस्करः (अवोऽधः कीर्यते अप् 'कस्कादिः') इस १ पुं० शब्द के लिङ्ग-योनि (उपस्थ), विष्ठा (मैला) अर्थ हैं ॥ १६७ ॥

[8]आडम्बरः (आडम्ब्यते इति घञ्, आडम्बयति इति बाहुलकादरन्) इस १ पुं० शब्द के गजों (हाथियों) की गर्जना, बाजा का शब्द समारम्भ (आडम्बर) आदि अर्थ हैं।

अभिहारः (अभिहरणम् इति घञ्) इस १ पुं० शब्द के चोरी, अभियोग, कवच आदि धारण करना अर्थ हैं ॥ १६८ ॥

१. तारो मुक्तादिसंशुद्धो तरणे शुद्धमौक्तिके। तारं च रजतेऽत्युच्चस्वरेऽप्यन्यवदीरितम् ॥ ऋक्षाक्षिमध्ययोस्तारासुग्रीवगुरुयोषितोः। बुद्धदेव्यां मता तारा। इति विश्वः। २. शारः स्याच्छबले वाच्यलिङ्गः पुंसि समीरणे। इति मेदिनी। ३. संगरो युधि चापदि। क्रियाकारे विषे चाङ्गीकारे क्लीबं शमीफले। इति मेदिनी। ४. मन्त्रो वेदविशेषे स्याद्देवादीनां च साधने। गुह्यवादेऽपि च पुमान्। इति मेदिनी। ५. मित्रं सुहृदि न द्वयोः। सूर्ये पुंसि। इति मेदिनी। ६. स्वरुः पुमान् यूपखण्डे भिदुरेऽप्यध्वरे शरे। इति मेदिनी। ७. अवस्करोऽपि वर्चस्के गुह्ये। इति मेदिनी। ८. आडम्बरः समारम्भे गजगर्जिततूर्ययोः। इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याज्जङ्गमे परीवारः खड्गकोषे परिच्छदे ।
विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासने ॥ १६९ ॥

द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्य्यप्यनन्तरे ।
विपुले नकुले विष्णौ बभ्रुर्ना पिङ्गले त्रिषु ॥ १७० ॥
सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु ।
दुरोदरो द्यूतकाये पणे द्यूते दुरोदरम् ॥ १७१ ॥
महारण्ये दुर्गपथे कान्तारं पुन्नपुंसकम् ।
मत्सरोऽन्यशुभद्वेषे तद्वत् कृपणयोस्त्रिपु ॥ १७२ ॥

---

[1]परिवारः (परिवार्यतेऽनेन परिवारणं वा घञ् उपसर्गस्य दीर्घश्च), इस १ पुं० शब्द के कुटुम्ब (परिजन), उपकरण (सहायक सामान), खड्ग की म्यान आदि अर्थ हैं ।

विष्टरः (विस्तीर्यते इति 'वृक्षासनयोर्विष्टरः' इति निपातनात् साधुः) इस १ पुं० शब्द के वृक्ष, कुश से भरी मुट्ठी, पारा (पीढ़ा), मृगचर्म आदि आसन अर्थ हैं ॥ १६९ ॥

[2]प्रतीहारः (प्रतिह्रियतेऽनेन [illegible] दीर्घश्चोपसर्गस्य) इस १ पुं० शब्दके द्वारपाल, द्वार अर्थ हैं और स्त्री० प्रतीहारी शब्द का द्वारपालिका अर्थ है ।

[3]बभ्रुः (बिभर्ति भरति [illegible]) इस १ पुं० शब्द के नकुल (नेवला, नेउर), मुनि (ऋषि), बड़ा, विष्णु अर्थ हैं और त्रि० [illegible] (पिङ्गल वर्ण), शूली, आग अर्थ हैं ॥ १७० ॥

[4]सारः (सरति इति घञ्) इस १ पुं [illegible] ताकत (बल), सारिण लकड़ी, अर्थ हैं । और न० सारम् शब्द का न्याय पूर्ण अर्थ हैं और त्रि० सार शब्द का श्रेष्ठ (उत्तम) अर्थ है ।

[5]दुरोदरः (दुष्टमासमन्तादुदरमस्य) इस १ पुं० शब्द के जुआ खेलाने वाला (द्यूतकार), दाव अर्थ हैं । और न० दुरोदरम् शब्द का द्यूत (जुआ) अर्थ हैं ॥ १७१ ॥

[6]कान्तारः (कान्ता अरा अस्य, कान्तं मनोज्ञमृच्छति इयर्ति वा अण्) इस १ पुं० शब्द के बड़ा वन (जंगल), दुर्गम (कठिन) मार्ग, बिल अर्थ हैं ।

[7]मत्सरः (माद्यति परकृच्छ्र इति सरः) इस १ पुं० शब्द का द्वेष करना (देखकर जलना) अर्थ है और त्रि० मत्सर शब्द के दूसरे के शुभ कर्मों से द्वेष करने वाला, सूम (कृपण) अर्थ हैं ॥ १७२ ॥

---

१. परीवारः परिजने खड्गकोशे परिच्छदे । इति मेदिनी । २. प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति । इति मेदिनी । ३. बभ्रुर्ना नकुले विष्णौ विपुले पिङ्गले त्रिषु । इति बलशर्मा । बभ्रुर्विशाले नकुले कृशानावजे मुनौ शूलिनि पिङ्गले च । इति विश्वः । ४. सारो बले स्थिरांशे च मज्जि पुंसि जले धने । न्याय्ये क्लीबं त्रिषु वरे । इति मेदिनी । ५. दुरोदरो द्यूतकारे द्यूताक्षपणयोः पुमान् । इति मेदिनी । ६. कान्तारोऽस्त्री महारण्ये बिले दुर्गमवर्त्मनि । पुंसि स्यादिक्षुभेदे । इति मेदिनी । ७. मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान् । असह्यपरसम्पत्तौ कृपणे चाभिधेयवत् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये।
वंशांकुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥ १७३ ॥
ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम्।
यमाऽनिलेन्द्र-चन्द्राऽर्कविष्णु-सिंहांशुवाजिषु ॥ १७४ ॥
शुकाऽहि-कपि-भेकेषु हरिर्ना कपिले त्रिषु।
शर्करा कर्परांशेऽपि, यात्रा स्याद्यापने गतौ ॥ १७५ ॥
इरा भू-वाक-सुराऽप्सु स्यात्, तन्द्रा निद्रा-प्रमीलयोः।

---

[1]वरः (व्रियते वरणं वा अप्) इस १ पुं० शब्द के उपलब्ध अभीष्ट फल (वरदान), दामाद, विट अर्थ हैं और त्रि० वर शब्द का श्रेष्ठ अर्थ है और न० वर शब्द का थोड़ा प्रिय अर्थ है।

[2]करीरः (कृणाति किरति वेति ईरन्) इस १ पुं० न० शब्द का अंकुर अर्थ है और पुं० करीर शब्द के करीर नामक वृक्ष, घड़ा अर्थ हैं ॥ १७३ ॥

[3]प्रतिसरः (प्रतिसरति इति अच्) इस १ पुं० शब्द के मन्त्रभेद, कङ्कण, सेना का अन्तिम भाग, माला अर्थ हैं। और पुं० न० प्रतिसर शब्द के विवाहकालिक कंकण या राखी, मण्डल अर्थ हैं और त्रि० प्रतिसर शब्द का भृत्यादि (नियोज्य) अर्थ हैं।

[4]हरिः (हरति इति इः) इस १ पुं० शब्द के चन्द्रमा, [illegible], पवन (हवा), विष्णु, यमराज, सिंह, साँप, किरण बन्दर, अश्व ([illegible]), मेंढक, [illegible] और त्रि० हरि शब्द के कपिल वर्ण हरा रंग अर्थ हैं ॥ १७४ ॥

[5]शर्करा (शृणाति शीर्यते वा करन्) इस १ [illegible] कङ्कण या तिनका, चीनी (शक्कर), टुकड़ा, रोगविशेष अर्थ हैं।

[6]यात्रा (यानम् अनेन वा त्रन् टाप् च) इस १ स्त्री० शब्द के समययापन करना (विताना) चलना, देवदर्शन आदि करना अथ हैं ॥ १७५ ॥

इरा (एति ईर्यते वा 'ऋज्रेन्द्राग्र' इति निपातनात् साधुः) यह १ स्त्री० शब्द भूमि, वचन, शराब, पानी (जल) आदि अर्थ का वाचक है।

तन्द्रा (तत् राति इति कः टाप् च, तद् द्राति वा 'निद्रातन्द्रा' इति तदो नान्तत्वं निपात्यते) यह १ स्त्री० शब्द निद्रा (नींद) परिश्रम करने से इन्द्रियों का अपने २ कार्य में शिथिल होना, आदि अर्थ का वाचक है।

---

१. वरो जामातरि वृत्तो देवतादेरभीप्सिते। पिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम्। वरो प्रोक्ता शतावर्या वरा च स्यात्फलत्रिके। मनागिष्टे वरं क्लीवं केचिदाहुस्तदव्ययम् ॥ इति मेदिनी। २. वंशाङ्कुरे करीरोऽस्त्री वृक्षभिदघटयोः पुमान्। करीरा चीरिकायां च दन्तमूले च दन्तिनाम ॥ इति मेदिनी। ३. भवेत्प्रतिसरो मन्त्रभेदे माल्ये च कंकणे। व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डले। आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः। इति मेदिनी। ४. हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु। सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च। हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोः। इति विश्वः। ५. शर्करा खण्डविकृतावुपलाकर्परांशयोः। शर्करान्विते देशेऽपि रुग्भेदे शकलेऽपि च ॥ इति मेदिनी। ६. यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे। इति विश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपि ॥ १७६ ॥
क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
त्रिषु क्रूरेऽधमेऽल्पेऽपि क्षुद्रं, मात्रा परिच्छदे ॥ १७७ ॥
अल्पे च परिमाणे सा मात्रं कार्त्स्न्येऽवधारणे ।
आलेख्याऽऽश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः ॥ १७८ ॥
योग्य-भाजनयोः पात्रं, पत्रं वाहन-पक्षयोः ।

---

[१]धात्री (धीयते इति ष्ट्रन् ङीष् च) यह १ स्त्री० शब्द भूमि (पृथ्वी) माता, धाई, आँवला, आदि अर्थ का वाचक है ॥ १७६ ॥

[२]क्षुद्रा (क्षुणत्ति क्षुद्यते वेति रक् टाप् च) इस १ स्त्री० शब्द के किसी अङ्ग से रहित नारी, वेश्या, भटकटैया, नटी, मधुमक्खी, आदि अर्थ वाच्य है और त्रि० क्षुद्र शब्द के धनहीन (निर्धन गरीब), नीच, क्रूर आदि अर्थ वाच्य है ।

[३] मात्रा (मीयते अनया वा, माति मिमीते वेति त्रन् टाप् च) यह १ स्त्री० शब्द सामग्री, अल्प (थोड़ा), वर्ण (जैसे इकार एकार आदि), अवयव, परिमाण, कर्णाभूषणविशेष, आदि अर्थ का वाचक है ॥ १७७ ॥

[४]चित्रम् (चिनोति चीयते वेति क्रः) यह १ न० शब्द तस्वीर (शकल, फोटो) चित्रविचित्र रंग (चितकवरा) आश्चर्य आदि अर्थ का वाचक है ।

[५]कलत्रम् (गडति गड्यते वेति अत्रन् आदेश्च कः, डलयोरेकत्वम्) यह १ न० शब्द नारी (स्त्री), कटि (कमर), आदि अर्थ का वाचक है ॥ १७८ ॥

[६]पात्रम् (पाति पायते वा, पीयतेऽनेनेति वा ष्ट्रन्) यह १ न० शब्द श्रेष्ठ (योग्य) वर्तन, दो किनारों का मध्य (बीच), राजसचिव (मन्त्री), नाटक करने वाला, स्रुवा-चरु आदि, पर्ण (पत्ता), आदि अर्थ का वाचक है ।

[७]पत्रम् (पतन्त्यनेनेति ष्ट्रन्) इस १ न० शब्द के अश्व गज आदि वाहन, पत्ता, पक्षी, वाण (शर) आदि अर्थ वाच्य है ।

---

१. धात्री जनन्यामलकीवसुमत्युपमातृषु । इति मेदिनी । २. क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् । क्षुद्रा व्यङ्गा नटी कण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपि । इति विश्वः । ३. मात्रा कर्णविभूषायां वित्ते माने परिच्छदे । अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे । ।इति मेदिनी । ४. चित्राखुपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम् । तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि । तद्युक्तयोर्वाच्यलिङ्गं चित्री झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखा लिखनभेदयोः ॥ इति मेदिनी । ५. दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः । इति रभसः । ६. पात्रं तु भाजने योग्ये पात्रं तीरद्वयान्तरे । पात्रं स्रुवादौ पर्णे च राजमन्त्रिणि चेष्यते । इति विश्वः । ७. पत्रं तु वाहने पर्णे पक्षे च शरपक्षिणोः । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निदेश-ग्रन्थयोः शास्त्रं, शस्त्रमायुधलोहयोः ॥ १७९ ॥
स्याज्जटांशुकयोर्नेत्रं क्षेत्रं पत्नी-शरीरयोः ।
मुखाग्रे क्रोड-हलयोः पोत्रं, गोत्रं तु नाम्नि च ॥ १८० ॥
सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।
अजिरं विषये काये, ऽप्यम्बरं व्योम्नि वाससि ॥ १८१ ॥

शास्त्रम् (शासनम् इति ष्ट्रन्) यह १ न० शब्द न्याय व्याकरण आदि शास्त्र, आज्ञा (आदेश) आदि अर्थ का वाचक है।

१शस्त्रम् (शस्यतेऽनेनेति ष्ट्रन्) यह १ न० शब्द अस्त्र (हथियार), लोहा, आदि अर्थ का वाचक है ॥ १७९ ॥

२नेत्रम् (नयति नीयते अनेन वेति ष्ट्रन्) यह १ न० शब्द वृक्ष की जड़, मथनी (छोंढ़ी) की डोरी (रस्सी), वस्त्र (कपड़ा), आँख, आदि अर्थ का वाचक है।

३क्षेत्रम् (क्षयति क्षीयते अनेन वेति ष्ट्रन्) यह १ न० शब्द नारी, खेत, शरीर, सिद्ध महर्षियों का स्थान, आदि अर्थ का वाचक है।

४पोत्रम् (पूयतेऽनेनेति ष्ट्रन्) इस १ न० शब्द के सूकर (सुअर) का मुख, हल का अगला भाग, कपड़ा (वस्त्र) आदि अर्थ वाच्य हैं।

५गोत्रम् (गूयतेऽनेनेति ष्ट्रन्) यह १ न० शब्द वंश खानदान (गोत्र), नाम, वन (जङ्गल), मार्ग (रास्ता), सम्भावना के योग्य बोध, क्षेत्र आदि अर्थ का वाचक है ॥ १८० ॥

६सत्रम् (सीदन्त्यत्र अनेन वेति ष्ट्रन्) यह १ न० शब्द ढाँकना (आच्छादन, तोपना) हमेशा दान करना, वन (जङ्गल), यज्ञ, दम्भ, आदि अर्थ का वाचक है।

७अजिरम् (अजन्त्यत्र अनेन वेति 'अजिर शिशिर' इति निपातनात् साधुः) यह १ न० शब्द रूप रस गन्ध आदि विषय, प्राङ्गण (आँगन), शरीर, वायु (हवा), मेघा (मेंढक) आदि अर्थ का वाचक है।

८अम्बरम् (अम्बते अम्ब्यते वेति बाहुलकादरः) यह १ न० शब्द वस्त्र (कपड़ा), आकाश, कपास आदि अर्थ का वाचक है ॥ १८१ ॥

---

१. शस्त्रं लोहास्त्रयोः क्लीवं छुरिकायां तु योषिति । इति मेदिनी । २. नेत्रं मथिगुणे वस्त्रे तरुमूले विलोचने । नेत्रं रथे च नाड्यां च नेत्रो नेतरि मेघवत् ॥ इति विश्वः । नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां च नेत्री नाड्यां च योषिति ॥ इति मेदिनी । ३. क्षेत्रं शरीरे केदारे सिद्धस्थान-कलत्रयोः । इति मेदिनी । ४. पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च । इति विश्वः । ५. गोत्राभू-गव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः । संभावनीयबोधे च काननक्षेत्रवर्त्मसु । इति मेदिनी । ६. सत्रं यज्ञे सदा दानच्छादनारण्यकैतवे । इति मेदिनी । ७. अजिरं प्राङ्गणे वाते विषये दर्दुरे तनौ । (स्त्री चण्ड्याम्) इति मेदिनी । ८. अम्बरं वाससि व्योम्नि कार्पासे च सुगन्धके । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्रं राष्ट्रे, ऽप्यक्षरं तु मोक्षेऽपि, क्षीरमप्सु च।
स्वर्णेऽपि भूरि-चन्द्रौ द्वौ, द्वारमात्रेऽपि गोपुरम् ॥ १८२ ॥
गुहादम्भौ गह्वरे द्वे, रहोऽन्तिकमुपह्वरे।
पुरोऽधिकमुपर्यग्राण्य, -गारे नगरे पुरम् ॥ १८३ ॥

---

[१]चक्रम् (क्रीयतेऽनेनेति घञर्थे कः द्वित्वं च) इस १ न० शब्द के पहिया, राज्य, अस्त्रविशेष, सेना, कुम्हार का चाक, समूह, जल की भौंरी, आदि अर्थ वाच्य हैं। और पुं० चक्र शब्द का चकोर पक्षी अर्थ है।

[२]अक्षरम् (न क्षरति इति अच्,) यह १ न० शब्द परब्रह्म, क ख च ट त प आदि वर्ण, मोक्ष, धर्म, तप, आकाश मुख्य कारण (हेतु). अपामार्ग (चिचिड़ा), आदि का वाचक हैं।

[३]क्षीरम् (घस्यते इति ईरन् अल्लोपः षत्वञ्च) यह १ न० शब्द जल, दूध आदि अर्थ का वाचक है।

[४]भूरि (भवति भूयते वेति क्रिन् चन्दति इति रक्) यह १ न० शब्द स्वर्ण (सोना) अर्थ का वाचक है। और पुं० भूरि शब्द के शंकर जी, कृष्ण जी, विधाता (ब्रह्म) आदि अर्थ वाच्य हैं। और त्रि० भूरि शब्द का अधिक (ज्यादा काफी), अर्थ वाच्य है। तथा पु० चन्द्र शब्द, स्वर्ण (सोना), शशी (चन्द्रमा) सुन्दर, औषध-विशेष (कबीला) आदि अर्थ का वाचक है।

[५]गोपुरम् (पुरति इति कः, गवां पुरम्) यह १ न० शब्द नगर का द्वार, मोथा, द्वारमात्र, आदि अर्थ का वाचक है ॥ १८२ ॥

[६]गह्वरम् (गाह्यते इति 'छित्वरछत्वर' इति निपातनात् साधुः) यह १ न० शब्द दम्भ, गहन, निकुञ्ज आदि अर्थ का वाचक है।

[७]उपह्वरम् (उपह्वरन्त्यत्र इति घः) यह १ न० शब्द निर्जन (एकान्त), समीप अर्थों का वाचक है।

[८]अग्रम् (अग्यते अगति वेति 'ऋज्रेन्द्राग्र' इति निपातनात् साधुः) यह १ न० शब्द सामने (आगे), ४ भरी का प्रमाण विशेष, आलम्बन, प्रान्त, ऊपर, समूह आदि अर्थों का वाचक है। और त्रि० अग्र शब्द के प्रधान, अधिक, प्रथम (पहला) आदि अर्थ वाच्य हैं।

[९]पुरम् (पिपर्ति इति कः) यह १ न० शब्द, घर, शहर, बड़ा गाँव आदि अर्थों का वाचक है। और पुं० पुर शब्द गुग्गुल अर्थ का वाचक है ॥ १८३ ॥

---

१. चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्तेऽपि। इति मेदिनी। २. मोक्षेऽपवर्गे ओंब्रह्मण्यच्युतेऽक्षरम्। इत्यनेकार्थकोषः। ३. क्षीरं दुग्धे जले। इति मेदिनी। ४. भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि। नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्य-लिङ्गकः। इति मेदिनी। चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णचारुषु। इति मेदिनी। ५. गोपुरं द्वारि पूर्द्वारि-कैवर्तीमुस्तकेऽपि। इति मेदिनी। ६. गह्वरस्तु गुहादम्भनिकुञ्जगहनेष्वपि। इति विश्वः। ७. उपह्वरं समीपे स्यादेकान्ते च नपुंसकम्। इति मेदिनी। ८. अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम्। अधिके च प्रधाने च प्रथमे चाभिधेयवत्। इति मेदिनी। ९. पुरं शरीरमित्याहुर्गृहोपरि गृहे पुरम्। पुरो गुग्गुलुराख्यातो नगरेऽपि पुरं पुरी।। इति धरणिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दिरं च, थ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।
दरोऽस्त्रियां भये श्वभ्रे, वज्रोऽस्त्री हीरके पवौ ॥ १८४ ॥
तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।
औशीरश्चामरे दण्डेऽप्यौशीरं शयनाऽऽसने ॥ १८५ ॥
पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।

---

[1]मन्दिरम् (मन्दतेऽत्र इति किरच्) यह १ न० शब्द गृह (घर) नगर, अर्थ का वाचक है ।

[2]राष्ट्रः (राजति इति ष्ट्रन्) यह १ पुं० न० शब्द उपद्रव और देश अर्थ का वाचक है ।

[3]दरः (दरणम् दीर्यते वेति अप्) यह १ पुं० न० शब्द भय (डर), गढा (गड़हा) आदि अर्थों का वाचक है ।

[4]वज्रः (वजति इति 'ऋज्रेन्द्र' इति निपातनात् साधुः) यह १ पुं० न० शब्द इन्द्र का अस्त्रविशेष (वज्र), हीरा आदि अर्थों का वाचक है ॥ १८४ ॥

[5]तन्त्रम् (तननम् तन्यते अनेन वेति ष्ट्रन्) यह १ न० शब्द सिद्धान्त, सामग्री, प्रधान, जुलाहा (तन्तुवाय), वेदकी एक शाखा, उत्तम औषध, कारण, आदि अर्थों का वाचक है ।

[6]औशीरम् (उश्यते इति ईरन् अण् च) यह १ पुं० न० शब्द चँवर का दण्ड अर्थ का वाचक है और न० औशीर शब्द आसन, शयन, (दोनों का समुदाय) खस (उशीर) से उत्पन्न आदि अर्थ का वाचक है ॥ १८५ ॥

[7]पुष्करम् (पुष्णाति पुष्यते अनेन वेति करन्) यह १ न० शब्द गज-शुण्डा का अग्रभाग, जल, आकाश, बाजा के भाण्ड का मुख, कमल, खड्ग (तलवार) का फल, पुष्कर नामक तीर्थ, पुष्करमूल औषध, आदि अर्थों का वाचक है ॥ १८६ ॥

---

१. मन्दिरं नगरेऽगारे क्लीबं ना मकरालये । इति मेदिनी । २. राष्ट्रं स्यादुपवर्तने । उपद्रवे क्लीबपुंसोः । इति मेदिनी । ३. दरोऽस्त्री साध्वसे गर्ते कन्दरे तु दरी स्मृता । दराऽव्ययं मनागर्थे । इति मेदिनी । ४. वज्रं स्याद्बाधके धात्र्यां क्लीबं योगान्तरे पुमान् । वज्रा स्नुह्यां गुडूच्यां च वज्री स्नुह्यन्तरे स्मृता । दम्भोलौ हीरकेऽप्यस्त्री वज्रं त्रपुवरत्रयोः । इति दन्तोष्ठ्यादौ मेदिनी । ५. तन्त्रं कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे । प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेताबुभयार्थप्रयोजके । इतिकर्तव्यतायां च (तन्त्री वीणा गुणे मता । अमृता देहशिरयोः) इति मेदिनी । ६. औशीरं चामरे दण्डे औशीरं स्नापपीठयोः । इत्यजयः । ७. पुष्करं पङ्कजे व्योम्नि पयःकरिकराग्रयोः । औषधिद्वीपविहगतीर्थरागोरगान्तरे । पुष्करं तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्योम्नि खङ्गफले पद्मे तीर्थौषधिविशेषयोः ॥ १८६ ॥
अन्तरमवकाशाऽवधि-परिधानाऽन्तर्धि-भेद - तादर्थ्ये ।
छिद्राऽऽत्मीय-विना-बहिरवसर-मध्येऽन्तरात्मनि च ॥ १८७ ॥
मुस्तेऽपि पिठरं, राजकशेरुण्यपि नागरम् ।
शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम् ॥ १८८ ॥
गौरोऽरुणे सिते पीते, व्रणकार्यप्यरुष्करः ।
जठरः कठिनेऽपि स्या, दधस्तादपि चाधरः ॥ १८९ ॥

अन्तरम् (अन्तं राति इति कः) यह १ न० शब्द खाली (अवकाश), पहनने का वस्त्र आदि, अवधि (सीमा), छिपना (अन्तर्धान), फरक (भेद), उसके लिए (तादर्थ्य), अपना (आत्मीय), विना, छिद्र, अन्तरात्मा, बाहर, बीच (मध्य). अवसर, सादृश्य, अन्य आदि अर्थों का वाचक है ॥१८७॥

[1]पिठरम् (पेठति पिठ्यते वेति बाहुलकादरः गुणाभावश्च) यह १ न० शब्द मोथा, पतली (स्थाली, बटलोई), मथनी (छोंढ़ी) आदि अर्थों का वाचक है ।

[2]नागरम् (नगरे भवम् इति अण् वृद्धिश्च) यह १ न० शब्द नागरमोथा, सोंठ, आदि अर्थों का वाचक है । और त्रि० नागर शब्द नगरनिवासी या नगर में होनेवाला, कुशल (चतुर), आदि अर्थों का वाचक है ।

शार्वरम् (शर्वर्यां भवम् इति अण्) इस १ न० शब्द का घोर अन्धकार अर्थ है और त्रि० शार्वर शब्द का घातुक अर्थ है और पुं० शार्वर शब्द घातुक हाथी का वाचक है ॥ १८८ ॥

[3]गौरः (गोरति, गवते वा मनोऽत्र इति 'ऋज्रेन्द्र' इति निपातनात् साधुः) यह १ त्रि० शब्द लाल (अरुण) गोरा (सफेद), विशुद्ध, पीला आदि अर्थों का वाचक है और पुं० गौर शब्द पीला सरसों, शशी (चन्द्रमा), आदि अर्थों का वाचक है और पुं० गौर शब्द पद्मकेसर का वाचक है ।

[4]अरुष्करः (अरुः करोति इति टः गुणे रपरत्वे षत्वे च) यह १ पुं० शब्द भेलावा औषधि विशेष १ अर्थ का वाचक है और त्रि० अरुष्कर शब्द घाव करने वाला पदार्थ विशेष १ अर्थ का वाचक है ।

[5]जठरः (जायते अस्मिन् वेति कर्तरि आधारे च अरः नस्य ठत्वे) यह १ त्रि० शब्द कठोर अर्थ का वाचक है । और अपि शब्द से पुं० न० जठर शब्द का उदर (पेट) १ अर्थ है । और पुं० जठर शब्द बूढ़ा १ अर्थ का वाचक है ।

[6]अधरः (न धरति इति अचि गुणे च, धरादुच्चात्कठिनादन्यो वा) यह १ त्रि० शब्द हीन-नीच अर्थ का वाचक है । और पुं० अधर शब्द ओठ १ अर्थ का वाचक है ॥ १८९ ॥

---

१. पिठरः स्थाल्यां ना क्लीबं मुस्तामन्थानदण्डयोः । मेदिनी । २. नागरं मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे । इति मेदिनी । ३. गौरः पीतेऽरुणे श्वेते विशुद्धे चाभिधेयवत् । ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे ॥ (गौरी त्वसंजातरजःकन्याशंकरभार्ययोः । रोचनी रजनी पिङ्गा प्रियङ्गुवसुधासु च । आपगाया विशेषे च यादसांपतियोषिति) इति मेदिनी ।-४. अरुष्करो व्रणकृति त्रिषु भल्लातके पुमान् । इति मेदिनी । ५. जठरो न स्त्रियां कुक्षौ वद्धकक्खटयोस्त्रिषु । इति मेदिनी । ६. अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वेऽपि वाच्यवत् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनाकुलेऽपि चैकाग्रो व्यग्रो व्यासक्त आकुले ।
उपर्युदीच्य-श्रेष्ठेष्वप्युत्तरः स्या, दनुत्तरः ॥ १९० ॥
एषां विपर्यये श्रेष्ठे, दूरानात्मोत्तमाः परः ।
स्वादु-प्रियौ तु मधुरौ, क्रूरौ कठिन-निर्दयौ ॥ १९१ ॥

---

[1]एकाग्रः (एकमेकत्र वाग्रमस्य) यह १ त्रि० शब्द स्वस्थ या सावधान, निर्जन (एकान्त) २ अर्थ का वाचक है । अनाकुले = अव्यग्रे अपिशब्दात् एकविषयासक्तचित्ते इति सम्बन्धः ।

व्यग्रः (विविधं विविधे वाऽग्रमस्य, विरुद्धमङ्गति 'ऋज्रेन्द्र' इति निपातनात् साधुः) यह १ त्रि० शब्द चञ्चल (अनेक काम में फँसा हुआ), व्याकुल, आदि अर्थों का वाचक है! व्यासक्ते = व्याकुले कार्यसंलग्ने वा व्यग्रः इति सम्बन्धः ।

[2]उत्तरः (उत्तरति इति उत्पूर्वकात् तरतेः कर्तरि अच्) यह १ त्रि० शब्द का उत्तर दिशा, ऊपर, श्रेष्ठ आदि ३ अर्थों का वाचक है । और न० उत्तर शब्द का प्रत्युत्तर (जवाब) १ अर्थ है । और पुं० उत्तर शब्द विराट् नृप का सुत (पुत्र) १ अर्थ का वाचक है । और स्त्री० उत्तरा शब्द अर्जुन के पुत्र अभिमन्यु की पत्नी, उत्तर दिशा २ अर्थों का वाचक है ।

अनुत्तरः (उत्तरस्याभावः उत्तरस्य विरुद्धो वा) यह १ त्रि० शब्द उत्तर से भिन्न दिशा, श्रेष्ठ, नीच, आदि ३ अर्थों का वाचक है । और न० अनुत्तर शब्द का उत्तररहित (निरुत्तर) १ अर्थ है । विपर्यये विरुद्धे श्रेष्ठे उत्तमे चेति सम्बन्धः ।

[3]परः (पिपर्ति पूर्यते अनेन वेति अच् अप् घो वा) यह १ त्रि० शब्द दुश्मन (शत्रु), श्रेष्ठ (उत्तम), दूर, अपर (अपने से भिन्न) इन ४ अर्थों का वाचक है । दूरं = विप्रकृष्टम्, अनात्मा = देहादिः उत्तमश्चैते पराः स्युरिति सम्बन्धः ।

[4]मधुरः (मधु माधुर्यं राति अस्त्यत्र वेति कः आलोपे च, ऊषसुषीति रो वा) यह १ त्रि० शब्द स्वादिष्ट, प्रिय, इन २ अर्थों का वाचक है और पुं० मधुर शब्द मीठा इस १ अर्थ का वाचक है और स्त्री० मधुरा शब्द सौंफ इस १ अर्थ का वाचक है । स्वादुप्रियौ मधुरौ स्यातामिति सम्बन्धः ।

[5]क्रूरः (कृन्तति इति रक् धातोश्च क्रू आदेशः) यह १ त्रि० शब्द घोर, कठिन, दयारहित (निर्दय), इन ३ अर्थों का वाचक है ॥ १९१ ॥

---

१. एकाग्रमन्यलिङ्गं स्यादेकतानेऽप्यनाकुले । इति मेदिनी । २. उत्तरं प्रतिवाक्ये स्यादूर्ध्वोदीच्योत्तमेऽन्यवत् । उत्तरस्तु विराटस्य तनये दिशि चोत्तरा । इति विश्वः । ३. परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले । इति मेदिनी । ४. मधुरौ स्वादुशोभनौ । इति व्याडिः । मधुरस्तु रसे विषे । मधुरं रसवत्स्वादु प्रियेषु मधुरोऽन्यवत् । इति विश्वः । ५. क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत् । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदारो दातृमहतो-रितरस्त्वन्य-नीचयोः ।
मन्द-स्वच्छन्दयोः स्वैरः, शुभ्रमुद्दीप्त-शुक्लयोः ॥ १९२ ॥
चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।
द्रुमप्रभेद-मातङ्ग-काण्ड-पुष्पाणि पीलवः ॥ १९३ ॥
कृतान्ताऽनेहसोः काल, श्चतुर्थेऽपि युगे कलिः ।

---

[1]उदारः (उच्चैरासमन्तात् ऋच्छति इति उदाङ्पूर्वकात् ऋच्छतेः कर्तरि अचि गुणे रपरत्वं च) यह १ त्रि० शब्द महान् (बड़ा), देनेवाला (दाता), कुशल (चतुर) इन ३ अर्थों का वाचक है ।

इतरः (इना कामेन तरति इति अच्) यह १ त्रि० शब्द अपर (अन्य, दूसरा), क्रूर (नीच) इन २ अर्थों का वाचक है ।

स्वैरः (स्वेन स्वान्त्र्येण ईर्ते ईरयति वेति अच् वृद्धौ) यह १ त्रि० शब्द स्वतन्त्र (वन्धनमुक्त), मन्द इन २ अर्थों का वाचक है ।

उद्दीप्तः उज्ज्वलितः शुक्लश्च [2]शुभ्रम् (शोभते इति रक् कित्वाद् गुणाभावः) यह १ त्रि० शब्द प्रकाशमान, शुक्ल वर्णवाला इन २ अर्थों का वाचक है । और न० शुभ्र शब्द सफेद रंग इस १ अर्थ का वाचक है ॥ १९२ ॥

॥ इति रान्ताः ॥

[3]मौलिः (मूलस्यादूरे भवः इति घञि वृद्धौ) यह १ पुं० स्त्री० शब्द किरीट (मुकुट), बँधा हुआ बाल (केश), चूड़ा = शिखा इन ३ अर्थों का वाचक है ।

[4]पीलुः (पीलति इति उः) यह १ पुं० शब्द गज (हाथी), शर (बाण), अखरोट का वृक्ष, इन ३ अर्थों का वाचक है और न० पीलु शब्द अखरोट का फल तथा फूल इन २ अर्थों का वाचक है ॥ १९३ ॥

[5]कालः (कालयति इति ण्यन्तः, अच्) यह १ पुं० शब्द समय, कृतान्त (यमराज) काला, मृत्यु इन ४ अर्थों का वाचक है ।

[6]कलिः (कलयति कल्यते वेति इः) यह १ पुं० शब्द युद्ध-झगड़ा, कलियुग, इन २ अर्थों का वाचक है और स्त्री० कलि शब्द पुष्प की कली इस १ अर्थ का वाचक है ।

---

१. उदारो दातृमहतोर्दक्षिणे चाभिधेयवत् । इति मेदिनी । २. शुभ्रं स्यादभ्रके क्लीबमुद्दीप्तशुक्ल-योस्त्रिषु । इति मेदिनी । ३. किरीटे मौलिरक्लीबे चूडासंयतकेशयोः । इति रभसः । मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् । अशोकपादपे पुंसि । इति मेदिनी । ४. पीलुः पुमान् प्रसूने स्यात्परमाणौ मतङ्गजे । अस्थिखण्डे च तालस्य काण्डपादपभेदयोः ॥ इति मेदिनी । ५. कालो मृत्यौ महाकाले समये यमकृष्णयोः । इति मेदिनी । ६. कलिः स्त्री कलिकायां ना शूराजिकलहे युगे । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यात् कुरङ्गेऽपि कमलः प्रावारेऽपि च कम्बलः ॥ १९४ ॥
करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम् ।
स्थौल्य-सामर्थ्य-सैन्येषु बलं ना काक-सीरिणोः ॥ १९५ ॥
वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।
भेद्यलिङ्गः शठे, व्यालः पुंसि श्वापद-सर्पयोः ॥ १९६ ॥

---

[1]कमलः (कामयते काम्यते वेति कलः) यह १ पुं० शब्द कुरङ्ग (मृग विशेष) इस १ अर्थ का वाचक है और न० कमल शब्द कमल पुष्प, आकाश, औषध, ताँवा इन ५ अर्थों का वाचक है।

[2]कम्बलः (काम्यते इति कमेः कलच्चि वुगागमे च) यह १ पुं० शब्द चादर, गज, गाय बैल आदि के गले में लटकती हुई ललरी (सास्ना), कीड़ा, इन ४ अर्थों का वाचक है और न० कम्बल शब्द जल और ऊन का कम्बल, इन २ अर्थों का वाचक है॥ १९४ ॥

[3]बलिः (बलते बल्यते वेति इन्) यह १ पुं० शब्द टैक्स (राजा का कर, मालगुजारी), भेंट (उपहार), बलि नामक राक्षस चँवर दण्ड, इन चार अर्थों का वाचक है और स्त्री० बलि शब्द वृद्धावस्था के कारण चमड़ों का सिकुड़ना, घर में लगी हुई लकड़ी विशेष, उदर के चमड़े की सिकुड़न (पेटी) इन ३ अर्थों का वाचक है।

[4]बलम् (बलते बलति बल्यते वेति अच् घञ् वा वृद्ध्यभावश्च) यह १ न० शब्द स्थूलता (मोटाई) ताकत (सामर्थ्य), रूप, सेना आदि ४ अर्थों का वाचक है और पुं० बल शब्द काक (कौआ) कृष्णाग्रज (बलराम), इन्द्र से मारा हुआ बल नामका निशाचर आदि ३ अर्थों का वाचक है ॥१९५॥

[5]वातूलः (वातानां समूहः इति ऊलः) यह १ पुं० शब्द पवनसमूह (आँधी) इस १ अर्थ का वाचक है और त्रि० वातूल शब्द अधिक बात करने वाला (बातूनी) और वायु को न सहनेवाला अर्थ का वाचक है।

[6]व्यालः (विरुद्धमासमन्तादलति अडति वेति अच्) यह १ त्रि० शब्द शठ (दुष्ट) इस १ अर्थ का वाचक है। और पुं० व्याल शब्द सर्प, बदमाश गज (हाथी), हिंसक जन्तु आदि ३ अर्थों का वाचक है ॥ १९६ ॥

---

१. कमलं सलिले ताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः। इति मेदिनी। २. कम्बलो नागराजे स्यात्सास्नाप्रावारयोरपि। कृमावप्युत्तरासंगे सलिले तु नपुंसकम्॥ इति मेदिनी। ३. बलिर्दैत्य-प्रभेदे च करचामरदण्डयोः। उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि। गृहदारुप्रभेदे च जठरावयवेऽपि च। इति मेदिनी। ४. बलं गन्धे रसे रूपे स्थामनि स्थौल्यसैन्ययोः। बलो हलायुधे दैत्यभेदे बलिनि वायसे॥ इति विश्वः। ५. वातूलो वातुलोऽपि स्यात्। इति द्विरूपकोषात् ह्रस्वमध्योऽपि। ६. व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलोऽस्त्री पाप-विट्-किट्टा, न्यस्त्री शूलं रुगायुधम् ।
शङ्कावपि द्वयोः कीलः पालिः स्त्र्यश्र्यंकपंक्तिषु ॥ १९७ ॥
कला शिल्पे कालभेदेऽप्याली सख्यावली अपि ।
अब्ध्यम्बुविकृतौ वेला काल-मर्यादयोरपि ॥ १९८ ॥

---

[१]मलः (मलयति मलते वेति अच्) यह १ पुं० न० शब्द विष्ठा, मैल, पाप, कृष्ण, आदि ४ अर्थों का वाचक है ।

[२]शूलम् (शूलति इति कः) यह १ न० पुं० शब्द त्रिशूल (अस्त्रविशेष), शूलसंज्ञक रोगविशेष इन २ अर्थों का वाचक है ।

[३]कीलः (कीलति कील्यते अत्र अनेन वेति कः घञ् घो वेति) यह १ पुं० स्त्री० शब्द अग्नि की लपट (ज्वाला), खूँटा या शल्य = कांटा आदि २ अर्थों का वाचक है ।

[४]पालिः (पालयति पाल्यते अत्र अनया वेति इः) यह १ स्त्री० शब्द गोद (कोरा, अङ्क), कतार (पंक्ति), कोना, दाढ़ी मूँछसे युक्त नारी, किनारा (प्रान्त), बड़ाई, पुल, कर्णलता, कल्पित भोजन, प्रस्थ, इन १० अर्थों का वाचक है ॥ १९७ ॥

[५]कला (कलयति कल्यते वेति अच् टाप् च) यह १ स्त्री० शब्द समयविशेष ब्याज (सूद), कारीगरी, सोलहवां भाग, शशिकला, आदि ५ अर्थों का वाचक है ।

[६]आली (आ अलति अल्यते वेति इनि आलिः वा ङीष् च) यह १ स्त्री० शब्द कतार (पंक्ति) सखी इन २ अर्थों का वाचक है ।

[७]वेला (वेलति इति अच् टाप् च) यह १ स्त्री० काल (समय), तीर (तट), चन्द्रोदय होनेपर सागर का बढ़ना, बुध की पत्नी, बिना कष्ट की मृत्यु, आपेशब्द से महाजनों (धनियों) का भोजन, मर्यादा, आदि ७ अर्थों का वाचक है ॥ १९८ ॥

---

१. मलोऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत् । इति मेदिनी । २. शूलोऽस्त्री रोग आयुधे । मृत्युकेतनयोगेषु (शूला स्यात्पण्ययोषिति) इति मेदिनी । ३. कीलः कफोणिकाघाते स्यात्पौ च ज्वलनार्चिषि । इति धरणिः । कीलो लेशे द्वयोः स्तम्भे ज्वालाकफोणिशंकुषु । इति विश्वः (मेदिनी) । कीलोऽग्नितेजसि । कफोणिस्तम्भयोः शङ्कौ कीला रतहतावपि । इति हैमः । ४. पालिः कर्णलतायां स्यात्प्रदेशे पंक्तिचिह्नयोः । इत्यजयः । सश्मश्रुयुवती पालिः प्रस्थः (पङ्क्तिः) कर्णलतापि च । इति त्रिकाण्डशेषः । पालिः कर्णलताग्रेऽस्त्री पङ्क्तावङ्कप्रभेदयोः । छात्राद्यदिदेये स्त्री पाली यूकासश्मश्रुयोषितोः । इति मेदिनी । ५. कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः । इति मेदिनी । तालेषु च गुरुः कला । ६. आलिर्विशदाशये त्रिषु स्त्रियां वयस्यायां सेतौ पङ्क्तौ च कीर्तिता । इति मेदिनी । ७. वेला काले च सीमायामब्धेः कूलविकारयोः । अक्लिष्टमरणे रोगे ईश्वरस्य च भोजने । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ।
लीला विलास-क्रिययो, रुपला शर्कराऽपि च ॥ १९९ ॥
शोणितेऽम्भसि कीलालं, मूलमाद्ये शिफा-भयोः ।
जालं समूह आनाय-गवाक्ष-क्षारकेष्वपि ॥ २०० ॥
शीलं स्वभावे सद्वृत्ते, सस्ये हेतुकृते फलम् ।
छदिर्नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०१ ॥

[1]बहुलाः (बहति इति वाहुलकादुलच् टाप् च) यह १ स्त्री० शब्द कृत्तिका नक्षत्र, गाय, इन २ अर्थों का वाचक है और पुं० बहुल शब्द कृष्णपक्ष आग इन २ अर्थों का वाचक है और त्रि० बहुल शब्द अधिक (बहुत), काला वर्ण इन २ अर्थों का वाचक है ।

[2]लीला (लेलायनम् इति लेला दीप्तौ धातोः अङ् टाप् च पृषोदरादिः) यह १ स्त्री० शब्द शृङ्गार से उत्पन्न किया विशेष, केलि, विलास इन ३ अर्थों का वाचक है ।

[3]उपला (उप लाति इति कः टाप् च) यह १ स्त्री० शब्द पाषाण का छोटा २ टुकड़ा, चीनी-या खाँड़, इन २ अर्थों का वाचक है और पुं० उपल शब्द पाषाण, रत्न इन २ अर्थों का वाचक है ॥१९९॥

कीलालम् (कीलेन प्रतिबन्धेनाल्यते वार्यते इति घञ्) यह १ न० शब्द रक्त और जल इन २ अर्थों का वाचक है ।

[4]मूलम् (मूलति इति कः) यह १ न० शब्द प्रथम, सोर (जड़), मूल नक्षत्र, मूलधन, समीप, इन ४ अर्थों का वाचक है ।

[5]जालम् (जलति इति णः) यह १ न० शब्द फन्दा (जाल), समूह, खिड़की, विना खिली हुई कली, दम्भ, इन ५ अर्थों का वाचक है और पुं० जल शब्द, कदम्ब वृक्ष का वाचक है ॥ २०० ॥

शीलम् (शीलनम् शील्यतेऽनेन वेति घञ् घो वा) यह १ न० शब्द स्वभाव, श्रेष्ठ रहना (सदाचरण) आदि २ अर्थों का वाचक है ।

[6]फलम् (फलनम् इति अच्) यह १ शब्द फल (वृक्ष आदि का फल), लाभ, जातीफल, वाण की नोक, कंकोल, सम्पत्ति, त्रिफला आदि, अर्थों का वाचक हैं ।

[7]पटलम् (पटं विस्तारं लाति इति कः) इस १ न० शब्द के नेत्ररोग, छप्पर ये २ अर्थ वाच्य हैं और न० स्त्री० पटल शब्द समूह इस १ अर्थ का वाचक है ॥ २०१ ॥

---

१. बहुला नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षी च वाच्यवत्प्राज्यकृष्णयोः । इति मेदिनी । २. लीलां विदुः केलिविलासखेलाशृङ्गार-भावप्रभवक्रियासु । इति विश्वः । ३. शर्करा शकले सेवासितोपलरजःस्वपि । इत्यजयः । उपलः प्रस्तरे रत्ने शर्करायां तु योषिति । इति मेदिनी । ४. मूलं शिफाद्ययोः । मूलवित्तेऽन्तिके ना भे । इति मेदिनी । ५. जालं गवाक्ष आनाये क्षारके जन्मवृन्दयोः । जालो नीपद्रुमे । इति मेदिनी । ६. फलं हेतुसमुत्थे स्यात्फलके व्युष्टिलाभयोः । जातीफलेऽपि कक्कोले सस्यवाणाग्रयोरपि । इति विश्वः । ७. अथ पटलं पिटके च परिच्छेदे । छदिर्हृद्रोगतिलके क्लीवं वृन्दे पुनर्न ना । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधःस्वरूपयोरस्त्री तलं, स्याच्चामिषे पलम् ।
और्वानलेऽपि पातालं, चैलं वस्त्रेऽधमे त्रिषु ॥ २०२ ॥
कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।
निर्णीते केवलमिति त्रिलिङ्गं त्वेक-कृत्स्नयोः ॥ २०३ ॥
पर्याप्ति-क्षेम-पुण्येषु कुशलं शिक्षिते त्रिषु ।
प्रवालमङ्कुरेऽप्यस्त्री, त्रिषु स्थूलं जडेऽपि च ॥ २०४ ॥

---

[1]तलम् (तलति इति अच्) यह पुं० न० अधोभाग (नीचे), स्वरूप, पृष्ठभाग इन ३ अर्थों का वाचक है।

[2]पलम् (पलति इति अच्) यह १ न० शब्द समयविशेष, मांस, चार भरी का नाप (परिमाण विशेष) इन ३ अर्थों का वाचक है

[3]पातालम् (पतति अत्र वेति आलञ्) यह १ न० शब्द पाताल (नाग लोक), वडवाग्नि, विल इन ३ अर्थों का वाचक है।

चैलन् (चिलति चिल्यते वेति अच् घञ् वेति) यह न० १ शब्द वस्त्र इस १ अर्थ का वाचक है। और पुं० शब्द नीच इस १ अर्थ का वाचक है।

कुकूलम् (कोभूमेः कुलम्, कुत्सितं वा कुलम्) यह १ न० शब्द कील आदि से परिपूर्ण (भरा हुआ) गढ़ा, इस १ अर्थ का वाचक है। और पुं० कुकूल शब्द भूसा की अग्नि (भउरा) इस १ अर्थ का वाचक है।

केवलम् (केवते इति कलः) यह १ अव्यय केवल (सिर्फ, खाली) इस १ अर्थ का वाचक है। और त्रि० केवल शब्द अकेला (एक), सम्पूर्ण (समूचा) इन २ अर्थों का वाचक है ॥ २०३ ॥

कुशलम् (कौ भूमौ शलति इति अच्) यह १ न० शब्द सामर्थ्य (पर्याप्ति), हित (कल्याण), सुकृत (पुण्य), इन ३ अर्थों का वाचक है। और त्रि० कुशल शब्द पढ़ा हुआ (शिक्षित चतुर) इस १ अर्थ का वाचक है।

[4]प्रवालम् (प्रवलति इति णः) यह १ पुं० न० शब्द नूतन पर्ण (तथा पल्लव), वीणा का दण्ड, मूंगा, इन ३ अर्थों का वाचक है।

[5]स्थूलम् (स्थूलयति इति अच्) यह १ त्रि० शब्द मूर्ख (जड़), मोटा इन २ अर्थों का वाचक है ॥ २०४ ॥

---

१. तलं स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं कानने कार्यबीजे च पुंसि तालमहीरुहे। चपेटे च त्सरौ तन्त्री घाते सव्येन पाणिना। इति मेदिनी। २. पलमुन्मानमांसयोः। इति रुद्रः। ३. पातालं नागलोके स्याद्विवरे वडवानले। इति मेदिनी। ४. प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे। इति मेदिनी। ५. स्थूले कूटे च निष्प्रज्ञे पीवरेऽप्यन्यलिङ्गकम्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करालो दन्तुरे तुङ्गे, चारौ दक्षे च पेशलः।
मूर्खेऽर्भकेऽपि बालः स्याल्लोलश्चलसतृष्णयोः ॥ २०५ ॥
दव-दावौ वनारण्यवह्नी, जन्महरौ भवौ।
मन्त्री सहायः सचिवः पति-शाखि-नरा धवाः ॥ २०६ ॥
अवयः शैलमेषार्का, आज्ञाऽऽह्वानाऽध्वरा हवाः।

---

[1]करालः (करेणालाति इति कः) यह १ त्रि० शब्द ऊँचा, दाँतुल, भयङ्कर इन ३ अर्थों का वाचक है।

पेशलः (पिश् धातोः घञि पेशं लाति इति वाहुलकात् अलच् वा) यह १ त्रि० शब्द सुन्दर, निपुण (चतुर), इन २ अर्थों का वाचक है।

[2]बालः (वलति इति णः) यह १ त्रि० शब्द वालक, आँख का औषध, मूर्ख, केश, गज, अश्व के दुम (पूँछ) के बाल का गुच्छा, इन ५ अर्थों का वाचक है।

[3]लोलः (लोडति इति अच् डलयोरेकत्वम्) यह १ त्रि० शब्द इच्छा (चाहना) से युक्त, चञ्चल इन २ अर्थों का वाचक है ॥ १०५ ॥

दवः दावः (दुनोति दवति वेति वा णः, पक्षे अच्) ये २ पुं० शब्द जङ्गल (वन), दावाग्नि (काष्ठों की रगड़ से उत्पन्न आग), इन २ अर्थों के वाचक हैं।

[4]भवः (भवति इति अच्) यह १ पुं० शब्द उत्पन्न होना (जन्म लेना), शङ्कर जी, प्राप्ति, कल्याण, विश्व (संसार), सत्ता इन ६ अर्थों का वाचक है।

सचिवः (सचनम् इति इन्, सचिं वाति इति कः,) यह १ पुं० शब्द मन्त्री, कर्म-सचिव (सहायक) इन २ अर्थों का वाचक है।

[5]धवः (धवति, धुवति धुनोति वेति अच्) यह १ पुं० शब्द धव का वृक्ष, पुरुष (नर), पति, धूर्त इन ४ अर्थों का वाचक है ॥ २०६ ॥

[6]अविः (अवति अव्यते वेति इन्) यह १ पुं० शब्द पर्वत, मेष (भेंड़ा), रवि (सूर्य), स्वामी, इन ४ अर्थों का वाचक है।

हवः (हूयते अत्रेति अप्) यह १ पुं० शब्द आदेश (आज्ञा), बुलाना (पुकारना), यज्ञ इन ३ अर्थों का वाचक है।

---

१. करालं दन्तुरे तुङ्गे भीषणे चाभिधेयवत् (ससर्ज रसतैले ना क्ली वं कृष्णकुवेरके) इति मेदिनी। २. वालः कचे शिशौ मूर्खे ह्रीवेरेऽश्वेभपुच्छयोः। इति विश्वः। वालो ना कुन्तलेऽश्वस्य गजस्यापि च वालधौ। वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुंनपुंसकम्। अलंकारान्तरे योषे वाली वाला त्रुटिस्त्रियोः। इति मेदिनी। ३. लोलश्चले सतृष्णे च लोला तु रसनाश्रियोः। इति हैमः। ४. भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः। इति मेदिनी। ५. धवः पुमान्नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च। इति मेदिनी। ३. अविर्नाथे रवौ मेषे शैले मूषिककम्बले। इति मेदिनी। अविभूपुष्पवत्योः स्त्री वायु-प्राकारभः-सु ना। इति वैजयन्ती।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावः सत्ता-स्वभावा-भिप्राय-चेष्टाऽऽत्म-जन्मसु ॥ २०७ ॥
स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।
अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः ॥ २०८ ॥
उत्सेकाऽऽमर्षयोरिच्छाप्रसरे मह उत्सवः ।
अनुभावः प्रभावे च सतां च मतिनिश्चये ॥ २०९ ॥
स्याज्जन्महेतुः प्रभवः स्थानं चाद्योपलब्धये ।
शूद्रायां विप्रतनये शस्त्रे पारशवो मतः ॥ २१० ॥
ध्रुवो भ-भेदे क्लीबं तु निश्चिते शाश्वते त्रिषु ।

---

[1]भावः (भावयति इति अच्) यह १ पुं० शब्द शील (स्वभाव), चेष्टा, सत्ता, अभिप्राय, क्रिया, आत्मा, लीला, जन्म, जीव (जन्तु), विभूति, रतिवेग, पण्डित, वस्तु इन १३ अर्थों का वाचक है ॥ २०७ ॥

[2]प्रसवः (प्रसवनम् प्रसूयते वेति अप् अच् वा) यह १ पुं० शब्द पुष्प, उत्पत्ति, गर्भ से पैदा होना, फल, सन्तान इन ५ अर्थों का वाचक है ।

[3]निह्नवः (निह्नवनम् इति अप्) यह १ पुं० शब्द व्यर्थ बोलना, शठता, अविश्वास इन अर्थों का वाचक है ॥ २०८ ॥

[4]उत्सवः (उत्सवनम् इति अप्) यह पुं० शब्द क्रोध, प्रसन्नता का समय (विवाह आदि उत्सव), उन्नति, इच्छा का वेग, इन ४ अर्थों का वाचक है ।

[5]अनुभावः (भवनम् इति घञ्, अनुगतः भावः इति समासः) यह १ पुं० शब्द पुरुषों के ज्ञान का निर्णय, भावप्रकाशन, प्रभाव इन ३ अर्थों का वाचक है ॥ २०९ ॥

[6]प्रभवः (प्रभवत्यस्मात् इति अप्) इस १ पुं० शब्द के जन्महेतु (माता पिता आदि), प्रथम प्राप्ति का स्थल (जैसे गंगा के प्रथम प्रभव का स्थान हिमालय) ये २ अर्थ वाच्य हैं ।

[7]पारशवः (परान् शृणाति इति डः, परशुरेव इति अण्) यह १ पुं० शब्द शूद्र वर्ण की स्त्री में ब्राह्मण वर्ण के पुरुष से उत्पन्न सन्तान, फरसा, कुल्हाड़ी आदि अस्त्र इन २ अर्थों का वाचक है ॥२१०॥

[8]ध्रुवः (ध्रुवति इति अच्) यह १ पुं० शब्द शङ्कर जी, वटवृक्ष, शङ्कु, ध्रुवतारा, वसु, कील इन ७ अर्थों का वाचक है । और न० ध्रुव शब्द निश्चित अर्थ का वाचक है । और त्रि० ध्रुव शब्द अनवरत (निरन्तर-जैसे जातस्य हि ध्रुवो मृत्युः इति), व्योम (आकाश) तर्क आदि ६ अर्थों का वाचक है ।

---

१. भावः सत्ता स्वभावाभिप्रायचेष्टात्मजन्मसु । क्रियालीलापदार्थेषु विभूतिबन्धुजन्तुषु । रत्यादौ च । इति मेदिनी । २. प्रसवो गर्भमोचने । उत्पादे स्यादपत्येऽपि फलेऽपि कुसुमेऽपि च । इति मेदिनी । २. निह्नवः पुंसि निकृतावविश्वासापलापयोः । इति मेदिनी । ३. उत्सवः मह उत्सेक इच्छाप्रसव-कोपयोः । इति मेदिनी । ४. अनुभावः प्रभावे स्यान्निश्चये भावसूचके । इति मेदिनी । ५. प्रभवो जलमूले स्याज्जन्महेतौ पराक्रमे । ज्ञानस्य चादिमस्थाने ॥ इति मेदिनी । ६. पुंसि पारशवः पुमान् । परस्त्रीतनये शस्त्रे द्विजाच्छूद्रासुतेऽपि च । इति मेदिनी । ७. ध्रुवः कीले शिवे शङ्कौ वसौ योगे वटे मुनौ । ध्रुवानूर्ध्वाशालिपण्यां गीतिन्नु ग्भेदयोरपि । ध्रुवं तु निश्चिते तर्के निश्चले शाश्वतेऽन्यवत् ॥ इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ॥ २११ ॥
स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ।
शिवा गौरी-फेरवयो, र्द्वन्द्वं कलह-युग्मयोः ॥ २१२ ॥
द्रव्याऽसुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।
क्लीबं नपुंसकं षण्ढे वाच्यलिङ्गमविक्रमे ॥ २१३ ॥
द्वौ विशौ वैश्य-मनुजौ, द्वौ चराभिमरौ स्पशौ ।

१स्वः (स्वनति स्वन्यते वेति ढः) यह १ पु० शब्द जाति, आत्मा इन २ अर्थों का वाचक है। और त्रि० स्व-शब्द स्वी (आत्मीय) इस १ अर्थ का वाचक हैं। और पुं० न० स्व शब्द धन इस १ अर्थ का वाचक है ॥ २११ ।

२नीवी (निव्ययति निव्नीयते वेति 'नौव्यो यलोपः पूर्वस्य च दीर्घः' इतीण् ङीप् च) यह १ स्त्री० शब्द नारियों के श्रोणी स्थल की वस्त्रग्रन्थि (फुफुती), नृप सुतों के धन का अदल-बदल, बनियों का मूल धन इन तीन अर्थों का वाचक है ।

३शिवा (शिवमस्त्यस्याः इति अच् टाप् च) यह १ स्त्री० शब्द गौरी (पार्वती), शृगाली (सियारिन), शृगाल (स्यार), शमीतरु, आमलक (आँवला), भूँई आँवला औषधि आदि ६ अर्थों का वाचक है ।

४द्वन्द्वम् (द्वौ द्वौ इति 'द्वन्द्वं रहस्यमर्यादावचन' इत्यादिना निपातनात् साधुः) यह १ न० पुं० शब्द युद्ध, युगल (जोड़ी), रहस्य इन ३ अर्थों का वाचक है ॥ २१२ ॥

५सत्त्वम् (सीदन्त्यस्मिन् गुणाद्याः इति त्वन्) यह १ न० शब्द अधिक सामर्थ्य (पराक्रम) होना, वस्तु, प्राण इन ३ अर्थों का वाचक है। और पुं० न० सत्त्व शब्द प्राणी इस १ अर्थ का वाचक है ।

६क्लीबम् (क्लीबते इति कः) यह १ न० शब्द जनखा (हिजड़ा), इस १ अर्थ का वाचक है। और त्रि० क्लीब शब्द सामर्थ्य रहित इस १ अर्थ का वाचक है ॥ २१३ ॥

७विट् (विशति इति क्विप्) इस १ पुं० शब्द के मनुष्य, प्रवेश, वैश्य आदि ३ अर्थ वाच्य हैं ।

८स्पशः (स्पशति इति अच्) इस १ पुं० शब्द के रण (युद्ध), दूत ये २ अर्थ वाच्य हैं ।

---

१. स्वो ज्ञात्यात्मनोः स्वं निजे धने । इति हेमचन्द्रः । स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने । इति मेदिनी । २. नीवी स्त्रीकटीवस्त्रबन्धने । मूलद्रव्ये परिपणे । इति हैमः । ३. पुण्डरीकद्रुमे चापि शिवा झाटामलौषधौ । अभयामलकीगौरीक्रोष्ट्रीसक्तुफलासु च ॥ इति विश्वः । ४. द्वन्द्वं रहस्ये कलहे तथा मिथुनयुग्मयोः । इति मेदिनी । ५. सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वव्यवसायासुवित्तेष्वस्त्री तु जन्तुषु । इति मेदिनी । ६. अस्त्री नपुंसके क्लीबं वाच्यलिङ्गमविक्रमे । इति रुद्रः । ७. विट् स्मृतो वैश्यमनुजप्रवेशेषु मनीषिभिः । इति विश्वः । ८. स्पशः स्यात्संपराये च प्रणिधावपि पुंस्ययम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वौ राशी पुञ्ज-मेषाद्यौ, द्वौ वंशौ कुल-मस्करौ ॥ २१४ ॥
रहः प्रकाशौ वीकाशौ, निर्वेशो भृतिभोगयोः ।
कृतान्ते पुंसि कीनाशः क्षुद्र-कर्षकयोस्त्रिषु ॥ २१५ ॥
पदे लक्ष्ये निमित्तेऽपदेशः स्यात् कुशमप्सु च ।
दशावस्थानेकविधाप्याशा तृष्णापि चायता ॥ २१६ ॥

राशिः (रश्यते रशति वा बाहुलकादिण् इः वा) यह १ पुं० शब्द वृष मिथुन आदि राशि, ढेरी इन २ अर्थों का वाचक है।

[१]वंशः (वमति वम्यते वेति शक्) यह १ पुं० शब्द खान्दान (कुल), संघ, बाँस, पीठ की रीढ़ इन ४ अर्थों का वाचक हैं ॥ २१४ ॥

[२]वीकाशः (विकाशनम् अस्मिन् वेति घञ् दीर्घश्च) यह १ पुं० शब्द निर्जन (एकान्त), व्यक्त (स्पष्ट, प्रकाश) इन २ अर्थों का वाचक है।

[३]निर्वेशः (निर्विश्यते निर्वेशनं वेति घञ्) यह १ पुं० शब्द जीविका (वेतन), उपभोग इन २ अर्थों का वाचक है।

[४]कीनाशः (की इत्यव्ययं कुत्सायाम् की कुत्सितं नाशयति इति अच्) यह १ पुं० शब्द कपि (वानर), काल (यमराज) इन २ अर्थों का वाचक है। और त्रि० कीनाश शब्द किसान, क्षुद्र इन २ अर्थों का वाचक है ॥ २१५ ॥

[५]अपदेशः (अपदेशनम् अपदिश्यते वेति घञ्) यह १ पुं० शब्द वहाना (व्याज), लक्ष्य, कारण (निमित्त) इन तीन अर्थो का वाचक है।

[६]कुशम् (कौ शेते तिष्ठति इति डः) यह १ न० शब्द जल इस १ अर्थ का वाचक है। और पुं० कुश शब्द रामपुत्र, वैल के गर्दन के लिए जोती नाम की रस्सी, द्वीप, कुशा इन ४ अर्थों का वाचक है।

[७]दशा (दशति इति अच् टाप् नलोपश्च) यह १ स्त्री० शब्द अवस्था (दशा) अनेक प्रकार, दीपक की वत्ती इन २ अर्थों का वाचक है। और किनारी इस १ अर्थ का भी वाचक है।

[८]आशा (आसमन्ताद् अश्नुते इति अच् टाप् च) यह १ स्त्री० शब्द आसरा (तृष्णा), उत्तर आदि दिशा इन २ अर्थों का वाचक है ॥ २१६ ॥

---

१. वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च । इति विश्वः । २. वीकाशो विजने व्यक्ते । इति विश्वः । विकाशः पुंसि विजने प्रकाशे सदृशं समे । उचिते च । इति मेदिनी । ३. निर्वेशस्तु पुमान्भोगे वेतने मूर्च्छनेऽपि च । इति मेदिनी । ४. कीनाशः कर्षकक्षुद्रोपांशुघातिषु वाच्यवत् (यमे ना) । इति मेदिनी । ५. अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि । इति विश्वः । ६. कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले । इति विश्वः । ७. दशावस्था दीपवर्त्योर्वस्त्रान्ते भूम्नि योषिति । इति मेदिनी । ८. आशा ककुभि तृष्णायाम् इति हैमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वशा स्त्री करिणी च स्याद्, दृग्ज्ञाने ज्ञातरि त्रिषु ।
स्यात् कर्कशः साहसिकः कठोरामसृणावपि ॥ २१७ ॥
प्रकाशोऽतिप्रसिद्धेऽपि, शिशावज्ञे च बालिशः ।
सुर-मत्स्यावनिमिषौ, पुरुषावात्म-मानवौ ॥ २१८ ॥
काकमत्स्यात्खगौ ध्वाङ्क्षौ, कक्षौ तु तृण-वीरुधौ ।
अभीषुः प्रग्रहे रश्मौ, प्रैषः प्रेषणमर्दने ॥ २१९ ॥

---

[1]वशा (वष्टि इति अच् टाप् च) १ स्त्री० शब्द नारा, हथिनी, बाँझ, गाय, लड़की, वश में रहने वाली इन ५ अर्थों का वाचक है।

[2]दृक् (पश्यति इति क्विप्) यह १ स्त्री० शब्द ज्ञान, आँख, मति (बुद्धि) इन ३ अर्थों का वाचक है। और त्रि० दृक् शब्द का जानने वाला यह १ अर्थ वाच्य है।

[3]कर्कशः (कृणाति इति विच्, कश्यते इति अच्, कर् चासो कशश्च) यह १ त्रि ० शब्द कठोर दृढ, साहसी, रूखा, क्रूर, निर्दय, सूम (कृपण) इन ७ अर्थों का वाचक है। और पुं० कर्कश शब्द के खड्ग (तलवार), कासमर्द, कबीला ओषधि, ईख ये ४ अर्थ वाच्य हैं ॥ २१७ ॥

[4]प्रकाशः (प्रकाशते इति अच्) यह १ पुं० शब्द अधिक विख्यात (प्रसिद्ध) धाम, उजाला, हँसी इन ४ अर्थों का वाचक है।

वालिशः (वाडनम् इति इन्, वालिं श्यति इति कः) यह १ पु० शब्द शिशु (बालक) मूर्ख इन २ अर्थों का वाचक है ॥ इति शान्ताः ॥

अनिमिषः (न निमिषति कः नञ्समासः) यह १ पुं० शब्द देवता, मीन (मछली) इन २ अर्थों का वाचक है।

[5]पुरुषः (पुरति इति कुषन्) यह १ पुं० शब्द ज्ञानी, मनुष्य (पुरुष), पुन्नाग नाम का तरु (वृक्ष) इन ३ अर्थों का वाचक है ॥ १०९ ॥

[6]ध्वाङ्क्षः (ध्वाङ्क्षति इति अच्) यह १ पुं० शब्द वायस (कौवा), वक (मछली खाने वाला बगुला), याचक (भिक्षुक), साप, कपास के बीज निकालने का यन्त्र विशेष इन ६ अर्थों का वाचक है।

[7]कक्षः (कषति कष्यते वेति सः) यह १ पु० शब्द घास, लता, वन, काँख, इन ४ अर्थों का वाचक है ॥ २१० ॥

---

१. वशा वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च । इति विश्वः । २. दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके । इति मेदिनी । ३. कर्कशः परुषे क्रूरे कृपणे निर्दये दृढे । इक्षौ साहसिके कासमर्द-काम्पिल्लयोरपि ॥ इति विश्वः । ४. प्रकाशोऽतिप्रसिद्धे स्यात्प्रहासातपयोः स्फुटे । इति विश्वः । ५. पुरुषः पूरुषे सांख्यज्ञे च पुंनागपादपे इति । मेदिनी । ६. ध्वाङ्क्षौ मत्स्यात्खगे काके भिक्षुके तक्षकेऽपि च । इति मेदिनी । ७. कक्षः स्मृतौ भुजामूले कक्षोऽरण्ये च वीरुधि । कक्षः शुष्कतृणे प्रोक्तः कक्षः कच्छ उदाहृतः ॥ कक्षा स्पर्धापदे काञ्च्यां रथगेहप्रकोष्ठयोः । गजरज्जौ परिशामपश्चादलपल्लवे । इति धरणिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षः सहायेऽप्युष्णीषः शिरोवेष्ट-किरीटयोः ।
शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ॥ २२० ॥
कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ।
द्यूतेऽक्षे शारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये ॥ २२१ ॥
ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे ।

अभीषुः (ईषते ईष्यते वेति उः आदेरिच्च, अभिगत इषुः इति समासः) यह १ पुं० शब्द अश्व आदि की लगाम या वागडोर, रश्मि (किरण) इन २ अर्थों का वाचक है ।

[1]प्रैषः (प्रेषणम् इति घञ् वृद्धिश्च) यह १ पुं० शब्द प्रेषित करना (भोजन) वेदना (पीडा) इन २ अर्थों का वाचक है ॥ २१० ॥

[2]पक्षः (पक्षति पक्षते वेति अच् घञ् वा) यह १ पुं० शब्द कृष्ण पक्ष शुक्ल पक्ष (अधिमास), ग्रह, सहाय, पार्श्व, अविरोध, साध्य, बाल (केश) आदि के आगे रहने पर समूह अर्थ का वाचक (यथा काकपक्षः केशपक्षः), शक्ति, मित्र, पंख, इच्छा (रुचि), विकल्प आदि १२ अर्थों का वाचक है ।

[3]उष्णीषः (उष्णमीषते हिनस्ति इति कः शकन्ध्वादिः) यह १ पुं० न० शब्द मुकुट, पगड़ी इन २ अर्थों का वाचक है ॥ २२० ॥

[4]वृषः (वर्षति इति कः) यह १ पुं० शब्द मूसा (चूहा), धर्म, अधिक पराक्रम वाला, श्रेष्ठ, वृष राशि, बैल, इन ६ अर्थों का का वाचक है ॥ २२१ ॥

[5]कोषः (कुष्यते इति घञ्) यह १ पुं० न० शब्द पुष्प की बिना खिली हुई कली, म्यान, शपथ, खजाना इन ४ अर्थों का वाचक है ।

[6]आकर्षः (आकर्षणम्, आकृष्यते वेति घञ्) यह १ पुं० शब्द जुआ (द्यूत), सतरञ्ज आदि खेलने का वस्त्र या पटरी, खींचना, जुवा खेलने का पाशा, इन्द्रिय इन ५ अर्थों का वाचक है ॥ २२१ ॥

[7]अक्षम् (अक्ष्णोति अक्ष्यते वेति अच् घञ् वा) यह १ न० शब्द तूतिया, काला नमक (सोंचर) इन्द्रिय इन ३ अर्थों का वाचक है । और पुं० अक्ष शब्द प्रमाण विशेष (१६ मासा), पहिया, जुआ खेलने का पाशा, व्यवहार (लेन-देन), बहेड़ा का वृक्ष इन ५ अर्थों का वाचक है ॥

---

१. प्रैषः प्रेषणपीडयोः । इत्यजयः । प्रेषः स्यात्प्रेषणे क्लेशे मर्दनोन्मादयोरपि । इति विश्वः । २. पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः । चुलीरन्ध्रे पतत्रे च वाजि-कुञ्जरपार्श्वयोः ॥ इति मेदिनी । ३. उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तरे । इति विश्वः । ४. वृषो धर्मे बलीवर्दे शृङ्ग्यां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च वासमूषिकशुक्रले ॥ इति मेदिनी । ५. कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥ इति मेदिनी । तालव्यान्तोऽपि । इति मेदिनी । ६. नाकर्षो द्यूत इन्द्रिये । पाशके शारिफलके कोदण्डाभ्यासवस्तुनि । आकर्षणेऽपि पुंसि स्यात् । इति मेदिनी । ७. अक्षः कर्षे तुषे चक्र शकटव्यवहारयोः । आत्मज्ञे पाशके चाक्षे तुल्ये सौवर्चलेन्द्रिये ॥ इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्षूर्वार्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ॥ २२२ ॥
पुंभावे तत्क्रियायां च पौरुषं, विषमप्सु च ।
उपादानेऽप्यामिषं स्याद्, पराधेऽपि किल्बिषम् ॥ २२३ ॥
स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।
प्रेक्षा नृत्येक्षणं प्रज्ञा, भिक्षा सेवार्थना भृतिः ॥ २२४ ॥
त्विट्शोभापि, त्रिषु परे, न्यक्षं कार्त्स्न्य-निकृष्टयोः ।

¹कर्षूः (कृष्यते कर्षति वेति ऊः) यह १ पुं० शब्द जीविका (खेती), उपरी (गोंइठा) का अङ्गार, इन २ अर्थों का वाचक है । और स्त्री० कर्षू शब्द नहर इस १ अर्थ का वाचक है ॥ २२२ ॥

²पौरुषम् (पुरुषस्य कर्म भावो वेति अञ्) यह १ न० शब्द पुरुषार्थ, तेज, पुरुष का भाव इन ३ अर्थों का वाचक है और त्रि० पौरुष शब्द हाथ उठाये हुए मनुष्य का साढ़े चार हाथ का प्रमाण (पोरसा) इस १ अर्थ का वाचक है ।

³विषम (वेवेष्टि इति कः) यह १ न० शब्द पानी, जहर इन २ अर्थों का वाचक है ।

⁴आमिषम् (आमिष्यते भुज्यते इति घञ् गुणाभावश्च) यह १ पुं० न० शब्द उत्कोच (घूस), मांस, भोग्य वस्तु, संभोग इन ४ अर्थों का वाचक है ।

⁵किल्बिषम् (केलनम् किल्यते वेति टिषच् बुक् च) इस १ न० शब्द के पाप, रोग, अपराध ये ३ अर्थ वाच्य हैं ॥ २२३ ॥

⁶वर्षम् (वर्षणम् इति अच्) यह पुं० शब्द वृष्टि (वर्षा), साल, जम्बूद्वीप के खण्ड इन ३ अर्थों का वाचक है । और स्त्री० ब० वर्षा शब्द वर्षा ऋतु इस १ अर्थ का वाचक है ।

⁷प्रेक्षा (प्रेक्षणम् अनया वेति अः टाप् च) यह १ स्त्री० शब्द नृत्य (नाच), नाच देखना, मति (बुद्धि) इन ३ अर्थों का वाचक है ।

⁸भिक्षा (भिक्षणम् भिक्ष्यते वेति अः टाप् च) यह १ स्त्री० शब्द माँगना, भिक्षा में प्राप्त पदार्थ, सेवा, वेतन इन ४ अर्थों का वाचक है ॥ २२४ ॥

⁹त्विट् (त्वेषणम् अनया वेति क्विप्) यह १ स्त्री० शब्द कान्ति (शोभा), वचन, तेज इन ३ अर्थों का वाचक है ।

¹⁰न्यक्षम् (नियतानि निकृतानि वा अक्षाणि यस्मिन् यस्य वा) यह १ त्रि० शब्द सम्पूर्ण, नीच इन २ अर्थों का वाचक है । और पुं० न्यक्ष शब्द परशुराम इस १ अर्थ का वाचक है ।

---

१. करीषाग्निः पुमान् कर्षूः कुल्यायामपि च स्त्रियाम् । इति रभसः । २. पौरुषं पुरुषस्य स्याद् भावे कर्मणि तेजसि । ऊर्ध्वविस्तृतदोःपाणिनृमाने त्वभिधेयवत् ॥ इति विश्वः । ३. विषं तु गरले तोये । इति विश्वः । ४. आमिषं पुंनपुंसकम् । भोग्यवस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च । इति मेदिनी ॥ ५. किल्बिषं पापरोगयोः । इति मेदिनी । ६. वर्षोऽस्त्री भारतादौ च जम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि । इति मेदिनी । ७. प्रेक्षा धीनृत्यदर्शयोः । इत्यजयः । प्रेक्षा नृत्येक्षणे बुद्धौ इति मेदिनी । ८. भिक्षा भृतौ च याच्ञायां सेवाभिक्षितवस्तुनोः । इति विश्वः । ९. कान्तौ वाचि रुचौ त्विट् स्त्री । इति रभसः । १०. न्यक्षः परशुरामे स्यान्न्यक्षः कार्त्स्न्यनिकृष्टयोः । इति विश्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षेऽधिकृतेऽध्यक्षो, रूक्षस्त्वप्रेम्ण्यचिक्कणे ॥ २२५ ॥
रविश्वेतच्छदौ हंसौ, सूर्यवह्नी विभावसू ।
वत्सौ तर्णक-वर्षौ द्वौ, सारङ्गाश्च दिवौकसः ॥ २२६ ॥
श्रृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः ।
पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे ॥ २२७ ॥
देवभेदेऽनले रश्मौ वसू रत्ने धने वसु ।

अध्यक्षः (अधिगतोऽक्षम् इति अच्) यह १ त्रि० शब्द मालिक, प्रत्यक्ष इन २ अर्थों का वाचक है।

रूक्षः (रूक्षयति अच्) यह १ त्रि० शब्द प्रेमशून्य, रूखा इन २ अर्थों का वाचक है ॥ २२५ ॥

[१]हंसः (हन्ति गच्छति इति अच् सक् च) यह १ पुं० शब्द रवि, मराल (हंस), योगिभेद इन ३ अर्थों का वाचक है।

[२]विभावसुः (विभा प्रभा वसु धनमस्य) यह १ पुं० शब्द भास्कर (सूर्य), आग, इन २ अर्थों का वाचक है।

[३]वत्सः (वसति अस्मिन् वेति सः) यह १ पुं० शब्द गाय का बछड़ा, या सुत (पुत्र) आदि, साल (वर्ष) इन २ अर्थों का वाचक है और न० वत्स शब्द सीना (छाती) इस १ अर्थ का वाचक है।

[४]दिवौकसः (द्यौः ओको यस्य) यह १ पुं० शब्द देवता, चातक पक्षी इन २ अर्थों का वाचक है ॥ २२६ ॥

[५]रसः (रस्यते इति घञ्) यह १ पुं० शब्द तिक्त कषाय आदि ६ रस, वीर्य, राग, श्रृङ्गार आदि ९ रस, जहर, पानी, पिघलना, स्वाद, पारा इन अर्थों का वाचक है।

[६]उत्तंसः, अवतंसः (उत्तंस्यति उत्तंस्यते अनेन वेति अच् घञ् वा) यह १ पुं० शब्द कर्णालङ्कार (कानका गहना), केवल आभूषण, इन २ अर्थों का वाचक है ॥ २२७ ॥

[७]वसुः (वसति सर्वत्र उष्यतेऽनेन वेति उः) यह पुं० शब्द घर, ध्रुव सोम आदि ८ वसु, आग, रश्मि (कारण), नृप (राजा), जुवा में बाँधी हुई बैल के गर्दन में बाँधने की रस्सी (जोती) इन ५ अर्थों का वाचक है और न० वसु शब्द धन, सुवर्ण, रत्न, वृद्धि—औषध इन ४ अर्थों का वाचक है और त्रि० वसु शब्द मधुर इस १ अर्थ का वाचक है।

---

१. हंसो विहंगभेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे। निर्लोभनृपतौ हंसः शरीरमरुदन्तरे ॥ इति विश्वः। २. विभावसुः पुमान्सूर्ये हारभेदे च पावके । इति मेदिनी। ३. वत्सः पुत्रादि वर्षयोः। तर्णके नोरसि क्लीवम्। इति मेदिनी। ४. दिवोकाश्च दिवौकाश्च पुंसि देवे च चातके। इति मेदिनी। ५. रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। श्रृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे। रसा तु शल्लकी पाठा जिह्वाधरणिकङ्गुषु। इति विश्वः। ६. उत्तंसः कर्णपूरेऽपि शेखरे चावतंसवत्। इति विश्वः। ७. वसुर्ना देवभेदाग्निमायोक्त्रवकराजसु। क्लीवं वृद्धौषधे श्याले रै रत्ने मधुरे त्रिषु ॥ इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णौ च वेधाः, स्त्री त्वाशीर्हिताशंसाऽहिदंष्ट्रयोः ॥ २२८ ॥
लालसे प्रार्थनौत्सुक्ये, हिंसा चौर्यादिकर्म च ।
प्रसूरश्वापि, भूद्यावौ रोदस्यौ रोदसी च ते ॥ २२९ ॥
ज्वालाभासौ न पुंस्यर्चि, ज्योतिर्भ-द्योत-दृष्टिषु ।
पापापराधयोरागः खगबाल्यादिनोर्वयः ॥ २३० ॥

[1]वेधाः (विदधाति इति असुन्) यह १ पुं० शब्द विधाता (ब्रह्मा), विष्णु, पण्डित इन ३ अर्थों का वाचक है।

आशीः (आशास्ते इति क्विप् ईत्वञ्च) यह १ स्त्री० शब्द साँप का दाँत, आशीर्वाद, इन २ अर्थों का वाचक है आशीस्तागता दंष्ट्र तयोविद्धो न जीवति ॥ २२८ ॥

[2]लालसा (लालसनम् इति यङन्तः, अ प्रत्ययः) यह १ स्त्री० शब्द उत्सुकता, अधिक चाह, प्रार्थना, माँगना (याचना) इन ४ अर्थों का वाचक है।

[3]हिंसा (हिंसनम् इति अः टाप् च) यह १ स्त्री० शब्द बाँधना डराना चोरी आदि दुष्कर्म, मारना, इन २ अर्थों का वाचक है।

[4]प्रसूः (प्रसुते इति क्विप्) यह १ स्त्री० शब्द अश्वा (घोड़ी), माता, केला, लता, इन ४ अर्थों का वाचक है।

[5]रोदसी (रोदिति सर्वमस्मिन् इति असुन् ङीष् च) यह १ स्त्री० शब्द और न० रोदस् शब्द भी जमीन-आसमान इस अर्थ का वाचक है ॥ २२९ ॥

[6]अर्चिः (अर्च्यते इति इसिः) यह १ स्त्री० न० शब्द ज्वाला, कान्ति या रश्मि इन २ अर्थों का वाचक है।

[7]ज्योतिः (द्योतते द्योतनं वा, अनेन वेति इसिन् जादेशश्च) यह १ न० शब्द नक्षत्र, ज्योतिष शास्त्र, दृष्टि, प्रकाश इन ४ अर्थों का वाचक है।

आगः (एति इति असुन्) यह १ न० शब्द पाप, अपराध इन २ अर्थों का वाचक है।

[8]वयः (वयते इति असुन्) यह १ न० शब्द पक्षी (चिड़िया), यौवन वार्धकादि अवस्था, इन २ अर्थों का वाचक है ॥ २३० ॥

---

१. वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि इति मेदिनी। २. लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयोः। इति मेदिनी। ३. हिंसा चौर्यादिघातयोः। इति मेदिनी। ४. प्रसूरश्वा जनन्योश्च कदलीवीरुधोरपि। इति विश्वः। ५. द्यावापृथिव्यौ रोदसौ रोदस्यौ रोदसीति च। विगृहीतयोरप्येते नामनी। रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सहप्रयोगेऽप्यनयो रोदः स्यादपि रोदसी ॥ इति विश्वः। ६. अथार्चिर्मयूखशिखयोर्न ना। इति मेदिनी। ७. ज्योतिरग्नौ दिवाकरे। पुमान् नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः ॥ इति मेदिनी। ८. वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजःपुरीषयोर्वर्चो, महस्तूत्सव-तेजसोः ।
रजो गुणे च स्त्रीपुष्पे, राहौ ध्वान्ते गुणे तमः ॥ २३१ ॥
छन्दः पद्येऽभिलाषे च, तपः कृच्छ्रादिकर्म च ।
सहो बलं सहा मार्गो, नमः ख श्रावणो नभाः ॥ २३२ ॥
ओकः सद्माश्रयश्चौकाः, पयः क्षीरं पयोऽम्बु च ।

[1]वर्चः (वर्चते इति असुन्) यह न० शब्द विष्ठा (पाखाना), रूप, तेज, इन ३ अर्थों का वाचक है ।

महः (महनम् मह्यते वेति असुन्) यह १ न० शब्द तेज, उत्सव इन २ अर्थों के वाचक हैं ।

[2]रजः (रजनम् रज्यतेऽनेन वेति असुन् नलोपश्च) यह १ न० पुं० शब्द नारी का मासिक आर्तव, रजो गुण इन २ अर्थों का वाचक है ।

[3]तमः (तम्यतेऽनेन इति असुन्) यह १ पुं० शब्द राहु नामक ग्रह इस १ अर्थ का वाचक है । और न० तमस् शब्द तमो गुण, मूर्छामोह (शोक), अन्धकार इन ३ अर्थों का वाचक है ॥ २३१ ॥

[4]छन्दः (चन्दनम् चन्द्यतेऽनेन वेति असुन् आदेः छश्च) यह १ न० शब्द श्लोक आदि पद्य, अभिलाष, स्वच्छन्दता, वेद इन ४ अर्थों का वाचक है ।

[5]तपः (तपनम् तप्यते अनेन वेति असुन्) यह १ न० शब्द चान्द्रायण आदि तपस्या, धर्म, तपोलोक इन ३ अर्थों का वाचक है । और पुं० तपाः शब्द माघ मास तथा शिशिर ऋतु इन २ अर्थों का वाचक है ।

[6]सहः (सहते सह्यते अनेन अत्र वेति असुन्) यह १ न० शब्द ताकत, ज्योतिष इन २ अर्थों का वाचक है । और सहाः यह पुं० शब्द अगहन मास, हेमन्त ऋतु इन २ अर्थों का वाचक है ।

[7]नभः (नमनम् नभ्यते अनेन अत्र वेति असुन्) यह १ न० शब्द आकाश इस १ अर्थ का वाचक है । और पुं० नभाः (नभस्) शब्द श्रावण मास, बादल, थूकने का पात्र (पीकदान), नाक, मृणाल सूत्र, वर्षा ऋतु इन ६ अर्थों का वाचक है ॥ २३२ ।

[8]ओकः (उच्यति समवैत्यत्र असुन्) यह १ न० अदन्त शब्द घर (मकान) इस १ अर्थ का वाचक है । और पुं० ओकस् शब्द आश्रयमात्र इस १ अर्थ का वाचक है ।

पयः (पीयते पयते वेति असुन्) यह १ न० शब्द क्षीर (दूध), जल इन २ अर्थ का वाचक है ।

---

१. वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि चन्द्रस्य तनये । इति मेदिनी । २. रजः क्लीबं गुणान्तरे । आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते । इति मेदिनी । रजोऽयं रजसां सार्धं स्त्रीपुष्पगुणधूलिषु । इत्यजयः । ३. तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे । इति मेदिनी । ४. छन्दः पद्ये च वेदे च स्वैराचाराभिलाषयोः । इति मेदिनी । ५. तपो लोकान्तरेऽपि च । चान्द्रायणादौ धने च पुमाञ्शिशिरमाघयोः ॥ इति मेदिनी । ६. सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः । इति मेदिनी । ७. नभोव्योम्नि नभा मेघे श्रावणे च पतद्ग्रहे । घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृतः ॥ इति विश्वः । ८. ओका आश्रयमात्रे च मन्दिरे च नपुंसकम् । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओजो दीप्तौ बले, स्रोत इन्द्रिये निम्नगारये ॥ २३३ ॥
तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्य, तस्त्रिषु ।
विद्वान् विदंश्च, बीभत्सो हिंस्रोऽप्य, विश्वये त्वमी ॥ २३४ ॥
वृद्ध-प्रशस्योर्ज्यायान् कनीयाँस्तु युवाल्पयोः ।

---

[1]ओजः (उब्जति अनेन वेति असुन् बलोपश्च) यह १ न० शब्द कान्ति, ताकत, प्रकाश इन ३ अर्थों का वाचक है।

[2]स्रोतः (स्रवति इति असुन् तुट् च) यह १ न० इन्द्रिय, जल का बहाव (सोत) इन २ अर्थों का वाचक है ॥ २३३ ॥

[3]तेजः (तेजयति तेज्यतेऽनेन वेति असुन्) यह १ न० शब्द कान्ति, ताकत, प्रभाव, वीर्य, असहन इन ५ अर्थों का वाचक है।

यहाँ से आगे सकारान्त सम्पूर्ण शब्द त्रिलिङ्ग हैं।

[4]विद्वान् (वेत्ति इति शतुः वसुः वा) यह १ त्रि० शब्द आत्मज्ञानी, पण्डित, प्राज्ञ इन ३ अर्थों का वाचक है।

[5]बीभत्सः (बीभत्सते बीभत्स्यते अनेन वेति सन् अभ्यासः, दीर्घश्च अच् घञ् घः वा) यह १ त्रि० शब्द क्रूर या हिंसक, डरावना (भयानक) इन २ अर्थों का वाचक है। और पुं० बीभत्स शब्द बीभत्स रस का वाचक है ॥ २३५ ॥

[6]ज्यायान् (अतिशयेन वृद्धः प्रशस्यो वेति 'द्विवचन' इतीयसुन् ज्य च, वृद्धस्य च इति वृद्ध-प्रशस्योः ज्यादेशः आत्वञ्च) यह १ त्रि० शब्द अधिक वृद्ध, अधिक प्रशंसा का पात्र इन २ अर्थों का वाचक है।

[7]कनीयान् (अतिशयितो युवा अल्पो वा इतीयसुनि कन्नादेशश्च) यह १ त्रि० शब्द जवान [अधिक युवा] बहुत छोटा इन २ अर्थों का वाचक है।

---

१. ओजो दीप्ताववष्टम्भे प्रकाशबलयोरपि। इति मेदिनी। २. स्रोतोऽम्बुवेग इन्द्रिये। इति मेदिनी। ३. तेजो धाम्नि पराक्रमे (प्रभावरेतसोश्च)। इति विश्वः। तेजो दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः। इति मेदिनी। अधिक्षेपावमानादेः प्रत्यक्षस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ इति भरतः। ४. विद्वानात्मविदि प्राज्ञे पण्डिते चाभिधेयवत्। इति विश्वः। ५. बीभत्सो विकृते पार्थे क्रूरे पापघृणात्मनोः। इत्यजयः। ६. ज्यायान् वृद्धे प्रशस्ये च। इति हैमः। ७. कनीयानतियूनि स्यादत्यल्पानुजयोस्त्रिषु। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरीयाँस्तूरुवरयोः, साधीयान् साधु-बाढयोः ॥ २३५ ॥
दलेऽपि बर्हं, निर्बन्धोपरागार्कादयो ग्रहाः ।
द्वार्यपीडे क्वाथरसे निर्यूहो नागदन्तके ॥ २३६ ॥
तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ।
पत्नीपरिजनादानमूलशापाः परिग्रहाः ॥ २३७ ॥
दारेषु च गृहाः, श्रोण्यामप्यारोहो वरस्त्रियाः ।

---

[1]वरीयान् (अतिशयितः ऊरुर्वरो वा इतीयसुनि ऊरोर्वरादेशश्च) यह १ त्रि० शब्द अधिक बड़ा, अधिक श्रेष्ठ इन २ अर्थों का वाचक है ।

साधीयान् (अतिशयितः साधुर्बाढो वेति ईयसुनि बाढशब्दस्य साधादेशश्च) यह १ त्रि० शब्द अधिक साधु, अधिक ज्यादा इन २ अर्थों का वाचक है ॥ २३५ ॥

[2]बर्हम् (बर्हति इति अच्) यह १ पुं० न० शब्द पर्ण (पत्ता), मयूर पंख इन २ अर्थों का वाचक है ।

[3]ग्रहः (ग्रहणम् गृह्णाति वेति अप्) यह १ पुं० शब्द सूर्य चन्द्र ग्रहण, भौम बुध आदि नव ग्रह, ग्रहण करना इन ३ अर्थों का वाचक है ।

[4]निर्यूहः (निर्यूहति इति कः) यह पुं० शब्द शिखा में बांधने की माला क्वाथ का रस, द्वार इन ४ अर्थों का वाचक है ॥ २३६ ॥

[5]प्रग्रहः, प्रग्राहः (प्रगृह्यते इति वा घञ् पक्षे अप्) यह २ पुं० शब्द तराजू की डांडी (दण्डी) की रस्सी, अश्वादि की लगाम (बागडोर) इन २ अर्थों का वाचक हैं ।

[6]परिग्रहः (परिगृह्यते इति अप्) यह १ पुं० शब्द स्त्री, लेना, पेड़ आदि की जड़, परिजन, शपथ या शाप, राहु से ग्रसित सूर्य इन ६ अर्थों का वाचक है ॥ २३७ ॥

[7]गृहा (गृह्णाति धान्यादिकम् इति कः) यह १ पुं० शब्द स्त्री इस १ अर्थ का वाचक है । और न० पुं० गृह शब्द घर इस १ अर्थ का वाचक है ।

[8]आरोहः (आरुह्यते अरोहणम् आरोहति वेति घञ्) यह १ पुं० शब्द नारी की कमर या चूतड़, पर्वत आदि पर चढ़ना, वृक्ष आदि की ऊँचाई इन ३ अर्थों का वाचक है ।

---

१. वरीयान् योगभिच्छ्रेष्ठवरिष्ठेष्वतियूनि च । इति मेदिनी । २. बर्हं पिच्छे दलेऽस्त्रियाम् । इति मेदिनी । ३. ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः । इति विश्वः । ४. निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके । इति विश्वः । ५. प्रग्राहः स्यात्तुलासूत्रे वृषादीनां च बन्धने । इति हैमः । प्रग्रहस्तु तुलासूत्रे बन्द्यां नियमने भुजे । हयादिरश्मौ च सुवर्णे हलिपादपे । इति विश्वः । ६. परिग्रहः कलत्रे च मूलस्वीकारयोरपि । शपथे परिवारे च राहुवक्त्रस्थभास्करे ॥ इत्यजयः । ७. गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि । इति मेदिनी । ८. आरोहस्त्ववरोहे च वरारोहा कटावपि । आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये ॥ इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यूहो वृन्देऽप्य, हिर्वृत्रेऽप्य, ग्नीन्द्वर्कास्तमोपहाः ॥ २३८ ॥
परिच्छदे नृपार्हेऽर्थे परिबर्होऽव्ययाः परे ।
आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥ २३९ ॥
आ प्रगृह्यः स्मृतौ वाक्येऽप्या, स्तु स्यात् कोप-पीडयोः ।
पापकुत्सेषदर्थे कु, धिङ् निर्भर्त्सन-निन्दयोः ॥ २४० ॥
चान्वाचयसमाहारेतरेतरसमुच्चये ।

---

[१]व्यूहः (व्यूहते इति कः व्यूहते वा घञ्) यह १ पुं० शब्द झुण्ड (समूह) सेना की स्थिति-विशेष, रचना, तर्क इन ४ अर्थों का वाचक है ।

[२]अहिः (आहन्ति इतीण् डित् आङो ह्रस्वश्च) यह १ पुं० शब्द सर्प, वृत्र नामक राक्षस इन २ अर्थों का वाचक है ।

[३]तमोपहः (तमोऽपहन्ति इति डः) यह १ पुं० शब्द आग, शशि (चन्द्रमा), रवि (सूर्य), जिन, इन ४ अर्थों का वाचक है ॥ २३८ ॥

[४]परिबर्हः (परिबर्हते परिबर्ह्यते वेति अच् घञ् वा) यह १ पुं० शब्द नृप के छत्र चामर आदि चिह्न, धन, सामग्री इन ३ अर्थों का वाचक है ।

यहाँ से आगे नानार्थवर्ग के अन्त तक सम्पूर्ण शब्द अव्यय हैं ।

आङ् (अतति इन वाहुलकाड् डाङ् प्रत्ययः टिलोपे ग़ुलोपे च) यह १ अव्यय शब्द अल्प (थोड़ा) व्याप्ति (अभिव्याप्ति), सीमार्थ, धातुयोग से उत्पन्न अर्थ इन ४ अर्थों का वाचक है ॥२३९॥

[५]आ (आप्नोति इति क्विप् पृषोदरादित्वात् पलोपे) यह १ प्रगृह्य संज्ञक आ शब्द स्मरण और वाक्यारम्भ इन २ अर्थों का वाचक है ।

[६]आ (आस्ते इति क्विप्, आङ्पूर्वादसतेर्वा) यह १ आ शब्द कोप (क्रोध) पीडा इन २ अर्थों का वाचक है ।

[७]कु (कवते कूयते वेति डुः मितद्र्वादित्वात्) यह १ अव्यय शब्द निन्दा, थोड़ा, पाप इन ३ अर्थों का वाचक है ।

धिक् (धक्कयति इति वाहुलकाड्डिक् दधातेर्वा टिलोपे) यह १ अव्यय शब्द निन्दा अपकार शब्दों से डराना इन २ अर्थों का वाचक है ।

[८]च (चन्दति इति डः) यह १ अव्यय शब्द अन्वाचय—दो का आनुषङ्गिक परस्पर में अन्वय, जैसे—भिक्षामट, गाञ्चानय, समाहार—अनेक पदों का समूह जैसे—संज्ञापरिभाषम्, इतरेतरयोग—मिलित पदों का अन्वय जैसे—धवखदिरौ छिन्धि, समुच्चय—परस्पर अनेक निरपेक्षों का एक में अन्वय जैसे—गणेशं गुरुं च भजस्व । तुल्ययोगिता, कारण, विनियोग इन ७ अर्थों का वाचक है ।

---

१. व्यूहः स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः । इति विश्वः । २. अहिर्वृत्रासुरे सर्पे । इति विश्वः । ३. तमोपहः सहस्रांशुमृगाङ्कजिनवह्निषु । इति विश्वः । ४. परिबर्हस्तु राजार्हवस्तुन्यपि परिच्छदे । इति प्रश्विः । ५. आः प्रगृह्यः स्मृतौ वाक्येऽनुकम्पायां समुच्चये । इति मेदिनी । ६. आः स्मरणेऽप्यकारणे कोपसन्तापयोरपि । इति मेदिनी । ७. कु (पापे चेषदर्थे च) कुत्सायां च निवारणे । इति विश्वः । ८. चः पादपूरणे पक्षान्तरे हेतौ विनिश्चये । इति त्रिकाण्डशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्त्याशीःक्षेमपुण्यादौ, प्रकर्षे लंघनेऽप्यति ॥ २४१ ॥
स्वित् प्रश्ने च वितर्के च, तु स्याद्भेदेऽवधारणे ।
सकृत् सहैकवारे चाप्याराद् दूर-समीपयोः ॥ २४२ ॥
प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः ।
पुनःसहार्थयोः शश्वत्, साक्षात् प्रत्यक्ष-तुल्ययोः ॥ २४३ ॥
खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत ।

---

[१]स्वस्ति (स्वसति स्वस्यति वा क्तिच्) यह १ अव्यय शब्द मंगल, आशीर्वाद, पुण्य, कल्याण इन ४ अर्थों का वाचक है।

[२]अति (अतति इति इन् प्रत्ययः) यह १ अव्यय शब्द अतिशय (प्रकर्ष), लङ्घन इन २ अर्थों का वाचक है।

प्रश्ने वितर्के च— [३]स्वित् (सुष्ठु एति अयति वा क्विप् तुगागमे) यह १ अव्यय शब्द प्रश्न, वितर्क (अनेक पक्षों का विचार) इन २ अर्थों का वाचक है।

[४]तु (तुदति इति डुः) यह १ अव्यय शब्द (अलगाव), निश्चय इन २ अर्थों का वाचक है।

[५]सकृत् (एकवारम् 'एकस्य सकृच्च' इति सुच् एकस्य सकृदादेशे सुचो लोपे) यह १ अव्यय शब्द साथ, १ वार, हमेशा इन ३ अर्थों का वाचक है।

आरात् (आराति इति आङ्पूर्वकात् रधातोः बाहुकादाति प्रत्ययः) यह १ अव्यय शब्द समीप, दूर इन २ अर्थों का वाचक है।

पश्चात् (अवरस्मिन् इति 'पश्चात्' इत्यनेनावरस्य सप्तमी पञ्चमी प्रथमान्तस्य निपातिते सुपो लुकि) यह १ अव्यय शब्द अन्त, पश्चिमदिशा इन २ अर्थों का वाचक है।

[६]उत (ऊयते इति क्तः) यह १ अव्यय शब्द प्रश्न, वितर्क, समुच्चय, विकल्प इन ४ अर्थों का वाचक है।

[७]शश्वत् (शशति इति बाहुलकाद्वत्) यह १ अव्यय शब्द साथ, सदा (नित्य) बारम्बार इन ३ अर्थों का वाचक है।

[८]साक्षात् (सहाक्षेण साक्षः तमतति इति क्विप्) यह १ अव्यय शब्द प्रत्यक्ष, तुल्य इन २ अर्थों का वाचक है ॥ २४३ ॥

[९]वत (वन्यते स्मेति क्तः इडागमाभावे नलोपे च) यह १ अव्यय शब्द दुःख, दया, सन्तोष, आश्चर्य, निमन्त्रण इन ५ अर्थों का वाचक है।

---

१. स्वस्ति मङ्गलाशीर्वादपापनिर्णेजनादिषु । इति भागुरिः । २. अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च । इति विश्वः । ३. स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे । इति मेदिनी । ४. तु पादपूरणे भेदे समुच्चयेऽवधारणे । पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ॥ इति मेदिनी । ५. सकृत् सहैकवारयोः । इत्यजयः । ६. उतापी द्वौ च बाढार्थौ । इत्यजयः । ७. शश्वत् सहसहार्थयोः । इत्यजयः । ८. साक्षात्तुल्यसमक्षयोः । इत्यजयः । ९. वत खेदेऽनुकम्पायां हर्षे सम्बोधनेऽद्भुते । इत्यजयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः ॥ २४४ ॥
प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ।
इति हेतु-प्रकरण-प्रकाशादि-समाप्तिषु ॥ २४५ ॥
प्राच्यां पुरस्तात् प्रथमे पुरार्थेऽग्रत इत्यपि ।
यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे ॥ २४६ ॥
मंगलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ।
वृथा निरर्थकाविध्योर्, नानाऽनेकोभयार्थयोः ॥ २४७ ॥

---

[1]हन्त (हन्ति बाहुलकात्) यह १ अव्यय शब्द प्रसन्नता, अनुकम्पा, वाक्यारम्भ, विषाद इन ४ अर्थों का वाचक है ॥ २४४ ॥

प्रति (प्राति प्रथते वेति बाहुलकाडुतिः) यह १ अव्यय शब्द वीप्सा (व्याप्त करने की इच्छा), प्रतिनिधि = मुख्यसदृश, लक्षण आदि से इत्थंभूताख्यान, भाग, प्रतिदान इन ६ अर्थों का वाचक है ।

[2]इति (एति अंयति वेति क्तिच्) यह १ अव्यय शब्द कारण, प्रकरण, प्रकाश, इस प्रकार, समाप्ति, विवक्षा, कानून (नियम) स्वरूप इन ७ अर्थों का वाचक है ॥ २४५ ॥

[3]पुरस्तात् (पूर्वस्मिन् इत्यस्तातिः, पुरादेशश्च) यह १ अव्यय शब्द पूर्व दिशा, प्रथम भूत (विगत), आगे (पहले) इन ४ अर्थों का वाचक है ।

[4]यावत् तावत् (यत् तत् परिमाणमस्य इति डवतुः, आत्वे च) ये २ अव्यय शब्द सम्पूर्ण—जितना उतना, सीमा अवधि, निश्चय (अवधारणा), परिमाण इन ४ अर्थों के वाचक हैं ॥ २४६ ॥

[5]अथो अथ (अर्थयते इति बाहुलकात् डोः, पृषोदरादित्वात् रलोपश्च) ये २ अव्यय शब्द मङ्गल, पश्चात् [बाद], प्रारम्भ, सवाल (प्रश्न), सम्पूर्ण (कार्त्स्न्य), अधिकार, प्रतिज्ञा, कहे हुए की पुनरावृत्ति करना (दुहराना), समुच्चय, इन ९ अर्थों के वाचक हैं ।

[6]वृथा (वृणोति वृणीते वेति बाहुलकात् थाक्) यह १ अव्यय शब्द निरर्थक (व्यर्थ), विधि से हीन इन २ अर्थों का वाचक है ।

[7]नाना (न इति नञो नाञ्) यह १ अव्यय शब्द अधिक (अनेक), उभय, इन २ अर्थों का वाचक है । अनेकः, उभयः तौ एव अर्थौ ययोः ॥ २४७ ॥

---

१. हन्त वाक्यारम्भखेदविषादहर्षसंभ्रमे । इति मेदिनी । २. इति प्रकरणे हेतौः प्रकाशादिसमाप्तिषु । निदर्शने प्रकारे स्यादनुकर्षे च संमतम् । इति विश्वः । ३. प्राच्यां पुरः पुरस्तादग्रप्रथमव्यतीतेषु । इति वोपालितः । ४. यावत् कार्त्स्न्येऽवधारणे । प्रशंसायां परिच्छेदे मानाधिकारसंभ्रमे । पक्षान्तरे च । इति मेदिनी । ५. अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये ॥ इति मेदिनी । ६. वृथा निष्कारणे वन्ध्ये स्याद्विधिवर्जिते । इति विश्वः । ७. नाना शब्दो विनार्थेऽपि तथानेकोभयार्थयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नु पृच्छायां विकल्पे च, पश्चात् सादृश्ययोरनु ।
प्रश्नावधारणाऽनुज्ञानुनयामन्त्रणे ननु ॥ २४८ ॥
गर्हा—समुच्चय—प्रश्न—शङ्का—सम्भावनास्वपि ।
उपमायां विकल्पे वा, सामि त्वर्धे जुगुप्सिते ॥ २४९ ॥
अमा सह समीपे च, कं वारिणि च मूर्धनि ।
इवेत्थमर्थयोरेवं, नूनं तर्केऽर्थनिश्चये ॥ २५० ॥

---

[1]नु (नुदति नौति वेति डुः) यह १ अव्यय शब्द विकल्प, वितर्क, प्रश्न इन ३ अर्थों का वाचक है।

[2]अनु (अनिति इति बाहुल्कादुः यह १ अव्यय शब्द पीछे (पश्चात् , बाद), समानता (सादृश्य), भाग, लक्षणा, वीप्सा, तत्त्वाख्यान, लम्बाई इन ७ अर्थों का वाचक है।

[3]ननु (न नुदति इति डुः टिलोपे च) यह १ अव्यय शब्द आज्ञा, वाक्यारम्भ, प्रश्न, आक्षेप, अवधारणा, आमन्त्रण, जवाब (उत्तर), इन ७ अर्थों का वाचक है ॥ २४८ ॥

[4]अपि (न पियति इति क्विप् तुगभावः आगमशास्त्रस्यानित्यत्वात्) यह १ अव्यय शब्द प्रश्न, संभावना, निन्दा, आक्षेप, समुच्चय, शंका, युक्तवस्तु, इष्टप्रश्न इन ८ अर्थों का वाचक है।

[5]वा (वाति इति क्विप्) यह १ अव्यय शब्द विकल्प, उपमा, समूह इन ३ अर्थों का वाचक हैं।

सामि (सामयति इति इः) यह १ अव्यय शब्द अर्धभाग (आधा), निन्दित इन २ अर्थों का वाचक है ॥ २४९ ॥

अमा (न माति इति नञ्पूर्वकान्मातेः क्विप्) यह १ अव्यय शब्द समीप (पास), साथ इन २ अर्थों का वाचक है।

[6]कम् (कम्यते इति विच्) यह १ अव्यय शब्द जल, मस्तक, मुँह (मुख) इन ३ अर्थों का वाचक है।

[7]एवम् (ए इत्यं वमति इति विच्) यह १ अव्यय शब्द सदृश, इस प्रकार, उपदेश आदि, निश्चय, स्वीकार, निर्देश इन ६ अर्थों का वाचक है।

नूनम् (नुवा स्तुत्या नमति इति विच्) यह १ अव्यय शब्द तर्क, अर्थ का निश्चय करना इन २ अर्थों का वाचक है ॥ २५० ॥

---

१. नु स्यात्प्रश्ने विकल्पार्थेऽप्यतीतानुनयार्थयोः। इति विश्वः। २. अनुहीने सहार्थे च पश्चात्सादृश्ययोरपि। आयामे च समीपे च लक्षणादावनुक्रमे। इति विश्वः। ३. ननु प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे। आमन्त्रणे चापि ननु। इति विश्वः। ४. अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये। तथायुक्तपदार्थे च कामचारक्रियासु च ॥ इति विश्वः। ५. वा स्याद्विकल्पोपमयोर्वितर्के पादपूरणे समुच्चये च। इति मेदिनी। वास्याद्विकल्पोपमयोरेवार्थे च समुच्चये। इति विश्वः। ६. कम् शिरः सुखवारिषु। इति विश्वः। कम् पादपूरणे तोये। इति मेदिनी। ७. एवं प्रकारोपमयोरङ्गीकारेऽवधारणे। इति धरणिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तूष्णीमर्थे सुखे जोषं, किं पृच्छायां जुगुप्सने।
नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने ॥ २५१ ॥
अलं भूषण-पर्याप्ति-शक्ति-वारण-वाचकम्।
हुं वितर्के परिप्रश्ने, समयाऽन्तिक-मध्ययोः ॥ २५२ ॥
पुनरप्रथमे भेदे, निर्निश्चय-निषेधयोः।
स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा ॥ २५३ ॥

---

[1]जोषम् (जुष्यते इति बाहुलकादमि) यह १ अव्यय शब्द न बोलना (मौन), सुख इन २ अर्थों का वाचक हैं।

[2]किम् (कूयते कवनं वेति बाहुलकाड्डिम्, कायतेः डिमिः वा) यह १ अव्यय शब्द सवाल (प्रश्न), निन्दा इन २ अर्थों का वाचक है।

[3]नाम (नामयति नाम्यते वेति डः) यह १ अव्यय शब्द प्रकट, नाम, द्वेषपूर्वक स्वीकार करना, निन्दा, संभावना के योग्य, झूठा, क्रोध, विस्मय, इन ७ अर्थों का वाचक है ॥ २५१ ॥

[4]अलम् (अलति इति बाहुलकादम्) यह १ अव्यय शब्द आभूषण, पर्याप्ति, ताकत (शक्ति), रोकना (मना करना), व्यर्थ इन ५ अर्थों का वाचक है।

हुम् (हूयते इति बाहुलकान्मः) यह १ अव्यय शब्द भय, वितर्क, डरना, प्रश्न, अनिच्छा इन ५ अर्थों का वाचक है।

समया (समेति इति समिण्विकपिभ्याम्. इति आप्रत्यये गुणे अयादेशे) यह १ अव्यय शब्द मध्य (बीच), नजदीक (समीप) इन २ अर्थों का वाचक है ॥ २५२ ॥

[5]पुनः (पनते इति बाहुलकादरः अकारस्योकारः) यह १ अव्यय शब्द दूसरी बार (फिर) भेद विशेष इन २ अर्थों का वाचक है।

[6]निः (नृणाति इति क्विप् इत् च) यह १ अव्यय शब्द निषेध, निश्चय इन २ अर्थों का वाचक है।

[7]पुरा (पुरति बाहुलकात् का कित्वाद् गुणाभावे) यह १ अव्यय शब्द अविच्छेदेन कार्य का होना, बहुत दिन पहले, आगामी समीप समय, प्रबन्ध इन ४ अर्थों का वाचक है ॥ २५३ ॥

---

१. जोषं सुखे प्रशंसायां तूष्णीं लङ्घनयोरपि। इति मेदिनी। २. किम् कुत्सायां वितर्के च निषेधप्रश्नयोरपि। इति मेदिनी। ३. नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च। संभाव्यकुत्साप्राकाश्य-विकल्पेष्वपि दृश्यते ॥ इति मेदिनी। ४. अलं भूषणपर्याप्तिवारणेषु निरर्थके। अलं शक्तौ च निर्दिष्टम्। इति विश्वः। ५. पुनरप्रथमे मतम्। अधिकारे च भेदे च तथा पक्षान्तरेऽपि च। इति मेदिनी। ६. निर्निश्चये क्रान्ताद्यर्थे निःशेषनिषेधयोः। इति विश्वः। ७. पुरा पुराणे निकटे प्रबन्धातीतभाविषु। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊरयूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।
स्वर्गे परे च लोके स्व, वार्ता-सम्भाव्ययोः किल ॥ २५४ ॥
निषेधवाक्यालङ्कार—जिज्ञासाऽनुनये खलु ।
समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ॥ २५५ ॥
नाम-प्राकाश्ययोः प्रादु, र्मिथोऽन्योन्यं रहस्यपि ।
तिरोऽन्तर्धौ तिर्यगर्थे, हा विषादशुगर्तिषु ॥ २५६ ॥
अहहेत्यद्भुते खेदे, हि हेताववधारणे ॥ २५७ ॥

[1]ऊररी, ऊरी, उररी (ऊयते इति बाहुलकाद्ररीक् यलोपे रीक् च, वयतेः ररीक् सम्प्रसारण-पूर्वरूपे) ये ३ अव्यय शब्द विस्तार, स्वीकार इन २ अर्थों के वाचक है।

स्वः (स्वरति इति विच्) यह १ अव्यय शब्द परलोक, स्वर्ग इन २ अर्थों का वाचक है।

[2]किल (किलति इति कः) यह १ अव्यय शब्द बात (वार्ता), कारण, असत्य, सम्भावना के योग्य, अरुचि इन ५ अर्थों का वाचक है ॥ २५४ ॥

[3]खलु (खलति इति बाहुलकादुः) यह १ अव्यय शब्द जानने की अभिलाषा, वाक्यालङ्कार, अनुनय, निषेध इन ४ अर्थों का वाचक है।

अभितः (पर्यभिभ्यां च इति अभिशब्दात्तसिल्) यह १ अव्यय शब्द समीप, शीघ्र, दोनों तरफ, सम्पूर्ण, सामने इन ५ अर्थों का वाचक है ॥ २५५ ॥

प्रादुः (प्रान्दाति इति बाहुलकादुस् नुमभावश्च) यह १ अव्यय शब्द संज्ञा (नाम), प्रकट इन २ अर्थों का वाचक है।

मिथः (मेथति इति असुन् ह्रस्वश्च) यह १ अव्यय शब्द आपस में निर्जन (एकान्त) इन २ अर्थों का वाचक है।

तिरः (तरति इति असुन् गुणविषये इरादेशे) यह १ अव्यय शब्द प्रच्छन्न होना (छिपना), तिरछा इन २ अर्थों का वाचक है।

[4]हा (जहाति इति क्विप्) यह १ अव्यय शब्द दुःख, शोक, विषाद इन ३ अर्थों का वाचक है ॥ २५६ ॥

[5]अहह (अहं जहाति जिहीते इति डः मलोपे च पृषोदरादित्वात्) यह १ अव्यय शब्द खेद (दुःख), अद्भुत इन २ अर्थों का वाचक है।

[6]हि (हिनोति इति विच् गुणाभावः तुगभावश्च) यह १ अव्यय शब्द कारण, निश्चय इन २ अर्थों का वाचक है ॥ २५७ ॥ इत्यनेकार्थवर्गः ॥

१. ऊररी चोररी चोरी विस्तारेऽङ्गीकृते त्रयम् । इत्यजयः । २. किलशब्दस्तु वार्तायां संभाव्यानुनयार्थयोः । इति विश्वः । वार्तायामरुचौ किल । इति त्रिकाण्डशेषः । ३. खलु स्याद्वाक्यभूषायां जिज्ञासायां च सान्त्वने । वी[illegible]प्सामाननिषेधेषु पूरणे पादवाक्ययोः ॥ इति मेदिनी । ४. हा विषादे च शोके च कुत्सा-दुःखार्थयोरपि । इति मेदिनी । ५. अहहेत्यद्भुते खेदे परिक्लेशप्रहर्षयोः । सम्बोधने पि । इति मेदिनी । ६. हि पादपूरणे हेतौ विशेषेऽप्यवधारणे । प्रश्ने हेत्वपदेशे च संभ्रमासूययोरपि । हि दुःखहेतावाख्यातो विषादे विस्मयेऽपि च । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. अथ अव्ययवर्गः

चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ।
मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत् समाः ॥ १ ॥
स्राग्झटित्यञ्जसाऽह्नाय द्राङ् मङ्क्षु सपदि द्रुते ।
बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥

---

४. अथाव्ययवर्गः

[1]चिराय (चिरमयते चिरपूर्वात् अयतेः कर्तरि अण्) [2]चिररात्राय (चिरा रात्रयः इति अचि चिररात्राः तान् अयते इति अणि) [3]चिरस्य (चिरमस्यति, चिरपूर्वात् अस्यतेः कर्तरि ण्यति वृद्ध्यभावे पररूपे च) इन ३ अव्यय शब्दों का दीर्घकाल १ अर्थ है । चिरोऽर्थो येषामिति । आदय पद से—चिरम्, चिरेण, चिरात् चिरे का परिग्रह होता है ।

[4]मुहुः (मोहनम् मुह्यतेः कर्तरि बाहुलकात् उसि), पुनः पुनः पवते कर्तरि बाहुलकात् अरि वीप्सायां पुनः शब्दस्य द्वित्वे च), [5]शश्वत् (शशतीति वति प्रत्यये), अभीक्ष्णम् (अभिक्ष्णौति अभिपूर्वकात् क्ष्णौतेः डमिः दीर्घे च), असकृत् (न सकृत् असकृत्) ये ५ अव्यय शब्द वारम्बार १ अर्थ के है । समा = तुल्यार्थाः स्युः ॥ १ ॥

द्रुते शीघ्रार्थे स्युरिति सम्बन्धः— [6]स्राक् (स्रवति इति बाहुलकात् कर्तरि डाक्) [7]झटिति (झटनम् इति भावे संपदादित्वात् क्विपि झट् तामेतीति कर्तरि क्तिचि), [8]अञ्जसा (अञ्जनम् इति भावे पचाद्यचि तं स्यति सायति वा क्विपि), [9]अह्नाय (ह्नवनम् इति अपनयनार्थकह्नुङ्धातोः भावे घञि वृद्धौ अवादेशे पृषोदरादित्वात् वस्य यः, नञ्समासे च), [10]द्राङ् (द्राणम् क्विपि, द्राति वा इति कः, तामकतीति क्विपि), [11]मङ्क्षु (मज्जतीति बाहुलकात् सुप्रत्यये, नुमागमे, सलोपे, कुत्वे, षत्वे कषोः संयोगे क्षत्वे), [12]सपदि (संपद्यते इति इन् पृषोदरादित्वात् समोऽन्त्यलोपे च) ये ७ अव्यय शब्द शीघ्र अर्थ के वाचक हैं ।

निर्भरे अतिशयार्थे इति सम्बन्धः—[13]बलवत् (बलमस्यास्ति इति मतुपि यस्य बत्वे च) [14]सुष्ठु (सुतिष्ठतीति सुपूर्वकात्तिष्ठतेः कर्तरि कुः, षत्वे च) [15]किमुत (किम् च तद् उत च) [16]सु (स्रवनम् स्रवति वा भावे कर्तरि वा क्विपि तुगागमाभावे च) [17]अति (अतति इति कर्तरि इनि, अति च इव च इति [18]अतीव) ये ६ अव्यय शब्द अतिशय (अत्यधिक) के वाचक हैं ॥ २ ॥

---

१. चिराय सन्तर्प्य समिद्भिरग्निम् । २. चिररात्राय सञ्चितं मधु मक्षिकाभिः । ३. चिरस्य दृष्टैव मृतोत्थितेव । ४. मुहुः पश्यसि कौन्तेय । ५. शश्वच्छान्तिं निगच्छति । ६. यथा—स्राग्वयो याति देहिनाम् । ७. वृक्षं झटित्यरुरोह वानरः । ८. अञ्जसा याति तुरगः । ९ अह्नाय सूर्येण नभो निरस्तम् । १०. द्राग् भविष्यति ते प्रिये । ११. मङ्क्षूदपाति सरितः पटलैरलीनाम् । १२. वचसस्तस्य सपदि क्रिया केवलमुत्तरम् । १३. यथा—पुनर्वशित्वाद् बलवन्निगृह्य । १४. सुष्ठु पीतं मया घृतम् । १५. किमुतावर्द्धितं क्षेत्रम् । १६. सुपक्वं कदलीफलम् । १७. अतिवर्षति तोयदः । १८. अतीव शोभते राजा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने।
यत्तद्यतस्ततो हेता,—वसाकल्ये तु चिच्चन ॥ ३ ॥
कदाचिज्जातु, सार्धं तु साकं सत्रा समं सह।
आनुकूल्यार्थकं प्राध्वं, व्यर्थके तु वृथा मुधा ॥ ४ ॥

वर्जने वर्जनार्थे स्युरिति सम्बन्धः— [१]पृथक् (पर्थयति इति प्रक्षेपार्थकपृथधातोः ककि प्रथयति कित्वात् सम्प्रसारणे) [२]विना (असहायार्थे वर्तमानेन विशब्देन ना प्रत्यये), [३]अन्तरेण (अन्तरेति अन्तः-पूर्वकात् एतेः कर्तरि णप्रत्यये गुणे च) [४]ऋते (ऋतीयते इति ऋतिः सौत्रो धातुः तस्मात् केप्रत्ययः) [५]हिरुक् (हिनोति इति गत्यर्थकहिधातोः रुकक् प्रत्यये) [६]नाना (पृथक् भावे वर्तमानेन नञ्शब्देन नाञ् प्रत्यये वृद्धौ च) ये ६ अव्यय शब्द वर्जनार्थक हैं।

हेतौ कारणे यत्तदाद्याः स्युरिति सम्बन्धः— [७]यत् (यच्छति इति यमेः कर्तरि क्विपि, अनुनासिक-लोपे तुगागमे च), [८]तत् (तनोति इति तनोतेः कर्तरि क्विपि नलोपे तुगागमे च), [९]यतः (यस्मात् इति तसिल् त्यदाद्यत्वे च), [१०]ततः (तस्मादिति तसिल्) ये ४ अव्यय शब्द हेत्वर्थक हैं।

असाकल्ये असम्पूर्णे–चित् चन इमौ स्यातामिति सम्बन्धः–[११]चित (चेतति इति चितेः कर्तरि क्विपि तुगागमे च) [१२]चन (चनति इति चनेः कर्तरि पचाद्यचि) ये दो अव्यय शब्द असम्पूर्ण के वाचक हैं ॥३॥

[१३]कदाचित् (कस्मिन् काले इति दा प्रत्यये किमः कादेशे च कदा, चेततीति क्विपि तुकि चित् कदा च चिच्चेति अनयोः समाहारः), [१४]जातु (जायति इति जैक्षयेधातोः बाहुलकात्तुनि) ये दो अव्यय शब्द किसी काल विशेष के वाचक हैं।

[१५]सार्धम् (सह अर्धित्वा इति आभीक्ष्ण्ये णमुलि गुणे सहस्य सादेशे दीर्घे च)[१६]साकम् (सह अकनम् सहपूर्वकात् अकेर्भावे अमि णमुलि वा सादेशे च)[१७]सत्रा (सह त्रायते इति सहपूर्वकात् त्रैङ्-धातोः कर्तरि क्विपि आत्वे सादेशे च)[१८]समम् (समति इति समेः कर्तरि बाहुलकात् अमि)[१९]सह (सहते इति सहधातोः कर्तरि पचाद्यचि) ये ५ अव्यय शब्द सहार्थक (साथ अर्थ को कहते) हैं।

आनुकूल्यार्थकम्—[२०]प्राध्वम् (प्राध्वनति प्र+आङ्पूर्वकात् ध्वनेः कर्तरि बाहुलकाड्डमि. यह एक अव्ययशब्द अनुकूलता का वाचक है।

व्यर्थके—वृथा मुधा च इमौ स्याताम् इति सम्बन्धः–[२१]वृथा (व्रियते इति थाकि)[२२]मुधा (मुह्यति इति कर्तरि काप्रत्यये गुणाभावे पृषोदरादित्वात् ह्रस्य धत्वे) ये दो अव्यय शब्द व्यर्थ के वाचक हैं ॥ ४ ॥

---

१. किञ्चिद्दत्त्वा पृथक् क्रिया। २. विना वातं विना वर्षं विद्युतः पतनं विना। विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ॥ ३. अन्तरेण सुतं नास्ति सुखं संसारिणां भुवि। ४. ऋते ज्ञानान्न मुक्तिः। ५. हिरुक् कर्म न मोक्षः। ६. विष्णुं नाना नास्ति मोक्षदो देवः। ७ यत्–यन्न रम्यं तरस्त्रिभ्यः। ८. तदिदं रक्ष शोभने। ९. यतो गङ्गाम्भसि स्नातः। १०. ततो निष्कल्मषो भवेत्। ११. कश्चित् कान्ताविर-हगुरुणेत्यादि। १२. ततः कञ्चन नाश्रयेत्। १३. कण्डूयमानेन कटं कदाचित् १४. ज्ञायन्ते जातु सत्तमम्। १५ सार्धं दानवैरिणा। १६. पत्न्या साकं पतिर्भुङ्क्ते। १७. सत्रा कलत्रेण सुखं समश्नुते। १८. समं वधूभिस्तरुणा रमन्ते। १९. पुत्रेण सहागतः पिता। सजूः सहार्थे इति त्रिकाण्डशेषात् सजुष्शब्दोपि सहा-र्थकः तेन 'सजूः सख्या गन्तव्य' इत्युपपन्नम्। २०. प्राध्वं तु प्रणते चातिदूरे वर्त्मनि बन्धने। विश्वनाथो गुरुं प्राध्वं प्रणमति। २१. पञ्च यज्ञा वृथा तस्य नीलवस्त्रस्य धारणात्। २२. मुधा बुधा भ्रमन्त्यत्र।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आहो उताहो किमुत विकल्पे किं किमूत च।
तु हिं च स्म वै पादपूरणे, पूजने स्वती ॥ ५ ॥
दिवाह्नीत्यथ दोषा च नक्तं च रजनाविति।
तिर्यगर्थे साचि तिरोऽप्य,थ सम्बोधनार्थकाः ॥ ६ ॥

विकल्पे = विकल्पार्थे स्युरिति सम्बन्धः[१]—आहो (आहन्तीति आङ्पूर्वकात् हन्तेः कर्तरि डोप्रत्यये डित्वाट्टिलोपे च) [२]उताहो (उत च आहो च अनयोः समाहारः) [३]किमुत (किमु च उत अनयोः समाहारः) [४]किम् (कानम् कायतेर्भावे बाहुलकाड्डिमौ) [५]किमु (किम् च उ च अनयोः समाहारः [६]उत (ऊयते इति उङ् धातोः कर्मणि क्ते) ये ६ अव्यय शब्द वितर्क के वाचक हैं।

पादपूरणार्थे स्युरिति सम्बन्धः— [७]तु (तुदतीति बाहुलकाड्डु प्रत्यये), [८]हि (हिनोतीति कर्तरि क्विप् तुगभावे च), [९]च(चनतीति डप्रत्यये टिलोपे च), [१०]स्म (स्मयते स्मिङः कर्तरि डे , [११]ह (हन्तीति हनेः कर्तरि डे), [१२]वै (वातीति कर्तरि डे) ये ६ अव्यय शब्द पादपूरणार्थक हैं।

एतौ पूजने अर्चने स्यातामिति सम्बन्धः—[१३]सु (सवति सुधातोः डु प्रत्यये)[१४]अति (अतति इति इनिः) सु च अति चेति स्वती—ये दो अव्यय शब्द पूजनार्थक हैं ॥ ५ ॥

अह्नि दिवसे इत्यर्थे—[१५]दिवा (दीव्यन्त्यत्र इति आधारे बाहुलकात् कात्यये) यह अव्यय शब्द दिन का वाचक है।

अथ—[१६]दोषा (दुष्यन्त्यत्र इति दुषधातोः आधारे आप्रत्यये गुणे च), [१७]नक्तम् (नज्जति इति तमु प्रत्यये पृषोदरादिः सलोपे कुत्वे चर्त्वे च) ये दो अव्यय शब्द रात्रि के वाचक हैं।

तिर्यगर्थे = कुटिलार्थे—[१८]साचि (सचनम् सचेर्भावे इति वृद्धौ) [१९]तिरः (तरणम् इति भावे असुनि इरादेशे च) ये दो अव्यय शब्द कुटिल अर्थ के वाचक हैं। अनन्तरं पाट् आदयः सम्बोधनार्थकाः ॥६॥

---

१. देवः आहो गन्धर्वः। विकल्पे विस्मयेप्यहो। इति रुद्रः। अहो ह्रस्वादिरपि। २. उताहो ब्रह्म चोच्यते। ३. किमुतातिशये प्रश्ने विकल्पे च प्रयुज्यते। इति विश्वः। ४. स्थाणुरयं किं पुरुषः। ५. किमु सम्भावनायां विमर्शे चापि दृश्यते।—यथा गृहं किमु वनं गतः। ६. उत प्रश्ने वितर्के च उताव्यर्थविकल्पयोः। इति विश्वः। ७. रामस्तु लक्ष्मणं प्राह। ८. अहं हि याम्ये नगरं मनोज्ञे। ९. स च प्राह राजानम्। १०. मया स्म भुक्तं सुचिरं सुराज्यम्। ११. ह स्यात् सम्बोधने पादपूरणे विनिग्रहे। नियोगे क्षिपायां च कुत्सायामपि दृश्यते॥ इति मेदिनी। १२. हतो वै रामचन्द्रेण रावणो लोकरावणः। १३. सु पूजायां भृशार्थे सु मतिकृच्छ्रसमृद्धिषु। इति मेदिनी। सुस्तुतो देवदेवेशः शिवया सहितो हरः। १४. अत्युत्तमो हि देवानां विष्णुः सर्वगुहाशयः। १५. दिवानिशं तप्यति मर्मताडितः। १६. दोषा रात्रिमुखे रात्रावव्यानव्ययमप्यसौ। १७. नक्तं दोषा च रजनी। १८. साचिः स्त्रीलिङ्गापि भित्तौ साची परिणतमुखी। कृतं साचि धनुस्तेन। तिर्यक् साचिरपि स्त्रियाम्। इति रत्नकोशः। १९. तिरो गत्वा समीक्षते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्युः प्याट्पाडङ्ग हे है भोः समया निकषा हिरुक् ।
अतर्किते तु सहसा, स्यात् पुरः पुरतोऽग्रतः ॥ ७ ॥
स्वाहा देवहविर्दाने श्रौषट् वौषड् वषट् स्वधा ।
किञ्चिदीषन्मनागल्पे, प्रेत्याऽमुत्र भवान्तरे ॥ ८ ॥

सम्बोधनार्थकाः स्युरिति पूर्वेणान्वयः—[1]पाट् (पाव्यति इति पटेर्णिजन्तात् कर्तरि क्विपि णिलोपे च) [2]प्याट् (प्यायते प्यैङ् धातोः कर्तरि बाहुलकात् ट् प्रत्यये आत्वे च) [3]अङ्ग (अङ्गति अङ्गेः कर्तरि पचाद्यचि) हे (हिनोतीति विचि गुणे च.) [5]है (हन्तीति डै डित्वाट्टिलोपे च) [6]भोः (भातीति डोन् प्रत्यये टिलोपे च) ये ६ अव्ययं शब्द सम्बोधनार्थक हैं ।

[7]समया (समयनम् सम् पूर्वकात् इण् धातोः भावे आ प्रत्यये गुणे अयादेशे च), [8]निकषा (निकषणम् निपूर्वकात् कषेर्भावे आ प्रत्यये) [9]हिरुक् (हिनोतीति, कर्तरि रुकि) ये ३ अव्यय शब्द सामीप्य के वाचक हैं ।

अतर्किते—सहसा (सहते इति बाहुलकात् सा प्रत्यये) यह एक अव्यय शब्द बिना विचारे (एकाएक) का वाचक है ।

[10]पुरः (पूर्वस्मिन् इति अस्तात्यर्थे असि प्रत्यये पुरादेशे रुत्वे विसर्गे च) [11]पुरतः (पुरति इति अतसुकि) [12]अग्रतः (अग्रे इति तसि प्रत्यये) ये तीन अव्यय शब्द अग्रार्थक हैं ॥ ७ ॥

देवहविर्दाने–[13]स्वाहा (स्वादतेऽनेन स्वादेः कर्तरि बाहुलकात् आप्रत्यये पृषोदरादित्वात् दस्य हः, हुञ् आहूयतेऽनेन वेति विग्रहे डा प्रत्यये स्वाहेत्यव्ययस्य सिद्धिः) [14]श्रौषट् (श्रूयतेऽनेन वा श्रु-धातो बाहुलकात् डौषट्प्रत्यये टिलोपे च) [15]वौषट् (उह्यतेऽनेन वेति डौषटि, [16]वषट् इत्यस्य डषटि प्रत्यये सिद्धिः) [17]स्वधा (स्वद्यतेऽनेन स्वदेः करणे बाहुलकात् आ प्रत्यये पृषोदरादित्वात् दस्य धत्वे) ये ४ अव्यय शब्द देवतोद्देश्यक द्रव्य त्याग करने में प्रयुक्त होते हैं ।

अल्पे—[18]किञ्चित् (किम च चिच्च अनयोः समाहारः) [19]ईषत् (ईषणम् ईषतेर्भावे बाहुलकात् अतिप्रत्यये) [20]मनाक् (मननम् इति भावे आकि प्रत्यये) ये तीन अव्यय शब्द अल्पार्थक है ।

भवान्तरे = जन्मातरे—[21]प्रेत्य (प्रकर्षेण इत्वा इति समासे, ल्यबादेशे, तुगागमे च) [22]अमुत्र (अमुष्मिन् इति अदःशब्दात् त्रलि त्यदाद्यत्वे, पररूपे, उत्वे, मत्वे च) ये दो अव्यय शब्द जन्मान्तरार्थक हैं ॥ ८ ॥

१. पाट् भीम यशं रक्षस्व । २. प्याट् पार्थ जयद्रथं पश्य । ३. अङ्ग देव दयां कुरु । ४. हे राम तव दासोस्मि । ५. है अम्ब मां सन्निधेहि । ६. क्षमस्व भो दुराराध्य । ७. यथासमया ग्रामं नदी वहति । ८. निकषान्तिकमध्ययोः । इति मेदिनी । यथा—विलङ्घ्य लंकां निकषा हनिष्यति । ९. हिरुग् रामं गतो भरतः । १०. पुरः पश्यसि किं बाले । ११. पुरतः संस्थाप्य सर्वेशम् । १२. ददर्श राजा…… गानग्रतः प्रस्रविणीम्…… ”। इति रघु० । १३. यथा—विष्णवे स्वाहा । १४. महादेवाय श्रौषट् । १५. वासुदेवाय वौषट् । १६. बलारातये वषट् । १७. पितृदाने स्वधा मता । तेन—पितृभ्यः स्वधा । १८. किञ्चित् विकसितं पुष्पम् । १९. ईषदुष्णं पयः पिब । २०. मनाग् विहस्य सन्तुष्टो बभूव । २१. प्रेत्य स्वर्गे महीयते । २२. इहामुत्र च फलं श्रेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च वा यथा तथैवैवं साम्येऽहो ही च विस्मये।
मौने तु तूष्णीं तूष्णीकां, सद्यः सपदि तत्क्षणे ॥ ९ ॥
दिष्ट्या समुपजोषं चेत्यानन्देऽथान्तरेऽन्तरा।
अन्तरेण च मध्ये स्युः, प्रसह्य तु हठार्थकम् ॥ १० ॥

साम्ये = तुल्यार्थे— [१]व (वाति वानं वेति भावे वा डटिलोपे च) [२]वाः (वाति वानं वेति क्विपि) [३]यथा (येन, प्रकारेणेति थालि त्यदाद्यत्वे च) [४]तथा (तेन प्रकारेण इति थालि त्यदाद्यत्वे च) [५]एव (अयनम् इति इण्धातोः भावे वनि गुणे च) [६]एवम् (अयनम् इति एतेर्भावे वमि गुणे च। वक्ति गुणाभावे इव) ये ६ अव्यय शब्द समान अर्थ के वाचक हैं।

विस्मये अहो ही च स्याताम् इति सम्बन्धः—[८]अहो (अहानम् इति नञ्पूर्वकात् हाङो भावे डो प्रत्यये) [९]ही (हननम् इति हन्धातोः बाहुलकात् भावे डीप्रत्यये टिलोपे च) ये दो अव्यय शब्द विस्मयार्थक हैं।

मौने = अभाषणे—तूष्णीं तूष्णीकाम् स्याताम् इति सम्बन्धः—[१०]तूष्णीम् (तोषणम् तुष्यतेर्भावे नामि प्रत्यये उपधाया ऊदादेशे च)[११]तूष्णीकाम् (तूष्णीमेव इति काम्प्रत्यये मित्त्वादन्त्याचः परः) ये दो अव्यय शब्द अभाषणार्थक हैं।

तत्क्षणे—[१२]सद्यः (समानेऽहनि इति विग्रहे निपातनात्),[१३]सपदि (संपद्यते इति सम् पूर्वकात् पद्यतेराधारे इनि) ये दो अव्यय शब्द तत्काल के वाचक हैं। स चासौ क्षणश्च इति ॥ ९ ॥

आनन्दे—[१४]दिष्ट्या (देशनम् संपदादित्वात् क्विपि दिक्, तां सत्यायति इति दिक्पूर्वात्सत्यायतेः कर्तरि क्विपि षत्वे पृषोदरादित्वात् सलोपे ष्टुत्वे जश्त्वाभावे च) [१५]समुपजोषम् (समुपजोषणम् इति समुपूर्वकात् जुषतेर्भावे अमि प्रत्यये गुणे च) ये दो अव्यय शब्द कल्याणार्थक हैं।

अथ = अनन्तरम् मध्ये = मध्यार्थे—[१६]अन्तरे (अन्तरपूर्वकात् इण्धातोः कर्तरि विचि गुणे च) [१७]अन्तरा (डाचि)[१८]अन्तरेण (णेप्रत्यये गुणे च) ये तीन अव्यय शब्द मध्यार्थक हैं।

हठार्थकम् = हठोऽर्थो यस्य इति। [१९]प्रसह्य (प्रकर्षेण सोढ्वा इति प्रपूर्वकात् सहतेर्भावे क्त्वाप्रत्यये ल्यबादेशे च) यह एक अव्यय शब्द हठार्थक है ॥ १० ॥

---

१. वं प्रचेतसि जानीयात् इवार्थे तु तदव्ययम्। इति मेदिनी। यथा—शरच्चन्द्रो व ते यशः। २. मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम, म्रियमाणौ व तौ दृष्ट्वा मङ्किस्तत्रेदमब्रवीत्। विषधरो वा चुक्रोध मेघनादो महाबलः। ३. यथा बुभुक्षितस्यान्नम्। ४. तथैवार्तस्य चौषधम्। ५. एवौपम्ये परिभवे ईषदर्थे। इति हैमः। ६. अग्निरेवं द्विजो भाति रामान्तिकमुपागतः। ७. छायेव तां भूपतिरन्वगच्छत्। इति रघुः। ८. यथा—अहो अलं पुण्यतमं मधोर्वनम्। ९. ही विचित्रो विपाकः। १०. तूष्णीं स्थित्वा क्षणं रामो जगाम गुरुसन्निधौ। ११. तूष्णीकामासने रामः स्थित्वा दध्यौ महेश्वरम्। १२. सद्यो हतः समुत्तस्थौ। १३. ध्यात्वा सपदि तं रामं वाणं जग्राह लक्ष्मणः। १४. यथा–दिष्ट्या ते दर्शनं जातमुत्तमम्। १५. समुपजोषं समीपं ते दर्शनं जातमुत्तमम्। १६. अनयोरन्तरे तिष्ठ। १७. त्वां मामन्तरा हरिः। १८. नारद-पर्वतयोरन्तरेण कमण्डलुः। १९. प्रसह्य सिंहः किल तां चकर्ष।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युक्ते द्वे साम्प्रतं स्थाने,ऽभीक्ष्णं शश्वदनारते ।
अभावे नह्यनो नापि, मास्म माऽलं च वारणे ॥ ११ ॥
पक्षान्तरे चेद्यदि च, तत्त्वे त्वद्धाञ्जसा द्वयम् ।
प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते ॥ १२ ॥

युक्ते = उचितार्थे द्वे स्यातामिति सम्बन्धः—१साम्प्रतम् (सम्प्रतनम् इति सम्प्रपूर्वकात् तनोतेर्भावे डमि प्रत्यये पृषोदरादित्वात् समुपसर्गस्य दीर्घे च), २स्थाने (स्थानस्य करणम् इति स्थानशब्दात् तत्करोतीति णिजन्ताद् भावे ए प्रत्यये णिलोपे च) ये दो अव्यय शब्द युक्तार्थक हैं ।

अनारते = निरन्तरे—३अभीक्ष्णम् (अभिक्ष्णवनम् क्षणु तेजने धातोर्डमि प्रत्यये पृषोदरादित्वादमे-दीर्घः) ४शश्वत् (शशनम् इति विग्रहे शशु प्लुतगतौ धातोः भावे वति प्रत्यये) ये दो अव्यय शब्द निरन्तरार्थक हैं ।

अभावे—५नहि (नह्यति इति णह धातोः कर्तरि इनिः) ६अ (अवतीति कर्तरि डप्रत्यये टिलोपे च) ७नो (नह्यतीति डो प्रत्यये) ८न (नह्यतीति ड प्रत्यये) ये चार अव्यय शब्द अभावार्थक हैं ।

वारणे = निषेधार्थके— ९मास्म (मा च स्म च अनयोः समाहारे)१०मा (मानम् इति माधातोः भावे सम्पदादित्वात् क्विपि)११अलम् (अलनम् इति अलधातोः भावे अमिप्रत्यये) ये तीन अव्यय शब्द निषेधार्थक हैं ॥ ११ ॥

पक्षान्तरे = विकल्पार्थे—१२चेत् (चेतति इति कर्तरि विचि गुणे च १३यदि (यतनम् इति यतेर्भावे इनि पृषोदरादित्वात् तस्य दत्वे च) ये दो अव्ययशब्द विकल्पार्थक हैं ।

तत्त्वे = यथार्थे–१४अद्धा (अतनम् संपदादिः क्विपि अत् अतं सततगमनं धयति दधाति वा अत्पूर्वकात् धयतेः दधातेर्वा कर्तरि विचि) १५अञ्जसा (अञ्जनम् भावे पचाद्यचि अञ्जः तं स्यति सायति वा इति कर्तरि क्विपि) ये दो अव्यय शब्द यथार्थ के वाचक हैं ।

प्राकाश्ये = स्फुटार्थे–१६प्रादुः (प्राप्ति प्रपूर्वात् अत्तेः कर्तरि उसि दीर्घे च) १७आविः (आवते आङ् पूर्वात् उङः कर्तरि इरिः इसि वा गुणे अवादेशे दीर्घे च) ये दो अव्यय शब्द प्रकटार्थक हैं ।

मते = अनुमतार्थे—१८ओम् (अवति अवतेः कर्तरि मनिनि टिलोपे ऊठि गुणे च) १९एवम् (अयनम् इण्धातोः भावे बाहुलकात् वमि गुणे च) २०परमम् (परं मिमीते मिनोति मिनाति वा परपूर्वान्माङो बाहुल्काड्डमिः) ये तीन अव्ययशब्द अनुमतार्थक हैं ॥ १२ ॥

---

१. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् । २. स्थाने हृषीकेश तव प्रकीर्त्या, इत्यादि । ३. अभीक्ष्णमुष्णैरपि तस्य सोष्मणः । ४. शश्वच्छान्तिं प्रयच्छति । ५. यथा—नहि स्वात्मारामं विषय-मृगतृष्णा भ्रमयति । ६. अ स्वल्पार्थेप्यभावेऽपि इति हैमः । ७. नो चक्री किं कुलालः । ८. नायं जनो मे सुखदुःखहेतुः । ९. मास्म कार्षीरिदं प्रिये । १०. मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । ११. अलं महीपाल तव श्रमेण । १२. यथा—सत्यं चेत्तपसा च किम् । १३. शुचिर्मनो यद्यस्ति तीर्थेन किम् । १४. भ्रातरं चावधीत् कंसं मातुरद्धा तदर्हणम् । १५. अञ्जसा मथुरां रुध्वा जरासन्धो जगर्ज ह । १६. यथा—प्रादुर्भूत्वा तयोर्मध्ये जहार स्वां प्रियां हरिः । १७. आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः । १८. ओमित्यनुमतौ प्रोक्तं प्रवणे चाप्युपक्रमे । ओम्प्रश्नेऽङ्गीकृतौ रोषे इति विश्वः । १९. यथा—एवं यदाह…। ओमेवं परमं भवेत् । इति व्याडिः । २०. इत्युक्त्वा परमं रामो हनुमन्तमुवाच ह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समन्ततस्तु परितः सर्वतो विष्वगित्यपि।
अकामानुमतौ काममसूयोपगमेऽस्तु च ॥ १३ ॥
ननुच स्याद्विरोधोक्तौ, कच्चित् कामप्रवेदने।
निःषमं दुःषमं गर्ह्ये, यथास्वं तु यथायथम् ॥ १४ ॥
मृषा मिथ्या च वितथे, यथार्थं तु यथातथम्।

सर्वतः इत्यर्थे—समन्ततः [१](समन्तात् इति तसि प्रत्यये) [२]परितः (परि शब्दात् तसिल् प्रत्यये) [३]सर्वतः (सर्वस्मात् इति तसिल्) [४]विष्वक् (विषु अञ्चतीति क्विपि। अपि शब्दात् अभितः विश्वतः इत्यादिपरिग्रहः) ये ४ अव्ययशब्द 'सब तरफ' के अर्थ में प्रयुक्त होते हैं।

अकामानुमतौ = अनिष्टाङ्गीकारे—[५]कामम् (काम्यतीति कर्मणिङन्तात् बाहुलकात् अमि) इस एक अव्ययशब्द का अर्थ यथेच्छ है।

गुणेषु दोषाविष्करणमसूया तस्याः उपगमः प्राप्तिः सत्स्वरूपाङ्गीकारस्तत्र—[६]अस्तु (असति अस्यति वा कर्तरि बाहुलकात् तुन्) यह एक अव्ययशब्द निन्दा पूर्वक स्वीकार करने अर्थ में प्रयुक्त होता है ॥ १३ ॥

विरोधोक्तौ—[७]ननुच (न नुदति इति नञ् पूर्वान्नुदतेः कर्तरि डुप्रत्यये टिलोपे च, च चन्दतीति बाहुलकात् डे टिलोपे च, ननु च अनयोः समाहारद्वन्द्वे कृते सिध्यति) यह एक अव्ययशब्द विरोधोक्ति का वाचक है।

कामप्रवेदने—इष्टप्रश्ने—[८]कच्चित् (कौतीति कर्तरि डति प्रत्यये डित्वाट्टिलोपे च कत्, चेततीति क्विपि, कच्च चिच्च अनयोः समाहारः) यह एक अव्ययशब्द अभिमत प्रश्न पूछने के अर्थ में प्रयुक्त होता है।

गर्ह्ये = निन्दायां—[९]निःषमम् (निर्गतम् सममत्र इति अव्ययीभावे षत्वे च) [१०]दुःषमम् (दुष्टं सममत्र इति अव्ययीभावे षत्वे च) ये दो अव्ययशब्द निन्दा अर्थ में प्रयुक्त होते हैं।

[११]यथायथम्, यथास्वमिति द्वे यथायोग्येऽर्थे स्यातामिति–यथायथम् (यथा शब्दस्य द्वित्वे क्लीबत्वे च निपातनात् यथास्वे यथायथमिति सूत्रेण) [१२]यथास्वम् (योऽयमात्मा यच्चात्मीयं तद्यथास्वम्) ये दो अव्ययशब्द यथायोग्यार्थक हैं ॥ १४ ॥

वितथे = असत्ये अर्थे—[१३]मृषा (मृष्यते इति बाहुलकात् का प्रत्यये कित्वात् गुणाभावे च) [१४]मिथ्या (मथतीति अघ्न्यादियन्तो निपातः) ये दो अव्ययशब्द असत्य अर्थ में प्रयुक्त होते हैं। विगतं तथा सत्यमस्मात् तत्र।

---

१. यथा—समन्ततो वर्षति वारिवाहः। २. आयान्ति परितः श्रियः। ३. सर्वतो वाति पवनः ४. विष्वक् पतन्ति किरणाः। ५. अकामानुमतौ काममसूयोपगमेऽपि च। इति रुद्रः। यथा—त्वं हविष्यसि चेत्काममम्। कामं कामाभ्यनुज्ञयोः। इति त्रिकाण्डशेषः। ६. अस्तु स्यादभ्यनुज्ञानेऽव्यसूयापीडयोरपि। इति मेदिनी। ७. यथा—ननुचैवं मन्यसे। ८. कच्चित् जीवति मे माता। ९. निःषमं वक्ति। १०. दुःषमं वर्तते। ११. यथायथं पलायन्ते। १२. यथास्वमाश्रमं चक्रे। १३ यथा—उच्छ्राय सौन्दर्यगुणा मृषोद्याः। १४. सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्युरेवं तु पुनर्वै वेत्यवधारणवाचकाः ॥ १५ ॥
प्रागतीतार्थकं, नूनमवश्यं निश्चये द्वयम् ।
संवद्वर्षेऽवरे त्ववर्गागामेवं, स्वयमात्मना ॥ १६ ॥

यथार्थेऽर्थे—यथातथम् (तथा शब्दः तथशब्दो वा सत्यार्थः सत्यमनतिक्रम्य इति यथातथम्) यह एक अव्ययशब्द यथार्थ (सत्य अर्थ) में प्रयुक्त होता है। किसी आचार्य के मत में—'[१]यथार्थ' '[२]यथातथम्' ये दो नाम सत्यार्थ में प्रयुक्त होने वाले हैं।

अवधारणवाचकाः— [३]एवम् (एतीति वाहुलकात् वमि) [४]तु (तुदतीति वाहुलकात् डु प्रत्यये) [५]पुनः (पनते इति वाहुलकादरि उपधाऽकारस्य उत्वे विसर्गे च) [६]वै (वातीति डै प्रत्यये) [७]वा (वातीति कर्तरि क्विपि) ये पाँच अव्ययशब्द निश्चयार्थबोधक हैं ॥ १५ ॥

अतीतार्थके = भूतार्थके— [८]प्राक् (प्राच्यां प्राच्याः प्राची वा दिक् इति अस्तातिप्रत्यये अस्तातेर्लुकि च, लुकि सति स्त्रीप्रत्ययस्यापि लुकि) यह एक अव्ययशब्द अतीतार्थक है।

निश्चये— [९]नूनम् (नु ऊनयति इति नपूर्वकात् ऊनधातोरमि) [१०]अवश्यम् (अवश्यायते इति अवपूर्वकात् श्यैङः वाहुलकात् डमि प्रत्यये टिलोपे च) ये दो अव्ययशब्द अवधारणार्थक हैं।

वर्षे—संवत् (संवयते संपूर्वकात् वयगतौ अस्मात् कर्तरि क्विपि यलोपे तुकि च, संवदतीति विचि वा) यह एक अव्ययशब्द वर्ष का वाचक है।

अवरे = पूर्वकालतः पश्चादर्थे— [११]अर्वाक् (अर्वन्तमञ्चति अवरे अञ्चति वा इति अस्तातिप्रत्यये अस्तातेर्लुकि च पृषोदरादिः) यह एक अव्ययशब्द पूर्वकाल से पश्चात् अर्थ में प्रयुक्त होता है।

निश्चयार्थे— [१२]आम् (आमयतीति अम गत्यादौ धातोः ण्यन्तात क्विपि णिलोपे च) [१३]एवं (अयनम् इति इण् धातोः भावे वाहुलकात् वमि गुणे च) ये दो अव्ययशब्द स्वीकारार्थक हैं।

आत्मना इत्यत्रार्थे— [१४]स्वयम (सुष्ठु अयते इति विग्रहे गत्यर्थकायधातोः अमि) यह एक अव्ययशब्द आत्मार्थक ('अपने से' इस अर्थ में प्रयुक्त होता) है ॥ १६ ॥

---

१. यथार्थमुक्तं भवता न चान्यत्। २. गुरुर्यथातथं ब्रूते गोविन्दगुणगायकः। ३. एवमेव यथा प्राह। ४. रावणं तु दुरात्मानमवधीत् राघवः प्रभुः। ५. पुनर्वभाषे वसुदेवसूनुः। ६. धर्मज्ञो व्याससुनुर्वै सज्जनानन्ददायकः। ७. स्वामिना तु वचो वोक्तं तन्मे भद्रकरं भवेत्। ८.—प्राक्कर्म कृतं भुङ्क्ते जनो जातो धरातले। ९. नूनं निश्चितवितर्कयोः। इति विश्वः। १०. अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः। ११. कुले ऋतुत्रयादर्वाक् मण्डनात्रतु मुण्डनम्। १२. आम् ज्ञानविनिश्चये। इति वोपालितः। १३. एवं कृत्वा पितुर्वाक्यं रामो मातन्तिकं गतः। १४. जायते श्रीपतिः स्वयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अल्पे नीचै, र्महत्युच्चैः प्रायो भूम्न्यद्रुते शनैः ।
सना नित्ये बहिर्बाह्ये, स्मातीतेऽस्तमदर्शने ॥ १७ ॥
अस्ति सत्त्वे, रुषोक्तावू, मुं प्रश्नेऽनुनये त्वयि ।

अल्पे— [१]नीचैः (निचीयते इति निपूर्वकचिञ्चयने धातोः कर्मणि बाहुल्कात् डैसि प्रत्यये दीर्घे च) यह एक अव्ययशब्द अल्पार्थक है ।

महति = महत्त्वार्थे— [२]उच्चैः (उच्चीयते इति उत्पूर्वकचिञ्धातोः डैसि प्रत्यये चुत्वे चर्त्वे च) यह एक अव्ययशब्द उन्नतार्थक है ।

भूम्नि = बाहुल्यार्थे— [३]प्रायः (प्रायणम् इति प्रपूर्वकाद्यतेः भावे .असुनि) यह एक अव्ययशब्द अधिकार्थक है ।

अद्रुते = अशीघ्रार्थे— [४]शनैः (शणतीति विग्रहे शण् गतौ अस्मात् कर्तरि ऐस् प्रत्यये पृषोदरादित्वात् णस्य नत्वे) यह एक अव्ययशब्द मन्द अर्थ में प्रयुक्त होता है ।

नित्ये— [५]सना (सनतीति कर्तरि बाहुलकादाप्रत्यये) यह एक अव्ययशब्द नित्यार्थक है ।

आत्प्रत्यये— [६]सनात्, अति प्रत्यये [७]सनत्—ये दो नाम भी नितयार्थक कहे गये हैं ।

बाह्ये—[८]बहिः (वहतीति इसिः ववयोरभेदः) यह एक अव्ययशब्द बाह्य (बाहर) अर्थ में प्रयुक्त होता है ।

अतीते — [९]स्म (स्यतीति बाहुलकात् ड्म प्रत्यये टिलोपे च, स्मयते इति विग्रहे तु स्मिङ् धातोः ड प्रत्यये सिध्यति रूपम्) यह एक अव्ययशब्द व्यतीतार्थक है ।

अदर्शने—[१०]अस्तम् (असनम् .अस्यतेर्भावे तमि प्रत्यये) यह एक अव्ययशब्द अदर्शनार्थक है ॥ १७ ॥

सत्त्वे = विद्यमानतायाम्—[११]अस्ति (असनम् इति भावे क्तिचि) यह एक अव्ययशब्द सत्तार्थक है । रुषोक्तौ = कोपयुक्ते वचने—[१२]ऊम् (ऊय्यते इति ऊयतेः कर्मणि मुकि यलोपे च) यह एक अव्ययशब्द क्रोधयुक्त वचन में प्रयुक्त होता है । प्रश्ने—[१३]उम् (अघनम् इति उङो भावे डुमि प्रत्यये टिलोपे च) यह एक अव्ययशब्द पृच्छार्थक है ।

---

१. यथा—तथापि नीचैर्विनयाददृश्यत । २. उच्चैरधः पाति पयोमुचोऽपि । ३. प्रायः साहसिकाः स्त्रियः । ४ शनैरनीयन्त······। ५. सनातनोऽयं पुरुषः पुराणः । ६. सनान्नभस्ये चरणौ मुरारेः । ७. सनत्कुमारो वचनं बभाषे । ८. यथा—बहिर्विकारं प्रकृतेः पृथग्विदुः···। ९. शीतालुः सलिलगतेन सिच्यते स्म । १०.···हिमधाम्नि याति चास्तम् । ११. अस्त्याह शब्दौ कालसामान्ये तिङन्तप्रतिरूपकौ । इति त्रिकाण्डशेषः । मित्रमस्तिधनं कृष्णं पश्येत्याह प्रिया पतिम् । इति । १२. ऊमागतोऽहं शत्रुस्ते पौरुषं दर्शयाशु मे । १३. उँ गच्छसि बहिर्धव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुं तर्के स्यादुषा रात्रेरवसाने नमो नतौ ॥ १८ ॥
पुनरर्थेऽङ्ग, निन्दायां दुष्ठु, सुष्ठु प्रशंसने ।
सायं साये, प्रगे प्रातः प्रभाते, निकषान्तिके ॥ १९ ॥

अनुनये = सान्त्वने— [1]अयि (ईयते अय्यते वा एतेः अयते वा इनिः) यह एक अव्ययशब्द सान्त्वनार्थक है। ए प्रत्यय करनेपर [2]अये भी होता है।

तर्के = ऊहे— [3]हुम् (हवनम् इति जुहोतेः भावे डमिर्बाहुलकात्) इस एक अव्ययशब्द का तर्क (अनुमान) अर्थ है।

रात्रेरवसाने = निशाया अन्ते— [4]उषा (ओषतीति उषेः कर्तरि बाहुलकात् काप्रत्यये गुणाभावे च) यह एक अव्ययशब्द रात्र्यन्त का वाचक है।

नतौ = नमस्कारे— [5]नमः (नमनम् नमतेर्भावे असुनि) यह एक अव्ययशब्द नमस्कारार्थक है ॥ १८ ॥

पुनरर्थे—अङ्ग (अङ्गनम् अङ्गतेर्भावे घञि नुमागमे च) यह एक अव्यय शब्द पुनरर्थक है। जैसे–मूर्खोऽपि नावमन्यते किमङ्ग विद्वान्। निन्दायां— [6]दुष्ठु (दुःस्थानम् इति दुःपूर्वकात् स्थाधातोः कुप्रत्यये आलोपे षत्वे च) यह एक अव्ययशब्द निन्दार्थक है। प्रशंसायाम्— [7]सुष्ठु (सुस्थानम् इति सुपूर्वकात् स्थाधातोः कुप्रत्यये षत्वे च) यह एक अव्ययशब्द प्रशंसा अर्थ में प्रयुक्त होता है।

साये = दिनावसाने—[8]सायं (सानम् स्यतेर्भावे बाहुलकात् णमि युगागमे च) यह एक अव्ययशब्द दिनान्त का वाचक है।

प्रभाते— [9]प्रगे (प्रगीयते अत्र वा प्रपूर्वकात् गायतेः कर्मणि अधिकरणे वा बाहुलकात् के आलोपे च, कप्रत्यये तु आलोपे निपातनात् एत्वे) [10]प्रातः (प्रातति इति प्रपूर्वकात् अतधातोः अरन् प्रत्यये) ये दो अव्ययशब्द प्रातःकाल के वाचक हैं।

अन्तिके = समीपे—[11]निकषा (निकषणम् निपूर्वकात् कषतेः आप्रत्यये) यह एक अव्ययशब्द समीपार्थक है ॥ १९ ॥

---

१. अयि विजहीहि दृढोपगूहनम्। २. मा कुरु मानिनि मानमये। ३. हुँ रामो भरतो हुँ च। ४. उषा स्याद्रजनीशेषे। उषः इत्यपि दृश्यते। इति रभसः। उषातनो वाति वायुर्यथा। ५. नमो विष्णवे। ६. यथा—दुष्ठु खलु त्वम्। ७. सुष्ठु काव्यं त्वया कृतम्। ८. सायं सन्ध्यामुपासिष्ये। ९. इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद् बहिः। १०. रेवतीरमणो रामः प्रातरत्र समागतः। ११. विलङ्घ्य लङ्कां निकषा हनिष्यति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परुत् परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ॥
अद्यात्राह्न्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २० ॥
तथाऽधरान्यान्यतरेतरात् पूर्वेद्युरादयः ।
उभयद्युश्चोभयेद्युः, परे त्वह्नि परेद्यवि ॥ २१ ॥

पूर्वे अब्दे = वत्सरे— [1]परुत् (पूर्वस्मिन् वत्सरे इति विग्रहे उति प्रत्यये पूर्वस्य परादेशे अलोपे च निपातनात्) यह एक अव्ययशब्द गत पूर्ववर्ष का वाचक है ।

पूर्वतरे वत्सरे— [2]परारि (पूर्वतरे वर्षे इति विग्रहे आरि प्रत्यये पूर्वस्य परादेशे निपातनात्) यह एक अव्ययशब्द गत तृतीयवर्ष का वाचक है ।

यति = गच्छति (वर्तमाने वर्षे)— [3]ऐषमः (अस्मिन् संवत्सरे इति विग्रहे इदन् शब्दस्य इशादेशे समसणश्च प्रत्ययः, षत्वे वृद्धौ च) यह एक अव्यय शब्द वर्तमानवर्ष का वाचक हैं ।

अत्र = अस्मिन् अहनि = दिने—अद्य (अस्मिन्नहनि इति निपातनात् इदमोऽश् द्यश्च प्रत्ययः) यह एक अव्ययशब्द 'आज दिन' का वाचक है । जैसे—अद्यापि सेनातुरगाः सविस्मयैरलूनपक्षा इव मेनिरे जनैः ।

अथ = अनन्तरम्—पूर्व-उत्तर-अपरेभ्यः तथा अधर-अन्य-अन्यतरेतरेभ्यश्च पूर्वेऽह्नि इत्यादौ अर्थे पूर्वेद्युः, आदिना उत्तरेऽह्नि, अपरेऽह्नि, अधरस्मिन्नह्नि, अन्यस्मिन्नहनि, अन्यतरस्मिन्नहनि, इतरस्मिन्नह्नि इत्यर्थोऽवसेयः । द्वितीयेनादिशब्देन उत्तरेद्युः अपरेद्युः, अधरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः शब्दाः निपातनात् सिद्ध्यन्ति । [4]पूर्वेद्युः (पूर्वस्मिन्नहनि इति विग्रहे पूर्वशब्दात् एद्युसि प्रत्यये अलोपश्च निपातनात्) [5]उत्तरेद्युः (उत्तरस्मिन् अहनि इति विग्रहे उत्तरशब्दात् एद्युसि अलोपे च) [6]अपरेद्युः (अपरस्मिन्नहनि इति पूर्ववत्) [7]अधरेद्युः (अधरस्मिन्नहनि इति एद्युसि अलोपे च) [8]अन्येद्युः (अन्यस्मिन्नहनि) [9]अन्यतरेद्युः (अन्यतरस्मिन्नहनि इति एद्युसि अलोपे च) [10]इतरेद्युः (इतरस्मिन् अहनि इति पूर्ववत् निपातनम्) ये ७ अव्ययशब्द क्रमसे १–२ गत पूर्वदिनों के वाचक हैं ॥ २०½ ॥

[11]उभयद्युः (उभयस्मिन्नहनि इति द्युसि प्रत्यये विभक्तिलोपे च)[12] उभयेद्युः (एद्युसि प्रत्यये अलोपे च) ये दो दिनों के वाचक हैं ।

परे अह्नि तु—[13]परेद्यवि (परस्मिन्नहनि इति विग्रहे एद्यवि प्रत्यये अलोपे च) यह एक अव्ययशब्द परदिन का वाचक है ॥ २१ ॥

---

१. परुन्नागतः । २. परारि नागतम् । ३. ऐषमो भवान्···करिष्यति । ४. पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरे । इति रुद्रः । ५. नान्दीमुखात् उत्तरेद्युर्विवाहः परिकीर्तितः । ६. अपरेद्युर्गमिष्यामि मथुरां माधवप्रियाम् । ७. अधरेद्युरधो गत्वा नागनाथं ददर्श सः । ८. अन्येद्युरात्मानुचरस्य भावमिति रघुः । ९. दृष्ट्वा त्वन्यतरेद्युर्मामानन्दमुनयोऽमलाः । १०. इतरेद्युर्निरीक्षेऽहमीशानं पार्वतीप्रियम् । ११. यथा—उभयद्युरुमानाथपादकञ्जं भजाम्यहम् । १२. उभयेद्युर्भजे रामं ससीतं लक्ष्मणानुगम् । १३. मित्रं दृष्टं परेद्यवि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्यो गते-ऽनागतेऽह्नि श्वः परश्वस्तु परेऽहनि ।
तदा तदानीं, युगपदेकदा, सर्वदा सदा ॥ २२ ॥
एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २३ ॥

गते = अतीते (दिवसे)—[१]ह्यः (यातमहः इति विग्रहे पृषोदरादिः) यह एक अव्ययशब्द विगत दिन का वाचक है ।

अनागते दिवसे—[२]श्वः (आगामि अहः इति पृषोदरादिः) यह एक अव्यय शब्द आगामी दिन का वाचक है ।

परेऽहनि—[३]परश्वः (पर च तच् श्वश्च, श्वः परं वा राजदन्तादिः) यह एक अव्ययशब्द आगामी परसों का वाचक है ।

[४]तदा (तस्मिन् काले इति दा प्रत्यये त्यदाद्यत्वे पररूपे च) [५]तदानीम् (दानीम्प्रत्यये) ये दो अव्ययशब्द तत् (उस) काल के वाचक हैं ।

[६]युगपत् (युवन्त्यस्मिन् काले इति यौतेराधारे गपतकि प्रत्यये । युगं पयतेऽस्मिन् इति विग्रहे तु युगपूर्वकात् पयतेराधारे डति प्रत्यये वा) [७]एकदा (एकस्मिन् काले इति दा प्रत्यये) ये दो अव्ययशब्द एक काल के वाचक हैं ।

[८]सर्वदा (सर्वस्मिन् काले इति दा प्रत्यये) [९]सदा (सर्वस्य सादेशे च) ये दो अव्ययशब्द सब-काल के वाचक हैं ॥ २२ ॥

[१०]एतर्हि (अस्मिन् काले इति इदम् शब्दात् र्हिलि प्रत्यये प्रकृतेरेतादेशे च) [११]सम्प्रति (सं च प्रति च अनयोः समाहारः) [१२]इदानीम् (अस्मिन् काले इति दानीम्प्रत्यये विभक्तिलोपे इशादेशे च) [१३]अधुना (अधुना प्रत्ययः, विभक्तिलोपे इशादेशे इलोपे च) [१४]साम्प्रतम् (सम् च प्रति च अनयोः समाहारे, प्रज्ञाद्यण् वृद्धी मान्वत्वं च निपातनात्) ये ५ अव्यशब्द वर्तमान (इस) काल के वाचक हैं । तथा शब्द समुच्चयार्थक अव्यय है ।

---

१. यथा—ह्योऽभवत् त्वपुत्रः । २. श्वो भविता राज्यभारो रामस्य । ३. रामः परश्वः समुपेष्यते माम् ! ४. तदा चक्षुष्मतां प्रीतिः ५. यदा स्याद् राधया संगतस्तदानीमेव मे सुखम् । ६. उदयाद्रिमूर्ध्नि युगपच्चन्द्रभासतोः । ७. एकदा भगवान् व्यासो वसुदेवं ददर्श ह । ८. तैरस्मान् रक्ष सर्वदा । ९. याचन्ते याचकाः सदा । १० यथा—एतर्हि क्रियते कार्यम् । ११. हरत्यघं सम्प्रति हेतुरेष्यतः । किरात० । १२. इदानीं नास्ति ते भयम् ! १३. नीरक्षीरविवेके हंसालस्यं त्वमेव कुरुषे चेत् । विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ॥ १४ मानिनीमानविध्वंसदक्षो जयति साम्प्रतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. अथ लिङ्गादिसंग्रहवर्गः

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं सङ्कीर्णवदिहोन्नयेत् ॥ १ ॥

पूर्वादौ दिग्देशकाले वाच्ये—प्रागुदक् प्रत्यगाद्यः स्युरिति सम्बन्धः— [१]प्राक् (प्राच्यां दिशि, प्राच्या दिशः प्राची दिक् वा इति विग्रहे अस्ताति प्रत्यये अस्तातेः लुकि, स्त्रीप्रत्ययस्यापि लुकि च) उदक् (उदीच्याम्, उदीच्याः उदीची वा दिक्) प्रत्यक् (प्रतीच्याम्, प्रतीच्याः प्रतीची वा दिक्) ये तीन अव्यय शब्द पूर्व उत्तर पश्चिम, दिशा देश और काल के वाचक हैं। दिग् देश काल एवं सप्तमी पञ्चमी प्रथमादि विभक्ति के भेद से प्रागुदक प्रत्यक् के ३-३ अर्थ होते हैं। इत्यव्ययवर्गः ॥ ७३ ॥

सलिङ्गशास्त्रैः—लिङ्गबोधकानि तानि शास्त्राणि इति मध्यमपदलोपिसमासः तैः सहिताः इति सलिंग-शास्त्राः तैः—पाणिन्यादि-ऋषिनिर्मितलिङ्गविधायक शास्त्रों अर्थात् सूत्रों (जैसे—स्त्रियां क्तिन्, पुंसि संज्ञायां घः प्रायेण, नपुंसके भावे क्तः, अदन्तोत्तरपदो द्विगुः स्त्रियामिष्टः आदि) के सहित, सन्ना० सन् आदिर्येषामिति सन्नादयश्च कृतश्च तद्धिताश्च समासाश्च तेभ्यो जायन्ते ये तैः—सन्-आदि पद से—क्यच्, काम्यच्, कृत्, तद्धित और समास से उत्पन्न प्रत्ययों से बनने वाले शब्दों से (जैसे—सनादि प्रत्ययों से तितिक्षा, चिकीर्षा, लोलूया, कण्डूया पुत्रकाम्या आदि। कृत्प्रत्ययों से बनने वाले शब्द जैसे—पाचकः भूतिः, इष्टिः, कृतिः, स्मृतिः इत्यादि। तद्धित प्रत्ययों से बननेवाले शब्द जैसे–औपगवः, औपगवी, गार्ग्यः, वैयाकरणः, वात्स्यः आदि। समास प्रत्ययों (जैसे—टच्, अच्, अ, आदि) से बनने वाले शब्द जैसे—वायुसखः, धर्मराजः, ब्रह्मवर्चसम्, अर्धर्चः। अथवा समासजैः = समाप्रयुक्तलिङ्गबोधकैः जैसे–संज्ञा-परिभाषम्, बदरामलकम् आदि।

अनुक्तैः = पूर्व में प्रायः नहीं कहे हुये शब्दों से। इह संग्रहे = इस लिङ्गादि संग्रह वर्गमें। संकीर्ण-वत् = संकीर्ण वर्ग की तरह। लिङ्गम् तर्कयेत् उन्नयेत् = लिङ्गों का ज्ञान करना चाहिये। अभिप्राय यह है कि—जैसे संकीर्ण वर्ग में—प्रकृति प्रत्ययादि अर्थों से लिङ्गों का ज्ञान अनुक्त शब्द विषयक कहा गया है उसी तरह लिङ्ग बोधक शास्त्रों से यहाँ भी अनुक्त शब्दों का लिङ्ग ज्ञान करना चाहिये। संकीर्णवर्गमें जैसे प्रकृति से—'अर्धर्चाः पुंसि च' अर्धर्चः, अर्धर्चम्—आदिमें। प्रत्ययसे—'स्त्रियाँ क्तिन्' 'पुंसि संज्ञायां घः प्रायेण' नपुंसके भावे क्तः–इत्यादिमें। आदिपद से–'क्रियाविशेषणानां क्लीबत्वमेकवचनान्तत्वञ्च'–लिङ्ग ज्ञान होता है उसी तरह यहाँ भी जानना चाहिये। गोबलीवर्दन्याय अथवा ब्राह्मणवसिष्ठन्याय से ही सन्नादिपदोंका पृथगुपादान जानना चाहिये ॥ १ ॥

यदि विशेषैः ॥ अत्रोक्तैः प्रागुक्तैश्च वचनैः (यहाँ कहे हुये और पहले कहे हुए वचनों से, अबाधितः = बाधितो न भवति (निषेध न किया गया हो तो)—लिङ्गशेषविधिः = लिङ्ग्यन्ते = चिह्नयन्ते स्त्रीपुंनपुंसकतया शब्दाः अनेन इति लिङ्गम् तस्य शेषः = अवशेषः तस्य विधिः (शेष लिङ्ग का विधान अपने विषयमें) व्यापी = व्याप्नोतीति व्यापक (अपवाद = बाधक) विषय को छोड़कर उत्सर्गत्वात् तीनों

१. प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिंगशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच्सयोनिप्राणिनाम च ॥ २ ॥
नाम विद्युन्निशा-बल्ली-वीणा-दिग्भू-नदी-ह्रियाम् ।

काण्डमें व्यापक होता है। अर्थात् अपवाद विषय को छोड़कर सर्वत्र सामान्यतः कथित लिङ्गका विधान होता है। जैसे—पुंस्त्व के अधिकार में "स्वर्गयागाद्रि मेघाब्धि" इस वाक्य से स्वर्ग पर्याय शब्दों को सामान्यतः पुंलिङ्ग का विधान किया गया है। किन्तु "स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः । सुरलोको द्यौ दिवौ द्वे स्त्रियां क्लीवे त्रिविष्टपम्" इस उक्ति से स्वर शब्द को अव्यय, द्यो दिव शब्द को स्त्रीलिंग और त्रिविष्टप् शब्द को नपुंसकलिंग का विशेष विधान होने से स्वर द्यो दिव त्रिविष्टप पुंलिंग में प्रयुक्त नहीं होते हैं। किन्तु उक्त 'स्वरव्यम्' आदि इस विशेष वचन के अनुसार क्रमशः अव्यय, स्त्रीलिंग और नपुंसक लिंग में ही स्वर द्यो दिव, त्रिविष्टप शब्दों का प्रयोग होता है। अभिप्राय यह कि विशेष वचन से सामान्य का बाध होता है। जैसे—'पुंस्त्वे सभेदानुचराः सपर्यायाः' इस सामान्य वचन से पर्याय के सहित सुर, असुर शब्दों को पुंलिंग कहा गया है। किन्तु 'वृन्दारकाः दैवतानि पुंसि वा देवताः स्त्रियाम्" इस विशेष वचन से दैवत शब्द को पुंल्लिग और नपुंसक तथा देवता शब्द को स्त्रीलिंग का विधान किया गया है। विशेष से सामान्य का बोध होने के कारण ही सुर शब्द के पर्याय दैवत तथा देवता तथा शब्द का भी पुंल्लिग में प्रयोग नहीं होता है ॥ १२ ॥

अथ स्त्रीलिङ्गसंग्रहः

पुंस्त्वे सभेदानुचराः इत्यतः प्राक् स्त्रियामित्यधिक्रियते । ईदूद्विरामैकाच्—ईच्च ऊच्च तौ विरामौ अन्तौ यस्य तच्च तदेकाच्च स्त्रियां स्यादिति सम्बन्धः। एक अच् वाले ईकारान्त (जैसे—धीः श्रीः ह्रीः) शब्द तथा ऊकारान्त (भ्रूः, स्रूः, द्रूः, जूः, लूः, भूः) शब्द स्त्रीलिङ्ग होते हैं। 'लू' 'भू' का लवनं लूः, भवनं भूः विग्रह जानना चाहिये। नयतीति नीः, नियौ, नियः, लुनातीति लूः, लुवौ, लुवः इत्यादि में वाच्य-लिङ्गता समझनी चाहिये।

एवं—योनि = भगं तत्सहितानां प्राणिनां नाम च स्त्रियां स्यादिति सम्बन्धः। योनि सहित प्राणियों के नाम स्त्रीलिङ्ग होते हैं। जैसे—माता, दुहिता, याता, स्त्री आदि। विशेष से सामान्य का बाध (दाराः पुं भूम्नि,) होने के कारण ही 'दाराः' शब्द पुंल्लिग एवं बहुवचनान्त होता है ॥ २ ॥

विद्युत्—निशा—वल्ली—वीणा—दिग्—भू—नदी—ह्री एषामष्टानां नाम स्त्रियां स्यात्। विद्युदादि आठ ये संज्ञा वाले शब्द स्त्रीलिङ्ग होते हैं। जैसे—विद्युत् = तडित्, चपला, सौदामिनी। निशा = रात्रिः, यामिनी, तमी, रजनी। वल्ली = वीरुत् प्रततिः, लता। वीणा = विपञ्ची, कच्छपी। दिक् = हरित् आशा, ककुप्, काष्ठा। भूः = पृथ्वी; भूमिः, इला, क्ष्मा, गोत्रा, कुः। नदी = सरित्, आपगा। ह्री = व्रीड़ा, लज्जा, त्रपा।

'ड्यावूडन्तम्' इस वक्ष्यमाण वाक्यसे वीणापर्य्याय—विपञ्ची, कच्छपी आदि में स्त्रीत्व की सिद्धि हो ही जायगी वीणाग्रहण चिन्त्य है, ऐसा कहकर वीणा के स्थान में वाणी पढ़ने वाले के मत में वाणी के पर्याय ब्राह्मी, भारती, वाक्, भाषा, गीः आदि में स्त्रीत्व की सिद्धि होती है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदन्तैर्द्विगुरेकार्थो, न स पात्रयुगादिभिः ॥ ३ ॥
तल्वृन्दे येनिकट्यत्रा वैरमैथुनिकादिवुन् ।

'स्त्रियामीदूद्विरामैकाच्' इस वचन से 'ह्री' पर्याय त्रपा, लज्जादि में स्त्रीत्व की सिद्धि हो ही जायगी 'ह्री' शब्द के स्थान में 'धी' शब्द का पाठ ही उचित है। ऐसा कहनेवाले के मत में संवित्, चित्, प्रतिपत् आदि में स्त्रीत्व की सिद्धि होती हैं। अन्यथा चित् संविदादि में स्त्रीत्व सिद्धि के लिये उपायान्तर ढूँढ़ना आवश्यक होगा। उक्त पाठान्तर किसी वैयाकरण विशेष के मत से है।

अदन्तैः उत्तरपदैः सह यः एकार्थः (एकः अर्थो यस्य सः) द्विगुः स स्त्रियां स्यात्। ह्रस्व अकारान्त शब्द के उत्तर पद में रहने पर एकार्थक (समाहार) द्विगुसमाससंज्ञकशब्द स्त्रीलिङ्ग में प्रयुक्त होते हैं। जैसे—दशानां मूलानां समाहारः दशमूली, त्रयाणां लोकानां समाहारः त्रिलोकी, पञ्चानामक्षराणां समाहारः पञ्चाक्षरी। अदन्त उत्तरपदपरक कहने से—पञ्चानां कुमारीणां समाहारः पञ्चकुमारि, दशानां धेनूनां समाहारः दशधेनु में स्त्रीत्व नहीं होता है। एवं एकार्थ (समाहार) द्विगु कहने से—पञ्चसु कपालेषु संस्कृतः पञ्चकपालः इत्यादि तद्धितार्थविषयक द्विगु का स्त्रीलिङ्ग नहीं होता है।

पात्रयुगादिभिरदन्तैः यो द्विगुः स स्त्रियां न स्यादिति। पात्र और युग (आदि पद से—भुवन, पुर) अदन्तशब्द उत्तरपदपरक—द्विगु-समास संज्ञक-शब्द का स्त्रीलिङ्ग में प्रयोग नहीं होता है। जैसे—पञ्चानां पात्राणां समाहारः पञ्चपात्रम्। चतुर्णां युगानां समाहारः चतुर्युगम्। त्रयाणां भुवनानां समाहारः त्रिभुवनम्। त्रयाणां पुराणां समाहारः त्रिपुरम्। यहाँ ज्ञातव्य है कि भाष्यकारने 'समासान्ता' सूत्रके भाष्य में 'त्रिपुरी' उदाहरण स्वरूप रखा है जो 'न स पात्रयुगादिभिः' इस वाक्य के विरुद्ध है ॥ ३ ॥

तल् = भावादौ विहितं तलन्तं स्त्रियामित्यन्वयः भाव आदि में विहित तल् प्रत्ययान्त शब्द स्त्रीलिङ्ग में प्रयुक्त होते हैं। जैसे—शुक्लस्य भावः शुक्लता। देवस्य कर्म भावो वा देवता। ग्रामाणां समूहः ग्रामता। जनानां समूहः जनता। बन्धूनां समूहो बन्धुता। ब्राह्मणस्य कर्म ब्राह्मणता। वृन्दे = समूहे यश्च इनिकस्यत्राश्च तदन्तं स्त्रियां स्यादिति सम्बन्धः। समूह अर्थ में विहित य, इनि, कट्य, त्र प्रत्ययान्त शब्द स्त्रीलिङ्ग होते हैं। क्रमशः जैसे—पाशानां समूहः पाश्या, वातानां समूहः वात्या। खलानां समूहः खलिनी, शाकानां समूहः शाकिनी। रथानां समूहः रथकट्या। गवां समूहः गोत्रा। वृन्द (समूह) कहने से ही 'मुखे भवो मुख्यः' 'दण्डोऽस्यास्तीति दण्डी' यहाँ स्त्रीलिङ्ग नहीं होता है।

'द्वन्द्वाद्वुन् वैरमैथुनिकयोः' इति सूत्रेण वैरमैथुनिकादौ अर्थे विहितो यो वुन् प्रत्ययान्तः शब्दः सः स्त्रियां स्यादिति। वैरमैथुनिक आदि अर्थ में विहित वुन् प्रत्ययान्त शब्द स्त्रीलिङ्ग होते हैं। जैसे—अश्वश्च महिषश्च तयोर्वैरम् अश्वमहिषिका—'द्वन्द्वाद्वुन् वैरमैथुनिकयोः' इति वुनि अकादेशे प्रत्ययस्थेति इत्वे च सिद्धा। काकश्च उलूकश्च इति काकोलूकौ तयोर्वैरम् इति वुनि अकादेशे इत्वे च काकोलूकिका। अत्रिश्च भरद्वाजश्च इति अत्रिभरद्वाजौ तयोः मैथुनिका इति वुनि अकादेशे इत्वे च अत्रिभरद्वाजिका। कुत्सश्च कुशिकश्च इति कुत्सकुशिकौ तयोर्मैथुनिका इति वुनि अकादेशे इत्वे च कुत्सकुशिकिका।

आदि पद से—"पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' तथा 'दण्डव्यवसर्गयोश्च' सूत्रों से विहित वुन् का भी ग्रहण है। अतः वीप्सामें—'द्वौ द्वौ पादौ ददाति इति द्विपदिकां ददाति, द्वे द्वे शतं ददाति द्विशतिकां ददाति'। दण्ड में—'द्वौ पादौ दण्डितः इति द्विपदिकां ददाति, द्वे शतं दण्डितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीभावादावनिक्तिण्वुल्णच्क्यब्युजिञङ्निशाः ॥ ४ ॥
उणादिषु निरूरीश्च ङ्यावूङन्तं चलं स्थिरम् ।

इति द्विशतिकां व्यवसृजति' में स्त्रीत्व की सिद्धि होती है। 'वैरमैथुनिकादि' के ग्रहण से ही 'वासुदेवार्जुनाभ्यां वुन्' से विहित वुन् प्रत्ययान्त 'वासुदेवे भक्तिरस्य इति वासुदेवकः' में स्त्रीलिङ्ग नहीं होता है।

वुन् ग्रहण वुञ् का भी उपलक्षण है अतः 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' से विहित वुञ् प्रत्ययान्त शब्द जैसे—'गार्गिकया श्लाघते, काठिकया विकत्थते, तदा 'द्वन्द्वमनोज्ञादिभ्यश्च' से विहित वुञ् प्रत्ययान्त शब्द जैसे—'शिष्यश्च उपाध्यायश्च इति शिष्योपाध्यायौ तयोर्भावः शिष्योपाध्यायिका' आदि में स्त्रीत्व की सिद्धि होती है।

स्त्रियां भावादिः तस्मिन् स्त्रीभावादौ। 'स्त्रियां क्तिन्' सूत्रघटक 'स्त्रियां' के अधिकार में एवं कर्तृभिन्न कारक (भावकर्म) में विहित जो—अनि, क्तिन्, ण्वुल्, णच्, क्यप्, युच्, इञ्, अङ्, नि, श प्रत्यय तदन्तशब्द स्त्रीलिंग होते हैं। क्रमशः उदाहरण—जैसे अनि प्रत्ययान्त शब्द—न करणम् अकरणिः, न जीवनम् अजीवनिः। क्तिन् प्रत्ययान्त शब्द जैसे—करणं कृतिः, भवनं भूतिः। 'ण्वु' से ण्वुल्—ण्वुच् दोनों का सामान्यतया ग्रहण होता है। 'रोगाख्यायां ण्वुल्बहुलम्' से विहित ण्वुल् प्रत्ययान्तशब्द जैसे—प्रच्छर्दनम् प्रच्छर्दिका। प्रवहणम्—प्रवाहिका। धात्वर्थनिर्देशे ण्वुल्वक्तव्यः से विहित ण्वुल्—आसनम्-आसिका, शयनम्—शायिका। 'पर्यायार्हर्णोत्पत्तिषु ण्वुच्' से विहित ण्वुच् प्रत्ययान्त शब्द जैसे—भवतः शायिका, भवानिक्षुभक्षिकामर्हति। 'कर्म व्यतिहारे णच् स्त्रियाम्' से विहित णच् प्रत्ययान्त शब्द जैसे—व्यवक्रोशनम्-व्यावक्रोशी, व्यवहसनम्-व्यावहासी, व्यत्युक्षणम् व्यात्युक्षी आदि में 'णचःस्त्रियामञ्' और 'टिड्ढाणञ्' स्मरण करना चाहिये। 'व्रजयजोर्भावे क्यप्'से विहित क्यप् प्रत्ययान्त शब्द जैसे—व्रजनम्—व्रज्या, यजनम् इज्या। 'संज्ञायां समजनिषद्-'से विहित क्यप् प्रत्ययान्तशब्द जैसे—समजन्त्यस्यामिति समज्या, निषीदन्त्यस्यामिति निषद्या; विदन्त्यनयेति विदया। अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च वेदा ह्येताश्चतुर्दश॥ 'स्त्री भावादि' ग्रहण करने से ही वदः सुपि क्यप् च विहित-ब्रह्मणो वदनम्- ब्रह्मोद्यम्, मृषोद्यम् आदि क्यबन्त में एवं 'भुवो भावे' से विहित ब्रह्मणो भवनम्—ब्रह्मभूयम् आदि क्यप् प्रत्ययान्त शब्द में स्त्रीलिंग नहीं होता है। 'ण्यासश्रन्थो युच्' से विहित युच् प्रत्ययान्तशब्द—कारणम्, कारणा, कामनम्, कामना, हारणम्-हारणा, आसना। विभाषाख्यानपरिप्रश्नयोरिञ्च से विहित इञ् प्रत्ययान्त शब्द—का त्वं कारिं गणिं वा अकार्षीः, सर्वां कारिं गणिं वा अकार्षम्। 'षिद्भिदादिभ्योऽङ्' से विहित अङ् प्रत्ययान्त जैसे शब्द पचनम्—पचा, त्रपणम्-त्रपा। भेदनम्—भिदा, छेदनम्—छिदा। 'अङ्' से अका भी ग्रहण होता है अतः—'अप्रत्ययात्' से विहित अप्रत्ययान्त शब्द—चिकीर्षणम्—चिकीर्षा पुत्रीयणम्—पुत्रीया। 'गुरोश्चहलः' से विहित अप्रत्यय तदन्त शब्द—ईहनम्—ईहा, ऊहनम्—ऊहा। 'ग्लाम्लाज्याहाभ्यो निः' से विहित निप्रत्यय तदन्त शब्द—ग्लानम्—ग्लानिः, म्लानम्—म्लानिः ज्यानम्—ज्यानिः। 'कृञः श च' से विहित श प्रत्यय तदन्त शब्द—करणम्—क्रिया। एषणम् इस विग्रह में—'इच्छा' सूत्र से श प्रत्यय करने पर—इच्छा आदि में स्त्रीत्व की सिद्धि होती है॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा णदिक् ॥ ५ ॥
घञो ञः सा क्रियाऽस्यां चेद्दाण्डपाता हि फाल्गुनी ।
श्यैनम्पाता च मृगया तैलम्पाता स्वधेति दिक् ॥ ६ ॥

उणादिषु = उणादौ निरूरीश्च निर् उर् ई:च = न्यन्तम् ऊदन्तम् ईदन्तं च स्त्रियां स्यादिति सम्बन्धः । उणादि में विहित् निर् ऊर् और ई प्रत्ययान्त शब्द स्त्री-लिंग होते हैं। जैसे—'वीज्याज्वारिभ्यो निः' से विहित नि प्रत्ययान्त शब्द— वेणिः, यहाँ बाहुलकात् णत्व की कल्पना करनी चाहिये । ज्यानिः, जूर्णिः, [2]सृणिः, यहाँ कित्वात् गुणाभाव जानना चाहिये । नि ग्रहण करने से नित् का भी ग्रहण होता है । अतः—'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' से विहित नित् प्रत्यय तदन्तशब्द जैसे—श्रेणिः, श्रोणिः द्रोणिः आदि में स्त्रीत्व की सिद्धि होती है । "उणादिष्वनिरूरीश्च" पाठान्तर पढ़ने वाले के मतमें—अनि प्रत्ययान्त शब्द—धरणिः, धमनिः, सरणिः आदि उदाहरण जानने चाहिये ।

'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' से विहित ऊप्रत्यय तदन्त शब्द—[3]कर्षूः, चमूः । 'अवितृतन्त्रिभ्यः ईः' से विहित ई प्रत्यय तदन्त शब्द—[4] अवीः, [5]तरीः, [6]स्तरीः, [7]तन्त्रीः आदि स्त्री लिंग होते हैं ।

ङी च आप् च ऊङ् च अन्ते यस्य तत् ङ्यावूङन्तं स्त्रियां स्यात् । ङी, आप् ऊङ् प्रत्यय तदन्तशब्द स्त्रीलिङ्ग होते हैं । जैसे—[8]कदली, [9]कन्दली । ङी ग्रहण से ङीष् एवं ङीप् का भी ग्रहण होता है । आबन्त शब्द जैसे—रमा, गङ्गा । ऊङन्त शब्द जेसे—वामोरूः, करभोरूः । चलं = जङ्गमम् , स्थिरं = स्थावरञ्च स्त्रियां स्यादिति सम्बन्धः । जङ्गम और स्थावर ङी आप् (टाप्) ऊङ् प्रत्ययान्त शब्द स्त्रीलिंग होते हैं । जंगम जैसे—नारी, शिवा, ब्रह्मबधू । स्थावर जैसे—नाड़ी, खट्वा, अलाबूः ।

तत्प्रहरणं क्रीडायां चेत्तदा मौष्टा पाल्लवा च स्यात् । खेल में मुसल पल्लव प्रहार है इसका, इस अर्थ में ण प्रत्ययान्त शब्द स्त्रीलिंग होते हैं ।

जैसे—मुष्टिः प्रहरणमस्यामिति मौष्टा, पलल्वाः प्रहरणमस्यामिति पाल्लवा । ये ण प्रत्ययान्त के कुछ उदाहरण हैं । परिगणन नहीं है । अतः—मुसलप्रहरणमिति मौसला, दण्डप्रहरणमिति दाण्डा आदि में स्त्रीत्व की सिद्धि होती है ॥ ५ ॥

सा = घञन्तपदवाच्या दण्डपातादिक्रिया अस्याम् = इति सप्तम्यर्थे वर्तते चेत् तदा घञः = घञन्तात् 'घञः सास्यां क्रियेति ञः' इत्यनेन ञः प्रत्ययः स्यात् स च = ञप्रत्ययान्तः शब्दः स्त्रियां स्यादिति सम्बन्धः । दण्डपात इस फाल्गुनी नक्षत्र में है इस अर्थ में घञन्त से विहित ञ प्रत्ययान्त शब्द स्त्रीलिंग होते हैं । जैसे—दण्डपातो ऽस्यां फाल्गुन्यां वर्तते इति दाण्डपाता फाल्गुनी । 'श्येन पात है इस मृगया क्रिया में इस अर्थ में घञन्त से विहित ञप्रत्ययान्त शब्द स्त्रीलिंग होते हैं । जैसे—श्येनपातोऽस्यां मृगयायां इस

---

१. वेणिः स्यात् केशविन्यासः प्रवेणिश्च स्त्रियामुभे । २. अङ्कुशः । ३. कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता । ४. अवीर्नारी रजस्वला । ५. नौः । ६. धूमः । ७. वीणादेः गुणः । ८. कदली हरिणान्तरे । रम्भायां वैजयन्त्यां च । इति हैमः । ९. कन्दली कन्दली तु मृगगुल्मप्रभेदयोः । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्जिकाऽऽढकी ॥ ७ ॥
सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका ।

विग्रह में 'श्येन तिलस्य पाते ञे' से मुमागम होने पर श्येनंपाता मृगया में स्त्रीत्व सिद्ध हुआ । 'तिलपात है इस स्वधा (पितृदाने स्वधा मता) में' इस अर्थ में घञ् प्रत्ययान्त से विहित ञ प्रत्ययान्त शब्द स्त्रीलिङ्ग होते हैं । जैसे—तिलपातो वर्ततेऽस्यां स्वधायामिति 'तैलंपाता स्वधा' यहाँ भी 'श्येनतिलस्य पाते ञे' से मुमागम जानना चाहिए । दिक् कहने से परिगणनाभाव सूचित होता है । अतः दण्डपातोऽस्यां तिथौ वर्तते इति 'दाण्डपाता तिथिः' मुसलपातोऽस्यां भूम्यां वर्तते इति 'मौसलपाता भूमिः' आदिका संग्रह जानना चाहिए ॥ ६ ॥

यदि अपचये विवक्षा = वक्तुमिच्छा स्यात्तदा मृणाल्यादिः काचित्स्त्रीस्यादिति सम्बन्धः । यदि अल्पत्व की विवक्षा हो तो 'मृणाली' आदि शब्द स्त्रीलिङ्ग होते हैं । जैसे—अल्पं मृणालं मृणाली-गौरादि में पाठ होने से ङीष् जानना । आदि पद से—कुम्भी, प्रणाली, मुसली, छत्री, मठी, पटी, तटी आदि । काचित् कहने से ही 'अल्पो वृक्षः वृक्षकः' में पुंलिंग होता है ।

'ङ्याबूङन्तम्' (ङीषन्त, ङीबन्त, आबन्त, ऊङन्त) आदि वाक्य से सिद्ध स्त्रीलिङ्ग शब्दों का (जो अप्रसिद्ध हैं पहले अनुक्त हैं उन-उन शब्दों के नाम निर्देशपूर्वक लिङ्ग ज्ञान के लिये ही लङ्कादि ४२ स्त्रीलिंग शब्दों का) यहाँ पाठ किया जाता है ।

[1]लङ्का (लक्यते सुखमस्यामिति लाकयतेश्चौरादिकाधिकरणे अचि घञि वा पृषोदरादित्वात् ह्रस्वे नुमागमे वृद्ध्यभावे च । रमन्तेऽस्यामिति विग्रहे तु बाहुलकात्कप्रत्यये लत्वे मस्यानुस्वारपरसवर्णे च वा) शेफालिका (शेते इति विचि शेः, शवं फालयतीति अणि स्वार्थे कनि, क्वनि वा) [2]टीका (टीक्यते अर्थोऽनया इति टीकतेः करणे अप्रत्यये टापि च) धातकी (धातुं करोतीति णिचि टिलोपे क्वनि पिप्पल्यादेराकृतिगणत्वात् ङीषि) पञ्जिका (पिञ्ज्यतेऽर्थोऽस्यामिति पिजिधातोः चौरादिकादधिकरणे अप्रत्यये पृषोदरादित्वादिकारस्याकारे स्वार्थे कनि च पिञ्जयतीति विग्रहः क्वनि वा, [3]पञ्चिका इति वा पाठः = निःशेषपदस्य व्याख्या । पच्यन्ते व्यक्तीक्रियन्ते पदार्था अनयेति-पञ्चिका = आयव्ययलिखनार्था) [4]आढकी (आ समन्तात् ढौकतेरचि पृषोदरादित्वात् औकारस्याकारे ङीषि च गौरादित्वात्) ॥ ७ ॥

सिध्रका (सेधति सिद्ध्यते वा रक्ि कनि इत्वाभावे च = सीध नाम का वृक्ष) सारिका (सरतीति ण्वुलि वृद्धौ अकादेशे इत्वे टापि, शृणाति दुःखं विरहिणीनामिति विग्रहे तालव्यादिरपि = मैना) हिक्का (हिक्कनम् इति अप्रत्यये, हिक्यते इति विग्रहे पचाद्यचि = हिचकी) प्राचिका (प्राचति अपूर्वादंचु गतौ धातोः ण्वुलि = वनमक्खी, पक्षिविशेष) उल्का (ओषति ओष्यते वा इति शुकवल्कोल्का इति कक्प्रत्यय लत्वे, तेजःपुञ्ज, लुक्क = उकापतंग), पिपीलिका (अपि पील्यते अपि पूर्वकात् पीलप्रतिष्टम्भे धातोः कर्मणि घञि भागुरिमतेन अलोपे संज्ञापूर्वकतया वृद्ध्यभावे स्वार्थे कनि टापि च = चींटी ।

---

१. लंका रक्षः पुरीशाखाशाकिनीकुलटासु च । इति मेदिनी । २. निरन्तर-व्याख्या विषमपदव्याख्या च । ३. पञ्चिका क्रियते लघुः । इति बोपदेवः । ४. आढकी तु तुवर्यां स्त्री परिमाणान्तरे त्रिषु इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिन्दुकी कणिका भङ्गिः सुरङ्गासूचिमाढयः ॥ ८ ॥
पिच्छा-वितण्डा-काकिण्यश्चूर्णिः शाणी द्रुणी दरत् ।
सातिः कन्या तथाऽऽसन्दी नाभी राजसभाऽपि च ॥ ९ ॥

—स्वामिमते—'शनैर्याति पिपीलिकः इति पुंस्त्वमपि) तिन्दुकी (तिम्यतीति तिमेः बाहुलकात् दुकपि गुणाभावे ङीपि च = तेन्दुआ नामक वृक्ष विशेष) कणिका (कणतीति पचाद्यचि स्वार्थे कनि = अति सूक्ष्म) [1]भङ्गिः (भङ्गस्य करणम् तत्करोति णिजन्तात् भावे इः = टेढ़ाई, रीति) सुरङ्गा (सु = बहु रज्यतेऽस्यां सुपूर्वकात् रञ्जेराधारे घञि कुत्वे टापि च = टेढा गड्ढा । [2]सूचिः (सूच्यतेऽनया इति सूच—पैशुन्ये धातोः इः प्रत्यये = सूई) [3]माढिः (महनम् महधातोः भावे क्तिनि ढत्वे ष्टुत्वे ढलोपे दीर्घे च = पत्रभङ्ग, पत्ते का नस और दैन्य के व्यक्त करने में 'माढि' शब्द का प्रयोग स्त्रीलिंग में होता है) ॥ ८ ॥

पिच्छा (पिच्छ्यते पिच्छबाधे धातोः अप्रत्यये टापि च = सेमर का गोंद या भात का मांड) वितण्डा (वितण्ड्यते परपक्षोऽनया इति विपूर्वकात् तडि आघाते धातोः अप्रत्यये टापि च = वादभेदः) [4]काकिणी (ककनम् कक लौल्ये धातोः भावे घञि, काकमणतीति अणि पृषोदरादित्वात् अकारस्येकारे ङीपि च = टुकड़ा) चूर्णिः (चूर्णस्य करणम् इति तत्करोतीति णिजन्ताद् भावे इ-प्रत्यये, चरणं चोरणं वेति विग्रहे निपातनात् साधुः = सौ कपर्दक इति पातञ्जलभाष्ये) शाणी (शणस्य विकारः इति अणि वृद्धौ ङीपि च = सनपटुआ से बना वस्त्र—विशेष, निकष, सान) । [5]द्रुणी (द्रुणति इति द्रुणधातोः इगुपधेति क—प्रत्यये ङीपि च = कच्छपी, गोजर), [6]दरत् (दरणम् दीर्यते वा इति दरतेः दृणातेर्वा भावे कर्मणि वा अदि प्रत्यये), [7]सातिः (सानम् स्यतेर्भावे क्तिनि धतिस्यतीति इत्वे प्राप्ते ऊतियूतिजूतीति इत्वाभावे निपातिते च, सननम् इति विग्रहे तु सनोतेर्भावे क्तिनि जनसनेत्यात्वे च = दान और समाप्ति), [8]कन्था (कम्यते इति कमुधातोः कर्मणि बाहुलकात् थनि = चिथडा) आसन्दी (आस्यतेऽस्यामिति निपातनात् साधुः = वेत्रासन, कुर्सी आदि) । [9]नाभिः (नम्यतेऽनया अस्या वा इति इञि, वृद्धौ च = ढोंढ़ी, रथचक्र का मध्य) राजसभा (राज्ञां सभा = राजा की सभा) ॥ ९ ॥

---

१. व्याजच्छलनिभे भङ्गिर्वैदभीतनमीलिका । इति रभसः । २. स्त्री सूचिर्नृत्यभेदे च व्यधनीशिखयोरपि । इति रत्नकोशः । ३. माढिः पत्रशिरा । इति रत्नकोशः । 'माढिः स्त्री पत्रभङ्गौ च दैन्यस्यापि प्रकाशने' इति मेदिनी । ४. पणगण्डकयोस्तुर्य उदमानस्य काकिणी । इति रुद्रः । पणोदमानगण्डानां तुर्यांशेऽपि च काकिनी । इति नान्ते रभसः, तत्र अन प्राणने धातुर्बोध्यः । आढकस्य पञ्चाशत्तमो भागः = उदमानः । उक्तञ्च—कुल्या स्यादष्टभिर्द्रोणीद्रोणपादेन चाढकम् । अतोर्धशतिको भाग उदमानमुदाहृतम् ॥ इति गणितावल्याम् । ५. द्रुण्यम्बुद्रोणीकच्छप्योः । इति मेदिनी । ६. दरत् स्त्रियां प्रपातेऽपि । इति मेदिनी । ७. सातिर्दानावसानयोः । इति हैमः । ८. कन्था मृन्मयभित्तौ स्यात्तथा प्रावरणान्तरे । इति मेदिनी । ९. नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिका मदे ॥ इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥ १० ॥
पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।

[1]झल्लरी (झर्झ्यते इति झर्झ परिभाषणहिंसातर्जनेषु इति धातोः कर्मणि बाहुलकादरनि पृषोदरादित्वाद् रझयोर्लत्वे ङीषि च = हुडुकबाजा)। [2]चर्चरी (चर्च्यते इति चर्च परिभाषण-भर्त्सनयोः धातोः कर्मणि बाहुलकादरनि ङीषि च = गान विशेष या ताली)। [3]पारी (पारयति पार्य्यते वा इति पूरणार्थक पॄधातोः पचाद्यचि घञि वा ङीषि च = हाथी बाँधने की रस्सी, गगरी, पानपात्र)। [4]होरा (होलति हुल्यते वा हुल हिंसासंवरणयोः धातोः पचाद्यचि घञि वा गुणे रलयोरेकत्वाद् रत्वे टापि च = होराशास्त्र)। [5]लट्वा (लटति इति लट बाल्ये धातोः वरनि टापि च = गौरैया पक्षी, फल, करञ्ज वाद्यविशेष।

[6]सिध्मला (सिध्ममस्त्यस्याः इति लचि, टापि = सूखी मछली, खुजली, कुष्ठरोगी) लाक्षा (लक्ष्यते इति आलोचनार्थक-लक्षधातोः घञि पृषोदरादित्वात् 'लाक्षारोचना' इति निर्देशाद्वा दीर्घे टापि च = लाह) लिक्षा (लक्ष्यते इति लक्षधातोः घञि पृषोदरादित्वात् अस्य इत्वे टापि च = जूँआ का अण्डा)। [7]गण्डूषा (गण्ड्यते इति गडिवदनैकदेशे इति धातोः ऊषनि टापि च = ऊँची नाभि) गृध्रसी (गृध्रमपि स्यति इति गृध्रपूर्वकात् स्यतेः कप्रत्यये आलोपे ङीपि च = वातरोग)। [8]चमसी (चम्यते इति असचि गौरादित्वान्ङीपि च = बेसन, यज्ञपात्र)। [9]मसी (मस्यतीति इन् ङीषि = स्याही, मसिर्वा मषति = हिनस्ति औज्ज्वल्यमिति इति विग्रहे मषतेः कर्तरि पचाद्यचि ङीपि—[10]मषीइति मूर्धन्योपधोऽपि) ये लंका से मसी पर्यन्त ४२ शब्द स्त्रीलिंग होते हैं ॥ १० ॥ इति स्त्रीलिंगसंग्रहः ॥

अथ पुंलिङ्गसंग्रहः।

सभेदाऽनुचराः = सह भेदैः अनुचरैश्च वर्तमानाः, सपर्यायाः = सह पर्यायैः वर्तमानाः सुरा = देवाः असुराः = दैत्याः पुंस्त्वे = पुंलिङ्गे स्युरिति सम्बन्धः। भेद और अनुचरों सहित देव तथा दानव के पर्यायों सहित सब शब्द पुंलिङ्ग होते हैं। सुरपर्याय जैसे--अमराः, निर्जराः, देवाः, त्रिदशाः, विबुधाः, सुराः। सुरभेद जैसे—तुषिताः, आभास्वराः, साध्याः, इन्द्रः, शक्रः, सूर्यः, आदित्यः। सुरानुचर जैसे--हाहाः, हूहूः, तुम्बुरुः, नारदः, मातलिः आदि। असुरपर्याय जैसे—दैत्यः, दैतेयः, दानवः। असुरभेद जैसे—बलिः, नमुचिः, जम्भः आदि। असुरानुचर जैसे—कूष्माण्डः, मुण्डः, कुम्भः, डाण्डः आदि। यहाँ से आगे 'द्विहीने' तक 'पुंस्त्वे' का अधिकार है। अतः मध्य के सभी शब्द पुंलिङ्ग होते हैं।

---

१. झल्लरी झिल्लरी च द्वे हुडुके बालचक्रके। इति मेदिनी। २. चर्चरी गीतभेदे च केशभित्करशब्दयोः। ३. कर्करी पूरयोः पारी पादरज्वां च हस्तिनः। इति विश्वः। ४. होरातु लग्ने राश्यर्धे रेखाशास्त्रभिदोरपि। इति मेदिनी। ५. लट्वा करञ्जभेदेऽपि फलेऽवद्ये खगान्तरे॥ इति मेदिनी। ६. सिध्मला मत्स्यविकृतौ वाच्यवत्तु किलासिनी। इति मेदिनी। ७. उन्नतनाभिस्तु गण्डूषा नापि मुखपूर्तिः। इति बोपालितः। ८. यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम्! इति मेदिनी। ९. अथ स्त्रीपुंसयोः केलिर्मणियोनिर्मसिर्मुनिः। इति त्रिकाण्डशेषः। १०. मलिनाम्बु मषी मसी। इति हैमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्ग-यागाद्रि-मेघाब्धि-द्रु-कालासि-शरारयः　॥ ११ ॥
कर-गण्डोष्ठ-दोर्दन्त-कण्ठ-केश-नख-स्तनाः　।

स्वर्गादयः समेदाः सपर्यायाः पुंसि स्युरिति सम्बन्धः। स्वर्ग, याग, अद्रि (पहाड़), मेघ, अब्धि (समुद्र), द्रु (वृक्ष) काल (समय), असि (तलवार), शर (वाण), अरि (शत्रु) इनके मेद और पर्याय वाचक शब्द पुंलिङ्ग होते हैं।

स्वर्ग के पर्याय जैसे—स्वर्गः, नाकः, त्रिदिवः, त्रिदशालयः आदि। किन्तु विशेष वचन—द्यो दिवौ द्वेस्त्रियां क्लीबे त्रिविष्टपम्,—से वाधित होने के कारण द्यो और दिव् शब्द स्त्रीलिङ्ग होते हैं और त्रिविष्टप शब्द नपुंसक होता है।

यागपर्याय जैसे—यागः, ऋतुः, मखः आदि। यागमेद जैसे—उक्थः, अतिरात्रः, अग्निष्टोमः, अश्वमेधः आदि।

अद्रि मेद जैसे—सुमेरुः, मेरुः, हिमालयः विन्ध्यः, सह्यः आदि। विशेष—'गन्धमादनमन्ये'—से वाधित होने के कारण—'गन्धमादनम्' नपुंसक होता है। पर्याय जैसे—अद्रिः, गिरिः, पर्वतः आदि।

मेघमेद जैसे—पुष्करावर्तक आदि। पर्याय जैसे—घनः, मेघः, जलदः, वारिदः आदि। विशेष—'अभ्रं मेघो'—से वाध होने के कारण 'अभ्रम्' नपुंसक होता है।

अब्धिमेद जैसे—क्षीरोदः आदि। पर्याय जैसे—समुद्रः, सागरः, अब्धिः, अर्णवः आदि।

द्रुमेद जैसे—प्लक्षः, वटः आम्रः आदि। पर्याय जैसे—द्रुः, वृक्षः, शाखी आदि। विशेष—'पाटलामोघा; पिच्छिलागुरुशिंशिपा'—से वाध होने के कारण पाटला, शिंशिपा में स्त्रीलिंग होता है।

कालमेद जैसे—मासः, पक्षः, ऋतुः आदि। पर्याय जैसे—कालः, दिष्टः, अनेहा, समयः। विशेष—दिनाहनी, तिथयोर्द्वयोः—से वाध होने के कारण दिन तिथ्यादि में लिङ्गान्तर होते हैं।

असिमेद जैसे—नन्दकः, चन्द्रहासः आदि। पर्याय जैसे—असिः, खड्गः, मण्डलाग्रः आदि। विशेष से वाध होने के कारण 'कटित्रम्' में नपुंसक होता है।

शरमेद जैसे—नाराचः, काण्डः, भल्लः आदि। पर्याय जैसे—शरः वाणः, विशिखः आदि। विशेष से वाध होने के कारण 'इषुः' में लिङ्गान्तर (स्त्रीलिंग) भी होता है। अरिमेद जैसे—आततायी। पर्याय जैसे—अरातिः, शत्रुः अरिः आदि ॥ ११ ॥

करः = राजग्राह्यो भागः, गण्डः = कपोलः, ओष्ठः = दन्तच्छदः, दोः = प्रवेष्टः, दन्तः दशनः, कण्ठः = गलः, केशः = कचः, नखः = पुनर्भवः, स्तनः = कुचः एते सपर्यायाः सभेदाः शब्दाः पुंसि स्युरिति सम्बन्धः करादि ९ शब्द, भेद एवं पर्याय सहित पुंलिङ्ग होते हैं। क्रमशः उदाहरण—कर पर्याय जैसे—करः, राजभागः किरणः रश्मिः, मयूखः पाणिः 'मरीचिः स्त्री-पुंसयोः' इस विशेष वचन से वाध होने के कारण 'मरीचिः' में स्त्रीलिङ्ग भी होता है।

गण्डपर्याय जैसे—गण्डः, कपोलः। ओष्ठपर्याय जैसे—ओष्ठः, अधरः दन्तच्छदः। दोर् पर्याय जैसे—दोः, प्रवेष्टः। 'द्वौ परौ भुजवाहू द्वयोः' वचन से वाध होने के कारण भुजादि शब्दों में स्त्रीलिंग भी होता है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ॥ १२ ॥
श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।

दन्त पर्याय जैसे—दन्तः, दशनः, रदः । दन्तभेद जैसे—जम्भः । जम्बीर के पर्याय में जम्भ शब्द पढ़ा गया है । 'अम्लत्वात् दन्तान् जम्भयति' इस विग्रह से निष्पन्न जम्भ शब्द का अर्थ—दाँतों को खट्टा करने वाला होता है । किन्तु रामाश्रमीकार ने दन्तभेद में 'जम्भः' को दिखलाया है ।

कण्ठ—पर्याय जैसे—कण्ठः, गलः आदि । 'समीपगलशब्देषु कण्ठं त्रिषु विदुर्बुधाः, इस शाश्वतोक्ति से बाध होने के कारण कण्ठ शब्द का प्रयोग तीनों लिङ्गों में होता है ।

केश पर्याय जैसे—केशः, कचः । नखः, पुनर्भवः । 'नखरोऽस्त्रियाम्' इस विशेष वचन से बाध होने के कारण 'नखरम्' नपुंसक भी होता है ।

स्तन पर्याय जैसे—स्तनः, पयोधरः, कुचः ।

अह्नश्च अहश्च अन्ते येषां ते अह्नाहान्ताः शब्दाः पुंसि स्युः । अह्न और अहन् शब्द अन्त में हो जिस शब्द के वे शब्द पुलिङ्ग होते हैं । परवल्लिङ्ग का यह अपवाद है । जैसे-अह्नः पूर्वम् = पूर्वाह्णः, अह्नः अपरम् = अपराह्णः, अह्नः मध्यम् = मध्याह्नः, अह्नः सायम् = सायाह्नः, यहाँ 'परवल्लिङ्गं द्वन्द्व तत्पुरुषयोः' का अपवाद है । द्वयोः अह्नोः समाहारः = द्व्यहः, त्रयाणाम् अह्नाम् समाहारः = त्र्यहः, यहां 'स नपुंसकम्' का अपवाद है ।

क्ष्वेडः = विषम्, तद्भेदाः पुंसि स्युः । विषभेद के वाचक शब्द पंलिङ्ग होते हैं । विषभेद के पर्याय जैसे—सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः, वत्सनाभः, कालकूटः, हलाहलः ।

रात्रोऽन्तो येषां ते, प्राक् असंख्यकाः शब्दाः पुंसि स्युः । रात्रशब्द हो अन्त में जिसके ऐसे रात्रान्त पूर्व में असंख्यक शब्द पुंलिंग होते हैं । यह परवल्लिंगता का अपवादक है । परत्वाद् समाहारनपुंसकता का भी बाधक है । अतः अहोरात्रः, सर्वरात्रः, पूर्वरात्रः की सिद्धि होती है । 'प्राक् असंख्यकाः' कहने से 'पञ्चरात्रम्' में पुंस्त्व नहीं होता, अन्यथा यहाँ भी पुंस्त्वापत्ति हो जायगी ॥ १२ ॥

श्रीवेष्टः आद्यो येषां ते निर्यासाः = वृक्षद्रवाः पुंसि स्युः । श्रीवेष्ट आदि गोंद के वाचक शब्द पुंलिंग होते हैं । जैसे—श्रीवेष्टः (श्रीपिष्टः भी पाठान्तर है) सरलः द्रवः । आद्य शब्द से—श्रीवासः, वृकधूपः, गुग्गुलुः, सिह्लकः शब्द भी पुंलिंग होते हैं ।

यदि असन्ताः अन्नन्ताश्च अबाधिताः स्युस्तदा तेऽपि पुंसि स्युरिति सम्बन्धः । अस् और अन् हों अन्त में जिसके ऐसे अबाधित शब्द भी पुंलिंग होते हैं । अबाधित शब्द का अभिप्राय है—जो किसी विशेष वचन से बाधित न हुआ हो ऐसे शब्द । जैसे—वेधस् से—वेधाः, पुरोधस् से—पुरोधाः, चन्द्रमस से—चन्द्रमाः, कृष्णवर्त्मन् से—कृष्णवर्त्मा, प्रतिदिवन् से प्रतिदिवा, मघवन् से—मघवा, प्लीहन् से = प्लीहा । अबाधित कहने से ही असन्त जैसे अप्सरस् से—अप्सरसः, जलौकस् से जलौकसः, सुमनस्से—सुमनसः । अन्नन्त-जैसे-लोमन् से—लोम, सामन् से—साम, वर्मन् से वर्म—पुंलिंग नहीं होते हैं । क्रमशः विशेष बाधक वचन जैसे—स्त्रियां बहुष्वप्सरसः । स्त्रियाँ भूम्नि जलौकसः । स्त्रियः सुमनसः । भूम्नि स्त्रियां सुमनसः, इति रत्नकोशः । तनूरुहं रोम लोम, स्त्रियामृक्सामयजुषी । तनुत्रं वर्म दंशनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कशेरु-जतु-वस्तूनि हित्वा तु-रु-विरामकाः ॥ १३ ॥
क-ष-ण-भ-म-रोपान्ता यद्यदन्ता अमी अथ ।
प-थ-न-य-स-टोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥
नाम्न्यकर्तरि भावे च घञजब्नङ्णघाथुचः ।

कशेरु—जतु—वस्तूनि हित्वा = विहाय तुश्च रुश्च इति तुरू तौ विरामे = अन्ते येषां ते पुंसि स्युतिति सम्बन्धः । कसेरु, जतु, वस्तु को छोड़ कर अन्य तु रु अन्त में हों जिसके ऐसे शब्द पुंलिंग होते हैं। जैसे—सेतुः, हेतुः, धातुः, रु अन्त वाले शब्द जैसे–कुरुः, मेरुः, त्सरुः । 'कशेरुजतुवस्तूनि—हित्वा' कहने से कशेरु, जतु, वस्तु शब्दों से नपुंसक होता है ॥ १३ ॥

क–ष–ण–भ–म–र उपान्ताः = वर्णोपधाः शब्दा अमी षट् यदि अदन्ताः = अकारान्ताः चेत्तदा पुंसि स्युः । क-ष-ण-भ-म-र ये ६ वर्णोपध वाले शब्द यदि अदन्त हों तो पुंलिङ्ग होते हैं। कोपध जैसे—अङ्कः, अर्कः, लोकः, शोकः । षोपध जैसे—माषः, तुषः, पोषः, रोषः, । णोपध जैसे—पाषाणः, शाणः, गुणः, घुणः । भोपध जैसे—दर्भः, सरभः, गर्दभः आदि । मोपध जैसे—सोमः, होमः. ग्रामः, धूमः इत्यादि । रोपध जैसे—झर्झरः, शीकरः, सीरः, समीरः इत्यादि ।

अथ = अनन्तरम्, प-थ-न-य-स-ट उपान्ता = वर्णोपधाः अमीषट् यद्यदन्ताश्चेत्तदापुंसि स्युरिति सम्बन्धः । अनन्तर प,-थ-न-य-स-ट ये ६ वर्णोपध वाले शब्द यदि अदन्त हों तो पुंल्लिंग होते हैं। पोपध जैसे—वाष्पः, कूपः, यूपः, सूपः, कलापः आदि । थोपध जैसे—रोमन्थः, सार्थः, नाथः, शपथः आदि । नोपध जैसे—फेनः, इनः, अपघनः (अंग), जनः, हायनः, आदि । योपध जैसे—तन्तुवायः, अपनयः, विनयः, प्रणयः आदि । सोपध जैसे—रसः, कुत्स, हासः, वत्सः, पनसः, आदि । टोपधः जैसे–करटः, पटः, सरटः आदि । रायमुकुट ने अथादि होने के कारण इस अंश में 'अदन्ताः' का सम्बन्ध नहीं माना है। अतः मुकुट के मतमें अदन्त से भिन्न शब्दों–गोमायुः, जायुः, वायुः, पायुः आदि में भी पुंलिंग होता है।

गोत्रम् = वंश आख्यायते = व्यपदिश्यते यैस्ते, गोत्रस्यादिपुरुषाः प्रवराश्च पुंसि स्युरिति सम्बन्धः । गोत्र और प्रवर के वाचक शब्द पुंलिङ्ग होते हैं। जैसे—कश्यपः, वशिष्ठः, गौतमः, भरद्वाजः, अत्रिः आदि ।

चरणानाम् = वेदशाखानामाह्वयाः = नामानि पुंसि स्युरिति । वेदशाखा के वाचक शब्द पुलिंग होते हैं। जैसे—कठः, कलापः, बह्वृचः, छन्दोगः आदि ॥ १४ ॥

घञादयः (घञ्-अच् अप्-नङ्-ण-घ अथुच्) सप्त प्रत्ययाः नाम्नि = संज्ञायां विषये अकर्तरि = कर्तृभिन्ने कारके भावे च ये विहिताः तदन्ताः शब्दाः पुंसि स्युरिति सम्बन्धः । संज्ञाके विषय में कर्तृभिन्न कारक और भाव में विहित जो घञादि—(घञ् अच्-अप्-नङ् ण-घ-अथुच्) सात प्रत्यय जिनके अन्त में हों ऐसे शब्द पुंलिंग होते हैं। घञ् प्रत्ययान्त जैसे–प्रासादः (प्रसीदन्त्यस्मिन्मनांसि इति आधारे हलश्चेति घञि वृद्धौ = राजभवनम्) प्रासः (प्रास्यते इति अपूर्वकाद् अस्यतेः कर्मणि घञि वृद्धौ = अस्त्रविशेषः) वेदः (विदन्त्यनेन इति विदज्ञाने धातोः करणे घञि, = आम्नायः) प्रपातः (प्रपतन्त्यस्मादिति प्रपूर्वकात् पततेः अपादाने घञि = तटः) भाव में जैसे—पाकः (पचनमिति घञि = रसोई,) त्यागः (त्यजनम् इति घञि = दानम्) । चकारात् 'पदरुज' से विहित घञ् का ग्रहण होने से—रोगः (रुजतीति घञि = व्याधिः) दायः, धायः इत्यादि असंज्ञा में विहितों का भी संग्रह होता है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल्युः कर्तरीमनिज्भावे को घोः किः प्रादितोऽन्यतः ॥ १५ ॥
द्वन्द्वेऽश्ववडवावश्ववडवा न समाहृते ।

अच् प्रत्ययान्त यथा—चयः (चयनम् इति चिनोतेर्भावे अचि = समूहः) जयः (जयनम् इति अचि = विजयः) । अप् प्रत्ययान्त जैसे—करः (कीर्यते इति कृधातोः कर्मणि अपि = मरीचिः, राजग्राह्यो भागः, पाणिर्वा) गरः (गीर्यतेऽनेन इति करणे अपि = कण्ठ) लवः (लवनम् लूयते वा भावे अपि = लेशः, कालभेदः, रामपुत्रो वा) स्तवः (स्तवनम् इति भावे अपि = स्तोत्रम्) । नङ् प्रत्ययान्त जैसे—यज्ञः (इज्यते अनेन अत्र वेति यजधातोः कर्मणि करणे अधिकरणे वा नङि = आत्मा, यज्ञः, नारायणः, अग्निः । उक्तं च हैमे—यज्ञः स्यादात्मनि मखे नारायण-हुताशयोः) यत्नः (यतनम् इति भावे नङि = उपायः), 'नङ्' उपलक्षण है, अतः 'नन्' का भी संग्रह होता है—यथा स्वप्नः में पुंस्त्व की सिद्धि होती है। ण प्रत्ययान्त जैसे—न्यादः (न्यदनम् इति निपूर्वकात् अत्तेर्भावे णप्रत्यये वृद्धौ = आहारः)। घप्रत्ययान्त जैसे—उरश्छदः (उरः छाद्यतेऽनेन इति उरःपूर्वकात् छद अपवारणे धातोः करणे घप्रत्यये ह्रस्वे = कवचम्) प्रच्छदः (प्रच्छादयतेऽनेन इति घप्रत्यये ह्रस्वे = पटः) । अथुच् प्रत्ययान्त जैसे—श्वयथुः (श्वयनम् इति श्वयतेर्भावे अथुचि शोथः) । वेपथुः (वेपनम् इति अथुचि = कम्पः) ।

नन्द्यादित्वात् ग्रहादित्वात् पचादित्वाद् वा कर्तरि विहितो ल्युः पुंसिस्यात् । 'नन्दिग्रहिपचादिभ्यः' से कर्ता में विहित जो ल्युप्रत्यय तदन्त शब्द पुंलिङ्ग होते हैं । ल्युप्रत्ययान्त जैसे—नन्दनः (नन्दयतीति ल्युप्रत्यये अनादेशे पुत्रः) । रमणः (रमते इति ल्युः रमणः = पतिः) । मधुसूदनः (सूदयतीति सूदनः, मधोः सूदनः) यह संज्ञाविषयक हैं । असंज्ञा में 'कृतः कर्तर्यसंज्ञायाम्' से सिद्ध हैं ।

भावे विहितो य इमनिच् तदन्ताः शब्दाः पुंसि स्युः । भाव में विहित जो इमनिच प्रत्यय तदन्त शब्द पुंलिङ्ग होते हैं । यथा-प्रथिमा (पृथोर्भावः इति इमनिचि ऋकारस्य रत्वे टिलोपे च) एवं म्रदिमा (मृदोर्भावः) ।

'सुपि स्थः' इति योगविभागात् विहितः कप्रत्ययस्तदन्ताः शब्दाः पुंसि स्युरिति सम्बन्धः ।

'सुपिस्थः' इस योगविभाग से अथवा 'घञर्थे कः' से विहित जो कप्रत्यय तदन्त शब्द पुंलिङ्ग होते हैं । कप्रत्ययान्त जैसे—आखूत्थः (आखूनामुत्थानम् इति कप्रत्यये) प्रस्थः (प्रस्थानम् कः) ।

प्रादितः = उपसर्गतः, अन्यतः = अन्यस्माच्च सुबन्तात्परो यो घुः = घुसंज्ञको धातुः तस्माद् विहितो यः किप्रत्ययस्तदन्ताः शब्दाः पुंसि स्युरिति सम्बन्धः । उपसर्ग या अन्य सुबन्त से पर जो घुसंज्ञक धातु उससे विहित जो किप्रत्यय तदन्तशब्द पुंलिङ्ग होते हैं । यथा—निधिः (नितरां धीयते, धत्ते = पोषयत्यनेन वेति कि-प्रत्यये आलोपे च = खजाना) । आदिः (आदीयते गृह्यतेऽर्थोऽनेनेति किः) विधिः (विधानम् विधीयतेऽनेन वेति किः, आलोपे च) । उदधिः (उदकानि धीयन्तेऽस्मिन्निति कर्मणि अधिकरणे वा किः) । 'घोः किः' कहने से ही सर्वत्र इष्टसिद्धि (पुंलिंगता) हो ही जाती है, 'प्रादितोऽन्यतः' यह स्पष्टार्थ जानना चाहिए ॥ १५ ॥

असमाहृते = समाहारार्थभिन्ने द्वन्द्वे = द्वन्द्व-समासे 'अश्ववडवौ' इति शब्दः पुंसि स्यात् । समाहारार्थ-भिन्न द्वन्द्वसमास में 'अश्ववडव' शब्द पुंलिङ्ग होता है । यथा—अश्वश्च वडवा च इति अश्ववडवौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कान्तः सूर्येन्दुपर्यायपूर्वोऽयः पूर्वकोऽपि च ॥ १६ ॥
वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः ।
पुङ्खो न्युङ्खः समुद्गश्च विट-पट्ट-धठाः खटाः ॥ १७ ॥
कोट्टाऽरघट्ट-हट्टाश्च पिण्ड-गोण्ड-पिचण्डवत् ।

यह परवल्लिङ्ग का अपवाद है। द्वित्व विवक्षित नहीं है—अतः 'अश्वाश्च वडवाश्च इति अश्ववडवाः, तान् अश्ववडवान्, अश्ववडवैः' आदि की सिद्धि होती है। असमाहृते कहने से ही समाहार में नपुंसक और एकवद् भाव होकर 'अश्ववडवम्' की सिद्धि होती है।

सूर्येन्दुपर्यायपूर्वः कान्तः = कान्तःशब्दः पुंसि स्यात्। सूर्य और चन्द्र के नाम पूर्वक शब्द पुंलिङ्ग होते हैं। यथा—भास्वत्कान्तः, सूर्यकान्तः, अर्ककान्तः, इन्दुकान्तः, चन्द्रकान्तः, शशिकान्तः, सुधांशुकान्तः, विधुकान्तः, आदि।

अयस् = लौहपूर्वकः कान्तशब्दः पुंसि स्यात्। अयस् = लौह पर्याय पूर्वक कान्तशब्द पुंलिङ्ग होते हैं। यथा—अयस्कान्तः, लौहकान्तः, पिण्डकान्तः आदि ॥ १६ ॥

पुंल्लिङ्गसङ्ग्रहान्तं यावदधुना कान्तखान्तक्रमेण पञ्चपञ्चाशत्पुंल्लिङ्गशब्दा उच्यन्ते—

वटकः (वटति इति वटवेष्टने धातोः क्किनि अकादेशे च = वरा) अनुवाकः (अनु उच्यते इति अनुपूर्वकाद्वचेः कर्मणि घञि वृद्धौ कुत्वे च = ऋग्यजुः-समूहो वेद-भेदः)। रल्लकः (ललनम्, लल्यते वा इति ललधातोः भावे कर्मणि वा क्विपि रलयोरेकत्वे च रल्; लक्यते इति लकधातोः घे लकः, रल् चासौ लकश्च इति रल्लकः = पक्ष्मकम्बलः)। कुडङ्गकः (कुटति इति कौटिल्यार्थककुटधातोः कर्तरि क्विपि कुट्, कुट् अङ्गमस्येति कपि = वृक्षलतागृहम्, छदिः = छाजन इति भाषायाम्। कुडङ्गको ना छदिः पिटम्; इति बोपालितः। वृक्षलता गृहम् इति स्वामी। कुटङ्गकः इति पाठो वा, तत्र कुटतेः कर्तरि के पररूपे च) इति कान्ताः। पुङ्खः (पुमांसं खनति, पुंसा खन्यते वा इति पुंस्पूर्वकात् खनतेः कर्तरि कर्मणि वा डे टिलोपे च = काण्डम्, बाणस्याधो भागः) न्युङ्खः (न्युङ्ख्यते इति निपूर्वकादुङ्खतेः कर्मणि घे = सामवेदस्य षडोंकारः। 'न्युङ्खः सम्यग् मनोज्ञे च साम्नः षट्प्रणवेषु च' इति मेदिनी। न्यूङ्ख इति दीर्घपाठनिर्देशे पृषोदरादिः कल्प्यः। इति खान्ताः। समुद्गः (समुद्गम्यते इति समुत्पूर्वकाद् गच्छतेः कर्मणि डे टिलोपे च = सम्पुटकः = 'डिब्बा' इति भाषायाम्) इति गान्ताः। विटः (वेटति इति के क्कित्वात् गुणाभावे च = धूर्तः 'विटोऽद्री धवले षिङ्गे भूषिके खदिरेऽपि च' इति मेदिनी)। पट्टः (पटति पट्यते वा इति पटतेः कर्तरि कर्मणि वा बाहुलकात्तप्रत्यये ष्टुत्वे च = 'पट्टः पेषणपाषाणे व्रणादीनां च बन्धने। चतुष्पथे च राजादिशासनान्तरपीठयोः' इति मेदिनी)। धटः (तट्यते धन्यते वा तटतेः धनतेः वा कर्मणि घे पृषोदरादित्वात् तस्य धत्वे नस्य टत्वे वा = परीक्षार्थतुला। 'परीक्षार्थतुलायां च धटः सूरिभिरिष्यते' इति विश्व।)। खटः (खट्यते इति खटतेः कर्मणि घे। 'खटोन्धकूपखपयोः प्रहारान्तरटङ्कयोः' इति मेदिनी) ॥ १७ ॥

कोट्टारः (कुट्यते इति कुट्ट धातोश्चौरादिकात् कर्मणि बाहुलकात् आरनि गुणे च। कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके इति रभसः। घट्टः (घट्यतेऽस्मिन् इति चलनार्थकघट्टधातोः आधारे घञि = घाट इति भाषायां प्रसिद्धः। केचिद्विद्वांसः कोट्टः = दुर्गपुरम्, अरघट्टः = कूपभेदः (कूपात् जलनिःसारणार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गडुः करण्डो लगुडो वरण्डश्च किणो घुणः ॥ १८ ॥
दृति-सीमन्त-हरितो रोमन्थोद्गीथ-बुद्बुदाः ।
कासमर्दोऽर्बुदः कुन्दः फेन-स्तूपौ स-पूपकौ ॥ १९ ॥

घटीयन्त्रविशेषो वा) इति पृथक्कृत्य व्याकुर्वन्ति । अत्र कुट्टधातोर्बाहुलकात् घप्रत्यये गुणे च, कोट्टः पुंक्लीबलिंगः इत्यभिधानचिन्तामणौ । अरैः चक्रावयवसदृशैः काष्ठविशेषैः घट्यते = रच्यते इति अरघट्टः) । हट्टः (हटन्त्यत्र इति हटधातोराधारे बाहुलकात्तप्रत्यये ष्टुत्वे च = आपणः, बाजार इति ख्यातः) पिण्डः (पिण्डते पिण्ड्यते वा कर्तरि कर्मणि वा अचि घञि वा 'पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । इति मेदिनी) गोण्डः (गोरण्ड इव = 'गोण्डः पामरजातौ च वृद्धनाभौ च तद्वति' इति मेदिनी) । पिचण्डः (अपिचण्डतेऽनेनात्र वेति अपिपूर्वकात् चण्डते साधनेऽधिकरणे वा घञि, 'वष्टि भागुरिरिति' अपेरल्लोपे च = उदरम्, 'पिचण्डोऽवयवे पशोः । उदरे च' इति हैमः) पिचण्डवत् कोट्टारादयः पुंसि स्युरित्यन्वयः । गडुः (गडति गड्यते वा बाहुलकादुः = 'गडुः पृष्ठगुडे कुब्जे' इति विश्वः) करण्डः (क्रियते इति अण्डन् = 'करण्डो मधुकोषासिकारण्डवदलाढके' इति मेदिनी) लगुडः (लगति इति लगे सङ्गे धातोः बाहुलकादुडच् = यष्टिः) वरण्डः (वृणोति व्रियते वेति अण्डनि गुणे च = 'वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः' इति मेदिनी) किणः (कणति गत्यर्थककणधातोः पचाद्यचि पृषोदरादित्वात् ककारोत्तराकारस्य इत्वे = मांसग्रन्थिः, = ठेला व्रणजं चिह्नं च) घुणः (घोणते इति भ्रमणार्थकघुणधातोः कप्रत्यये गुणाभावश्च कित्त्वात् = घुन इति भाषायाम् । 'घुणः स्यात् काष्ठवेधके' इति रत्नकोशः) ॥ १८ ॥

दृतिः (द्रियते इति आदरार्थकदृङ्धातोः कर्तरि क्तिचि = चर्मनिर्मितपात्रम्, मशक इति भाषायाम् । 'दृतिश्चर्मपुटे मत्स्ये ना' इति मेदिनी) सीमन्तः (सीम्नोऽन्तः पररूपे = केशविन्यासः) हरित् (हरति ह्रियते वेति हृधातोः कर्तरि कर्मणि वा इति प्रत्यये गुणे रपरे च = हरा रंग इति भाषायाम् । 'हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च' इति मेदिनी) रोमन्थः (रोमस्य मन्थः पृषोदरादिः = चर्वितस्य पुनश्चर्वणम्) उद्गीथः (उद्गीयते इति उत्पूर्वकात् गायतेः कर्मणि थकि = सामवेदध्वनिः, साम्नो भागविशेषे वा 'उद्गीथः प्रणवः सामवेदध्वनिः' इत्यरुणः) बुद्बुदः (बुद् इत्यव्यक्तध्वनिः बुन्दति = करोतीति के गुणाभावे नलोपे च = जलविकारः, 'बुलबुला' इति भाषायाम्) कासमर्दः (कासं मृद्नाति इति कासपूर्वकात् मृद्नातेः कर्मण्यणि गुणे च = वेसवारभेदः, रोगविशेषो वा) अर्बुदः (अरं बुन्दतीति अर्पूर्वकात् बुन्दतेः कर्तरि क प्रत्यये नलोपे पृषोदरादित्वादकारलोपे च – 'अर्बुदो मांसपरुषि दशकोटिषु न स्त्रियाम् । महीधर विशेषे ना' इति मेदिनी) कुन्दः (स्कुन्दते इति आप्रवणार्थकस्कुदिधातोः-पचाद्यचि पृषोदरादित्वात् सलोपे च = 'कुन्दो माध्येऽस्त्रीमुकुन्दभ्रमिनिभ्यन्तरेषु ना' इति मेदिनी) फेनः (स्फायते इति निपातनात् = समुद्रफेन पदेन प्रसिद्धः) स्तूपः (स्तूयते इति ष्टुञ स्तुतौ धातोः कर्मणि प प्रत्यये दीर्घे च = मृत्तिकादेः समूहः । यज्ञादौ वध्यपशुवन्धनार्थ—काष्ठविशेषो वा) पूपः (पुनाति पूयते वेति कर्तरि कर्मणि वा बाहुलकात्पकि = अपूपः (पूआ) । 'सयूपकौ' पाठे यौति यूयते युवन्ति = बध्नन्ति अस्मिन् पशुमिति यौतेः कर्तरि कर्मणि आधारे वा पप्रत्यये दीर्घे च = यज्ञस्तम्भः, ततः स्वार्थे कनि यूपकः तेन सहितौ सयूपकौ फेनस्तूपौ पुंसीत्यन्वयः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आतपः क्षत्रिये नाभिः कुणप-क्षुर-केदराः ।
पूर-क्षुरप्रचुक्राश्च गोल-हिङ्गुल-पुद्गलाः ॥ २० ॥
वेताल-मल्ल-मल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

आतपः (आतपतीति आङ्पूर्वकात्तपतेः कर्तरि पचाद्यचि = प्रकाशः 'घाम' इति लोके) क्षत्रिये = क्षत्रियार्थे प्रयुक्तो नाभिशब्दः पुंसि स्यात् । क्षत्रिय अर्थ में प्रयुक्त नाभिशब्द पुंलिङ्ग होता है । नाभिः = (नभ्यते इति हिंसार्थकणभधातोः कर्तरि इणि, नामयतीति विग्रहे तु स्वार्थण्यन्तादच्च इः इति इ प्रत्यये = 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्' इति मेदिनी) कणपः = (कणं पाति पिबतीति वा कणपूर्वकात् पातेः पिबतेर्वा कर्तरि क प्रत्यये आलोपे च = ग्रासविशेषः, कुणपः इति पाठे—क्वणति क्वणशब्दे धातोः कपनि सम्प्रसारणे च = शवः, दुर्गन्धः, 'कुणपः पूतिगन्धौ शवेऽपि च' इति मेदिनी) क्षुरः (क्षुरति इति विलेखनार्थकक्षुरधातोः क प्रत्यये = 'क्षुरः स्यात् छेदने द्रव्ये कोकिलाक्षे च गोक्षुरे' इति मेदिनी) केदरः (के दृणाति दीर्यते वा इति के पूर्वकात् दृणातेः पचाद्यचि कर्मणि अपि वा गुणे रपरत्वे च = सव्यवहारः, पदार्थश्च तरुभेदो वा) पूरः (पूरयति, पूरणार्थकचौरादिकात् पूरधातोः कर्तरि पचाद्यचि णिलोपे च = 'पूरो जल प्रवाहे स्याद् व्रणसंशुद्धिखाद्ययोः' इति मेदिनी) क्षुरप्रः (क्षुरं प्राति, क्षुर इव प्राति वा इति क्षुरपूर्वकात्प्रातेः कप्रत्यये आलोपे च = वाणः । खुरप्रः इति वा पाठः) चुक्रः (चक्यतेऽनेन इति करणे रकि उपधा—अकारस्य उत्वे च = 'चुक्रं वृक्षाम्ले, चाङ्गेयां स्त्रीपुंसयऽम्लवेतसि' इति मेदिनी) गोलः (गुडयते रक्षार्थकगुडधातोः कर्मणि घञि गुणे डलयोरेकत्वात् डस्य लत्वे च = 'गोलः स्यात् सर्ववर्तुले' इति—हैमः) हिङ्गुलः (हिङ्गुलातीति हिङ्गुपूर्वकात् लातेः कर्तरि कप्रत्यये आलोपे च = 'हिङ्गुलो वर्णकद्रव्ये ना भण्टाक्यां तु हिङ्गुली' इति मेदिनी । मितद्र्वादित्वात् डुप्रत्यये 'हिङ्गुलु' रित्युदन्तोऽपि—हिङ्गुलुः स्यात्तु हिङ्गुलम्' इति नपुंसके मुकुटेनोक्तम्) पुद्गलः (पुद्गिलति गीर्यतेवा इति पुत्पूर्वकात् गिरतेः कर्तरि अचि कर्मणि अपि, पुद्गलतीति विग्रहे पुत्पूर्वकात् गलतेः पचाद्यचि वा बोध्यः = 'पुद्गलः सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः' इति मेदिनी ॥ २० ॥

वेतालः (वो वायुः इतः = गतः यस्मात् स वेतः = शवः, वेतमलति = भूषयति इति अणि । वे = वायौ तालः = प्रतिष्ठा यस्य वा = प्रेतविशेषः) मल्लः (मल्लते मल्लयते वा धारणार्थकमल्लधातोः कर्तरि पचाद्यचि कर्मणि घञि वा = 'मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि' इति मेदिनी । भल्लः (भल्लते भल्ल्यते वा भल्लेः कर्तरि पचाद्यचि कर्मणि घञि वा = भल्लः स्यात् पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः । भल्लातक्यां स्त्रियां भल्ली' इति मेदिनी) पुरोडाशः (पुरः प्रथमं दाश्यतेऽयं इति विग्रहे पुरः पूर्वकाद्दाशतेः कर्मणि घञि पृषोदरादित्वात् दस्य डत्वे = 'पुरोडाशो हविर्भेदे चमरया पिष्टकस्य च । रसे सोमलतायाश्च हुतशेषे च कीर्तितः' इति विश्वः) पट्टिशः (पट्टि = पट्टिः स्त्री पटभेदे स्याल्ललाटे कुम्भिका द्रुमे, इति मेदिनी—श्यति = तनूकरोति इति पट्टिपूर्वकात् श्यतेः कप्रत्यये आलोपे च = अस्त्रविशेषः । दन्त्यसान्तोऽपि तत्र षोऽन्तकर्मणि धातुर्बोध्यः) कुल्माषः (कोलनम् इति क्विपि कुल्, कुलं मषति इति अणि वृद्धौ = 'कुल्माषो यावके प्रोक्तः कुल्माषं काञ्जिकेऽपि च' इति विश्वः । दन्त्यसान्तोऽपि तत्र मसधातोः घञ्प्रत्ययो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विहीनेऽन्यच्च खाऽरण्य-पर्ण-श्वभ्र-हिमोदकम् ।
शीतोष्ण-मांस-रुधिर-मुखाऽक्षि-द्रविणं बलम् ॥ २२ ॥

बोध्यः = माषादिमिश्रमर्धस्विन्नमोदनम्) रभसः (रभणम् रभतेऽनेन वेति रभधातोः भावे करणे वा असचि = 'रभसो वेगहर्षयोः' इति विश्वः) सकटाहः, = कटाहसहितः पतद्ग्रहः पुंसि स्यादिति सम्बन्धः—कटाह सहित पतद्ग्रह शब्द पुंलिङ्ग में प्रयुक्त होता है। कटाहः (कटेनातिशयेनाहन्यते = गम्यते इति कटाङ् पूर्वकाद् हन्तेः कर्मणि डप्रत्यये टिलोपे च = कराहइति लोके प्रसिद्धः । कटाहो घृततैलादिपाकपात्रेऽपि कर्परे । कटाहः कूर्मपृष्ठे च स्तूपे च महिषीशिशौ' इति विश्वः ।) पतद्ग्रहः (गृह्णातीति पचाद्यचि ग्रहः पततस्ताम्बूलादेः ग्रहः = निष्ठीवनपात्रम् 'पीकदान' इति भाषायाम्) । श्लोक संख्या १७—२१ तक पठित उक्त ५५ शब्द पुंलिङ्ग होते हैं ।। २१ ।। इति पुंलिङ्गसंग्रहः ।

अन्यत् द्विहीने स्यादिति सम्बन्धः । उक्तादन्यत् = अवशिष्टं क्लीबे स्यादित्यर्थः । द्विहीने = द्वाभ्यां स्त्रीपुंसाभ्यां हीने = रहिते क्लीबे इत्यर्थः । अतः परम् द्विहीने = क्लीबे इत्यस्याधिकारः । यहाँ से आगे 'पुंनपुंसकयोः' तक क्लीबे का अधिकार होने से इस मध्य में पडने वाले अबाधित शब्द नपुंसक होते हैं । जैसे—[१] खम् (खनति खन्यते वा इति कर्तरि कर्मणि वा ड—प्रत्यये टिलोपे च) अरण्यम् (अर्यते इति अर्तेः कर्मणि अन्यप्रत्यये णत्वे च)[२] पर्णम् (पर्णयति इति चौरादिकात् हरित—भावार्थकपर्णधातोः कर्तरि अचि प्रत्यये) श्वभ्रम् (श्वभ्रयति इति स्वार्थण्यन्ताद् गत्यर्थकश्वभ्रधातोः पचाद्यचि । सुष्ठु अभ्रमिति विग्रहे दन्त्यादिरपि) [३]हिमम् (हन्तीति । मनिनि ह्यादेशे च) उदकम् (उनति इति क्लेदनार्थकोन्दीधातोः कर्तरि क्वनि नलोपे अकादेशे च) [४]शीतम् (श्यायतेस्म इति श्यैङ् धातोः कर्तरि क्तप्रत्यये सम्प्रसारणे च) [५]उष्णम् ओषतीति दहनार्थकोषधातोः कर्तरि नक् प्रत्यते) [६]मांसम् (मन्यते इति सप्रत्यये दीर्घे च) [७]रुधिरम् (रुणद्धि रुध्यते वा इति किरचि गुणाभावे च) [८]मुखम् (खनति खन्यते अनेन वा इति अचि धातोर्मुडागमे टिलोपे च) अक्षि (अश्नुते इति क्सिप्रत्यये षत्वे कत्वे क्षत्वे च = लोचनम्) [९]द्रविणम् द्रवति द्रूयते वा द्रवतेः कर्तरि कर्मणि वा इननि गुणे अवादेशे च) बलम् (वलतीति पचाद्यचि = बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च ॥ बलयुक्तेऽन्यलिङ्गः स्याद्वास्त्या-लके तु योषिति । इति मेदिनी । एते सपर्यायाः सभेदाः शब्दाः क्लीबे स्युः । ये सपर्याय सभेद शब्द नपुंसकलिग में प्रयुक्त होते हैं । मुकुटने भी खादि-शब्दोंके पर्य्याय तथा भेदों को नपुंसक कहा है ।। २२ ।।

---

१. खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि । संवेदने देवलोके शर्मण्यपि नपुंसकम् । इति मेदिनी । २. पर्णं पत्रे पलाशे ना । इति । ३. हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गः । इति मेदिनी । ४. शीतं हिमगुणे क्लीबे शीतलालसयोस्त्रिपु । इति मेदिनी । ५. उष्णो ग्रीष्मे पुमान्दक्षाशीत-योरन्यलिङ्गकः । इति मेदिनी । ६. मासं स्यादामिषे क्लीबं कक्कोलीजटयोः स्त्रियाम् । इति मेदिनी । ७. रुधिरोऽङ्गारके पुंसि क्लीबं तु कुङ्कुमासृजोः । इति मेदिनी । ८. प्राक्खनोमुडुदात्तश्च ततोऽच् प्रत्यये भवेत् । प्रजास्त्रजा यतः खातं तस्मादाहुर्मुखं बुधाः । मुखं निःसरणे वक्त्रे प्रारम्भ पाययोरपि । सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम् । इति मेदिनी । ९. द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फल-हेम-शुल्व-लोह-सुख-दुःख-शुभाऽशुभम् ।
जल-पुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥
कोट्याः शतादिसंख्याऽन्या वा लक्षा नियुतं च तत् ।
द्व्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥

फलम् (फलतीति पचाद्यचि, हलमिति पाठे विलेखनार्थहलधातोः कर्तरि पचाद्यचि, लाङ्गलमित्यर्थः) हेम (हिनोति इति कर्तरि मनिनि गुणे च = सुवर्णम्) शुल्वम् (शल्यते वा उल्वादित्वात्साधुः, ताम्रं म्लेच्छमुखं वा लोहम् लोहयति लुह्यते वा रोहति रुह्यते वा इति कर्तरि पचाद्यचि कर्मणि घञि लत्वे च कपिलकादित्वात्) लूयतेऽनेन इति विग्रहे तु बाहुलकात् हप्रत्यये गुणे च = पिण्डम्, तीक्ष्णमिति वाऽर्थः) सुखम् (सुखयतीति पचाद्यचि = शर्म) दुःखम् (दुःखयतीति कर्तरि अचि = कष्टम्) शुभम् (शोभते इति कप्रत्यये गुणाभावे च = कल्याणम्) अशुभम् (न शुभम् इति = अमङ्गलम्) जलपुष्पाणि = (जलभवानि पुष्पाणि = जलमें होने वाले फूल, जैसे—कुमुद,कमल आदि नपुंसक होते हैं) । [1]लवणम् (लुनाति इति कर्तरि ल्युप्रत्यये अनादेशे गुणे अवादेशे 'लवणाल्लुगिति निर्देशाण्णत्वे च) [2]व्यञ्जनम् (व्यज्यतेऽनेनेति ल्युटि अनादेशे च) [3]अनुलेपनम् (अनुलिप्यते, अनेन वा इति ल्युटि अनादेशे च) ये समेद तथा सपर्याय शब्द नपुंसक होते हैं ॥ २३ ॥

कोट्याः अन्या शतादिः संख्या क्लीबे स्यात् । कोटि (करोड़) से भिन्न जो शतादि संख्या वाचक शब्द हैं वे नपुंसकलिङ्ग में प्रयुक्त होते हैं। जैसे—शतम्, सहस्रम्, अर्बुदम्, अयुतम् । लक्षा वा क्लीबं स्यात् । [4]लक्षा (लक्ष्यते इति अ) शब्द विकल्पसे क्लीबलिंग होता है । तत् = लक्षं नियुतम् (नियूयते स्म) नियुतशब्दवाच्यमपि । उसी लक्षा शब्द का पर्याय नियुत (= निपूर्वकात् यौतेः क्तप्रत्यये [5]नियुतम्) भी है ।

असन्तमिसन्तमुसन्तं यद् द्व्यच्कं तत् क्लीबे = नपुंसके स्यात् । असन्त—इसन्त-उसन्त अन्नन्त जो दो अच् वाले शब्द वे नपुंसक लिङ्ग में प्रयुक्त होते हैं। असन्त = अस् अन्तवाले जैसे—यशः, पयः, तेजः, [6]तमः । इसन्त जैसे—सर्पिः, ज्योतिः, हविः, रोचिः, शोचिः । उसन्त जैसे—धनुः, यजुः, वपुः, । अन् अन्त वाले जैसे—कर्म, वर्म, चर्म, साम, शर्म । अकर्तरि = कर्तृभिन्नेऽर्थे यदनान्तं नाम तत् क्लीबे स्यात् । कर्ता से भिन्न अर्थ में विहित जो अन अन्त वाले नाम शब्द वे नपुंसक लिङ्ग में प्रयुक्त होते है । जैसे—कदनम्, गगनम्, साधनम्, दमनम्, रमणम्, शमनम् । अकर्तरि कहने से—मधुसूदनः, नन्दनः, रमणः आदि में पुंस्त्व की सिद्धि होती है ॥ २४ ॥

---

१. लवणं सैन्धवादौ ना सिन्धुरक्षोभिदो रसे । तद्युक्ते वाच्यलिंगः स्यान्नदीभेदद्विषोः स्त्रियाम् ॥ इति मेदिनी । २. व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽहनि । इति मेदिनी । ३. कुंकुमाद्यनुलेपनम् । ४. लक्षा न पुंसि संख्यायां क्लीबे व्याजशरव्ययोः । इति मेदिनी । ५. शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्रीकोटिरर्बुदमिति क्रमाद्दश-गुणोत्तरम् ॥ इति रत्नकोशः । ६. तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे । इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रान्तं सलोपधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥
द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः ।

शिष्टमवशिष्टमबाधितमिति यावत् त्रान्तं = त्रकारान्तं सलोपधम् = सकारलकारोपधम् च क्लीबं स्यात् । शिष्ट = पूर्वोक्त से बचे हुए अबाधित जो त्र अन्त वाले शब्द वे नपुंसकलिङ्ग होते हैं । त्रान्त जैसे—गात्रम्, दात्रम्, पात्रम्, मित्रम्, यन्त्रम्, वहित्रम्, वस्त्रम् आदि । सकारोपध जैसे—त्रपुसम्, बिसम्, बुसम्, अन्धतमसम् आदि । लोपध जैसे—कूलम्, तूलम्, मूलम्, शूलम् आदि । 'शिष्ट' कहने से—पुत्रः, मन्त्रः, वृत्रः, कंसः, हंसः, पनसः, कालः, शालः आदि मे पुंस्त्व की सिद्धि होती है ।

प्राक्संख्ययान्वितम् = संख्यापूर्वपदं रात्रं क्लीबं स्यात् । संख्यावाचक शब्द हों पूर्व में जिनके ऐसे रात्रशब्दान्तशब्द नपुंसकलिङ्ग होते हैं । जैसे—द्विरात्रम् (द्वयोः रात्र्योः समाहारः) त्रिरात्रम् (तिसृणां रात्रीणां समाहारः) पञ्चरात्रम् (पञ्चानां रात्रीणां समाहारः) ।

लक्ष्यानुसारतः = शिष्टप्रयोगात् पात्राद्यदन्तैः = पात्रादिभिरदन्तैः एकार्थः = एकः अर्थो यस्य सः = समाहारः द्विगुः = द्विगुसमाससंज्ञकः शब्दः क्लीबे स्यात् । शिष्टप्रयोगानुसार = पात्र आदि अदन्त शब्दों के साथ समाहार अर्थ वाले द्विगुसमाससंज्ञकशब्द नपुंसकलिङ्ग होते हैं । जैसे—पञ्चपात्रम् (पञ्चानां पात्राणां समाहारः) त्रिभुवनम् (त्रयाणां भुवनानां समाहारः) चतुर्युगम् (चतुर्णां युगानां समाहारः) । एकार्थ = समाहार कहने से—तद्धितार्थद्विगु जैसे—पञ्चकपालः (पञ्चसु कपालेषु संस्कृतः) आदि में पुंस्त्व की सिद्धि हुयी । 'लक्ष्यानुसारतः' कहने से—पञ्चमूली (पञ्चानां मूलानां समाहारः) त्रिलोकी (त्रयाणां लोकानां समाहारः) आदि में स्त्रीत्वकी सिद्धि होती है ॥ २५ ॥

एकत्वे द्वन्द्वः—द्वन्द्वैकत्वम् = (राजदन्तादित्वात् द्वन्द्वशब्दस्य पूर्वनिपातः) = एकार्थको द्वन्द्वः = (समाहारद्वन्द्वः) अव्ययीभावश्च उभौ क्लीबे स्याताम् । द्वन्द्वसमास ये एकार्थक (समाहार) द्वन्द्व और अव्ययीभावसमाससंज्ञक शब्द, नपुंसकलिङ्ग होते हैं । समाहारद्वन्द्व जैसे—पाणिपादम्, शिरोग्रीवम् मार्दंगिकपाणविकम् । यहाँ 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' से एकत्व होता है । अव्ययीभाव में जैसे—अधिगोपम्, उपगङ्गम्, अविस्त्रि, यथाशक्ति, द्विमुनि आदि ।

संख्याव्ययात्परः पथः = कृतसमासान्तः पथिन् शब्दः क्लीबे स्यात् । संख्या और अव्यय से पर समासान्त अच् प्रत्ययान्त पथिन् शब्द क्लीबलिङ्ग में प्रयुक्त होता है । जैसे—द्विपथम् (द्वयोः पथोः समाहारः) त्रिपथम् (त्रयाणां पथां समाहारः) चतुष्पथम् (चतुर्णां पथां समाहारः) विपथः (विरूपः पन्थाः) यहाँ 'ऋक्पूरब्धूः' से समासान्त अच् प्रत्यय होने पर 'पथः संख्याव्ययादेः' से क्लीबत्व होता है । कापथम् (कुत्सितः पन्थाः, विभाषया अप्रत्यये कादेशे क्लीबत्वे च) । 'संख्याव्ययात्परः' कहने से ही—धर्मपथः, योगपथः आदि में पुंस्त्व की सिद्धि होती है । कृतसमासान्त 'पथः' ग्रहण करने से—अतिपन्थाः सुपन्थाः आदि में नपुंसकलिङ्ग नहीं होता है ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ट्याश्छाया बहूनां चेद्विच्छायं संहतौ सभा ॥ २६ ॥
शालार्थापि परा राजाऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥
उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादिकन्थोशीनरनामसु ॥ २८ ॥

तत्पुरुषे षष्ठ्याः = षष्ठ्यन्तात्परा या छाया सा क्लीबे स्यात्, सा चेद् बहूनां सम्बन्धिनी स्यात्। तत्पुरुषसमास में षष्ठ्यन्त से पर छाया शब्द नपुंसकलिङ्ग होता है, यदि वह (छाया) बहुतों की हो। जैसे—विच्छायम् (वीनां छाया) यहां 'छाया बाहुल्ये' से क्लीबत्व होता है। 'बहूनां ग्रहण करने से 'कुड्यच्छाया' 'कुड्यच्छायम्' में विकल्प से 'विभाषा सेना' से क्लीबत्व होता है।

षष्ठ्यन्तात्परः संहतौ = समूहे वर्तमानो यः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे स्यात्। षष्ठ्यन्त से पर समूह अर्थ को कहने वाला जो सभाशब्द तदन्ततत्पुरुष नपुंसकलिङ्ग में प्रयुक्त होता है। जैसे—स्त्रीसभम् (स्त्रीणां सभा अत्र अशाला चेत्यनेन क्लीबत्वम्)। 'संहतौ' ग्रहण करने से ही—धर्मसभा (धर्मस्य सभा) = धर्मशाला तथा 'दासी सभा' यहाँ नपुंसकलिङ्ग नहीं होता है ॥ २६ ॥

षष्ठ्यन्तात्परा शाला = गृहम् अर्थो यस्याः सा सभा अराजकात् = राजशब्द-वर्जितात् राजामनुष्यार्थकात् = राजपर्यायात्, मनुष्यार्थभिन्नात् = रक्षः पिशाचादिवाचकात् च तत्पुरुषात् क्लीबं स्यात्। षष्ठ्यन्तसे पर गृह अर्थ को कहने वाला सभाशब्द राजन्शब्द से भिन्न राजार्थक—राजपर्याय वाले—और मनुष्य अर्थ से भिन्न = राक्षस पिशाचादि अर्थ को कहने वाले तत्पुरुष समास संज्ञक शब्द नपुंसकलिङ्ग होते हैं। अपि शब्द से समूहार्थक सभा शब्द का भी ग्रहण होता है। जैसे—इनसभम् (इनस्य सभा) प्रभुसभम् (प्रभूणां सभा) पिशाचसभम् (पिशाचानां सभा) दासीसभम् (दासीनां सभा) नृपसभम् (नृपाणां सभा) रक्षस्सभम् (रक्षसां सभा) इत्यादि प्रयोगों में 'सभा राजामनुष्यपूर्वा' से क्लीबत्व जानना चाहिये। इमा दिशः = उदाहरणानि ज्ञेयानि। 'अराजकात् कहने से 'राज्ञां सभा—राजसभा राजपर्याय ग्रहण करने से 'चन्द्रगुप्तस्य सभा—चन्द्रगुप्तसभा' (यह राज) विशेष है) 'षष्ठ्यन्तात्' कहने से—ईश्वरा चासौ सभा चेति—ईश्वरसभा' 'न सभा असभा' तत्पुरुष ग्रहण करने से—'ईश्वरस्य सभेव सभा यस्य इति ईश्वरसभः' आदि स्थलों में नपुंसकलिंग नहीं होता है ॥ २७ ॥

तदादित्वप्रकाशने = तयोः = उपज्ञोपक्रमयोः आदित्वम् = प्राथम्यम् प्रकाशने = द्योत्ये सति षष्ठ्यन्तात्परः उपज्ञोपक्रमान्तरतत्पुरुषः = उपज्ञा (उपज्ञायते इति उपपूर्वकाज्जानातेः कर्मणि अङि टापि च) उपक्रमः (उपक्रम्यते इति उपपूर्वकात् क्रमेः कर्मणि घञि) च अन्ते यस्य एवं भूतस्तत्पुरुषसमाससंज्ञकः शब्दः क्लीबे स्यात्। उपज्ञा और उपक्रम का प्राथम्य प्रकाशित करना हो तो षष्ठ्यन्त से पर उपज्ञान्त और उपक्रमान्त तत्पुरुषसमाससंज्ञकशब्द नपुंसकलिंग होते हैं। जैसे—कोपज्ञम् = (कस्य = ब्रह्मणः उपज्ञा = आद्यं ज्ञानम् = प्रजा) कोपक्रमम् = (कस्य ब्रह्मणः उपक्रमः = आद्यारम्भः = लोकः) आदि पदसे—पाणिन्युपज्ञम् = (पाणिनेःउपज्ञा = आद्यज्ञानम् = ग्रन्थः) नन्दोपक्रमम् = (नन्दस्य उपक्रमः = आद्यारम्भः = द्रोणः)।

षष्ठ्यन्तात्परा या कन्था तदन्तस्तत्पुरुषः क्लीबे स्यात् सा = कन्था उशीनरनामसु = उशीनरदेशस्य कन्यायाः संज्ञासु वर्तते चेत्। षष्ठ्यन्त से पर कन्थान्ततत्पुरुषसमाससंज्ञकशब्द नपुंसकलिंग होता है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावे नणकचिद्भ्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहः परः ॥ २९ ॥
क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।

यदि वह कन्था उशीनर देश की कन्था का नाम हो। जैसे—सौशमिकन्थम् (सौशमीनां कन्था) आह्विककन्थम् (आह्विकानां कन्था) उशीनर ग्रहण करने से 'दाक्षिकन्था' यहाँ नपुंसकलिंग नहीं होता है। यह नाम वाह्लीक देश में प्रसिद्ध है न कि उशीनर देश में। 'नाम' कहने से 'वीरणकन्था', 'चैत्रकन्था' आदि में नपुंसकलिंग नहीं होता है, क्योंकि ये संज्ञा (नाम) नहीं हैं ॥ २८ ॥

न-ण-क-चिद्भ्यः = नश्च णश्च कश्च चिच्च (चकार इत यस्मिन् तत्) इति न-ण-क-चितः तेभ्यः अन्ये ये कृत्संज्ञकाः भावे विहिताः अदन्तप्रत्ययाः तथा समूहे अर्थे ये अकारान्तप्रत्ययास्तद्धिताः भावकर्मणोर्विहिताः तदन्ताः शब्दाः क्लीबे स्यात्। न-ण-क चित् प्रत्ययों से अन्य जो कृत्संज्ञक भाव में विहित अदन्त प्रत्यय, तथा समूह अर्थ में और भावकर्म में विहित जो अकारान्त तद्धित प्रत्यय तदन्त शब्द नपुंसकलिंग होते हैं। जैसे—भाव में विहितकृत्संज्ञक अदन्तप्रत्ययान्तशब्द—भूतम् (भवनमिति) भवितव्यम्, भवनीयम्, भव्यम् (भूयते इति) ब्रह्मभूयम् (ब्रह्मणो भवनम् इति) सांराविणम्, सांकूटिनम् (उभयत्र इनुण् तदन्तात् अणि, अणिपरे प्रकृतिंभावे च, प्रकृतिभावेन टिलोपो न)। न-ण-क चित् से भिन्न कहने से—यज्ञः (इज्यते इति नङ्) यत्नः (यतनम् इति) स्वप्नः (स्वपनम् इति नन्) न्यादः (न्यदनम् इति णः) आखूत्थः (आखूनामुत्थानम्—कः) विघ्नः (विहननम्—कः) चयः (चयनम्—अच्) जयः (जयनम—अच्) कारणा (कारणम्—युच्) आदि में नपुंसकलिंग नहीं हुआ। समूह अर्थ में जैसे—भैक्षम् (भिक्षाणां समूहः) औपगवकम् (औपगवानां समूहः इति वुञि अकादेशे च) काकम् (काकानां समूहः इति अण्) कैदार्यम् (केदाराणां समूहः इति यञ्) कैदारकम् (चाद् वुञ्)। भाव में जैसे—गोत्वम् (गोर्भावः) शौचम् (शुचेर्भावः—अण्) मौनम् (मुनेर्भावः—अण्) मार्दवम् (मृदोर्भावः अण्) मानोज्ञकम् (मनोज्ञानां समूहः इति वुञि अकादेशे च) स्तेयम् (स्तेनस्य भावः कर्म वा इति यति नलोपश्च) शौक्ल्यम् (शुक्लस्य भावः कर्म वा इति ष्यञि)।

पुण्यसुदिनाभ्यां परः कृतसमासान्तः अहः शब्दः क्लीबे स्यात्। पुण्य और सुदिन शब्दसे पर कृतसमासान्त अहन् शब्द नपुंसकलिंग में प्रयुक्त होता है। जैसे—पुण्याहम् (पुण्यं च तदहश्च इति टचि) सुदिनाहम् (सुदिनशब्दः प्रशस्तवाची सुदिनञ्च तदहश्च इति टचि। कृतसमासान्त ग्रहण करने से—'पुण्याहा (= पुण्यानि अहानि यस्मिन् मासि सः) यहाँ समासान्तत्वाभाव होने से क्लीबलिंग नहीं हुआ ॥२९॥

क्रियाश्च (धात्वर्थात्मिकाः) अव्ययानि (न वियन्ति = न क्षयन्ति इति च इति क्रियाव्ययानि तेषां क्रियाव्ययानां भेदकानि = विशेषणानि एकत्वे क्लीबे च स्युः। क्रिया और अव्ययों के विशेषण एकवचन और नपुंसक लिंग होते हैं। क्रिया विशेषण जैसे—मन्दं पचति, सुखं तिष्ठन्ति राजानः, सलीलं नृत्यन्ति केकाः। अव्ययों के विशेषण जैसे—रम्यं स्वः, प्रातः कमनीयम्; सुखदं प्रातः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चोचं पिच्छं गृहस्थूणं तिरीटं मर्मयोजने ॥ ३० ॥
राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः ।
माणिक्य-भाष्य-सिन्दूर-चीर-चीवर-पिञ्जरम् ॥ ३१ ॥

उक्थादि वाहवान्त ३३ शब्द जो नपुंसकलिंग में प्रयुक्त होने वाले हैं उन्हें क्रमशः अपने कण्ठ से कह रहे हैं—उक्थम् (उच्यते इति वचेः कर्मणि थकि सम्प्रसारणादिकार्ये कुत्वे च = सामभेदः) तोटकम् (तुटति इति ण्वुलि गुणे अकादेशे च = छन्दोविशेषः । तोटक नामका छन्द जो १० अक्षरों वाला पङ्क्तिजातीयवृत्तविशेष है) [1] चोचम् (चञ्चति चञ्च्यते वा गत्यर्थकचञ्चधातोः पचाद्यचि घञि वा पृषोदरादित्वादस्यौत्वे च)[2] पिच्छम् पिंच्छयते स्वार्थण्यन्तात् पिच्छयतेः कर्मणि घञि = मोरपंख) गृहस्थूणम् (गृहस्य स्थूणा = गृहस्तम्भ) तिरीटम् (तरतीति कीटनि इत्वे रपरत्वे च = शिरोभूषणम्, वेष्टनम्, उष्णीषम् वा) मर्म (म्रियतेऽनेन इति करणे मनिनि गुणे च = सन्धिस्थानम्, हृदयस्थलम् वा)[3] योजनम् (युज्यते इति बाहुलकाल्ल्युटि गुणे अनादेशे च = चार कोश का लम्बा रास्ता, परमात्मा वा योग) ॥ ३० ॥

राजसूयम् (राज्ञा सोतव्यः = अभिषवद्वारा निष्पादयितव्यः, लतात्मकः सोमो राजा स सूयते कण्ड्यतेऽत्रेति वा राजपूर्वकात् सुनोतेः कर्मण्यधिकरणे निपातनात् क्यपि दीर्घे च = राजसूयनामकयज्ञ विशेषः) वाजपेयम् (वाजम् = अन्नम् पैष्टी सुरा वा पीयतेऽत्रेति वाजपूर्वकात् पिबतेरधिकरणे यति आतः ईत्वे गुणे च = वाजपेय नामका यज्ञविशेष)।

कवेः कृतौ गद्य-पद्ये क्लीबे स्यातामिति । कविरचित बिना छन्द की शब्द योजना को गद्य तथा छन्दोबद्ध शब्दयोजना को पद्य कहते हैं, ये दोनों = (गद्य, पद्य) शब्द क्लीबलिंग में प्रयुक्त होते हैं। गद्यम् (गद्यते इति गदधातोः कर्मणि यति = छन्दोरहितं वाक्यम् [4]वार्तिकम् वा) [5]पद्यम् (पादाः सन्त्यस्य इतियति पदादेशे च, पदाः सन्त्यस्येति वा = श्लोकः) ।

'कवेः कृतौ – कवि रचित' कहने से ही 'गद्या = वार्ता' 'पद्यः = पङ्कः' 'पद्यम् = रजः' यहाँ पर क्रमशः स्त्री-पुं-नपुंसक की सिद्धि होती है।

माणिक्यम् (मणिशब्देन कायति = शब्दयति इति मणिपूर्वकात् कायतेः कर्तरि डे के वा इति मणि-कम् । मणिके = मणिपूराख्ये नगरे भवम् इति ञ्ये ष्यञि वा वृद्धौ च = रत्नम्) [6]भाष्यम् (भाष्यते सूत्रार्थोऽनेन इति भाषधातोः करणे ण्यति = सूत्रों के अनुसार पदों की व्याख्या वाला ग्रन्थविशेष)

---

१. फलावशिष्टं तालफलं च चोचं कदल्याः फलं भवेत् । इति आर्षकोशः । २. पिच्छापूगच्छटा-कोषमोचाशाल्मलिवेष्टके । भक्तसंभूतमण्डे च पक्तानश्वपदामये । स्त्रियां पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः । इति मेदिनी । ३. योजनं परमात्मनि । चतुष्क्रोश्यां च योगे च । इति मेदिनी । ४. उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते । तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः । ५. पद्यं श्लोके पुमान् शूद्रे पद्या वर्त्मनि कीर्तिता । इति मेदिनी । ६. सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ इति पाराशरीये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकायतं हरितालं विदल-स्थल-बाह्लवम् ।
पुन्नपुंसकयोः शेषोऽर्धर्च-पिण्याक-कण्टकाः ॥ ३२ ॥
मोदकस्तण्डकष्टङ्कः शाटकः खर्वटोऽर्बुदः ।

---

[1]सिन्दूरम् (स्यन्दते इति स्यन्दू धातोः ऊरनि सम्प्रसारणे पूर्वरूपे च = सेनूर) [2]चीरम् (चीयते इति चिनोतेः कर्मणि रकि दीर्घे च = झिल्ली, वस्त्रविशेष, गोस्तन) चीवरम् (चीयते इति ष्वरच्प्रत्ययान्तो निपातः = मुनेर्वसनम्) पञ्जरम् (पिञ्जयते इति पिजिधातोः अरप्रत्यये पृषोदरादित्वादिकारस्यात्वे च, [3]पिञ्जरम् [4]पाञ्जरम् वा पाठः = शरीरास्थिसमूहः, लौहादिनिर्मितखगादिबन्धगृहं वा, पिजड़ा इति भाषायाम् ॥ ३१ ॥

लोकायतम् (लोके आयतन्ते इति लोकाङ् पूर्वकात् यतीप्रयत्ने धातोः कर्तरि पचाद्यचि इति लोकायताः = चार्वाकाः तेषामिदं शास्त्रमित्यणि वृद्ध्यभावे च = चार्वाकशास्त्रम्) [5]हरितालम् (हरितेन अलति इति हरितपूर्वकात् अल्धातोः कर्तरि पचाद्यचि = धातुविशेष) विदलम् (विदलति विपूर्वकाद्दलतेः कर्तरि पचाद्यचि = वंशनिर्मितपात्र विशेषः) स्थालम् (स्थलत्यत्रेत्यधिकरणे घञि = भोजनादिपात्रम्) बाह्लवम् (बह्लदेशे भवम् इति अणि वृद्धौ गुणे अवादेशे च = कुङ्कुमम्) ॥ ३१½ ॥ इति क्लीबलिङ्गसंग्रहः ॥

अथ पुंनपुंसकसंग्रहः

'पुंनपुंसकयोः' इत्यधिक्रियते । शेषः उक्तादन्यः पुंनपुंसकयोः स्यादित्यर्थः । यहाँ से आगे 'स्त्रीनपुंसकयोः' का अधिकार है । अतः इस मध्य में पढ़े जाने वाले शेष = पूर्वोक्त से अतिरिक्त शब्द पुंल्लिग और नपुंसकलिंग होते हैं ।

अर्धर्चः, अर्धर्चम् (ऋचोऽर्धम् इति अप्रत्यये = ऋचा का आधा) [6]पिण्याकः, पिण्याकम् (पण्यते इति पिनाकादिः, तिलकल्कः = खली) [7]कण्टकः, कण्टकम् (कण्टतीति गत्यर्थककटिधातोः ण्वुलि अकादेशे च = क्षुद्रशत्रु प्रभृतिः) ॥ ३२ ॥

[8]मोदकः, मोदकम् (मोदते, मोदयते वा कर्तरि ण्वुलि अकादेशे च = लड्डू) [9]तण्डकः, तण्डकम् (तण्डते इति आघातार्थकतडिधातोः कर्तरि ण्वुलि अकादेशे च = खञ्जनादिः, दण्डकः इत्यपि पाठान्तरम् ।

---

१. सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तवर्णके । सिन्दूरी रोचनारक्तचेल्लकाधातकीषु च । इति मेदिनी । २. चीरी झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः । इति मेदिनी । चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम् । इति भागवतम् । ३. पिञ्जरोऽश्वान्तरे क्लीबं स्वर्णे पीते त्र वाच्यवत् । इति मेदिनी । ४. यावन्मध्यं बहुधा पाञ्जरं नावगाहते । इति दमयन्ती श्लेषः । ५. हरितालं धातुभेदे स्त्री दूर्वाकाशरेखयोः । इति मेदिनी । ६. पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीकसिह्लके । इति मेदिनी । ७. कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे च कण्टको मस्करेऽपि च ॥ इति विश्वः । ८. मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत् । इति मेदिनी । ९. तण्डकः खञ्जने फेने समासप्रायवाचि च । गृहदारुतरुस्कन्धमायाबहुलकेष्वपि ॥ इति मेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पातकोद्योग-चरक-तमालाऽऽमलका नडः ॥ ३३ ॥
कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेम कुट्टिमम् ।
संगमं शतमानाऽर्म-शम्बलाव्यय-ताण्डवम् ॥ ३४ ॥

तत्र दण्ड एव इति स्वार्थे कनि बोध्यः = वस्त्रनिर्माणार्थकाष्ठविशेषः, दण्डो लगुडो वा) [1]टङ्कः (टङ्कयति इति बन्धनार्थकटकिधातोः कर्तरि पचाद्यचि णिलोपे च = खनित्रम् । तङ्कोपि पाठः तत्र तङ्कतीति कृच्छजीवनार्थकतकिधातोः कर्तरि पचाद्यचि बोध्यः स च भयार्थकः) शाटकः (शटति इति गत्यर्थकशटधातोः कर्तरि ण्वुलि वृद्धौ अकादेशे च = परिधानवस्त्रम्) [2]खर्वटम् (खर्वति इति दर्पार्थकखर्वधातोरटनि) अर्बुदः, [3]अर्बुदम् (अर्बति इति हिंसार्थक-अर्बधातोः कर्तरि बाहुलकादुदचि = मांसवृद्धि, कठोर, १० कोटि, पर्वत विशेष) पातकः, पातकम् (पातयति इति ण्यन्तात् पतधातोः कर्तरि ण्वुलि णिलोपे अकादेशे च = पापम्) उद्योगः, (उद्योजनम् उत्पूर्वकात् युनक्तेर्भावे घञि = उद्यमः, चेष्टा वा) चरकः, चरकम् (चरतीति चरधातोः कर्तरि क्वुनि अकादेशे च = आयुर्वेदीयो ग्रन्थविशेषः । वरकम् इति पाठे स्यूत वस्त्रम्) [4]तमालः, तमालम् (ताम्यतीति तमधातोः कर्तरि कालनि = तमाखू) आमलकः, आमलकम् (आमलक्याः फलम् इति मयटि तस्य लुकि - आँवला) नडः, नडम् (नडतीति भ्रंशार्थक नडधातोः चुरादीनां वा णिच इति णिचोऽभावे-पक्षे कर्तरि पचाद्यचि = अन्तरविवरतृणभेदश्च = नरइ इति भाषायाम् ॥ ३३ ॥

कुष्ठम्, कुष्ठः (कुष्णातीति कर्तरि कुषधातोः क्थनि = रोगविशेषः) मुण्डम्, मुण्डः (मुण्ड्यते इति खण्डनार्थकमुण्डधातोः कर्मणि घञि = शिरः) शीधु, शीधुः (शेते अनेन इति साधने धुकि = मद्यम्) बुस्तम्, बुस्तः (बुस्यते स्म इति बुस्यतेः कर्मणि क्ते = मांसशष्कुली, भृष्टमांसम् वा, पुस्तमिति वा पाठः) क्ष्वेडितम्, क्ष्वेडितः (क्ष्वेडनम्, क्ष्वेड्यते वा ञिक्ष्विदाधातोः भावे कर्मणि वा क्ते = वीरगर्जितम्) [5]क्षेम, क्षेमा (क्षयति क्षियति वा इति क्षयार्थकक्षिधातोः निवासगत्यर्थकक्षिधातोर्वा कर्तरि मनि गुणे च = मङ्गलम्, लब्धस्य परिरक्षणम् वा) [6]कुट्टिमम्, कुट्टिमः (कुट्टनम् छेदनार्थक कुट्ट धातोर्भावे घञि कुट्टः तेन निर्वृत्तम् इतीमपि = निबद्धाभूः, पत्थरों से बँधी हुई भूमि) संगमम्, संगमः (संगमनम् इति संपूर्वकात् गमधातोः भावे अपि = संयोगः) शतमानम्, शतमानः (शतं मानमस्य = रूप्यपलम् = चाररुपये भर —प्रमाणविशेष) अर्मम्, अर्मः (ऋच्छतीति गत्यर्थक—ऋधातोः कर्तरि मनि गुणे रपरे च = अक्षिरोगः) शम्बलम्, शम्बलः (शम्बत्यनेन गत्यर्थकशम्बधातोः करणे बाहुलकाल्लचि = पाथेयम् । दन्त्यादिपाठे सर्पणार्थकषम्बधातुर्बोध्यः) [7]अव्ययम्, अव्ययः (न व्येति = न क्षयं याति इति नञ्पूर्वकात् इण्

१. टङ्को नीलकपित्थे न खनित्रे टङ्कने स्त्रियाम् । जङ्घायां स्त्री पुमान् कोपे कोषासिग्रावदारणे ॥ इति मेदिनी । २. यत्रैकतो भवेद् ग्रामो नगरं चैकतः स्मृतम् । मिश्रन्तु खर्वटं नाम नदीगिरिसमाश्रयम् ॥ ३. अर्बुदो मांसकीलेऽस्त्री पुंसि दशकोटिषु । महीधर विशेषे ना । इति मेदिनी । ४. तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे । इति मेदिनी । ५. जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थरक्षणम् । ६. कुट्टिमोऽस्त्री निबद्धाभूः । ७. अव्ययोऽस्त्री शब्दभेदे ना विष्णौ निर्व्यये त्रिषु । इति मेदिनी । सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कवियं कन्दकर्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीव-पात्रीवे यूपं चमसचिक्कसौ ॥ ३५ ॥
अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥

धातोः कर्तरि पचाद्यचि भावे अचि वा = खर्च न होना) [1]ताण्डवम्, ताण्डवः (ताण्डेन मुनिना कृतं ताण्डि नृत्यशास्त्रं तदस्यास्तीति । तण्डुना प्रोक्तम् वा इति अणि वृद्धौ गुणे अवादेशे च = उद्धतनृत्यम्, तृणविशेषो वा ॥ ३४ ॥

[2]कवियं, कवियः (कवते इति कुङ्धातोः कर्तरि बाहुलकात् इयप्रत्यये गुणे अवादेशे च = तोबड़ा इति भाषायाम् । घोड़ोंको दाना खिलाने का पात्र विशेष) [3]कन्दं, कन्दः (कन्दतीति कर्तरि पचाद्यचि = सूरणादिः) कर्पासम्, कर्पासः (करोति क्रियते वा इति कृधातोः पासप्रत्यये गुणे रपरत्वे च = कपास इति ख्यातः) पारावारम्, पारावारः (पारयति पार्य्यते वा कर्तरि अचि कर्मणि घे वा पारम्, न वारयति इति वारयतेः पचाद्यचि अवारम्, पारं च अवारं चानयोः समाहारः = नदी के दोनों किनारा) युगन्धरम्, युगन्धरः (युगन्धारयतीति युगपूर्वकाद् धारयतेः कर्तरि खचि, खचि परे ह्रस्वे मुमागमे च = कूबरः जूआ इति ख्यातः) यूपम्, यूपः (युवन्त्यस्मिन् इति यौतेराधारे पे दीर्घे = यज्ञस्तम्भः) प्रग्रीवम्, प्रग्रीवः (प्रगता ग्रीवा यस्मिन्निति = गवाक्षः मुखशाला वा) पात्रीवम् पात्रीवः (पात्रीं वातीति पात्रीपूर्वकात् वातेः कर्तरि के आलोपे च = यज्ञीयपात्रविशेषः) [4]यूषम्, यूषः (यूषतीति कर्तरि के = रस्सा, जूस वा) चमसम्, चमसः (चमन्त्यनेन इति करणे असचि = सोमपानपात्रम्) चिक्कसम्, चिक्कसः (चिक्कनम्, चिक्कयति वा इति भावे घञि कर्तरि पचाद्यचि वा चिक्कः तं स्यति इति कप्रत्यये आलोपे च । चेतत्यनेन इति चितेः करणे कसप्रत्यये तस्य कादेशे च वा = यज्ञपात्रविशेषः) अर्धर्चादि से चिक्कसान्त ४० शब्द पुंल्लिङ्ग तथा नपुंसकलिङ्ग में प्रयुक्त होते हैं ॥ ३५ ॥

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं यदुक्तमाचार्यैः तत् ध्रुवं वैदिकम् । तत् इह नोक्तम् । चेद् = यदि लोकेऽपि अस्ति तत् शेषवदस्तु इत्यन्वयः ॥ अर्धर्चादि गण में घृतादि शब्दों के जो पुंनपुंसकता का विधान आचार्यों ने किया है वह निश्चित ही वैदिक है—अर्थात् घृतादि शब्दों का पुंल्लिङ्ग और नपुंसकलिङ्ग में प्रयोग वेद में ही किया जाता है । यहाँ लोक में वैसा नहीं कहा गया है । यदि लोक में भी कहीं वैसा अर्थात् घृतादि शब्दों का दोनों लिङ्गों (पुंनपुंसक) में प्रयोग मिल जाय तो शेष अर्थात् अवशिष्ट शब्दों की तरह उनका भी दोनों लिङ्गों में प्रयोग जानना चाहिये ॥ ३६ ॥ इति पुंनपुंसकलिंग संग्रहः ।

१. पुं नृत्यं ताण्डवं प्राहुः स्त्री नृत्यं लास्यमुच्यते । २. नार्या कवी खलीनं कवियं वा ना तुरङ्गमुखभाण्डम् । इति वोपालितः । ३. कन्दोऽस्त्री सूरणे सस्यमूले जलधरे पुमान् । ४. मुद्गामलकयूषस्तु मेदीदीपनपाचनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥ ३७ ॥
मुनिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।

अथ स्त्रीपुंल्लिङ्गसंग्रहः ।

अतः परं 'स्त्रीनपुंसकयोरि' त्यतः प्राक् 'स्त्रीपुंसयोः' इत्यधिक्रियते । तेन मध्यपठिताः शब्दाः स्त्रीपुंसयोः स्युरिति । यहाँ से आगे 'स्त्रीनपुंसकयोः' के पूर्व 'स्त्रीपुंसयोः' का अधिकार है। अतः इस मध्य में पठित शब्द स्त्रीलिंग और पुंलिंग में प्रयुक्त होते हैं।

अपत्यान्ताः = अपत्यार्थे विहिताः ये अणादयः प्रत्ययाः तदन्ताः सर्वे शब्दाः स्त्रीपुंसयोः स्युरिति सम्बन्धः । अपत्य अर्थ में विहित जो अणादि प्रत्यय तदन्त सभी शब्द स्त्रीलिंग और पुंलिंग में प्रयुक्त होते हैं। जैसे—औपगवः पुं०- औपगवी स्त्री०, गार्ग्यः पुं०, गार्गी स्त्री० आदि ।

जातिभेदाः = जातिविशेषाः द्विपद—चतुष्पद—षट्पदवाचिनः उरगवाचिनश्च अबाधिताः शब्दाः स्त्रीपुंसयोः स्युरिति । जातिविशेष—दो पैर वाले, चार पैर वाले, छः पैर वाले और सर्प वाचक अबाधित शब्द स्त्रीलिंग और पुंलिंग होते हैं। द्विपदजाति विशेष जैसे—मानुषः पुं०, मानुषी स्त्री०, ब्राह्मणः पुं०, ब्राह्मणी स्त्री०, शूद्रः पुं०, शूद्रा स्त्री०, बकः पुं०, बकी स्त्री०, हंसः पुं०, हंसी स्त्री० । चतुष्पद जातिविशेष जैसे—सिंहः पुं०, सिंही स्त्री०, अजः पुं०, अजा स्त्री०, मृगः पुं०, मृगी स्त्री०, मार्जारः पुं० मार्जारी स्त्री० आदि । षट्पद जातिविशेष जैसे—भ्रमरः पुं०, भ्रमरी स्त्री आदि । उरग वाची जैसे—उरगः पु० उरगी स्त्री०, सर्पः पुं०, सर्पिणी स्त्री०, नागः पुं०, नागी स्त्री० आदि । मक्षिका, शिवा, लूता, पिपिलिका आदि शब्द विशेष से बाधित होने के कारण स्त्रीलिंग ही होते हैं। क्रमशः विशेष बाधक वचन जैसे—चित्रर्णा मक्षिका नीला, स्त्री शिवा, लूता स्त्री, प्राच्रिकोल्का पिपीलिका ।

स्त्रीयोगैः सह वर्तमानाः पुमाख्याः = पुरुषाख्याः शब्दाः स्त्रीपुंसयोः स्युरिति । स्त्री के साथ वर्तमान पुरुषवाचक शब्द स्त्रीलिंग और पुंल्लिग में प्रयुक्त होते हैं। जैसे—ब्राह्मण पुं०, ब्राह्मणी स्त्री, इन्द्रः पुं० इन्द्राणी स्त्री०, शूद्रः पुं०, शूद्री स्त्री० आदि ।

अतः परं स्त्रीलिंग-पुंल्लिङ्गविशिष्टाञ्छब्दान् स्वकण्ठरवेण कथयत्याचार्यः । अब कुछ स्त्रीलिंग-पुंल्लिग विशिष्ट शब्दों को आचार्य अपने कण्ठरव से स्वयं गिनाते हैं। जैसे—मल्लकः पुं०, मल्लिका स्त्री० (मल्लते इति मल्लधातोः कर्तरि ण्वुलि अकादेशे । स्त्रीलिंगे—प्रत्ययस्थाकारात्पूर्वस्यातः इदादेशे च मल्लिका = मल्लिका तृणशून्येऽपि मीनमृत्पात्रभेदयोः इति मेदिनी) ॥ ३७ ॥

मुनिः (मन्यते इति मनधातोः कर्तरि इनि प्रत्यये उपधाकारस्य उदादेशे च = वसिष्ठादिः) वराटकः, वराटिका (वरमटति इति वरपूर्वकादटतेः कर्तरि क्वुनि अकादेशे च । स्त्रीत्वे—टापि इत्वे च = बीजकोषः, कौड़ी) स्वातिः, स्वाती (शोभनमतति इति सुपूर्वकात् अतधातोः कर्तरि इणि वृद्धौ च, स्त्रीत्वे—टिड्ढेति ङीपि = नक्षत्रविशेषः) [1]वर्णः (वर्णयति इति चुरादिण्यन्तात् वर्णधातोः कर्तरि ण्वुलि अका-

१. विलेपने चन्दने च वर्णकं पुंन्नपुंसकम् । इति रभसः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूषा सृपाटी कर्कन्धूर्यष्टिः शाटी कटी कुटी ॥ ३८ ॥
स्त्री-नपुंसकयोर्भावक्रिययोः ष्यञ्क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं वुन्प्रागुदाहृतः ॥ ३९ ॥

देशे च = विलेपनम् । स्त्रीत्वे—वर्णिका) झाटलिः (झटनम् इति संघातार्थकझटधातोः भावे घञि झाटः झाटं लातीति बाहुलकात् डिप्रत्यये टिलोपे च = वृक्षविशेषः, स्त्रीत्वेऽपि झाटलिः) मनुः (मन्यते इति कर्तरि उप्रत्यये = मन्त्रः, आदि राजा च, स्त्रीत्वे—मनायी, मनावी, मनुः) मूषः, मूषा (मूषतीति कर्तरि पचाद्यचि टापि च = घरिया इति ख्यातः) सृपाटः (सरतीति कर्तरि बाहुलकात् पाटप्रत्यये, सर्पतीति विग्रहे पृषोदरादिः स्त्रीत्वे जातित्वात् ङीषि सृपाटी = परिमाणभेदः) कर्कन्धू, (कर्कं दधातीति निपातनात् साधुः । स्त्रीत्वेऽपि कर्कन्धूः = वदरीवृक्षः) यष्टिः (यक्षते इति पूजार्थकयक्षधातोः कर्तरि क्तिचि, ष्टुत्वे च । यजधातोः तिप्रत्यये षत्वे ष्टुत्वेऽपि यष्टिः = लगुडो मधुयष्टिका च, स्त्रीत्वेऽपि यष्टिः) शटः शाटी (शाट्यते इति स्वार्थण्यन्तात् कर्मणि घञि ङीषि च = वस्त्रविशेषः) कटः, कटी (कटति इति पचाद्यचि जातिलक्षणे ङीषि च = कमर इति ख्यातः) कुटिः, कुटी (कुटति इति इनिः ङीषि च । के प्रत्यये जातिलक्षणे ङीषि, के सति पुंस्त्वे कुटः = पर्ण शाला, कुटिया वा) ये १४ शब्द स्त्रीलिंग और पुंल्लिंग में प्रयुक्त होते हैं ॥ ३८ ॥ इति स्त्रीपुंससंग्रहः ।

अथ स्त्रीनपुंसकसंग्रहः ।

अतः परं 'त्रिषु' इत्यतः प्राक् 'स्त्रीनपुंसकयोः' इत्यधिक्रियते तेन मध्य पठिताः शब्दाः स्त्रीलिंगे नपुंसकलिंगे च स्युः । यहाँ से आगे 'त्रिषु' से आगे 'त्रिषु' से पूर्व स्त्रीनपुंसकयोः का अधिकार होने से मध्यपठित शब्द स्त्रीलिंग और नपुंसक लिंग में प्रयुक्त होते हैं ।

भावक्रिययोः = भावकर्मणोः विहितः ष्यञ् वुञ् च क्वचित् स्त्रीनपुंसकयोः स्यातामिति । भाव और कर्म में विहित ष्यञ् और वुञ् प्रत्ययान्त शब्द कहीं-कहीं स्त्री और नपुंसकलिग में प्रयुक्त होते हैं । जैसे —औचित्यम् (उचितस्य भावः कर्म वा इति ष्यञि वृद्धौ अलोपे च, स्त्रियान्तु—औचिती, अत्र तु गौरादित्वात् ङीषि यलोपे च) मैत्र्यम् (मित्रस्य भावः कर्म वा इति ष्यञि वृद्धौ अलोपे च, स्त्रि, ङीपि यलोपे च) एवं सामग्र्यम् (समग्रस्य भावः कर्म वा इति ष्यञि वृद्धौ अलोपे च, स्त्रियान्तु—सामग्री, अत्र ङीषि यलोपे च) आर्हन्त्यम् (अर्हतो भावः कर्म च इति ष्यङि वृद्धौ नुमागमे च, स्त्रियान्तु ङीषि यलोपे च आर्हन्ती = योग्यता) ।

प्राक् = पूर्वम् वुञ् उदाहृतः । वुञ् प्रत्ययान्त का उदाहरण 'वैरमैथुनिकादि वुन्' के उदाहरण में दिया जा चुका है । जैसे—आहोपुरुषिका (अहोपुरुषस्य भाव इति वुञि वृद्धौ अकादेशे टापि च) शैष्योपाध्यायिका (शिष्यश्च उपाध्यायश्च इतिवुञि) गार्गिका (गर्गस्य भावः वुञि) । क्वचित् कहनेसे—मानोज्ञकम्, रामणीयकम्, आदि में दोनों लिंग (स्त्रीनपुं) नही हुए । भावे कहनेसे स्वार्थ में विहित ष्यञ् प्रत्ययान्त—'चातुर्वर्ण्यम्' में स्त्रीत्व नहीं होता है ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठयन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥ ४० ॥
आबन्नन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥
त्रिषु पात्री पुटी वाही पेटी कुवल-दाडिमौ ।

षष्ठ्यन्तप्राक्पदाः (षष्ठयन्तं प्राक्=पूर्वं पदं येषां ते, षष्ठयन्तात्पराः सेना-छाया-शाला-सुरा-निशान्ताः तत्पुरुषसंज्ञकाः शब्दाः स्त्रीनपुंसकयोः स्युरिति। षष्ठयन्तपूर्वपद में रहने पर सेनान्त छायान्त शालान्त सुरान्त निशान्त तत्पुरुष शब्द स्त्रीलिंग और नपुंसकलिंग में प्रयुक्त होते हैं। जैसे—नृसेना, नृसेनम् (नृणां सेना) वृक्षच्छाया, वृक्षच्छायम् (वृक्षस्य छाया) गोशाला, गोशालम् (गवां शाला) यवसुरा, यवसुरम् (यवानां सुरा) श्वनिशा, (श्वनां निशा) यहाँ 'विभाषा सेना सुरा छाया शालानिशानाम्' से वैकल्पिक क्लीवत्व होता है। इसी प्रकार अन्य भी उदाहरणों को जानना चाहिये। दिक् शब्द का अर्थ परिगणनाभाव है। अतः 'इक्षुच्छायम्' (इक्षूणां छाया) यहाँ 'छाया बाहुल्ये' से नपुंसकता होती हैं। 'विभाषा सेना' से वैकल्पिक क्लीवता का यह अपवादक है ॥ ४० ॥

आबन्नन्तोत्तरपदः=आबन्तोत्तरपदः अन्नतोत्तरपदश्च द्विगुः=द्विगुसमाससंज्ञकः शब्दः। अपुंसि =न पुंसि अपुंसि—पुंस्त्वभिन्ने अर्थात् स्त्रीनपुंसकयोः स्याद्,। नश्च=अनो नकारस्य च लुप्=लोपः स्यादिति। आप् प्रत्ययान्त और अन् प्रत्ययान्तशब्द उत्तरपद में हों तो द्विगुसमाससंज्ञक शब्द स्त्रीलिंग और नपुंसकलिंग में प्रयुक्त होते हैं तथा अन् प्रत्ययके नकार का लोप होता है। जैसे-त्रिखट्वी (तिसृणां खट्वानां समाहारः इति ह्रस्वे ङीपि च) पक्षे—क्लीवत्वे त्रिखट्वम् (त्रयाणां खट्वानां समाहारः) एवं पञ्चखट्वी, पञ्चखट्वम्। अन्नन्त उत्तरपदपरक द्विगु जैसे–त्रितक्षी (त्रयाणां तक्ष्णां समाहारः इति विग्रहे अनो नलोपे ङीपि च) त्रितक्षम् (त्रयाणां तक्ष्णां समाहारः) एवं पञ्चतक्षी, पञ्चतक्षम् ॥ ४१ ॥
इति स्त्रीनपुंसकसंग्रहः।

अथ त्रिलिंगसंग्रहः

"त्रिषु" इत्यधिक्रियते 'परवल्लिङ्गमिति' यावत्। यहाँ से आगे परवल्लिङ्गम् के पूर्व 'त्रिषु' का अधिकार है। अतः इस मध्य में पठित शब्द तीनों लिंग (अर्थात्–पुंलिंग स्त्रीलिंग नपुंसकलिंग) वाले होते हैं। जैसे— [1]पात्री, पात्रम्; पात्रः (पातीति कर्तरि ष्ट्रनि ङीपि च=वर्तन इति भाषा) पुटी, पुटम्, पुटः (पुटतीति कर्तरि क प्रत्यये ङीपि च=पात्रविशेषः, ढक्कन इति लोके ख्यातः) [2]वाटी, वाटम्, वाटः (वाटयते इति ण्यन्तात् वटधातोर्घञि वाटः। स्त्रियां ङीपि वाटी=पथि) पेटी, पेटा, पेटम्

---

१. पात्र्यमत्रे त्रिषु क्लीब स्रुवादौ राजमन्त्रिणि। तीरद्वयान्तरे योग्ये। इति मेदिनी। अमत्रं भाजनम्। २. वाटः पथि वृतौ वाटं वरण्डेऽऽङ्गान्नभेदयोः। वाटी वास्तौ गृहोद्यानेत्कट्योः इति, हैमः। वाटो मार्गं वृतिस्थानेष्वित्कटीवास्तुनोः स्त्रियाम्। इति मेदिनी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परं लिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ॥ ४२ ॥

परपदलिंगस्यापवादमाह—

अर्थान्ताः प्राद्यलंप्राप्ताऽपन्नपूर्वाः परोपगाः ।

(पिट्यते शब्दसंघातार्थकपिटधातोः कर्मणि घञि गौरादिः = वेत्रादिनिर्मिता । स्त्रीलिंग प्रदर्शन ङ्यन्तता सूचनार्थक है ।) [1]कुवलः, कुवली, कुवलम् (कौ वलतीति विस्तृतार्थकवलधातोः पचाद्यचि । कमल, मुक्ताफल, वदरीफल,) [2]दाडिमः, दाडिमी, दाडिमम् (दलनम् विदारणार्थकदलधातोः घञि दालः दालेन निर्वृतः इति भावप्रत्ययान्तादिमप्, डलयोरेकत्वाल्लस्य डः, अनारपदवाच्यः) ये ६ शब्द त्रिलिङ्ग हैं ॥ ४१½ ॥ इति त्रिलिङ्गसंग्रहः ।

स्वप्रधाने (स्वे समस्यमानाः पदार्थाः प्रधानं यत्र तस्मिन्) द्वन्द्वे (इतरेतरद्वन्द्वे) परं लिंगं) स्यात् । उभयपदप्रधान इतरेतरयोगद्वन्द्वसमास में परपद का लिंङ्ग होता है ।

जैसे—कुक्कुटमयूर्यौ (कुक्कुटश्च मयूरी च) मयूरीकुक्कुटौ (मयूरी च कुक्कुटश्च) यहां इतरेतर-योगद्वन्द्व होने के कारण द्विवचनान्त प्रयोग है ।

तत् (परलिङ्गम्) तत्पुरुषसमास में भी परपद के समान लिंग होता है ।

जैसे—अयं कुलब्राह्मणः (कुलस्य ब्राह्मणः) इदं ब्राह्मणकुलम् (ब्राह्मणस्य कुलम्) इयम् अर्धपिप्पली (अर्धं पिप्पल्याः) ॥ ४२ ॥

अर्थान्ताः (अर्थः अन्तो येषां ते) परोपगाः = (परं = विशेष्यम् उपगच्छन्तीति = विशेष्यनिघ्नाः) स्युरिति । अर्थ शब्द जिनके अन्त में हों वे शब्द विशेष्यगत लिङ्ग वाले होते हैं । जैसे—द्विजार्थः सूपः (द्विजाय अयम्) द्विजार्था यवागूः (द्विजाय इयम्) द्विजार्थं पयः (द्विजाय इदम्) ब्राह्मणार्थो वेदः, देवार्था माला, विप्रार्थं वस्त्रम् इत्यादिः ।

प्राद्यलंप्राप्तापन्नपूर्वाः—प्रादिश्च अलंच प्राप्तश्च आपन्नश्च पूर्वश्चेति द्वन्द्वे । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायात्—प्रादिपूर्वाः अलंपूर्वाः प्राप्तपूर्वाः आपन्नपूर्वाः शब्दाः परोपगाः = विशेष्यलिङ्गभाजो भवन्तीति सम्बन्धः । प्रादि (प्र—परा-अप्—सम—अनु—अव्—निस्—निर्—दुस्—दुर्-वि-आङ्—नि—अवि—अपि—अति-सु-उत्-अभि—प्रति—परि उप्) पूर्वक, अलं पूर्वक; प्राप्त पूर्वक, आपन्नपूर्वक शब्द विशेष्य के समान लिङ्ग वाले होते हैं ।

जैसे—प्राचार्यः (प्रगतः अचार्यः) अतिखट्वः (खट्वामतिक्रान्तः) अतिमालः, अतिमाला, अतिमालम् (मालामतिक्रान्तः, अतिक्रान्ता, अतिक्रान्तम्) अवकोकिलः (कोकिलया अवक्रुष्टः) । अयमलंकुमारिः (अलंकुमार्यै) इयमलंकुमारी, इदमलंकुमारि, । अलंजीविकः (जीविकायै अलम्) अलंजीविका, अलंजीविकम् । प्राप्तजीविको भृत्यः (प्राप्तः जीविकाम्) । स्त्रीचेत्—प्राप्तजीविका, प्राप्त-जीविकं कुलम् । आपन्नजीविकः (आपन्नः जीविकाम्) भृत्यः, आपन्नजीविका ब्राह्मणी । आपन्नजीविकं कुलम् ।

---

१. कुवलं चोत्पले मुक्ताफलेऽपि वदरीफले । इति मेदिनी । २. दाडिमः करको दन्तबीजो लोहितपुष्पकः । इति भावप्रकाशः । वियोगिनीमैक्षत दाडिमीमसौ । इति नैषधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्धितार्थो द्विगुः संख्या-सर्वनाम-तदन्तकाः ॥ ४३ ॥
बहुव्रीहिरदिङ् नाम्नामुन्नेयं तदुदाहृतम् ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥
कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।

तद्धितार्थो यो द्विगुः स त्रिषु ज्ञेयः। तद्धितार्थक द्विगु वाच्यलिंग होते हैं। जैसे—पञ्चकपालः (पञ्चसु कपालेषु संस्कृतः) पुरोडाशः। पञ्चकपाला, पञ्चकपालम् (द्विगुसमासे अणि प्रत्यये, अणो लुकि च)।

संख्यावाचकः शब्दः वाच्यलिंगः स्यात्। संख्यावाचक शब्द वाच्यलिंग होते हैं। जैसे—एको ब्राह्मणः, एका कन्या, एकं कुलम्। द्वौ पुरुषौ. द्वे कन्यके, द्वे फले। त्रयश्छात्राः, तिस्रो नार्यः, त्रीणि कुलानि।

सर्वनामसंज्ञकः शब्दः त्रिष्ववसेयः। सर्वनाम संज्ञक शब्द वाच्यलिंग होते हैं। जैसे—सर्वो देशः, सर्वा नदी, सर्वं फलम्। पूर्वो ग्रामः, पूर्वा स्त्री, पूर्वं संवत्सरम्।

तदन्तकाः—तत् = संख्याशब्दः सर्वनामसंज्ञकशब्दश्च अन्ते येषां ते शब्दाः त्रिषु स्युरिति। संख्यान्त और सर्वनामान्तशब्द त्रिलिंग होते हैं। संख्यान्तशब्द जैसे—ऊनत्रयः (ऊनाः त्रयो येषां ते) ब्राह्मणाः, ऊनतिस्रः (ऊनाः तिस्रो यासां ताः) वध्वः, ऊनत्रीणि (ऊनानि त्रीणि येषां तानि) वस्त्राणि। सर्वनामान्त शब्द जैसे—परमसर्वः (परमश्चासौ सर्वश्च) परमसर्वा (परमा चासौ सर्वा च) परमसर्वम् (परमं च तत् सर्वम्) इत्यादि उदाहरण जानना ॥ ४३ ॥

अदिङ्नाम्नाम् (न दिङ् नामानि येषां तेषाम्) बहुव्रीहिः = बहुव्रीहिसमासः वाच्यलिंगः स्यात्। दिशाओं के नाम से भिन्न बहुव्रीहिसमास संज्ञक शब्द त्रिलिंग होते हैं। तत् = तस्य दिङ्नामभिन्नस्य बहुव्रीहेः उदाहृतम् = उदाहरणम् उन्नेयम् = स्वयमूहनीयम्। उस दिङ् नामातिरिक्त बहुव्रीहि समास का उदाहरण स्वयं विचारना चाहिये। जैसे—बहुधनः (बहु = अधिकं धनं यस्य सः) बहुधना (बहु धनं यस्याः सा) बहु धनम् (बहुधनं यस्मिन् तत्) गृहम्। 'अदिङ्नाम्नां कहने से—'उत्तरपूर्वा = (उत्तरस्याः पूर्वस्याश्च दिशोरन्तरालम्, अत्र 'दिङ् नामान्यन्तराले' इत्यनेन बहुव्रीहिः) = दिक्, यहाँ त्रिलिंग नहीं होता है। अन्यथा यहाँ भी त्रिलिङ्गापत्ति होगी।

गुणद्रव्यक्रियायोगोपाधयः = गुणश्च द्रव्यञ्च क्रिया च इति ताः, तासां योगः उपाधिः = निमित्तम् येषां ते, परगामिनः = वाच्यलिंगाः = भवन्ति। गुण-द्रव्य-क्रिया का योग निमित्त है जिनका ऐसे शब्द त्रिलिंग होते हैं। जैसे—शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्। दण्डी (दण्डोऽस्त्यस्य इति इनिः), दण्डिनी (दण्डोऽस्त्यस्याः इति), दण्डि (दण्डो विद्यते यस्य तत्)। पाचकः (पचति पाचयति वा इति ण्वुलि) पुरुषः, पाचिका स्त्री, पाचकं कुलम् आदि उदाहरण जानना ॥ ४४ ॥

असंज्ञायाम् = न संज्ञा असंज्ञा तस्यां कर्तरि अर्थे विहिताः कृतः = कृत्संज्ञकप्रत्ययाः तदन्ता शब्दाः परगामिनः (इति पूर्वेणान्वयः) = वाच्यलिंगाः भवन्तीति भावः। संज्ञाभिन्न कर्ता अर्थ में विहित जो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।

कृत्प्रत्यय तदन्त शब्द त्रिलिंग होते हैं। जैसे—कर्ता (करोतीति तृचि) पुमान्। कर्त्री (अत्र ङीपि) माया। कर्तृ कलत्रम्। कुम्भकारः (कुम्भस्य कारः करोतीति अण्) कुलालः। कुम्भकारी (अत्र ङीपि)। कुम्भकारं कुलम्। 'असंज्ञायां' कहने से संज्ञामें विहित जो प्रत्यय तदन्त शब्द से त्रिलिंग नहीं होता है। जैसे—विश्वम्भरः (विश्वं बिभर्तीति संज्ञायां खचि) 'विश्वम्भरोऽच्युते शक्रे पुंसि विश्वम्भरा भुवि' इति कोषात् विश्वम्भराऽपि। व्याघ्रः, धनञ्जयः आदि में, एवं कर्तरि कहने से एधितव्यम्, कृतिः आदि में त्रिलिंग नहीं होता है।

कर्तरि कर्मणि च असंज्ञायां विहिताः कृत्याः = कृत्यप्रत्ययान्ताः शब्दाः त्रिषु स्युरिति। संज्ञाभिन्न कर्ता और कर्म अर्थ में विहित कृत्यप्रत्ययान्त शब्द त्रिलिंग होते हैं। कर्ता अर्थ में विहित जैसे—भव्यः (भवतीति यति) तरुः, भव्या स्त्री, भव्यं कुलम्। वास्तव्यः (वसतीति तव्यति) वास्तव्या, वास्तव्यम्। कर्म अर्थ में विहित जैसे—कार्यः (क्रियते असौ इति ण्यति) घटः, कार्या सृष्टिः, कार्यं जगत् 'कर्तरि कर्मणि' कहने से—स्थातव्यम्, एधनीयम्, ब्रह्मभूयम् आदि भाव में विहित प्रत्ययान्त शब्दों से त्रिलिंग नहीं होता है। यहाँ भी 'असंज्ञायां' कहने से भिद्यः, उध्यः आदि क्यबन्तों में त्रिलिंग नहीं होता है।

तेन रक्ताद्यर्थे—तृतीयान्तात् रक्ताद्यर्थे विहिताः ये अणादयः, तदन्ता शब्दाः नानार्थभेदकाः = नानार्थानां भेदकाः = विशेषणानि, नानार्थाः वा भेदकाः विशेष्याः येषां ते त्रिलिङ्गाः स्युः। तेन रक्तं = उससे रंगा गया आदि अर्थ में विहित अणादि प्रत्ययान्त नानार्थ भेदक अनेक अर्थों के विशेषण शब्द त्रिलिंग होते हैं। प्रथम आदि पद से—आगत, युक्त, देवता, दृष्ट, प्रोक्त, भव आदि का ग्रहण है। द्वितीय आदि पद से—ठगादिका परिग्रहण जानना। क्रमशः उदाहरण जैसे—कौङ्कुमः (कुङ्कुमेन रक्तः इत्यण्) पटः, कौङ्कुमी शाटी, कौङ्कुमं वस्त्रम्। लाक्षिकः (लाक्षया रक्तम् इति ठक) पटः, लाक्षिकी शाटी, लाक्षिकं वस्त्रम्। माथुरः (मथुरायाः आगतः इति अणि) माथुरी, माथुरम्। कार्तिकी (कृत्तिकाभिः युक्ता पौर्णमासी इति अणि), कार्तिको मासः, कार्तिकं दिनम्। वासिष्ठः (वसिष्ठेन दृष्टो मन्त्रः) वासिष्ठी ऋक्, वासिष्ठं साम। प्राजापत्यः (प्रजापतिना प्रोक्तः इति ण्यः) प्राजापत्या, प्राजापत्यम्। ग्राम्यः (ग्रामे भवः इति यः) ग्राम्यम् आदि उदाहरण जानना ॥ ४५ ॥

षट् संज्ञकाः युष्मदस्मत्तिङव्ययम् = (युष्मच्च अस्मच्च तिङ् च अव्ययानि च इति समाहारे) त्रिषु (लिंगेषु) समाः = तुल्याः इत्यन्वयः। ष्णान्ता षट् और डति च सूत्रों से निष्पन्न षट् संज्ञा वाले शब्द और युष्मत्, अस्मत्, तिङन्त एवं अव्यय (लिंगप्रयुक्त विशेष परिवर्तित न होने के कारण) तीनों लिंगों में समान रूप वाले होते हैं। 'त्रिषु समाः' कहने से अलिंगत्वेन समानत्व प्रतिपादन होता है। जैसे—पञ्च, षट्, सप्त, अष्टौ वा छात्राः, पञ्च, षट्, सप्त, अष्टौ वा नगर्यः, पञ्च, षट्, सप्त, अष्टौ वा कुलानि। कति ब्राह्मणाः, कति नार्यः, कति फलानि, त्वम्, अहम् वा पुरुषः, त्वम्, अहम् वा स्त्री त्वम् अहम् वा फलम्। पुरुषः स्त्री कुलं वा पचति। उच्चैः प्रासादाः उच्चैः शाला, "षट् संज्ञकां गृहम् आदि। "षट् संज्ञकों का संख्यान्तर्गत होने से ही त्रिलिङ्गत्व सिद्ध है, 'संख्यासर्वनामतदन्तकाः' का ही यह प्रपञ्च है" ऐसा मुकुट का कहना उपयुक्त नहीं है—क्योंकि संख्या के भीतर डत्यन्तों का परिगणन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परं विरोधे, शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥
इत्यमरसिंहकृतौ नामलिंगानुशासने ।
सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥ ४७ ॥

नहीं है । डत्यन्तों का संख्याकार्य सम्पन्न होने के लिये ही पाणिनि ने अपने शास्त्र में संख्या संज्ञा की है, साधारणतया नहीं ।

विरोधे परं ज्ञेयमिति सम्बन्धः । लिंगविधायकवचनविरोधे सति परं वचनं ग्राह्यम् । लिंगविधान करने वाले वचनों में यदि परस्पर विरोध हो तो पर वचन से विहित लिंग का ग्रहण करना चाहिये । जैसे—'स्त्रियामीदूद्विरामैकाच्' धीः, भ्रूः में चरितार्थ है, 'कृतःकर्तर्यसंज्ञायां, कर्ता, पाचकः में चरितार्थ है और नीः लूः में दोनों (स्त्रीलिंगता और त्रिलिंगता) की प्राप्ति होने पर 'परं विरोधे' इस वचन से पर—त्रिलिंगता होती है । इसी प्रकार अन्यत्र (उदाहरणों में) भी जानना ।

शेषं शिष्टप्रयोगतः ज्ञेयम् = इहानुक्तम् शिष्टानां = सतां प्रयोगतः = प्रयोगात् ज्ञेयम् = बोध्यम् इत्यर्थः । शेष (अवशिष्ट लिंग) जो लिंग यहाँ नहीं कहा गया है उसका ज्ञान शिष्टों (आचार्यों) के प्रयोग से जानना चाहिये । जैसे—'चालनी तितउः पुमान्' इस वचन से 'तितउ शब्द को पुंलिंग कहा गया है किन्तु महाभाष्यकारके—'तितउ परिपवनं भवति'—इस प्रयोग से 'तितउ' शब्द नपुंसकलिंग में भी प्रयुक्त होता है । 'कलिका कोरकः पुमान्' इस उक्ति से 'कोरक' शब्द को पुंलिंग कहा गया है किन्तु 'कोरकाणि' ऐसा माघ कवि के प्रयोग से 'कोरक' शब्द को नपुंसक लिंग भी जानना चाहिए ॥ ४६ ॥ इति लिंगादिसंग्रहवर्गः ।

उपसंहरन्नाह—

इति, अमरसिंहकृतौ = निर्मिते नामलिंगानुशासने नामलिंगप्रतिपादकशास्त्रे तृतीयः सामान्यकाण्डः सांगः = अंगेन सहितः, सांगोपांगसमेतः एव समर्थितः = सम्पादितः । श्रीअमरसिंह के बनाये नाम—लिंग को कहने वाले शास्त्र (अर्थात्—अमरकोश नामकग्रन्थ) में तृतीय सामान्यकाण्ड सम्पादित हुआ ॥ ४७ ॥ शमिति ॥

आसीत्कवीन्द्रो नृपमाननीयो वाणीशशर्मेति बुधो वरिष्ठः ।
तदात्मजेनैव कृता सुधेयं सुधेव यायाद्धृदि सज्जनानाम् ॥ १ ॥

नन्दारिग्रहचन्द्रेऽब्दे खिष्टीये शिवरात्रके ।
अर्पितेयं कृतिर्भक्त्या शिवपादाब्जयुग्मके ॥ २ ॥

दरभंगामण्डलान्तर्गतकौरग्रामाभिजनकविमूर्धन्यश्रीवाणीशशर्मात्मज
श्रीविश्वनाथशर्मविरचितायाममरकोशटीकायां सुधाख्यायां
तृतीयः काण्डः समाप्तः । शुभमस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः

अमरकोशतृतीयकाण्डस्थ

शब्दानामनुक्रमणिका

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
अ	४	११	अजिर	३	१८२	अत्यन्तकोपन	१	३२	अधुना	४	२२
अकराणि	२	३९	अजिह्म	१	७२	अत्यय	३	१५०	अधृष्ट	१	२६
अकृष्णकर्मन्	१	४६	अज्ञ	१	२८	अत्याहित	३	७७	अधोमुख	१	३३
अक्ष	३	२२२	,,	१	३८	अथ	३	२४७	अध्यक्ष	३	२२६
अक्षर	३	१८७	अञ्चित	१	९८	अथो	३	२४७	अनन्त	३	८१
अक्षि	५	२२	अञ्जसा	४	२	अदभ्र	१	६३	अनन्यवृत्ति	१	७९
अक्षिगत	१	४५	,,	४	१२	अदर्शन	२	२२	अनय	३	५०
अखण्ड	१	६५	अणक	१	५४	अद्धा	४	१२	अनवस्कर	१	५६
अखिल	१	६५	अणीयस्	१	३३	अद्मर	१	२०	अनवरार्ध्य	१	५७
अग	३	१९	अणु	१	६२	अद्य	४	२०	अनिमिष	३	२१९
अग्र	१	५८	अण्डज	१	५१	अद्रि	३	१६४	अनु	३	२४८
,,	३	१८४	अति	३	२४२	,,	५	११	अनुक	१	२३
अग्रतस्	३	२४६	,,	४	२	अधम	१	५४	अनुकार	२	१७
,,	४	७	अतिक्रम	२	३३	,,	३	१४५	अनुग	१	९८
अग्रिय	१	५८	अतिपात	२	३३	अधर	३	१९०	अनुग्रह	२	१३
अग्र्य	१	५८	अतिरिक्त	५	७५	अधिकर्धि	१	११	अनुत्तम	१	५७
अघ	३	३२	अतिवक्तृ	१	३५	अधिक्षिप्त	१	४२	अनुत्तर	३	१९१
अङ्कु	३	४	अतिशय	२	११	अधिप	१	११	अनुपद	१	७८
अङ्ग	४	७	अतिशोभन	१	५८	अधिभू	१	११	अनुबन्ध	३	९८
अङ्ग	४	१९									
अङ्गीकृत	१	१०८	अतिसर्जन	२	२८	अधिष्ठान	३	१२६	अनुभव	२	२७
अज	३	३०	अतीन्द्रिय	१	७९	अधीन	१	१६	अनुभाव	३	२१०
अजित	३	६२	अतीव	४	२	अधीर	१	२६	अनुलेपन	५	२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
अनुवाक	५	१७	अपत्रपिष्णु	१	२८	अभितस्	१	६७	अभ्यवहृत	१	१११
अनुशय	३	१४८	अपदान्तरं	१	६८	,,	३	२५६	अभ्यागारिक	१	१२
अनुहार	२	१७	अपदेश	३	२१६	अभिनव	१	७७	अभ्यादान	२	२६
अनूक	३	१३	अपध्वस्त	१	३९	अभिनीत	३	८१	अभ्याश	१	६७
अनूनक	१	६५	अपरस्पर	२	१	अभिपन्न	३	१२८	अभ्युपपत्ति	२	१३
अनृजु	१	४६	अपवाद	३	८९	अभिप्राय	२	२०	अमर्षण	१	३२
अन्त	१	८१	अपष्ठु	१	८४	अभिभूत	१	४०	अभा	३	३
अन्तर	३	१८७	अपसव्य	१	८४	अभिमान	३	११०	अमुत्र	४	८
अन्तरा	४	१०	,,	१	८४	अभियोग	२	१३	अमृत	३	७६
अन्तराय	२	१९	अपस्नात	१	९१	अभिरूप	३	१३१	अम्बर	३	१८२
अन्तरे	४	१०	अपहार	२	१६	अभिलाव	२	२४	अयि	४	१८
अन्तरेण	४	३	अपाङ्ग	३	२१	अभिलापुक	१	२२	अरघट्ट	५	१८
,,	४	१०	अपावृत	१	१५	अभिवादक	१	२८	अरण्य	५	२२
अन्तर्गत	१	६८	अपि	३	२४९	अभिव्याप्ति	२	६	अराल	१	७१
अन्तर्मनस्	१	८	अप्रगुण	१	७२	अभिशस्त	१	४३	अरि	५	११
अन्तर्वाणि	१	६	अप्रत्यक्ष	१	७९	अभिषङ्ग	३	२४	अरिष्ट	३	३६
अन्तिक	१	६७	अप्रधान	१	६०	अभिष्टुत	१	११०	अरिष्टदुष्टधी	१	४४
अन्तिकतम	१	६८	अप्राग्र्य	१	६०	अभिहार	२	१७	अरुण	३	४८
अन्त्य	१	८१	अवद्धमुख	१	३६	,,	३	१६९	अरुन्तुद	१	८३
अन्ध	३	१०३	अबाध	१	८३	अभिहित	१	१०७	अरुष्कर	३	१८६
अन्न	१	१११	अब्न	३	३२	अभीक	१	२४	अरोक	१	११०
अन्य	१	८२	अब्द	३	८८	अभीक्ष्णम्	४	१	अर्क	३	४
अन्यतर	१	८२	अब्धि	५	११	,,	४	११	अर्घ	३	२७
अन्वक्ष	१	७८	अभिक	१	२४	अभीप्सित	१	५३	अर्चित	१	१०१
अन्वक्	१	७८	अभिख्या	३	१५६	,,	१	११२	अर्चिस्	३	२३०
अन्विष्ट	१	१०५	अभिग्रह	२	१३	अभीषङ्ग	२	६	अर्तन	२	३२
अन्वेषित	१	१०५	अभिग्रहण	२	१७	अभीषु	३	२२०	अर्ति	३	६८
अपचय	२	१६	अभिचार	२	१९	अभीष्ट	१	५३	अर्थ	३	८६
अपचायित	१	१०१	अभिजन	३	१०८	अभ्यग्र	१	६७	अर्थना	२	६
अपचित	१	१०१	अभिजात	३	८	अभ्यर्ण	१	६७	अर्थिन्	१	४९
अपचिति	३	६७	अभिज्ञ	१	४	अभ्यन्तकर्षण	२	१७	अर्घ्य	३	१६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०
अर्दना	२	६	अवध्वंस	१	९४	अश्ववडव	५	१६	आकीर्ण	१	८५
अर्दित	१	९७	अवन	२	४	असकृत्	४	१	आकुल	१	७५
अर्धर्च	५	३२	अवनत	१	७०	असमीक्ष्यकारिन्	१	१७	आक्रन्द	३	९०
अर्बुद	५	१९	अवनाय	२	२७	असार	१	५६	आक्रोशन	२	६
,,	५	३३	अवम	१	५४	असि	५	११	आक्षारित	२	४३
अर्भन्	५	३४	अवमत	१	१०६	असुर	५	११	आख्यात	१	१०७
अर्य	३	१४७	अवमानित	१	१०६	असौम्यस्वर	१	३७	आगस	३	२३१
अर्वन्	१	५४	अवरति	२	३७	अस्त	१	८७	आङ्	३	२४०
अर्वाक्	४	१६	अवरीण	१	९४	अस्तम्	४	१७	आच्छादन	३	१२५
अर्हित	१	१०१	अवश्यम्	४	१६	अस्ति	४	१८	आजि	३	३२
अलम्	२	२५२	अवष्टब्ध	३	१०४	अस्तु	४	१३	आडम्बर	३	१६८
,,	४	११	अवसर	२	२४	अस्थिर	१	४३	आढकी	५	७
अलङ्करिष्णु	१	२९	अवसान	२	३८	अस्फुटवाक्	१	३७	आढ्य	१	१०
अलङ्कर्मीण	१	१८	अवसित	१	९८	अस्त्र	१	१६५	आतङ्क	३	१०
अल्पक	३	१२	अवस्कर	३	१६८	अस्वच्छन्द	१	१६	आतञ्चन	३	११५
अल्प	१	६१	अवाग्र	१	७०	अस्वर	१	३७	आततायिन्	१	४४
अल्पिष्ठ	१	६२	अवाच्	१	१३	अहंयु	१	५०	आतप	५	२०
अल्पीयस्	१	६२	अवाक्	१	३३	अहङ्कारवत्	१	५०	आत्तगर्व	१	४०
अवकृष्ट	१	३९	अवासस्	१	३९	अहह	३	२३७	आत्मन्	३	१०९
अवगणित	१	१२६	अवि	३	२०७	अहि	२	२३९	आत्मम्भरि	१	२१
अवगति	१	१०८	अवित	१	१०६	अहिभुक्	३	३०	आथर्वण	२	४३
अवगीत	१	९३	अविनीत	१	२३	अहो	४	९	आदि	१	०८
,,	३	७९	अविलम्बित	१	८३	अह्नाय	४	२	आदीनव	२	२६
अवचूर्णित	१	९३	अवेक्षा	२	२८				आदृत	३	८१
अवज्ञात	१	१९६	अव्यक्त	३	६२	आः	३	२४०	आद्य	१	८०
अवतंस	३	२२८	अव्यय	५	३४	आ	,,	२४०	आद्यून	१	२१
अवदात	३	८०	अव्यवहित	१	३८	आम्	४	१६	आधि	३	६७
अवदान	२	३	अशनायित	१	२०	आकम्पित	१	८७	आधूत	१	८७
अवदीर्ण	१	८९	अशित	१	१११	आकर्ष	३	२२२	आनक	३	३
अवद्य	१	५४	अशुभ	५	२३	आकार	२	१५	आनत	१	७०
अवधि	३	९९	अशेष	१	६५	,,	३	१६३	आनन्दन	२	७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
आनर्त	३	६४	आशा	३	२१७	इरिणम्	३	५७	उत्कप	२	११
आपत्प्राप्त	१	४२	आशीस्	३	२२९	इला	३	४२	उत्कार	२	३६
आपन्न	१	४२	आशुग	३	१६	इव	४	९	उत्तंस	३	२२८
आपूपिक	२	२९	आश्रय	१	११	इष्टार्थोद्युक्त	१	९	उत्त	१	१०५
आप्रच्छन्न	२	७	आश्रव	१	२४	इष्टि	३	३६	उत्तम	१	५७
आमलक	५	३३	आश्रुत	१	१०८				उत्तर	३	१९१
आमिष	३	२२४	आसक्त	१	६	ईक्षण	२	३१	उत्थान	३	११८
आमिषाशिन्	१	१६	आसना	२	२१	ईडित	१	११०	उत्थित	३	८५
आमोद	३	९१	आसन्दी	५	९	ईति	३	६८	उत्पतितृ	१	२९
आम्नाय	२	७	आसन्न	१	६६	ईरित	१	८७	उत्पतिष्णु	१	२९
आयत	१	६६	आसादित	१	१०४	ईलित	१	१०६	उत्सव	३	२०६
आयति	३	७२	आसेचनक	१	५३	ईशितृ	१	१०	उत्सुक	१	८
आयत्त	१	१६	आस्था	३	८८	ईश्वर	१	१०	उत्सृष्ट	१	१०७
आयुष्मत्	१	७	आस्पद	३	९४	ईषत्	४	८	उत्सेध	३	९६
आरति	२	३७	आस्या	२	२१				उदक्	४	२३
आरम्भ	२	३६	आस्रव	२	२९	उ	४	१८	उदक	५	२२
आराव	३	२४३	आहत	१	८८	उक्त	१	१०७	उदग्र	१	७०
आराधन	३	१२५	आहतलण	१	१०	उक्थ	५	३०	उदज	२	३९
आरोह	३	२३८	आहो	४	५	उच्च	१	७०	उदार	१	८
आर्द्र	१	१०५				उच्चण्ड	१	८३	,,	३	१९२
आलि	३	१९८	इङ्ग	१	७४	उच्चावच	१	८३	उदित	१	१०७
आलोक	३	३	,,	२	१५	उच्चैस्	४	१७	उद्ग	१	९७
आलोकन	२	३१	इङ्गित	६	१५	उच्छ्रित	१	७०	उद्गार	२	३७
आविद्ध	१	७१	इडा	३	४२	,,	३	८५	उद्गीथ	१	१९
,,	१	८७	इतर	१	८२	उत	१	१०१	उद्गूर्ण	१	८६
आविध	२	३६	इतर	३	१९२	,,	३	२४३	उद्ग्राह	२	३७
आविस्	४	१२	इति	३	२४६	,,	४	५	उद्घन	२	३५
आवृत	१	९०	इदानीम्	४	२३	उताहो	४	४५	उद्घात	२	२६
आशंसितृ	१	२७	इन	३	१११	उत्क	१	८	उद्दित	१	९५
आशंसु	१	२७	इभ्य	१	१०	उत्कट	४	३४	उद्धृत	१	९०
आशय	२	२०	इरा	३	१७६	,,	१	२३	उद्भिज्ज	१	५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
उद्भिद्	१	५१	उपश्रुत	१	१०९	ऋजु	१	७२			
उद्भिद	१	५१	उपसर	२	२५	ऋतीया	२	३२	ओकस्	३	२३३
उद्भ्रम	२	१२	उपसर्जन	१	६०	ऋत्तु	३	६१	ओघ	३	२७
उत	१	८०	उपहर	३	१८३	ऋते	४	२	ओजस्	३	२३४
उद्यम	२	११	उपात्यय	२	३३	ऋषभ	१	५९	ओम्	४	१२
उद्यान	३	११७	उपादान	१	१६				ओघ	२	९
उद्योग	५	३३	उपाधि	१	१२	एक	१	८२	ओष्ठ	५	१२
उद्भ्रान्त	१	९७	उपासित	१	१०२	,,	१	८२			
उद्वेग	२	१२	उपाहित	१	९२	,,	३	१६	औचिती	५	३९
उन्नत	१	७०	उभयद्युस्	४	२१	एकक	१	८२	औचित्य	५	३९
उन्नतानत	१	६९	उभयेद्युस्	४	२१	एकतान	१	७९	औदरिक	१	२१
उन्नय	२	१२	उररी	३	२५५	एकदा	४	२२	औपगवक	२	३९
उन्नाय	२	१२	उररीकृत	१	१०८	एकसर्ग	१	८०	औक्षीर	३	१८६
उन्मदिष्णु	१	२३	उरु	१	६१	एकाकिन्	१	८२			
उन्मनस्	१	८	उल्का	५	८	एकाग्र	१	७९	क	३	५
उपकण्ठ	१	६७	उल्बण	१	८१	,,	३	१९०	ककुद	३	९२
उपक्रम	२	२६	उषा	४	१८	एकाग्र्य	१	८०	कक्ष	३	२१९
,,	३	१३९	उषित	१	९९	एकायन	१	७९	कक्ष्या	३	१५८
उपगत	१	१०९	उष्ण	५	२२	एकायनगत	१	८०	कच्चर	१	५५
उपगूहन	२	३०	उष्णीष	३	२२०	एडमूक	१	३८	कच्चित	४	१४
उपघ्न	२	१९				एतर्हि	४	२३	कच्छपी	३	१३२
उपचरित	१	१०२	ऊत	१	१०१	एधा	२	१०	कट	३	३४
उपचित	१	८९	ऊम	४	१८	एधित	१	७६	कटाह	५	२१
उपतप्तृ	२	१४	ऊररी	३	२५४	एवम्	३	२५१	कटी	५	३८
उपनिषद	३	९३	ऊरी	३	२५४	,,	४	९	कठ	३	३५
उपभोग	२	२०	ऊरीकृत	१	१०८	,,	४	१२	कठिन	१	७६
उपरक्त	१	४३	,,	१	१०८	,,	४	१५	कठोर	१	७६
उपराम	२	३७	ऊर्णा	३	५०	,,	४	१६	कण	१	६२
उपलम्भ	२	२७	ऊर्मि	५	३८				,,	३	४६
उपला	३	२००	ऊर्मिमत्	१	७१	ऐन्द्रियक	१	७९	कणिका	५	५
उपशाय	२	३२				ऐषमस्	४	२०	कण्टक	५	३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
कण्ठ	५	१२	कर्कन्धू	५	३८	काकिणी	५	९	किम्	४	५
कदर्य	१	४८	कर्कश	१	७६	काच	३	२८	किमु	४	५
कदाचित्	४	४	,,	३	२१८	काचित	१	८९	किमुत	४	२
कद्वद	१	३७	कर्णिका	३	१५	काण्ड	३	४३	,,	४	५
कनिष्ठ	३	४१	कर्णजप	१	४७	कान्त	१	५२	किम्पचान	१	४८
कनीनिका	६	९२	कर्पर	३	१६२	कान्तार	३	१७२	किल	३	२५५
कनीयस्	१	६२	कर्पास	५	३५	कान्ति	२	८	किल्बिष	३	२२४
कनीयस्	३	२३५	कर्मकर	१	१९	कान्दिशीक	१	४२	किष्कु	३	७
कन्या	५	९	कर्मकार	१	१९	काम	३	१३८	कीनाश	३	२१६
,,	५	९	कर्मक्षम	१	१८	कामन	१	२४	कील	३	१९८
कन्द	५	३५	कर्मठ	१	१८	कामम्	४	१३	कीलाल	३	२००
कबन्ध	८	११८	कर्मन्	२	१	कामयितृ	१	२४	कीलित	१	४२
कम्	३	२५०	कर्मशील	१	१८	कामिनी	३	११२	कु	३	२८१
कमन	१	२४	कर्मशूर	१	१८	कामुक	१	२३	कुकूल	३	२०३
कमल	३	१९५	कर्पूर	३	२२३	काम्यदान	२	३	कुक्षिम्भरि	१	२१
कमितृ	१	२३	कलङ्क	३	४	कारणिक	१	७	कुचर	१	३७
कम्पन	१	७४	कलत्र	३	१७	कारिका	३	१५	कुञ्चित	१	७१
कम्पित	१	८७	कलधौत	३	७६	कारीष	२	४३	कुञ्ज	३	३१
कम्प्र	१	७४	क ग	३	९८	कारुणिक	१	१५	कुंञ्जर	१	५६
कम्बल	३	१६५	कलाप	३	१२९	कार्पास	५	३५	कुटिल	१	७१
कम्बु	३	१३३	कलि	३	१९८	कार्म	१	१८	कुटी	५	३८
कम्र	१	२४	कलिल	१	८५	कार्मण	२	४	,,	५	३८
कर	३	१६४	कल्क	३	१४	काल	३	१९४	कुटुम्बव्यापृत	१	११
,,	५	१२	कल्य	३	१६०	,,	५	११	कुट्टिम	५	३४
करक	३	६	कत्रिय	५	३५	कालिका	३	१५	कुडङ्गक	५	१७
करट	३	३४	कशार्ह	१	४४	काष्ठा	३	४१	कुणप	५	२०
करण	३	५४	कशिपु	३	१३०	कासमर्द	५	१६	कुण्ठ	१	१७
करण्ड	५	१८	कशेरु	५	१३	किंशारु	३	१६३	कुत्सित	१	५८
कराल	३	२०५	कश्य	१	४४	किञ्चित्	४	८	कुन्द	५	११
करीर	३	१७४	कषाय	३	१५३	किण	५	१८	कुपूय	१	५४
करेणु	३	५२	कष्ट	३	३९	किम्	३	२५१	कुम्भ	३	१३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
कुल्माष	५	२१	कोष	३	२२१	,,	३	१४६	खर्व	१	७०
कुवल	५	४२	कोष्ठ	३	४०	क्षान्त	१	९७	खल	१	४७
कुवाद	१	३७	कौक्कुटिक	३	१७	क्षारित	१	४३	खलपू	१	१७
कुश	३	२१६	कौपीन	३	१२३	क्षिति	३	७०	खलिपी	२	४२
कुशल	१	४	कौलीन	३	११३	क्षिपा	२	११	खलु	३	२५५
,,	३	२०४	कौशिक	३	१०	क्षिप्त	१	८७	खल्या	२	४२
कुष्ठ	५	३४	क्रन्दन	३	१२३	क्षिप्नु	१	३०	खादित	१	११०
कूकुद	१	१४	क्रिया	२	१	क्षिया	२	७	खेट	१	५४
कूट	३	३७	,,	३	१५७	क्षीव	१	२३	ख्यात	१	९
कूटस्थ	१	७३	क्रियावत्	१	१८	क्षीर	३	१८३	ख्यातगर्हण	१	९३
कृत	३	७७	क्रर	१	४७	क्षुद्र	१	४८	ख्याति	२	९
कृतमुख	१	४	क्रूर	१	७६	,,	३	१७८	गडु	५	१८
कृतलक्षण	१	१०	,,	३	१९२	क्षुद्रा	३	१७७	गण	३	४६
कृतिन्	१	४	क्रोधन	१	३२	क्षुधित	१	२०	गणनीय	१	६४
कृत्त	१	१०३	क्लम	२	१०	क्षुर	५	२०	गणित	१	६४
कृत्या	३	१५९	क्लमथ	२	१०	क्षुरप्र	२	२०	गणेय	४	६४
कृत्स्न	१	६५	क्लिन्न	१	१०५	क्षुल्लक	१	६१	गण्ड	५	१२
कृपण	१	४८	क्लिशित	१	९८	,,	२	१०	गण्डूषा	५	१०
कृपालु	१	१५	क्लिष्ट	१	९८	क्षेत्र	३	१८०	गद्य	५	३१
कृशं	१	६१	क्लीव	३	२१४	क्षेत्रज्ञ	३	३३	गन्धन	३	११५
केतन	३	११४	क्लेश	२	२९	क्षेपण	२	११	गन्धर्व	३	१३३
केतु	३	६०	क्वथित	१	९५	क्षेपिष्ट	१	१११	गम्य	१	९२
केदर	५	२०	क्वाण	२	८	क्षेमन्	५	३४	गरिष्ठ	१	११२
केवल	३	२०४	क्षण	३	४७	क्षोदिष्ठ	१	१११	गरुत्मत्	३	५८
केश	५	१२	क्षतृ	३	६३	क्ष्णुत	१	९१	गर्धन	१	२२
कोटि	३	३८	क्षन्तृ	१	३१	क्ष्वेडा	३	४३	गर्भ	३	१३५
कोट्टं	५	१८	क्षम	३	१४३	क्ष्वेडित	५	३४	गर्ह्य	१	५४
कोपिन्	१	३२	क्षमा	,,	,,	ख	३	१८	गर्ह्यवादिन्	१	३७
कोमल	१	७८	क्षमितृ	१	३१	,,	५	२२	गलित	१	१०४
कोश	३	२२१	क्षमिन्	१	३१	खग	३	१९	गल्या	२	४२
कोशातकी	३	८	क्षय	२	७	खट	५	१७	गवेषित	१	१०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०
गहन	१	८५	गोपायित	१	१०६	घ्रात	१	९०	चिररात्राय	४	१
गह्वर	३	१८३	गोपुर	३	१८३	च	३	२४१	चिरस्य	,,	,,
गाङ्गेय	३	१५६	गोल	५	२०	,,	४	५	चिराय	,,	,,
गिरि	२	११	गोविन्द	३	९१	चक्र	३	१८२	चीर	५	३१
गिलित	१	११०	गोशाल	५	४०	चञ्चल	१	७५	चीवर	५	३१
गीर्ण	१	११०	गोष्पद	३	९४	चण्ड	१	३२	चुक्र	५	२०
गीर्णि	२	११	गौर	३	१८९	चन	४	३	चूर्णि	५	९
गुड	३	४२	ग्रन्थित	१	८६	चन्द्र	३	१८३	चेत्	४	१२
गुण	३	४७	ग्रस्त	१	१११	चपल	१	४६	चैल	३	२०३
गुणित	१	८८	ग्रह	२	८	चमस	५	३५	चोच	५	३०
गुण्ठित	१	८९	,,	३	२३६	चमसी	५	१०	च्युत	१	१०४
गुप्त	,,	,,	ग्रहीतृ	१	२७	चर	१	७४	छन्द	२	२०
,,	१	१०६	ग्राम	३	१४१	चरक	५	३३	,,	३	८८
गुप्ति	३	७४	ग्रामणी	३	४९	चरम	१	८१	छन्दस्	३	२३२
गुरण	२	११	ग्रामता	२	४२	चराचर	१	७४	छन्न	१	९८
गुरु	३	१६२	ग्रावन्	३	१०६	चरिष्णु	१	७४	छात	१	१०३
गुल्म	३	१४२	ग्राह	२	८	चर्चरी	५	१०	छादित	१	९८
गुह्य	३	१५४	ग्लस्त	१	१११	चर्वित	१	१११	छाया	३	१५८
गूढ	१	८९	घन	१	६६	चल	१	७४	छित	१	१०३
गून	१	९६	,,	३	१११	चलन	१	७४	छिद्रित	१	९९
गृध्नु	१	२२	घनाघन	३	११०	चलाचल	१	७४	छिन्न	१	१०३
गृध्रसी	५	१०	घर्म	३	१४२	चलित	१	८७	छेदन	२	७
गृह	३	२३८	घस्मर	१	२०	चार	२	१४	जगत्	३	८०
गृहयालु	१	२७	घातुक	१	२८	चारु	१	५२	जगती	३	७१
गृहस्थूण	५	३०	,,	२	४७	चिकुर	१	४६	जघन	१	१११
गृह्यक	१	१६	घुण	५	१८	चिक्कस	५	३५	जघन्य	१	८१
गैरिक	३	१२	घूर्णित	१	३२	चित्	४	३	,,	३	१५८
गो	३	२५	घृणा	२	३२	चित्र	३	१७९	जङ्गम	१	७४
गोण्ड	५	१८	,,	३	५१	चित्रभानु	३	१०५	जङ्गमेतर	१	७३
गोत्र	३	१८१	घृत	३	७६	चिरक्रिय	१	१७	जटा	३	३८
गोप	३	१३०	घ्राण	१	९०	चिरन्तन	१	७७	जठर	३	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
जड	१	३८	जोषम्	३	२५१	तन्त्र	३	१८५	तुङ्ग	१	७०
जतु	५	१३	ज्ञपित	१	९८	तन्द्रा	३	१७६	तुच्छ	१	५६
जनता	२	४२	ज्ञातृ	१	३०	तपस्	३	२३२	तुरायण	२	२
जन्य	३	१५९	ज्यानि	२	९	तमस्	,,	,,	तूबर	३	१६५
जम्बुक	३	३	ज्यायस्	३	२३५	तमाल	५	३३	तुष्णीशील	१	३९
जय	२	१०	ज्येष्ठ	३	४१	तमोनुद	३	८९	तूष्णीक	,,	,,
जयन	२	१२	ज्योतिस्	३	२३०	तमोपह	३	२३९	तूष्णीकाम	४	९
जरठ	१	७६	ज्वर	२	३८	तरल	१	७५	तृप्त	१	१०३
जरायुज	१	५०	झटिति	४	२	तरस्विन्	२	१२८	तृष्णक्	१	२२
जलपुष्प	५	२३	झल्लरी	५	१०	तर्पण	२	४	तृष्णा	१	५१
जल्पाक	१	३६	झाटलि	५	३८	तल	३	२०२	तेजस्	३	२३४
जल्पित	१	१०७	टङ्क	५	३३	तलिन्	३	१२७	तेजित	१	९१
जवन	२	३८	टीका	५	७	तल्प	३	१३१	तेम	२	२९
जागरा	२	१९	डमर	२	१४	तष्ट	१	९९	तैलंपाता	५	६
जागरितृ	१	३२	डिम्ब	२	१४	ताण्डव	५	३४	तोटक	५	३०
जागरूक	१	३२	डिम्भ	३	१४	तार	३	१६६	त्यक्त	१	१०७
जागर्या	२	१९	तक्षक	३	४	तार्क्ष्य	३	१४६	त्रस	१	७४
जाति	३	६८	तण्डक	५	३३	तावत	३	२४७	त्रसर	२	२४
जात	४	४	तत	१	८६	तितिक्षु	१	३१	त्रस्त	१	२६
जामि	३	१४२	,,	४	३	तिन्दुकी	५	८	त्राण	१	१०६
जाल	३	२०१	ततस्	४	३	तिमित	१	१०५	,,	२	८
जाल्म	१	१७	तत्पर	१	९	तिरस्	३	२५७	त्रात	१	१०६
जिघत्सु	१	२०	तथा	४	९	,,	४	६	त्रिखट्व	५	४१
जिह्म	१	७१	,,	४	२३	तिरीट	५	३०	त्रिखट्वी	५	४१
,,	३	१४१	तद्	४	३	तिर्यंच्	१	३४	त्रितक्ष	५	४१
जीमूत	३	५८	तदा	४	२२	तिष्य	३	१४७	त्रितक्षी	५	४१
जीर्णि	२	९	तदानीम्	४	२२	तीक्ष्ण	३	५३	त्रुटि	१	६२
जूति	२	३८	तनु	१	६१	तीर्थ	३	८६	,,	३	३७
जूर्ति	२	३८	,,	१	६६	तु	३	२४२	त्रेता	३	६९
जैवातृक	१	७	,,	३	११२	तु	४	५	त्व	१	८२
,,	३	११	तनूकृत	१	९९	,,	४	१५	त्वरा	२	२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
त्वष्टृ	३	३५	दायदा	३	८९	दृढ	३	४५	धर्मराज	३	३२
त्रिप	३	२२५	दारित	१	१००	दृढसन्धि	१	७५	धव	३	२०७
दक्षिण	१	८	दाव	३	२०६	दृति	५	१९	धातकी	५	७
दक्षिणार्ह	१	५	दासीसभ	५	२७	दृब्ध	१	८६	धातु	३	६५
दक्षिणीय	१	५	दिगम्बर	१	३९	दृश्	३	२१७	धात्री	३	१७७
दक्षिण्य	१	५	दिग्ध	१	९१	दृष्टान्त	३	६२	धामन्	३	१२४
दग्ध	१	९९	दित	१	१०३	दृष्टि	३	३८	धिक्	१	२४१
दण्ड	३	४२	दिवा	४	६	देवद्र्यच्	१	३४	धिक्कृत	१	३९
दन्त	५	१२	दिवौकस्	३	२२७	देवन	३	११७	,,	१	९३
दभ्र	१	६१	दिव्योपपादुक	१	५०	दोषा	४	६	धिष्ण्य	३	१५५
दम	२	३	दिश्	५	३	दोषैकदृश्	१	४६	धीशक्ति	२	२५
दमथ	२	३	दिष्ट	३	३५	दोस्	५	१२	धुत	१	८७
दमित	१	९७	दिष्ट्या	४	१०	द्रविण	२	२२	धूत	१	१०७
दयालु	१	१५	दीन	१	४९	,,	३	५२	धूपायित	१	१०२
दयित	१	५३	दीपक	२	११	द्रव्य	३	१५५	धूपित	,,	,,
दर	३	१८५	दीर्घ	१	६९	द्राक	४	२	धूमकेतु	३	५८
दरत्	५	९	दीर्घसूत्र	१	१७	द्राघिष्ठ	१	११२	धूम्या	२	४२
दरिद्र	१	४९	दुःख	५	२३	द्रु	५	११	धूर्त	१	४७
दर्शन	१	३१	दुःषमन्	४	१३	द्रुणी	५	९	धृति	३	७६
दव	३	२०६	दुन्दुभि	३	१३६	द्रुत	१	८९	धृष्ट	१	२५
दविष्ठ	१	६९	दुरोदर	३	१७२	,,	१	१००	धृष्णज	,,	,,
दवीयस्	१	६९	दुर्गत	१	४९	द्रोण	३	४९	धेनुका	३	१५
दशमीस्थ	३	८७	दुर्गसञ्चर	२	२५	द्वन्द्व	३	२१३	ध्रुव	१	७२
दशा	३	२१७	दुर्जन	१	४७	द्वापर	३	१६२	ध्रुव	३	२११
दाडिम	५	४२	दुर्मनस्	१	८	द्विज	३	३०	ध्वनित	१	९४
दाण्डपाता	५	६	दुर्मुख	१	३६	द्विजिह्व	३	१३३	ध्वस्त	१	१०४
दात	१	१०३	दुर्विध	१	४९	द्वेष्य	१	४५	ध्वाङ्क्ष	३	२१९
दानशौण्ड	१	७	दुण्डु	४	१९	धट	५	१७	न	४	११
दान्त	१	९७	दून	१	१०२	धनिन्	१	१०	नक्तम्	४	६
दान्ति	२	३	दूर	१	६८	धन्य	१	३	नख	५	१२
दापित	१	४०	दृढ	१	७६	धर्म	३	१३९	नखर	,,	,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
नग	३	१९	नाय	२	९	निपुण	१	४	निष्कासित	१	३६
नग्न	१	३९	नायक	१	११	निभृत	१	२५	निष्क्रम	२	२५
नड	५	३३	निःशेष	१	६५	निमित्त	३	७६	निष्ठा	३	४१
नत	१	७१	निःशोघ्य	१	५६	नियुत	५	२४	निष्ठीवन	२	३८
नदी	५	३	निःषमम्	४	१३	निर्	३	२५३	निष्ठुर	१	७६
ननु	३	२४९	निःस्व	१	४९	निरन्तर	१	६६	निष्ठेव	२	३७
ननुच	४	१४	निकट	१	६६	निरर्गल	१	८३	निष्ठेवन	२	३८
नमस्	३	२३३	निकषा	४	७	निरर्थक	१	८१	निष्ठ्यूत	१	८७
नमस्	४	१८	,,	४	१९	निरग्रह	१	१५	निष्ठ्यूति	२	३८
नमित	१	१०१	निकार	२	१५	निरसन	१	३१	निष्णात	१	४
नमस्थित	१	१०१	,,	२	३६	निरस्त	१	४०	निष्पक्व	१	९५
नव	२	९	निकृत	१	४१	निराकरिष्णु	१	३०	निष्पन्न	१	१००
नव	१	७७	,,	१	४६	निराकृत्व	१	४१	निष्पाव	२	२४
नवीन	१	,,	निकृष्ट	१	५४	निराकृति	२	३१	निःप्रभ	१	१००
नव्य	,,	,,	निखिल	१	६५	निर्णिक्त	१	५६	निसृष्ट	१	८८
नहि	४	११	निगद	२	१२	निर्यातन	३	१२०	निस्तल्	१	२६६
नाक	३	३	निगम	३	१४०	निर्वर्णन	२	३१	नीच	१	७०
नाग	१	५९	निगाद	१	१२	निर्वाण	१	९६	नीचैस्	४	१७
,,	३	१९	निगार	२	३७	निर्वात	१	९६	नीलकण्ठ	३	४०
नाडी	३	४२	निग्रह	२	१३	निर्वाद	३	६०	नीवाक	२	२३
नाथवत्	१	१६	निघ	२	३६	निर्वार्य	१	१३	नीवी	३	२१२
नाना	३	२४८	निघ्न	१	१६	निर्वृत्त	१	१००	नु	३	२४८
,,	४	३	निज	३	३२	निर्वेश	२	२०	नुत्त	१	८७
नानारूप	१	९३	नित्य	१	७२	,,	३	२१५	नुन्न	१	८७
नान्दीकर	१	३८	निदिग्ध	१	८९	निर्व्यूह	३	२१७	नूतन	१	७७
नान्दीवादिन्	,,	,,	निद्राण	१	३३	निर्हार	२	१७	नूत्न	१	७८
नाभि	३	१३७	निद्रालु	१	३३	निवात	३	८४	नूनम्	३	२५
नाभि	५	२०	निधन	३	१२३	निवृत्त	१	८८	नूनम्	४	१६
नाली	५	९	निध्यान	१	३१	निशा	५	३	नृपसंभ	५	२७
नाम	३	२६०	निपठ	२	२६	निशित	१	९१	नृशंस	१	४७
नाव	३	३	निपातनं	२	२७	निष्क	३	१४	नृसेन	५	४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
नेतृ	१	११	पत्र	३	१७९	परिणाम	२	१५	पश्चात्	३	२४३
नेत्र	३	१८०	पत्रिन्	३	१०६	परितस्	४	१३	पश्चिम	१	८१
नेदिष्ठ	१	६८	पद	३	९३	परित्राण	२	५	पाक	२	८
नैकभेद	१	८३	पद्य	५	३०	परिधि	३	९७	पाट्	४	७
नैगम	३	१४०	पनायित	१	१०९	परिप्लव	१	७५	पाठ	२	२९
नो	४	११	पनित	१	१०९	परिबर्ह	३	२३९	पातक	५	३३
न्यक्ष	३	२२५	पन्न	१	१०४	परिभूत	१	१०६	पाताल	३	२०३
न्यग्रोध	३	९६	पयस्	३	२३३	परिमल	२.	१३	पादुक	१	६७
न्यच्	१	७०	पयोधर	३	१६४	परिरम्भ	२	३०	पात्र	३	१७९
न्यस्त	१	८८	पर	३	१६१	परिवापित	१	८५	पात्री	५	४२
न्यूब्ज	५	१७	परःशत	१	६४	परिवृढ	१	११	पात्रीव	५	३५
न्यून	३	१२८	परतन्त्र	१	१६	परिष्वङ्ग	२	३०	पाद	३	८९
पक्व	१	९१	परपिण्डाद	१	२०	परिसर्प	२	२०	पाप	१	४७
,,	१	९६	परमम्	४	१२	परिसर्या	२	२१	पारशव	३	२११
पक्ष	३	२२०	परवत्	१	१६	परीक्षक	१	७	पारायण	२.	२
पक्षति	३	७२	परश्वस्	४	२२	परीवाप	३	१२९	पारावार	५	३५
पक्ष्मन्	३	१२१	पराक्रम	३	१३८	परीवार	३	१६९	पारिप्लव	१	७५
पङ्क्ति	३	७२	पराग	३	२१	परीसार	२	२१	पारी	५	१०
पचा	२	८	पराङ्मुख	१	३३	परुत	४	२०	पार्श्व	,,	४१
पटल	३	२०२	पराचीन	१	३३	परेद्यवि	४	२१	पालि	३	१६८
पटु	३	४०	पराधीन	१	१६	पर्जन्य	३	१४७	पाल्लवा	५	५
पट्ट	५	१७	परान्न	१	८०	पर्ण	५	२२	पाश्या	२	४२
पट्टिश	५	२०	परारि	४	२०	पर्यय	२	३३	पाश्चात्य	१	८१
पण	३	४६	परार्ध्य	१	५८	पर्यवस्था	२	२१	पिचण्ड	५	१८
पणायित	१	१०९	परिकर	३	१६६	पर्याप्ति	२	५	पिच्छ	५	३७
पणित	,,	,,	परिक्रम	२	१६	पर्याय	३	१४७	पिच्छा	५	६
पतङ्ग	३	१९	परिक्रिया	२	२०	पर्वन्	३	१२१	पिञ्जर	५	३१
पतद्ग्रह	५	२१	परिक्षिप्त	१	८८	पल	३	२०२	पिठर	३	१८८
पतयालु	१	२७	परिघ	३	२७	पव	२	२४	पिण्ड	५	१८
पति	१	१०	परिचय	२	२३	पवन	,,	,,	पिण्याक	३	९
पत्ति	३	७२	परिणत	१	९६	पवित्र	१	५५	पिण्याक	५	३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
पितृसंनिभ	१	१३	पुरोडाश	५	२१	पोत	३	६०	प्रतिख्याति	२	२८
पिनाक	३	१४	पुरोभागिन्	१	४६	पौत्र	३	१८१	प्रतिजागर	,,	,,
पिपीलिका	५	८	पुलाक	३	५	पौरस्त्य	१	८०	प्रतिज्ञात	१	१०८
पिशुन	१	४७	पुषित	१	६७	पौरुष	३	२३	प्रतिपन्न	,,	,,
,,	३	१२७	पुष्कर	३	१८६	प्याट्	४	७	प्रतिबद्ध	१	४१
पीन	१	६१	पुष्कल	१	५८	प्रकार	३	१६३	प्रतिबन्ध	२	२७
पीलु	३	१६४	पुष्ट	१	६७	प्रकाश	२	२१८	प्रतिभान्वित	१	२५
पीवन्	१	६१	पूग	३	२०	प्रकृति	३	५३	प्रतियत्न	३	१०७
पीवर	,,	,,	पूजित	१	९८	प्रक्रम	२	२६	प्रतिशासन	२	३४
पुङ्ख	५	१७	पूज्य	१	५	प्रगल्भ	१	२५	प्रतिश्रय	३	१५३
पुङ्गव	१	५९	,,	३	१५१	प्रगाढ	३	२४४	प्रतिष्टम्भ	२	२७
पुटी	५	४२	पूत	१	५५	प्रगुरा	१	७२	प्रतिसर	३	१७४
पुटीरक	३	११	पूर	५	२०	प्रगे	४	१६	प्रतिहत	१	४१
पुण्य	३	१६०	पूरित	१	९८	प्रग्रह	३	२३७	प्रतीक	३	७
पुण्यवत्	१	३	पूर्ण	२	६५	प्रग्रीव	५	३५	प्रतीक्ष्य	१	५
पुद्गल	५	२०	,,	१	९८	प्रचलायित	१	३२	प्रतीत	१	९
पुनःपुनर्	४	१	पूर्व	१	८०	प्रचुर	१	६३	,,	३	८२
पुनर्	३	२५३	,,	३	१३४	प्रजन	२	२४	प्रतिहार	३	१७०
,,	४	१५	पूर्वेद्युस्	४	२१	प्रजा	३	३२	प्रतीहारी	,,	,,
,,	४	१६	पृक्ता	२	९	प्रज्ञान	३	१२२	प्रत्न	१	७७
पुर	३	१८४	पृथक्	४	३	प्रणय	२	२५	प्रत्यक्	४	२३
पुरतस्	४	७	पृथग्जन	३	१०६	,,	३	१५२	प्रत्यक्ष	१	७६
पुरस्	,,	,,	पृथग्विध	१	६३	प्रणिधि	३	१००	प्रत्यग्र	१	७७
पुरस्कृत	३	८४	पृथु	१	६०	प्रणिहित	१	८६	प्रत्यय	३	१४८
पुरस्तात्	३	२४६	पृथुक	३	३	प्रणुत	१	१०९	प्रत्यवसित	१	११०
पुरा	३	२५४	पृथुल	१	६०	प्रणेय	१	२५	प्रत्याख्यात	१	४०
पुराण	१	७७	पृष्ठ्य	२	४१	प्रतन	१	७७	प्रत्याख्यान	२	३[illegible]
पुरातन	,,	,,	पेचक	३	६	प्रति	३	२४५	प्रत्यादिष्ट	१	४०
पुरु	१	६३	पेटी	५	४२	प्रतिकूल	१	८४	प्रत्यादेश	२	३१
पुरुष	३	२१९	पेलव	१	६३	प्रतिकृष्ट	१	५४	प्रत्याहार	२	१६
पुरुहू	१	६२	पेशल	३	२०५	प्रतिक्षिप्त	१	४२	प्रत्युत्क्रम	२	२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
प्रत्यूह	२	१९	प्रश्रित	१	२५	प्राप्य	१	९२	बल	२	७२
प्रथम	१	८०	प्रसर	२	२३	प्राय	३	१५४	,,	३	१९६
,,	३	१४४	प्रसव	२	१०	प्रायस्	४	१७	बलवत्	४	२
प्रथा	२	६	,,	३	२०८	प्रार्थित	१	९७	बलि	३	१९५
प्रथित	१	९	प्रसव्य	१	८४	प्रिय	१	५३	बहिस्	४	१७
प्रदर	१	१६५	प्रसह्य	४	१०	प्रियंवद	१	३५	बहु	१	६३
प्रधान	१	५७	प्रसाद	३	९१	प्रीणन	२	४	बहुकर	१	१७
,,	३	१२२	प्रसारिन्	१	३१	प्रीत	१	१०३	बहुगर्ह्यवाच्	१	३६
प्रपञ्च	३	२८	प्रसित	१	९	प्रुष्ट	१	९६	बहुप्रद	१	७
प्रभव	३	२१०	प्रसिति	२	१४	प्रेक्षा	३	२२५	बहुल	३	१९९
प्रभु	१	११	प्रसिद्ध	३	१०४	प्रेङ्खि	१	८७	,,	१	६३
प्रभूत	१	६२	प्रसू	३	२३०	प्रेत	३	६०	बहुला	३	१८८
प्रमनस्	१	७	प्रसूति	२	१०	प्रेत्य	४	८	बहुविध	१	९३
प्रमा	२	१०	प्रसून	३	१२३	प्रेष्ठ	१	१११	बाढ	३	४४
प्रमाण	३	५४	प्रसृत	१	८८	प्रैष	३	२२०	बाण	३	४५
प्रमिति	२	१०	प्रस्ताव	२	२४	प्रौढ	१	७६	बाल	३	२०६
प्रमुख	१	५७	प्रस्थ	३	८८	प्लवग	३	२४	बालिश	१	४८
प्रमुदित	१	१०३	प्रच्छन्न	१	१०३	प्लवङ्गम	३	१३८	,,	१	२१८
प्रयाम	२	२३	प्रांशु	१	७०	प्लुष्ट	१	९९	बाष्प	३	१३०
प्रयोगार्थ	२	२६	प्राग्रहर	१	५८	प्लुष	२	९	बाह्लिक	३	६
प्रवण	३	५६	प्राग्र्य	१	४८	प्सात	१	११०	,,	५	३२
प्रवर्ह	१	५७	प्राधार	२	१०	फल	३	२०१	बाहुक	३	९
प्रवह	२	१८	प्राच्	४	१६	,,	५	२३	बीभत्स	३	२३५
प्रवारण	२	३	,,	४	२३	फल्गु	१	५६	बुद्ध	१	१०८
प्रवाल	३	२०८	प्राचिका	५	८	फाण्ट	१	९४	बुद्बुद	५	१९
प्रवासन	२	१८	प्राज्य	१	६३	फेन	५	१६	बुध	३	१००
प्रविश्लेष	२	२०	प्रातर्	४	१९	बंहिष्ठ	१	१११	बुधित	१	१०८
प्रवीण	१	४	प्रादुस्	३	२५६	बत	३	२४४	बुभुक्षित	१	२०
प्रवृत्ति	२	१८	प्रादुस्	४	१२	बद्ध	१	४२	बुस्त	५	३४
प्रवृद्ध	१	७६	प्राध्वम्	४	४	,,	१	९५	बृहत्	१	६०
,,	१	८८	प्राप्त	१	८६	बन्धन	२	१४	बृहती	३	७५
प्रवेक	१	५७	,,	१	१०४	बन्धुर	१	७०	ब्रह्मन्	३	११४
प्रव्यक्त	१	८१	प्राप्तरूप	३	१३१	बभ्रु	३	१७१	ब्रह्मबन्धु	३	१०८
प्रश्रय	२	२५	प्राप्ति	३	६९	बर्ह	३	२६६	ब्रह्मण्य	२	४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०	शब्दाः	वर्गः	श्लो०
भक्षक	१	२०	भूतिक	३	८	मनोहत	१	४१	माद	२	१२
भक्षित	१	११०	भूभृत	३	६१	मन्त्र	३	१६७	मानुष्यक	२	४२
भग	३	२६	भूयस्	१	६३	मन्द	३	९५	मार्गण	१	४९
भङ्गि	५	८	भूयिष्ठ	१	६३	मन्दिर	३	१८४	,,	२	३०
भयद्रुत	१	४२	भूरि	१	६३	मन्यु	३	१५४	मार्गित	१	१०५
भरण्यभुज्	१	१९	,,	३	१८३	मयूख	३	१८	मास्म	४	११
भर्तृ	३	५९	भूष्णु	१	२९	मरु	३	१६५	मितम्पच	१	४८
भल्ल	५	२१	भेदित	१	१००	मरुत्	३	५९	मित्र	३	१६७
भव	३	२०६	भोग	३	२३	मर्दन	२	२२	मिथस्	३	२५६
भवितृ	१	१९	भोगवती	३	७०	मर्मन्	५	३०	मिथुन	५	३८
भविष्णु	,,	,,	भोस्	४	७	मर्मस्पृश्	१	८३	मिथ्या	४	१५
भाग्य	३	१५५	भ्रम	२	९	मल	३	१९७	मीढ	१	९६
भाण्ड	३	४४	भ्रमि	२	९	मलदूषित	१	५५	मुख	२	२२
भानु	३	१०५	भ्रष्ट	१	१०४	मलिन	१	,,	मुखर	१	३६
भाम	३	२०८	भ्रातृव्य	३	१४	मलीमस्	,,	,,	मुख्य	१	५७
भावित	१	१०४	भ्रूण	३	४५	मल्ल	५	२१	मुण्ड	५	३४
भाषित	१	१०७	मङ्क्षु	४	२	मल्लक	५	३७	मुण्डित	१	८४
भाष्य	५	३१	मञ्जु	१	५२	मसी	५	१०	मुधा	४	४
भिक्षा	२	६	मञ्जुल	,,	,,	,,	३	७९	मुषित	१	८८
,,	३	२५५	मण्डन	१	२९	महती	३	६९	मुसल्य	१	४५
भिदा	२	५	मत्त	१	२३	महस्	३	२३१	मुहुस्	४	१
भिन्न	१	८२	,,	१	१०३	महाशय	१	३	मूक	१	१३
,,	१	१००	मत्सर	३	१७३	महेच्छ	१	३	मूढ	१	४८
भीरु	१	२६	मद	२	१२	महोत्साह	१	३	मूत	१	९५
भीरुक	१	२६	मद्गु	३	१०३	महोद्यम	१	३	मूत्रित	१	९६
भीलु	१	२६	मधुर	३	१९२	मा	४	११	मूर्ख	१	४८
भीलुक	१	२६	मधुरा	३	१९२	मांस	२	२२	मूर्च्छित	३	८२
भुक्त	१	१११	मध्य	४	१६१	माढि	५	८	मूर्त	१	७६
भुग्न	१	७१	मनाक्	४	८	माणव्य	२	४०	मूर्ति	३	६६
,,	१	९१	मनित	१	१०८	माणिक्य	५	३१	मूर्तिमत	१	७६
भूत	१	१०४	मनु	५	३८	मातङ्ग	३	२१	मूर्द्धाभिषिक्त	३	६९
भूत	३	७८	मनोजवस्	१	१३	मात्र	३	१७८	मूल	३	२००
भूतात्मन्	३	१०५	मनोज्ञ	१	५२	मात्रा	१	६२	मूषा	५	३८
भूति	३	६९	मनोरम	,,	,,	,,	३	१७८	मूषित	१	८८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
मृग	२	३०	यम	२	१८	राजसभा	५	९	लभ्य	३	१०४
,,	३	२०	यष्टि	५	३८	राजसूय	५	३१	ललाम	३	१४४
मृगणा	२	३०	याग	५	११	राम	३	१४०	लव	१	३२
मृगित	१	१०५	याचक	१	४९	राशि	३	२१५	,,	२	२४
मृणाली	५	७	याचनक	१	४९	राष्ट्र	३	१८४	लवण	५	२३
मृतस्नात	१	१९	याज्वा	२	६	रिक्तक	१	५६	लवन	२	२४
मृदु	१	७८	यातयाम	३	१४५	रिष्ट	३	३६	लाक्षा	५	१०
,,	३	९४	यात्रा	३	१७६	रीण	१	९२	लालसा	३	२२९
मृदुल	१	७८	याप्य	१	५४	रीति	३	६८	लालाटिक	३	१७
मृद्वीका	४	१०७	याम	२	१८	रुग्ण	१	९१	लिक्षा	५	१०
मृषा	४	१५	यावत्	३	२४७	रुचि	३	२६	लिङ्ग	३	२५
मृष्ट	१	५६	युग	३	२४	रुचिर	१	५२	लिप्त	१	९०
मेधा	५	११	युगन्धर	५	३५	रुच्य	,,	,,	लीढ	१	११०
मेदुर	१	३०	युगपद्	४	२२	रुद्ध	१	९०	लीला	३	२००
मेधि	१	१५	यूप	५	१९	रुधिर	५	२२	लुब्ध	१	२२
मेध्य	१	५५	,,	५	३५	रूक्ष	३	२२६	लून	१	१०३
मेलक	२	२९	यूप	,,	,,	रूप्य	३	१६१	लेश	१	६२
मैत्री	५	३९	योग	३	२२	रूषित	१	८६	लोक	३	२
मैत्र्य	५	३०	योजन	५	३०	रेफ	१	५४	लोकायत	५	३२
मैथुनं	३	१२२	योद्धृ	८	६१	,,	३	१३१	लोल	१	५४
मोघ	१	८१	रक्त	३	८०	रै	३	१६६	,,	३	२०६
मोदक	५	३३	रक्षित	१	१०६	रोदस्	३	२३०	लोलुप	१	२२
मौलि	३	१९३	रक्षण	२	८	रोदसी	,,	,,	लोलुभ	,,	,,
मौष्ट्या	५	५	रजत	३	७९	रोमन्थ	४	१९	लोहं	५	२३
यत्	४	३	रजस्	२	२३२	लक्ष्मण	१	१४	लोहल	१	३७
यतः	,,	,,	रण	२	८	लक्ष्मन्	३	१२४	व	४	६
यथा	४	९	,,	३	४९	लक्ष्मीवत्	१	१४	वंश	३	२१५
यथाजात	१	४८	रत्न	३	१२६	लगुड	५	१८	वक्तव्य	३	१६०
यथातथ	४	१५	रभस	५	२१	लघु	३	७८	वक्तृ	१	३५
यथायथम्	४	१४	रल्लक	५	१७	लङ्का	५	७	वचनेस्थित	१	२४
यथास्वम्	,,	,,	रवण	१	५८	लज्जाशीलं	१	२८	वज्र	३	१८५
यद्	४	१२	रश्मि	३	१३८	लज्जित	१	९१	वञ्चक	१	४७
यदृच्छा	२	२	रस	३	२२७	लट्वा	५	१०	वञ्चित	१	४१
यन्तृ	३	५९	राजन	३	१११	लपित	१	१०७	वटक	५	१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
वङ्ग	१	६१	वर्त्मन्	३	१२१	वातूल	३	१९६	वित्त	१	६६
वत्स	३	२२७	वर्धन	,,	२८	वाम	३	१४५	विदर	२	१५
वत्सल	१	१४	,,	२	७	वामन	१	७०	विदल	५	३२
वद	१	३५	वर्धिष्ण	१	२८	वार	३	१६२	विदित	१	१०८
वदान्य	१	७	वर्य	१	५७	वारुणी	३	५२	,,	१	१०६
,,	३	१६१	वर्ष	३	२२४	वार्त	३	७५	विदुर	१	३०
वदावद	१	३५	वर्ष्मन्	३	१२३	वार्ता	,,	,,	विद्ध	१	६६
वधू	३	१०२	वलज	३	३१	वार्मण	२	४३	विद्युत्	५	३
वध्य	१	४५	वलियित	१	९०	वात्रदूक	१	३५	विद्रुत	१	१००
वंन	३	१२६	वल्लभ	१	५३	वावृत्त	१	९२	विद्वस्	३	२३५
वनतिक्तिका	४	८५	,,	३	१३७	वासिता	३	५७	विधा	३	१०६
वनिता	३	७४	वल्ली	५	३	वाहिनी	३	११२	विधि	३	१०१
वनीयक	१	४९	वश	२	३	विकस्वर	१	३०	विधु	३	६६
वन्दारु	१	२८	वशक्रिया	२	४	विकार	२	१५	विधुत	१	१०७
वयस्	३	२३१	वशा	३	२१७	विकासिन्	१	३०	विधुर	२	२०
वर	२	८	वशिक	१	५५	विकुर्वाण	१	७	विधुवन	२	४
,,	३	१७३	वश्य	१	२५	विकृति	३	१५	विधुनन	,,	,,
वरण्ड	५	१८	वषट्	४	८	विक्रम	३	१४१	विधेय	१	२४
वरद	१	७	वसति	३	६७	विक्रिया	२	१५	विनयग्राहिन्	,,	,,
वराङ्ग	३	१६	वसु	३	२२८	विक्लव	१	४४	विना	४	३
वराटक	४	३७	वस्तु	५	१२	विक्षाव	२	३७	विनायक	३	६
वरिवसित	१	१०२	वा	३	२५०	विगत	१	१००	विनाश	२	२२
वरिवस्यित	,,	,,	,,	४	९	विग्रह	२	२२	विनीत	१	२५
वरिष्ठ	१	१११	,,	४	१५	विघ्न	२	१६	विन्दु	१	३०
वरीयस्	३	२३५	वागीश	१	३४	विचयन	२	३०	विन्न	१	९६
वरेण्य	१	५७	वाग्मिन्	१	३५	विचारित	१	६६	,,	१	१०४
वर्चस्	३	२३१	वाचाट्	१	३६	विच्छाय	५	२६	विपणि	३	५२
वर्ण	३	४८	वाचाल	,,	,,	विज्ञ	१	४	विपर्यय	२	३३
वर्णक	५	३८	वाचोयुक्तिपटु	१	३५	विज्ञात	१	६	विपुल	१	६१
वर्णित	१	११०	वाजपेय	५	३०	विट	५	१७	विप्रकार	२	१५
वर्तक	३	११	वाजिन	३	१०७	विटप	३	१३१	विप्रकृत	१	४१
वर्तन	१	२९	वाटी	५	४२	वितण्डा	५	६	विप्रकृष्टक	१	६८
वर्तिष्णु	,,	,,	वाडव्य	२	४१	वितान	३	११३	विप्रयोग	२	२८
वर्तुल	१	६९	वाणिनी	३	११२	वित्त	१	६	विप्रलब्ध	१	४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
विप्रलम्भ	२	२८	विषाण	३	५६	वृत्ति	३	७३	व्यध	२	८
विप्लवं	२	१४	विष्टर	३	१७०	वृत्र	३	१६४	व्यय	२	१७
विभावसु	३	२२६	विष्य	१	४५	वृथा	३	४८	व्यलीक	३	१२
विभ्रम	३	१४२									
विमनस्	१	८	विष्वच्	४	१३	,,	४	४	व्यसन	३	१२०
विमर्दन	२	१३	विष्वद्र्यच्	१	३४	वृद्ध	३	१००	व्यसनार्त	१	४३
वियम	२	१८	विसर्पण	२	२३	वृद्धि	२	९	व्यस्त	१	७२
वियात	१	२५	विसारिन्	१	३१	वृन्दारक	३	१६	व्याकुल	१	४३
वियाम	२	१८	विसृत	१	८६	वृन्दिष्ठ	१	११२	व्याघ्र	१	५०
विरति	२	३७	विसृत्वर	१	३१	वृश्चिक	३	७	व्याड	३	४२
विरल	१	६६									
विरोचन	३	१०८	विसृमर	१	३१	वृष	३	२२१	व्याल	३	१९७
विरोधन	२	२१	विस्तर	२	२२	वृषाकपायी	३	७६	व्यास	२	२२
विलक्ष	१	२६	विस्तार	,,	,,	वृषाकपि	३	१३०	व्युत्थान	३	११०
विलक्षण	२	२	विस्तृत	१	८६	वेग	३	२०	व्युष्टि	३	३८
विलम्ब	२	२८	विस्मयान्वित	१	२६	वेताल	५	२१	व्यूढ	३	४५
विलीन	१	१००	विस्मृत	१	८६	वेदना	२	६	व्यूह	२	२३९
विलेपन	२	२७	विस्रम्भ	३	१३५	वेध	२	८	व्रज	३	३०
विवध	३	९६	विहस्त	१	४३	वेधस्	३	२२९	व्रतति	३	६७
विवश	१	४४	विहार	२	१६	वेधित	१	९९	शकुन्त	३	५८
विवस्वत्	३	५७	विह्वल	१	४४	वेला	३	१९९	शक्ति	३	६६
विविक्त	३	८२	वीकाश	३	२१५	वेल्लित	१	७१	शक्ल	१	३५
विविध	१	९३	वीणा	५	३	,,	१	८७	शङ्ख	३	१७
विश्	३	२१४	वीथी	३	८७	वेष्टित	१	९०	शठ	१	४६
विशङ्कर	१	६०	वीध्र	१	५५	वै	४	५	शतमान	५	३४
विशल्या	३	१५६	वीर्य	३	१५५	,,	४	१५	शनैस्	४	१७
विशाय	२	३२	वीवध	३	२६	वैज्ञानिक	१	४	शब्दन	१	३८
विशारद	३	९५	वृक्ण	१	१०३	वैधेय	१	४८	शम	२	३
विशाल	१	६०	वृजिन	१	७१	वौषट्	४	८	शमथ	,,	,,
विश्रान्त	२	२८	,,	३	१०९	व्यक्त	३	६२	शमित	१	९७
विश्रुत	१	९	वृत	१	९२	व्यग्र	३	१९०	शम्बल	५	३४
विश्व	१	६५	वृति	२	८	व्यञ्जन	३	११६	शम्भु	३	१३५
विश्वकर्मन्	३	१०९	वृत्त	१	६९	,,	५	२३	शयालु	१	३३
विष	३	२२३	,,	१	९२	व्यडम्बक	४	५१	शयित	,,	,,
विषय	२	११	,,	३	७८	व्यत्यय	२	२३	शर	५	११
,,	३	१५३	वृत्तान्त	३	६३	व्यत्यास	,,	,,	शरण	३	५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
शरद	३	९३	शिलीमुख	३	१८	श्रील	[illegible]	[illegible]	संस्थान	३	१२४
शरारु	१	२८	शिवा	३	२१३	श्रीवेष्ट	५	१३	संहृत	१	१५
शर्करा	३	१७६	शिग्विदान	१	४६	श्रुत	३	७७	सकल	१	६५
शल्क	३	१	शीत	५	१२२	श्रुति	३	७३	सक्त्व	३	२ २
शश्वत्	३	२४४	शीध	५	३४	श्रेयस्	१	५८	सङ्कट	१	८५
,,	४	१	शीर्षच्छेद्य	१	३४	श्रेष्ठ	,,	,,	सङ्कलित	१	९३
,,	४	११	शील	३	२०१	श्रौषट्	४	८	सङ्कसुक	१	४३
शस्त	१	१०९	शुक्त	३	८३	श्लक्ष्ण	१	६१	सङ्कीर्ण	१	५७
शस्त्र	३	१८०	शुचि	३	२८	श्लेष	२	११	,,	३	८५
शाटक	५	३३	शुद्धान्त	३	६६	श्लोक	३	२	सङ्कुल	१	८५
शाटी	५	३८	शुभ	५	२३	श्वनिश	५	४०	सङ्क्रम	१	२५
शाणी	५	९	शुभंयु	१	५०	श्वभ्र	५	२२	सङ्क्षेपण	२	२१
शात	१	९१	शुभान्वित	,,	,,	श्वशुर्य	३	१४६	सङ्ख्यात	१	६४
शाद	३	९०	शुभ्र	३	१३३	श्वस्	४	२२	सङ्ग	२	२९
शान्त	१	९७	शुल्व	५	२३	श्वेत	३	७९	सङ्गा	,,	,,
शान्ति	२	३	शून्य	१	५६	संयत	१	४२	,,	५	३४
शार	३	१६६	शूल	३	१९७	संयम	२	१८	सङ्गर	३	१६७
शारद	२	९५	शृङ्ग	३	२६	संयाम	,,	,,	सङ्गीर्ण	१	१०९
शार्दूल	१	५९	शृत	१	९५	सयोजित	१	९२	सङ्गूढ	१	९३
शार्वर	३	१८६	शेफालिका	५	७	संवत्	४	१६	सङ्ग्राह	२	१४
शालावृक	३	१२	शोधित	१	५६	संवनन	२	४	सचिव	३	२०७
शालीन	१	२६	शोभन	१	५२	संवाहन	२	२२	सञ्ज्ञा	३	३३
शाश्वत	१	७२	शौण्ड	१	२३	संविद्	३	९२	सत्	३	८३
शाष्कुलिक	२	४०	शौष्कल	१	१९	संवीत	१	९०	सत्तम	१	५८
शास्त्र	३	१८	श्च्योत	२	१०	संवेद	२	६	सत्त्व	३	२१३
शास्त्रविद्	१	७	श्याम	३	१४३	संशयापन्नमानस्	१	५	सत्य	३	१५४
शिक्यित	१	८९	श्यामा	,,	,,	संश्रुत	१	१०५	सत्र	३	१८१
शिक्षित	१	४	श्यैनम्पाता	५	६	संश्लेष	२	३०	सत्रा	४	४
शिखरिन्	३	१०६	श्रद्धा	३	१०२	संसक्त	१	३८	सदातन	१	७२
शिखा	३	९	श्रद्धालु	१	२७	संसरण	३	५५	सदेश	१	६७
शिखिन्	३	१०६	श्रवण	२	१२	संस्कृत	३	८१	सद्यस्	४	९
शिति	३	८३	श्राय	,,	,,	संस्तर	३	१६२	सध्र्यच्	१	३४
शिपिविष्ट	३	३४	श्रीपर्ण	३	५३	संस्ताव	२	३४	सना	४	१७
शिफा	३	१३२	श्रीमत्	१	१४	संस्त्याय	३	१५२	सनातन	१	७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
सनीड	१	६६	समाहित	१	१०९	सहन	१	३१	सिंहसंहनन	१	१२
सन्तप्त	१	११२	समिति	३	७०	सहस्	३	२३३	सिकता	३	७३
सन्तापित	१	१०२	समीप	१	६६	सहसा	४	७	सित	१	६५
सन्दानित	१	९५	समुच्चय	२	१६	सहायता	२	४०	सित	१	९८
सन्दित	१	८६	समुच्छ्रय	३	१५२	सहिष्णु	१	३१	,,	३	८०
,,	१	९५	समुज्झित	१	१०७	सांशयिक	१	५	सिद्ध	१	१००
सन्धा	३	१०२	समुदक्त	१	९०	साकम्	४	४	सिध्मला	५	१०
सन्धि	२	११	समुद्ग	५	१७	साक्षात्	३	२४४	सिध्रका	५	८
सन्नय	३	१५१	समुद्गिरण	३	५५	साचि	४	६	सिन्दूर	५	३१
[illegible]र्पण	२	२३	समुद्धत	१	२३	साति	२	३८	सिन्धु	३	१०१
सन्निकृष्ट	१	९६	समुन्दन	२	२६	साति	३	६७	सीमन्त	५	१९
सन्निधि	२	२३	समुन्न	१	१०५	,,	५	६	सीवन	२	५
सपदि	४	२	समुन्नद्ध	३	१०३	सादिन्	३	१०७	सु	४	२
,,	४	९	समुपजोषम्	४	१०	साधन	३	११९	,,	४	५
सभा	३	१३७	समृद्ध	१	११	साधारण	१	८२	सुकल	१	८
सभाजन	२	१०	समृद्धि	२	१०	साधित	१	४०	सुकुमार	१	७८
सम	१	६४	सम्पराय	३	१५१	साधिष्ट	१	११२	सुकृतिन्	१	३
समग्र	१	६५	सम्प्रति	४	२३	साधीयस्	३	२३६	सुख	५	२३
समधिक	१	७५	सम्प्रदाय	२	७	साधु	१	५२	सुत	३	६०
समन्ततस्	४	१३	सम्बाध	१	८५	,,	३	१०१	सुदूर	१	६९
समम्	४	४	सम्भ्रम	२	२६	सान्द्र	१	६६	सुधा	३	१०२
समय	३	१४६	सम्मूर्च्छन	२	६	सामान्य	१	८२	सुन्दर	१	५२
समया	३	२५३	सरल	१	८	सामि	३	२५०	सुर	५	११
,,	४	७	सरस्वत्	३	५९	साम्प्रतम्	४	११	सुरङ्गा	५	८
समर्थ	३	८७	सर्ग	२	२१	,,	४	२३	सुरभि	३	१३७
समर्धक	१	७	सर्व	१	६४	सायक	३	२	सुषम	१	५२
समर्याद	१	६७	सर्वतस्	४	१३	सायम्	४	१९	सुष्ठु	४	२
समसन	२	२१	सर्वदा	४	२२	सार	३	१७१	,,	४	१९
समस्त	१	६५	सर्वान्नभोजिन्	१	२२	सारङ्ग	३	२३	सुहृदय	१	३
समाधि	३	९८	सर्वान्नीन	,,	,,	सारिका	५	८	सूक्ष्म	१	६१
समान	३	१२७	सविध	१	६७	सार्द्र	१	१०५	सूक्ष्म	३	१४४
समालम्भ	२	२७	सवेश	,,	,,	सार्धम्	४	४	सूचक	१	४७
समासाद्य	१	६२	सव्य	१	८४	साहस	२	४३	सूचि	५	८
समाहार	२	१६	सह	४	४	सिंह	१	५६	सूत	३	६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०	शब्दाः	वर्गाः	श्लो०
सूत्रवेष्टन	२	२४	स्थूल	१	६१	स्तनित	९	४४	हि	३	२५७
सूद	३	९१	,,	३	२०५	स्वनज्	१	३३	हि	४	५
सूना	३	११३	स्थूललक्ष्य	१	६	स्वयम्	४	१६	हिंसा	३	२२९
सूरत	१	१५	स्थूलोच्चय	३	१४९	स्वर्	३	२५५	हिंस्र	१	२८
सृपाटी	५	३८	स्थेयस्	१	७३	स्वरु	३	१६८	हिक्का	५	८
सृष्ट	३	३६	स्नव	२	९	स्वरूप	३	१३१	हिङ्गुल	५	२०
सेवन	२	५	स्निग्ध	१	१४	स्वर्ग	५	११	हिम	५	२[illegible]
सोढ	१	९७	स्नुत	१	९२	स्वस्ति	३	२४२	हिरुक्	४	[illegible]
सोन्माद	१	२३	स्पर्श	२	१४	स्वाति	५	३८	,,	४	[illegible]
सोमवल्क	३	९	स्पश	३	२१५	स्वामिन्	१	१०	ही	[illegible]	८५
सौम्य	३	१६१	स्पष्ट	१	८१	स्वाहा	४	८	हीन	१	१०७
स्कन्ध	३	१००	स्पृष्टि	२	९	स्वित्	३	२४२	हीन	३	१२८
स्कन्न	१	१०४	स्प्रष्टु	२	१४	स्वेदज	१	५१	हुम्	३	२५२
स्तन	५	१२	स्फाति	२	९	स्वैर	३	१९३	,,	४	१८
स्तम्बघन	२	३५	स्फार	१	६३	स्वैरिता	२	२	हृति	२	८
स्तम्बघ्न	३	३५	स्फुट	१	८१	स्वैरिन्	१	१५	हृणीया	२	३२
स्तम्भ	३	१३५	स्फुटन	२	५	ह	४	५	हृदयालु	१	३
स्तिमित	१	१०५	स्फुरण	२	१०	हंस	३	२२६	हृद्य	१	५३
स्तुत	१	११०	स्फुरणा	,,	,,	हट्ट	५	१८	हृष्ट	१	१०३
स्तूप	५	१६	स्फेष्ठ	१	११२	हत	१	४१	हृष्टमानस	१	७
स्तेम	२	२९	स्म	४	५	हन्त	३	२४५	हे	४	७
स्तोक	१	६१	,,	४	१७	हन्न	१	९६	हेति	३	७१
स्तोम	३	१४१	स्यन्न	१	९२	हयपुच्छी	४	१३८	हेमन्	५	२२
स्थपित	३	६१	स्यूत	१	१०१	हरिणी	६	५०	है	४	७
स्थविष्ट	१	१११	स्यूति	२	५	हरित्	५	१९	होरा	५	१०
स्थाणु	३	४९	स्रव	२	९	हरिताल	५	३१	ह्यस्	४	२
स्थान	३	११७	स्रस्त	१	१०४	हर्षमाण	१	७	ह्रसिष्ठ	१	११
स्थाने	४	११	स्राक्	४	२	हल्या	२	४१	ह्रस्व	१	५
स्थाल	५	३२	स्रुत	१	९२	हव	२	८	ह्रादिनी	३	११२
स्थावर	१	७३	स्रोतस्	३	२३४	,,	३	२०७	ह्री	५	३
स्थास्नु	,,	,,	स्व	३	२१२	हस्त	३	५९	ह्रीण	१	९[illegible]
स्थिति	२	२१	स्वच्छन्द	१	१५	हस्तवारण	२	५	ह्रीत	,,	[illegible]
स्थिरतर	१	७३	स्वतन्त्र	,,	,,	हा	३	२५७			
स्थूणा	३	५१	स्वधा	४	८	हायन	३	१०८			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible] प्रकाशन

मूलपाठ के साथ संस्कृत-हिन्दी टीका, भूमिका,
टिप्पणी एवं अन्य छात्रोपयोगी सामग्री सहित]

अभिज्ञानशाकुन्तलम्	सुबोधचन्द्र पन्त	(अ) २६; (स) ४०
उत्तररामचरित	आनन्दस्वरूप	(अ) ६५; (स) १५०
कादम्बरी (कथामुख)	रतिनाथ झा	३[illegible]
काव्यदीपिका	परमेश्वरानन्द	२[illegible]
किरातार्जुनीयम् (१–४ सर्ग)	जनार्दन शास्त्री पाण्डेय	१६.५[illegible]
चन्द्रालोक	सुबोधचन्द्र पन्त	२[illegible]
नागानन्द	संसारचन्द्र	२[illegible]
प्रतिमानाटक	श्रीधरानन्द शास्त्री	२[illegible]
नीतिशतक	जनार्दन शास्त्री पाण्डेय	[illegible]
प्रसन्नराघव	रमाशंकर त्रिपाठी	१[illegible]
बालचरित	कमलेश त्रिपाठी	[illegible]
भट्टिकाव्य (१-८ सर्ग)	पाण्डेय-शुक्ल	१५[illegible]
मृच्छकटिक	रमाशंकर त्रिपाठी	(अ) ५०; (स) ६[illegible]
मालविकाग्निमित्र	संसारचन्द्र	३[illegible]
मेघदूत	संसारचन्द्र	(अ) १८; (स) ३[illegible]
रघुवंश महाकाव्य (सम्पूर्ण)	धारादत्त शास्त्री	[illegible]०
रत्नावली	रमाशंकर त्रिपाठी	[illegible]४
वेणीसंहार	रमाशंकर त्रिपाठी	४८
शान्तिस्वस्तिपाठः	सुषमा पाण्डेय	२
शिशुपालवध (१-४ सर्ग)	जनार्दन शास्त्री पाण्डेय	२५.५०
शुनःशेपोपाख्यान	सुषमा पाण्डेय	६
श्रुतबोधः	सुषमा पाण्डेय	५
स्वप्नवासवदत्त	जयपाल विद्यालंकार	४४
साहित्यदर्पण	शालिग्राम शास्त्री	(अ) ६५; (स) १२५
सौन्दरनन्दकाव्य	सूर्यनारायण चौधरी	२८
हितोपदेश-मित्रलाभ	विश्वनाथ झा	६

मोतीलाल बनारसीदास
दिल्ली वाराणसी पटना बंगलोर मद्रास

मूल्य : रु० ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu